श्री हर्षपुष्पामृतजैन ग्रन्थमाला-ग्रंथाङ्कः - ३७४

श्री महावीरजिनेन्द्राय नमः

श्री मणिबुद्ध्याणंद-हर्षकर्पूरामृतसूरि-गुरुभ्यो नमः ।

वाचकवर श्रीकीर्तिविजयोपाध्यायविरचितः

卐 श्री विचाररत्नाकरः 卐

संशोधकः संपादकश्च

तपोमूर्ति पूज्याचार्यदेव श्रीविजयकर्पूरसूरीश्वर-पट्टधर-हालारदेशोद्धारक पूज्याचार्यदेव श्रीविजयामृतसूरीश्वरः-पट्टधरः **पूज्याचार्यदेवश्रीविजयजिनेन्द्रसूरीश्वरः**

सहायकाः

पू. आ. श्री विजयजिनेन्द्रसूरीश्वरसदुपदेशेन (१) श्री वेम्बली केन्टनएहेरो सत्संग मंडल लंडनः श्री मोतीचंद अेस. गुढका, रतीलाल डी गुढका, श्रीमंती कंचनबेन मोतीचंद गुढका (२) हा.वी.ओ तपा उपाश्रय धर्मस्थानकं ट्रस्ट, ४५, दिग्विजय प्लोट, जामनगर (३) श्री माटुंगा बीबी, श्वे. मू. तपगच्छ जैन संघ, मुंबइ (४) पू. आ. श्री विजयप्रभाकरसूरीश्वर सदुपदेशेन श्री मुक्तिचंद्रसूरीश्वर आराधना ट्रस्ट, अमदावाद (५) पू. मु. श्री दिव्यानंद विजयजी सदुपदेशेन शांतिभवन तपागच्छ जैन संघ आणदाबाबा चकला जामनगर (६) पू. सा. श्री पुण्य प्रभाश्रीजी सदुपदेशेन मातृमंदिर आराधना भवन आराधन श्राविका, तारदेव रोड, मुंबइ

प्रकाशिका : श्री हर्षपुष्पामृत जैन ग्रन्थमाला-लाखाबावल-शांतिपुरी (सौराष्ट्र)

श्री हर्षपुष्पामृतजैन ग्रन्थमाला-ग्रंथाङ्कः - ३७४

श्री महावीरजिनेन्द्राय नमः

श्री मणिबुद्ध्याणंद-हर्षकर्पूरामृतसूरि-गुरुभ्यो नमः ।

वाचकवर श्रीकीर्तिविजयोपाध्यायविरचितः

卐 श्री विचाररत्नाकरः 卐

संशोधकः संपादकश्च

तपोमूर्ति पूज्याचार्यदेव श्रीविजयकर्पूरसूरीश्वर-पट्टधर-हालारदेशोद्धारक पूज्याचार्यदेव श्रीविजयामृतसूरीश्वरः-पट्टधरः **पूज्याचार्यदेवश्रीविजयजिनेन्द्रसूरीश्वरः**

सहायकाः

पू. आ. श्री विजयजिनेन्द्रसूरीश्वरसदुपदेशेन (१) श्री वेम्बली केन्टनएहेरो सत्संग मंडल लंडनः श्री मोतीचंद अेस. गुढका, रतीलाल डी गुढका, श्रीमती कंचनबेन मोतीचंद गुढका (२) हा.वी.ओ तपा उपाश्रय धर्मस्थानक ट्रस्ट, ४५, दिग्विजय प्लोट, जामनगर (३) श्री माटुंगा बीबी, श्वे. मू. तपगच्छ जैन संघ, मुंबइ (४) पू. आ. श्री विजयप्रभाकरसूरीश्वर सदुपदेशेन श्री मुक्तिचंद्रसूरीश्वर आराधना ट्रस्ट, अमदावाद (५) पू. मु. श्री दिव्यानंद विजयजी सदुपदेशेन शांतिभवन तपागच्छ जैन संघ आणदाबाबा चकला जामनगर (६) पू. सा. श्री पुण्य प्रभाश्रीजी सदुपदेशेन मातृमंदिर आराधना भवन आराधन श्राविका, तारदेव रोड, मुंबइ

प्रकाशिका : श्री हर्षपुष्पामृत जैन ग्रन्थमाला-लाखाबावल-शांतिपुरी (सौराष्ट्र)

प्रकाशिका - श्री हर्षपुष्पामृत जैन ग्रन्थमाला - लाखाबावल

C/o श्रुतज्ञान भवन, ४५ दिग्विजय प्लोट, जामनगर (सौराष्ट्र)

वीर सं. २५२७ : : विक्रम सं. २०५७ : : सन् २००१ : : प्रथमावृत्ति : : प्रतय: १०००

प्रकाशकीय

अमारी ग्रन्थमाला तरफथी प्राचीन साहित्य प्रकाशन योजनामां ग्रन्थाक ३७४तरीके आ **श्री विचाररत्नाकर** ग्रन्थ प्रगट करता आनंद थाय छे. आ ग्रन्थना कर्ता पूज्यपाद **उपाध्याय श्री कीर्तिविजयजी महाराज छे.** आ ग्रंथनुं संशोधन अने संपादन पूज्य **आ. श्री विजयजिनेन्द्रसूरीश्वरजी महाराजे कर्युं** छे.

आ ग्रन्थ प्रकाशित करवा माटे पू. आ. श्री विजयजिनेन्द्रसूरीश्वरसदुपदेशथी (१) श्री वेम्बली केन्टनएहेरो सत्संग मंडल लंडन: ह: श्री मोतीचंद अेस. गुढका, रतीलाल डी गुढका, श्रीमती कंचनबेन मोतीचंद गुढका (२) हा.वी.ओ तपा उपाश्रय धर्मस्थानक ट्रस्ट, ४५, दिग्विजय प्लोट, जामनगर (३) श्री माटुंगा बीबी, श्वे. मू. तपगच्छ जैन संघ, मुंबइ (४) पू. आ. श्री विजयप्रभाकरसूरीश्वर सदुपदेशथी श्री मुक्तिचंद्रसूरीश्वर आराधना ट्रस्ट, अमदावाद (५) पू. मु. श्री दिव्यानंद विजयजी सदुपदेशथी शांतिभवन तपागच्छ जैन संघ आणदाबाबा चकला जामनगर (६) पू. सा. श्री पुण्य प्रभाश्रीजी सदुपदेशथी मातृमंदिर आराधना भवन आराधक श्राविका, तारदेव रोड, मुंबइ तरफथी सहकार मळेल छे ते बदल तेमनो आभार मानीए छीए अने भविष्यमां पण सहकार मळतो रहे तेवी अपेक्षा राखीए छीए.

ता.२६-३-२००१

लाखाबावल

देवचंद पदमशी गुढका

व्यवस्थापक - **श्री हर्षपुष्पामृत जैन ग्रंथमाला**

संपादकीय

श्री अरिहंत परमात्माओ तीर्थनी स्थापना करे छे. ते तीर्थ श्रुतना आधारे प्रवर्ते छे. द्वादशांङ्गी अने तेने आश्रीने रचायेलुं श्रुत ए शासन छे. तेना द्वारा आत्माने परमात्माना शासननो विश्वास बेसे छे. शंकाओ अने विकल्पोनो क्षय थाय छे अने आत्मा साचा अर्थमां परमात्मानो उपासक बने छे.

विचाररत्नाकर ग्रन्थ ए एवी जिज्ञासाओने संतोषवानो महाग्रन्थ छे. अंग उपांगादि सूत्रोने आधारे अत्यंत महत्वना समाधानो आप्या छे. जे वर्तमानमां प्रचाराता अने खोटी पक्कडथी आगल धराता सवालोना जवाबो आपे छे. मूर्ति श्रद्धा अने सामाचारीना अनेक प्रश्नो हल करे छे. नि:शंक बनावे छे. आगमो उपरांत प्रकरणोना आधारे पण प्रश्नोने समजाव्या छे.

समाधानो-आचारांगसूत्रथी १४, सूत्रकृतांग सूत्रथी २१, ठाणांगसूत्रथी १९, समवायांगसूत्रथी ३, भगवतीसूत्रथी १९, ज्ञातासूत्रथी ७, उपासक सूत्रथी २, अन्तकृत्दशासूत्रथी १, अनुत्तरौपातिकसूत्रथी १, प्रश्नव्याकरणसूत्रथी २, विपाकसूत्रथी २, औपपातिकसूत्रथी २, राजप्रश्नीय सूत्रथी ५, जीवाभिगम सूत्रथी ८, प्रज्ञापना सूत्रथी ११, जंबूद्वीप प्रज्ञप्तिथी २, चंद्रप्रज्ञप्तिथी २, सूर्य प्रज्ञप्तिथी २, निरयावलिकासूत्रथी १, नन्दीसूत्रथी ४, अनुयोगद्वारसूत्रेथी ३, आवश्यकसूत्र दशवैकालिकसुत्र, उत्तराध्ययन सूत्रथी **१७**, निशीथ सूत्रथी ९, महानिशीथसूत्रथी १३, दशा श्रुतस्कंधसूत्रथी १, बृहत्कल्पसूत्रथी ६, व्यवहारसूत्रथी १०, पंचकल्पसूत्रथी १, प्रकीर्णप्रकरणा**दिथी ८९** समाधानो कुल २७३ समाधानो आप्या छे-जे अद्भुत छे. आवा महान ग्रन्थना सर्जक पू. आ. भ. श्री **विजयहीरसूरीश्वरजी** म. ना शिष्यरत्न **उपाध्यायश्री कीर्तिविजयजी गणिवर** छे. आ महान ग्रन्थ आगम तूल्य छे अने आगमनी अनुप्रेक्षा रूप छे. सौ ते वांचीने आगमसूत्रना आधारे नि:शंक बने अने जैन शासन श्रुतने जयवंत करे एज अभिलाषा.

वि. सं. २०५७ फागण वद १३
गुरुवार ता. २२-३-२००१

जिनेन्द्रसूरि

अनुक्रमः

तरङ्गः	क्रमः	विचाराः	पृष्ठं
		॥ १ ॥ आचाराङ्गविचाराः ॥	१
	१	जातिस्मृतिमान् कियतो भवान् जानाति	२
	२	एकपर्याप्तकाश्रयेण असंख्येयापर्याप्तका	२
	३	पृथ्व्युपमर्द्दनेन तज्जीवानां वेदना	२
	४	केवलिनो व्यवहारं मन्यन्ते, जलविचारः	३
	५	वासविधिसत्ता	३
	६	देवानामपि जरासद्भावः	४
	७	केवलिनां जीवविराधना	५
	८	अभव्यस्य भव्यत्वाभव्यत्वशङ्का न	५
	९	भगवान् जलपुष्पजीवोपमर्दिनीं पूजां उपदिशति	६
	१०	पारगतपूजानिषेधकानामुत्तरं	७
	११	न तु अगीतार्थानां व्याख्यानकरणादिनिषेधः अपि तु अविदितषोडशविधवचनाना जल्पनमप्यनुचितं	८
	१२	निर्लक्षणउपधिः न रक्षणीयः	८
	१३	किं वस्त्रपरिकर्मणा साधुनामनुचिता ?	९
	१४	साधूनां दण्डकग्रहणमागमिकं	९

तरङ्गः	क्रमः	विचाराः	पृष्ठं
		॥२॥ द्वितीयतरंङ्गः सूत्रकृताङ्गविचाराः ॥	११
	१	सूत्रसूचितार्थसमर्थितानि प्रकरणसिद्धान्तविवराणि सिद्धान्तार्थाः एव	११
	२	अधिकरणवचनवदतः साधो भूयसी हानिः	११
	३	दुःकर्मवशतो नारकानां अशूच्यादिविरूपाहारः	१२
	४	परभवकृतमेव कर्म भुज्यते अत्र कृतं परत्र, अत्युग्रपाप पुण्यानामिहैव फलमिति न लौकिकं, आगमेऽपि	१२
	५	सन्निधिदोषदुष्टस्य स्नातुर्वस्त्रविभूषणप्रक्षालनकारिणश्च दूरे संयमः	१३
	६	परिणतपत्रफलशाकाद्याचरणे तत्तत्कालिनसंविज्ञगीतार्था-चारणौव प्रमाणं	१३
	७	मुनीनां माहाराद्यर्थं गृहस्थप्रशंसनं परमापायकारणं	१४
	८	साधूनां परस्परक्रिया अहं तवदीयपात्रं सज्जीकरोमि त्वं मग्दीयं वस्त्रं सज्जीकुरु इत्यादिरूपा न कल्पते	१४
	९	गृहस्थवस्त्रपात्रभोगनिषेधः	१५
	१०	योगोद्वहनस्वीकारः	१५

तरङ्गः क्रमः	विचाराः	पृष्ठं
११	पृथिव्यादिजीवत्वं	१६
१२	वापीकूपवस्त्रादिषुपुण्यं न वा विप्रादिना पृष्टं उत्तरं	१६
१३	औदयिकादिभावस्वरूपं	१७
१४	कर्मादप्रधान्यं न समुदाय एव प्राधान्ये वाच्यं	१८
१५	अन्यदर्शनीनां ज्योतिषादीनि अतिशयवन्तः प्रशस्या इति न व्यामोहा विधेयः	२०
१६	निद्रा न निषिद्धाः	२१
१७	साधुनां अवज्ञाकारी आगाढमिथ्यादृष्टिः	२२
१८	मुनीनामाहारादिनिषेधका साधुतयाविदिताः तमुपदेशं ददति ते उभयेऽपि आगाढमिथ्यात्विनो, केवलिनामाहारं आगमिकं च	२३
१९	मूर्तामूर्तयोः जीवकमणोः सम्बन्धः युक्तः	२६
२०	भगवत्यां ऋषभदत्तादय एकादशाङ्गिनः तत्सम्बन्धाश्च एकादशाङ्गान्तः कथं घटते ? कथं वा द्वादशाङ्गयाः नित्यत्वं	२६
२१	परेषां भोजनाद्यनुकम्पादानं निषेध न युक्तं	२७
	।।३।। तृतीयतरङ्गः श्रीस्थानाङ्गविचाराः ।।	
१	कृष्णपाक्षिकशुक्लपाक्षिकयोः स्वरूपं	२९
२	योगविधिसत्ता	२९
३	मुनीनामशुद्धाशनादि दानं न नरकफलं	३१
४	मातापित्रोर्भक्तियुक्ता न मात्र लौकिका	३३
५	उपस्थापनाक्षराणि	३५
६	सिद्धान्ताध्ययनं साधूनामेव सम्मतं न गृहस्थानां	३५
७	अल्पवृष्टिकारणानि	३६
८	पुनरपि योगविधिसत्ताकं सूत्रं	३७
९	श्रावकानां छिद्रान्वेषिणो न व्यामोहो न अश्रावकधीः	३८
१०	देवानामनागमहेतु शास्त्रं	३८
११	न उरगा एवाशीविषा मनुष्यादयोऽपि	४०
१२	साधुनामाचार्योपाध्यायै-सह कलहस्थानानि	४१
१३	साधूनामपि यथोक्तवर्षातिक्रमे शास्त्राध्ययनं श्रावकाणां का कथा ?	४२
१४	श्री जिनशासने कुत्रापि हठो न विधेयः	४४
१५	तीर्थङ्करासनोपविष्टत्वाम् यादृशगस्तादृशः आचार्यतुल्यः इति न युक्तं	४६
१६	मात्रसिद्धांतोक्तं न प्रमाणं आगमश्रुताज्ञाधारणाजीतानां व्यवहारत्वेन प्रमाणं	४७
१७	धर्मपुण्ययोः प्रतिविशेषः	४९
१८	दुर्लभबोधिनः प्रतिमापलापिनः केचन स्थापनां नाङ्गीकुर्वते, सिद्धांते स्थापनायाः सत्यत्वं	४९
१९	दानस्वरूपं	५०

तरङ्गः	क्रमः	विचाराः	पृष्ठं
		॥४॥ चतुर्थ तरङ्गः ॥ समवायाङ्गविचाराः ॥	
	१	श्रीजिनप्रतिमापूजकान् विगाहकानामुत्तरं	५२
	२	श्रावकाणामुपधानवहनं	५५
	३	जमालेरनन्तभवत्वं न	५७
		॥५॥ पञ्चमतरङ्गः ॥ पञ्चमाङ्गविचाराः ॥	
	१	पुस्तकादिकं पादस्थशर्दिनाशातना	५९
	२	सम्यग्दृष्टिव्यतिरिक्ताः मुक्त्यर्थतपस्यस्ति सा सकामनिर्जरा	५९
	३	तापसादीनामुत्पादसूत्रं	६०
	४	भिक्षुकादीनां न दाननिषेधः, चतुदर्शीं विहाय पूर्णिमामावस्ययोरेव पौधनं इति न	६३
	५	जिनप्रतिमाक्षराणि	६५
	६	केवलिशरीराज्जीवविराधना	६७
	७	अष्टमीचतुर्दश्यादौ वेलावृद्धिहानी किं निबन्धने ?	६८
	८	युद्धे हता स्वर्गं गच्छन्तीति मिथ्याजनप्रसिद्धिः	६९
	९	दण्डकग्रहराक्षराणि	७३
	१०	जीवोपयोगस्वरूपाः अवर्णाः अस्येशः एवं मतिज्ञानादयः	७३
	११	चन्द्रग्रहणमाश्रित्य मिथ्याहग्रहजल्पितजालनिराकरणं	७३
	१२	सूर्यचन्द्रमसौ भूगोलछायात् न परिवन्तते	७५
	१३	स्वकल्पितमतस्थापने युक्तयस्ताः कुयुक्तयः	७६
	१४	देवैर्प्रक्षिप्तं तृषादि प्रहरणीभवतीति न मात्र लौकिकं	७७
	१५	केवली शरीराद् जीवविराधना जायमाना न विरूद्धा	७८
	१६	पृथ्व्याक्रमणे कीदृशी वेदना	७८
	१७	वर्षसहस्रद्वयातिक्रमे वयं सुविहिताः साधवा इति जिनप्रतिमारिपूनां प्रलापः	८०
	१८	जिनप्रतिमाः शाश्वत्यः देवैरेव वंद्या इति प्रलापः	८२
	१९	दशविधसामाचारी दशविधालोचना	८४
		॥६॥ षष्ठतरङ्गः॥ ज्ञातासूत्रविचाराः ॥	
	१	मिथ्यावीकृतं सर्व वृथा इति न	८५
	२	पुष्पनक्षत्रमाहात्म्यं सिद्धान्तेऽपि	८७
	३	तीर्थंकरजन्मान्तरं तीर्थकरमाता न प्रसूते, इति प्रसिद्धिः सा अशास्त्री	८८
	४	जिनप्रतिमासिद्धान्ते श्रावकेन श्राविकया व न पूजिता इति न	८९
	५	द्रौपदीः परमश्राविका	९०
	६	द्रौपद्याः श्राविकात्वं	९१
	७	तस्मिन्नेव भवे आलोचना, अन्य भवे अनन्तरसंसारः इति न	९१
		॥७॥ सप्तमतरङ्गः ॥ उपासकदशाङ्गविचाराः ॥	
	१	नास्ति आगमे प्रतिमावंदनविधिः इति अयोग्यवचनं	९३
	२	श्रावकाणां प्रतिमा अनुष्ठेया	९५

तरङ्गः क्रमः	विचाराः	पृष्ठं
	॥८॥ अष्टमतरङ्गः ॥ अन्तकृद्दशाविचाराः ॥	
१	रत्नावलीतपः स्वरूपं	९८
	॥९॥ नवमतरङ्गः ॥ अनुत्तरोपपातिकविचाराः ॥	
१	चमत्कारिचारित्रस्य धन्यस्य स्वरूपं	१००
	॥१०॥ दशमतरङ्गः ॥ प्रश्नव्याकरणविचाराः ॥	
१	आत्मनि प्रमाणः	१०३
२	प्रतिमामुक्तिनिमित्तं	१०८
	॥११॥ एकादशस्तरङ्गः ॥ विपाकाङ्गविचारा ॥	
१	मित्थात्विनाऽपि बाहुकुमारेण प्राग्भवे मुनिदानतः संसारः परिध्वस्तः	११०
२	कल्पना पौषधतिथिनिर्णयः मिथ्यात्वं	११०
	विचाररत्नाकरे मध्यभागः	
	॥१॥ प्रथमस्तरङ्गः ॥ औपपातिकविचाराः ॥	
१	अकामनिर्जरादेवभावा न जन्मान्तराराधका इति न	१११
२	जिनप्रतिमारिपुप्रतिबोधाय अम्बडप्रसङ्गः	११२
	॥२॥ द्वितीयतरङ्गः ॥ राजप्रश्नीयविचाराः ॥	
१	श्रोत्रस्य द्वादशयोजनपरिमिते विषयेऽधिकमपि दृश्यते	११३
२	जिनप्रतिमाक्षराणि	११३
३	शाश्वत्यो जिनप्रतिमाः न आभरणरत्याः	११४
४	प्रतिमापूजनं देवाना आचार न धार्मिजो विधिः तदसत्	११४
५	अनुकम्पादाननिषेधः न युक्तः	११५
	॥३॥ तृतीयःतरङ्गः ॥ जीवाभिगमविचाराः ॥	
१	देवभवाच्च्युत्वा पुनरपि देवभवकालः	११६
२	तारकाणां कारणिकः शातोदयः	११९
३	जीवयोनिलक्षाणां चतुरशीतःप्रसिद्धा, तदधिकानामपि श्रयमाणात्वं	१२०
४	मिथ्यात्विकृतानि सर्वसत्त्व मैत्र्यादीनि न निष्फलानि	१२४
५	विजयदेवेन सविस्तरं प्रतिमापूजिता	१२५
६	विद्याचरणलब्धिमतः श्रमणा न प्रमादिनः	१२७
७	चातुर्मासिकसांवत्सरिकपर्वदिनानि देवानामपि मान्यानि	१२८
८	मनुष्यानां गृहाद्बहिर्गमनाय सालंकारोवेषः एव तया देवानामपि	१२९
	॥४॥ चतुर्थतरङ्गः ॥ प्रज्ञापना विचाराः ॥	
१	निंबाम्रादिवृक्षाणां मूलपत्रादीनि यथा यावत्प्रणिप्रतिनिबद्धानि	१३०
२	पुष्पेषु संख्यातासंख्यानन्तजन्तुकृतो विवेकः	१३०
३	पुष्पफलकालिङ्गफलादीनां वृन्तानि यावज्जीवात्मकानि	१३०
४	निगोदजीवानां एकशरीरे आनन्त्य	१३१
५	सूत्ररूचिबीजरुच्यधिगमरुचीनां स्वरूपं	१३३
६	गर्भजमनुष्यसंख्या	१३३
७	आदर्शादीस्वच्छेवस्तुनियत्प्रतिबिम्बं दृश्यते तत्किमात्मकं	१३७

तरङ्गः क्रमः	विचाराः	पृष्ठं
८	यस्माद्दण्डकात्समागतस्तीर्थकरत्वं लभते	१३८
९	आनतदेवस्य तैजसशरीरावगाहना	१४०
१०	केवलिशरीराज्जीवविराधना न मन्यते तं प्रति	१४१
११	शैलेश्यवस्थायां योगनिरोधे सर्वसंवरः	१४३
	॥५॥ पञ्चमतरङ्गः ॥ श्रीजम्बूद्वीपप्रज्ञप्तिविचाराः ॥	
१	साधोर्यावत्पर्यावस्य आचारादिश्रुतमध्याप्यं	१४३
२	कारणविशेषात्सिद्धांतेऽपि मतान्तरं किं तन्नापकर्णनीयं	१४४
	॥६॥ षष्ठस्तरङ्गः ॥ श्रीचन्द्रप्रज्ञप्तिविचाराः ।	
१	चन्द्रविमान संस्थानादि	१४५
२	तीर्थकराः पूज्याः, तन्मूर्तिर्न इति न समीचीनं	१४७
	॥७॥ सप्तमस्तरङ्गः ॥ श्रीसूर्यप्रज्ञप्तिविचाराः ।	
१	नक्षत्रसंस्थानविचाराः	१४८
२	नक्षत्राणां तारासङ्ख्यां	१४९
	॥८॥ अष्टमतरङ्गः ॥ निरयावलिकाविचाराः ॥	
१	चतुरशीतिसहस्राधिकैकलक्षमनुष्यसंहाराकारी चेटकमहाराजकूणिक राज्ञो संग्रामः	१५१
	॥९॥ नवमतरङ्गः ॥ नन्दीसूत्रविचाराः ॥	
१	प्रासादसद्भावाक्षराणि	१५६
२	स्त्रीणां मुक्तिः	१५६

तरङ्गः क्रमः	विचाराः	पृष्ठं
३	निगोदादिजीवानामपि मतिश्रुतज्ञानान्तांशोऽप्रावृतः	१६०
४	जिनप्रतिमाक्षराणि उपधानाक्षराणि	१६१
	॥१०॥ दशमस्तरङ्गः ॥ अनुयोगद्वारसूत्रवृत्तिविचाराः ॥	
१	स्थापनाक्षराणि	१६२
२	रजोहरणमुखवस्त्रिकादीनां सत्तासूचकाक्षराणि	१६४
३	प्रमाणाङ्गुलस्वरूपं	१६५
	॥११॥ एकादशस्तरङ्गः ॥ अनेकशास्त्रान्तर्वर्त्तीनि मतान्तराणि । मूलसूत्रविचारा तत्र आवश्यसूत्र विचाराः ॥	
१	इन्द्रियविषयविचारः	१७४
२	उद्धृतानुद्धृतेषु तियग्नरामेयषु कियन्तिसामयिकानि	१८०
३	सम्यक्त्वादिसमायिक चतुष्कविचारः	१८१
	॥ दशवैकालिकविचाराः ॥	
४	धर्मलाभं न वदन्ति तदज्ञानं	१८४
५	मुधादायिमुधाजीविस्वरूपं	१८४
६	प्रस्तरघारितप्रतिमायां वंदनं पूजनं दर्शनञ्च युक्तं	१८६
७	दण्डकाक्षराणि	१८६
	॥ उत्तराध्ययन विचाराः ॥	
८	आचाम्लादितपोमहिम्ना द्वादशवर्षाणि द्वारिका कुशलिनी	१८७
९	सर्वथा उत्सूत्रभाषिणा संघबाहेन सहास्तां मण्डलिको	

तरङ्गः	क्रमः	विचाराः	पृष्ठं
		व्यवहारः, कथानिमन्त्रणमपि न कर्तव्यं	१८८
	१०	मरणस्य सप्तदशभेदाः	१८८
	११	दीक्षाग्रहणे नामपरिवर्तनं	१९०
	१२	योगाक्षराणि	१९१
	१३	अष्टमीचतुर्दश्योर्वाचना न देया	१९१
	१४	चतुणामनुयोगानां स्वरूपं	१९२
	१५	पौरुष्यनन्तरं प्रातर्यावत्साधुनां जल्पनमनुचितं	१९३
	१६	केवलिशरीराज्जीवविराधना	१९३
	१७	दण्डाक्षराणि उपधिरक्षणार क्षराणि केवलिशरीराज्जीव विराधना-क्षराणि	१९५
		अपरतटे श्रीछेदग्रन्थविचाराः	
		॥१॥ श्रीनिशीथसूत्रभाष्यचूर्णि विचाराः ॥	
	१	अयोजितसौमकाम्यं केवलमौणिक न व्यापारणीयं	१९७
	२	उत्सर्गतः साधुभि प्रासुकोदिकेनाषि हस्तादिप्रक्षालनं न कर्तव्यं	१९८
	३	नीचजुगुप्सनीयकुलाहारं अकल्प्यं	१९९
	४	उत्सर्गतः तावत्साधुमिः मिथ्यात्वि वर्णनं न कर्तव्यं, कदाचित् कारण बलादापन्नं किं वक्तव्यं	२००
	५	शुषिराणां अप्रतिलेख्यानां उपभोग विना कारणे न कल्पते	२०२
	६	साधूनां प्रातिहारिकव्यापारणमनुचितं	२०६
	७	साधूना गृहस्थगृहे गतानामुपवेष्टुं न कल्पते	२०६
	८	साधूनामुपकरणादिकं गृहस्थैर्वाहयितुं न कल्पते	२०७
	९	शरीरे दन्तादिसतीकथमस्वाध्याये सिद्धान्तादि न गणनीयं	२०८
		॥२॥ श्रीमहानिशीथविचाराः ॥	
	१	समुदायीकृतसकलपापप्रकृतिभ्यो व्रत संयमखंडनोत्सूत्र-भाषणादरणोपेक्षणोद्भवं पापमसंख्यातगुणं	२१०
	२	मैथुनसेवी साधुः सर्वथाऽवन्द्यः	२१०
	३	उपधानोद्वहनं न स्वीकुर्वत तेऽवश्यं बहुलसंसारिणः	२११
	४	अतिस्फुटानि प्रतिमार्चनाक्षराणि	२११
	५	महानिशीथसूत्रं प्रमाणमेव	२११
	६	निरुपधानं श्रुतं न अध्येत्व्यं	२१२
	७	सामायिकपौषधादि कृत्वाऽनन्तरं न ईर्यापथिकी	२१२
	८	प्रज्ञांशपद्मूलभूतवर्धमानविद्या गन्धचूर्णजिनप्रतिमामालारोपण विध्यिक्षराणि	२१२
	९	सावधानवद्यभाषानभिज्ञस्यवक्तुमपि नानुज्ञा	२१३
	१०	मिथ्याविकृतं तपोऽनुष्ठानादिक न सर्वं व्यर्थं	२१३
	११	आचारादिश्रुतोक्तमन्यथाऽनुतिष्ठन्ति तदसुक्तं	२१४
	१२	कर्णेऽनिक्षिप्तकर्पारातूलःशतेतस्य प्रायच्छितं	२१४
	१३	चतुर्दशीं विध्य पौर्णमास्याउपवासादिकं अनागमिकं	२१४

तरङ्गः	क्रम:	विचारा:	पृष्ठं
		॥३॥ मध्यमतटे दशाश्रुतस्कन्धविचारा: ॥	
१		श्रावकप्रतिमास्वरूपं	२१४
		॥४॥ बृहत्कल्पविचारा: ॥	
१		कपाटनिषेध: जिनकल्पिकाश्रित:	२१८
२		साध्वीनां वसतौकपाटमवयमपेक्षितं	२२१
३		ज्ञानदर्शनादिकं कञ्चिद्गुणं प्रेक्ष्य पार्श्वस्थादिपुरुषवन्दनेऽपि न दोष:	२२१
४		केनचित्कारणबलेन परै: सह संवासे यद्वा कर्तव्यं	२२२
५		स्त्यानर्द्धिनिद्रावति दीक्षित सति विधि:	२२२
६		राजपिंडो वर्जनीय:	२२३
		॥५॥ श्री व्यवहारविचारा: ॥	
१		छिंपकायो न पिण्ड ग्रहणयोग्या:	२२३
२		द्रव्यक्षेत्रकालभावेषु विधिना आलोचना ग्राह्या	२२३
३		निश्चयव्यवहारयो:व्रतभंगाभिप्राय:	२३०
४		आलोचयतो गुणा दोषा:	२३१
५		साधूनामपि योगादितपोऽनुष्ठानपरिसमाप्तावश्यं नंद्यादिमहोत्स्व: कर्तव्य एव	२३३
६		आचायै: शरीरचिन्तार्थं बहिर्न गन्तव्यं	२३४
७		आचार्यो हि तीर्थंकर कल्पतेन गोचरचर्यायां न गन्तव्यं	२३४
८		वैयावृत्यकरेण अन्येन गीतार्थेनापि गुरोर्भक्तिकर्तव्या	२३६
९		अस्वाध्याये सर्वथा स्वाध्यायो न कर्तव्य:	२३७
१०		सन्ध्यास्वपि स्वाध्यायो न कर्तव्य:	२३७
		॥६॥ अपरतटे पञ्चकल्पविचारा:	
१		साधुभिर्मलमूत्रादिपीडा न रक्षणीया	२३८
		॥७॥ प्रकीर्णकप्रकरणादिसंकीर्णविचारा: ।	
१		मिथ्यात्विनां मार्गानुसारि कर्तव्य नानुमोदन्ति ते सिद्धान्तबाया:	२३८
२		मिथ्यात्विनां मार्गानुसारि कर्तव्य नानुमोदन्ति ते सिद्धान्तबाया:	२३९
३		गर्भस्वरूपे	२३९
४		अन्तकाले दीक्षासंमत्ति:	२४०
५		साधुभि: लेपकृद्वस्तु न ग्राह्यं	२४०
६		अजातश्मश्रुण: शिष्यादेशचरप्रकल्पाध्ययनं पाढयितु न कल्पते	२४१
७		परिशटितवस्त्रे यावन्ति थिग्गलानि ग्रन्थयश्च कल्पते	२४२
८		अधिताचार प्रकल्पस्ये व निश्रया विहर्त्तव्यं	२४२
९		कल्पत्रेणस्वरूपं	२४३
१०		कारणे चतुर्मासकमध्येऽपिनावानद्याद्युतरणं	२४३
११		साधूनां जिनकल्पिकस्थविर कल्पिकां विहार:	२४४
१२		साधूनां चतुर्मासकं विना पीठफलकोपभाग: न	२४५
१३		उत्सर्गतस्साधूनां सिद्धान्ताध्ययननं न अपवादत: दीक्षाभिमुखस्य	२४५
१४		प्रकीणकानि प्रमाणभूतानि	२४६
१५		चैत्यवंदना	२४८
१६		साधर्मिकवात्सल्यप्रभावनाक्षराणि	२४८

तरङ्गः	क्रमः	विचाराः	पृष्ठं
१७		प्रतिमापूजनं, देवगुर्वादिपुरतः स्वस्तिकं कर्तव्य	२४८
१८		देवपूजाविधिविचाराः	२४९
१९		भोजनादिकरणे दुकुलं सर्वदा न पवित्रमेव	२४९
२०		द्रव्यभावाभ्यां शुचिर्गृहे गृहचैत्ये	२४९
२१		उपवासपौरुष्यादिप्रत्याख्यान न दन्तधावनादि	२५०
२२		अन्यतीर्थिका पञ्चामृतमध्ये मधु गणयन्ति श्रावकैस्तु इक्षुरसः	२५०
२३		सुयत्नवालककुञ्चिका व्यापार्य प्रक्षाल्य अङ्गरूक्षणद्वयेन निर्जलता पूजा	२५०
२४		स्वगृहचैत्येफलादि स्वगृहचैत्यं न व्यापार्यं	२५०
२५		ज्ञानद्रव्यं हि देव द्रव्यवन्नकल्पते एव श्राद्धानां	२५१
२६		देवज्ञानार्देय क्षणमपि न स्थाप्यं	२५१
२७		देवादिदेयं सम्यगेवाप्यं	२५१
२८		अन्त्यावस्थायां पित्रादीनां यन्मान्यते तत्सावधानत्वे गुरुश्राद्धादि समक्षमेव वाच्यं	२५२
२९		सवेष्वपि नियमेषु च सहसाऽनाभोगाद्याकारचतुष्कं चिन्त्यं	२५२
३०		मुखकोशश्चाष्टपुटः	२५२
३१		खाद्यस्वाद्यादिसर्व वस्तुनां देवस्य गुरोश्च प्रदानपूर्व भोजनं	२५२
३२		ऋणसम्बन्धे प्रायः कलहः वैरवृत्तिश्च तस्माद्दणं निर्वाल्यः	२५२
३३		शपथादिकं न विदध्यात्	२५३
३४		निर्माल्यविचारः	२५३
३५		सदारंभः न असदारंभतुल्यः	२५४
३६		अहोरात्रिक एव न पौषधः	२५४
३७		श्रावकाणां दशवैकालिकादिसिद्धान्तपठनं न विहितः	२५६
३८		ग्लानस्यप्रतिचरणे महापुण्यं	२५६
३९		पौषधेभोजनाक्षराणि	२५७
४०		पौषधे भोजनं न स्वीकुर्वति, तेषां पूर्वजानां वाक्य	२५७
४१		उपधानपौषधस्य अन्यपौषधस्य समानविधिः	२५७
४२		पूर्वधराणा सम्यक्त्वं सम्यक्त्वं वा	२५८
४३		साधूनां चित्रिते उपाश्रये वस्तुं च कल्पते	२५८
४४		गच्छपरिमाणं	२५८
४५		साधूनां तरोरधोविदुत्सर्गः कर्तुं न कल्पते	२५९
४६		पञ्चपर्व्या आराध्यत्वे हेतुः	२५९
४७		दिवसेऽपि प्रथमचरमचतुर्घटिकयोर्बहिः पात्रादि न स्थाप्यं	२५९
४८		त्रिविधाहारं पानीयं	२५९
४९		लोणग्रहणं	२६०
५०		अभव्यस्य सुअसामाइयबंभो	२६०
५१		एकाकिनीनां साध्वीनां विहारः न कल्पते	२६१
५२		लोकः किदृशाकारः कथं व्यवस्थितः काभूमिः ? कियदधः सचिता ?	२६०
५३		षष्ठारके निर्बीजाणां पृथिव्यां पुनरप्याम्रादीनां उत्पत्तिः	२६१

तरङ्ग:	क्रम:	विचारा:	पृष्ठं
५४		प्रतिक्रमणस्य समय:	२६२
५५		पाक्षिकोपवासादिकं न पूर्णिमायां	२६२
५६		चतुर्थ्यां पर्युषण:	२६३
५७		नागवल्लीदल्लेषु विवेक:	२६३
५८		उपधिकल्प:	२६३
५९		साधूनां कल्प्यं वस्त्रं	२६३
६०		रूपक प्रमाणं	२६३
६१		धर्मो नास्तीति संघबाह्यवचनं	२६३
६२		छद्मस्थेन सह केवली विचरति	२६४
६३		परीषाणां उष्णादि	२६४
६४		समन्ताद्विस्तृतपुष्पप्रकरे साधूनां कथं न दोष:	२६४
६५		चतुर्विधाहारादि भंगाभंग:	२६४
६६		शुद्धैर्वाशुद्धै अशनादिभि: ग्लानस्य प्रतिचरणं	२६४
६७		गीतार्थानां ग्लानादीनां पुन: पुनर्वस्त्रप्रक्षालनं	२६५
६८		प्रतिदिनं द्वयासनं करोति तस्य मासेऽष्टाविंशत्युपवासपुण्यं	२६६
६९		नखरदनीछूरीरक्षणाक्षराणि	२६६
७०		स्थंडिले संक्रमन् केन प्रमार्जनं	२६६
७१		विद्धमविद्धं मुक्ताफलमचित	२६७
७२		यो मांसमश्नाति तस्य सम्यक्त्वं न भव इति न संङ्गतं	२६७
७३		रात्रौ अन्धकारयोनिका सर्वत्र उत्पद्यन्ते इति अनवबोध:	२६८
७४		पञ्चविधदानस्वरूपं	२६९
७५		'वंदणवत्तियाए पूअणवत्तियाए' पूजाविधानं	२६९
७६		साधुभि: पूजा कथं न क्रियते ?	२७०
७७		स्तूपं प्रतिसंदिह्यन्ते तेषां निसस:	२७१
७८		जिनपूजाक्षराणि न मन्यते तेषां प्रति	२७२
७९		खरतरा: श्रीअभयदेवसूरिरस्मत्पूर्वज: इति वदन्ति परं तदसत्	२७२
८०		भट्टारके परासौ सति तत्किं कर्तव्यं	२७३
८१		मृतयुगलिक शरीराणां का गति:	२७३
८२		पिप्पलिं वा पिप्पलिचुन्नं वा मिरियं वा मिरियचुन्नं वा भोज्यं	२७३
८३		आचीर्णानाचीर्णौ	२७४
८४		एकेन्द्रियानां कथञ्चिद्भावश्रुत कथञ्चित्संज्ञाश्च	२७४
८५		शालिप्रमुखान्तं जीवत्वसमय:	२७५
८६		साधुभिर्नखा न रक्षणीया:	२७५
८७		केवली जन्तुसंघातमाचरति तर्हि पापर्द्धिकृत्केवलीनो क: प्रति विशेष केवलि शरीराज्जीवविराधनाङ्गीकष्ट कर्थं तस्याष्टादशदोष रहितत्व	२७५
८८		योगवहनं विहितं	२७८
८९		'जोगवं उवहाणवं' इत्याद्युत्तराध्ययनवृत्तौ प्रशस्ति:	२७९ २८०

अर्हम्.

।। पू. आ. श्री विजयरामचंद्रसूरिभ्यो नमः ।।

श्रीकीर्त्तिविजयोपाध्यायविरचितः-

।। श्रीविचाररत्नाकरः ।।

।। १ ।। अथ प्रथमस्तरङ्गः ।।

स जयति जिनवीरः क्षीरपूराच्छकीर्त्तिर्भवति भुवनमान्यो यत्प्रसत्तेर्नरोऽपि ।
अथ किमिव न शक्यं दिव्यशक्तेर्घटोऽपि, श्रयति जननुतां यत्कामकुम्भप्रतिष्ठाम् ।। १।।
जीयासुर्जिनशासनोन्नतिकराः श्रीहीरसूरीश्वराः, सिद्धान्तोदधयः समाश्रिततटा रत्नार्थिभिर्धीवरैः ।
शिष्टाभीष्टरसाश्रया घनजना येभ्यो निपीतामृताः, गर्जन्तोऽप्यजडाशयाः प्रतिदिशं प्रीतिं समातन्वते ।।२।।
तेषामच्छस्वयशःपरिमलपरिकलितसकलभुवनानाम् । हृदि गोत्रमन्त्रमित्रं निधाय कामितफलवदान्यम् ।।३।।
अङ्गोपाङ्गाद्यागमतद्विवृतिप्रकरणादिदृष्टानाम् ।
रचयामि विचाराणां निचयं ग्रन्थेऽत्र रुचिराणाम् ।। ४ ।। त्रिभिर्विशेषकम्.
ये सिद्धान्तमयाशयाः कृतधियः संदब्धशास्त्राश्च ये, तेषामेष विशेषलेशलिखनायासोऽस्तु हासाय वै
अन्येषां तु मुदे भविष्यति जने हास्या न कृत्यासहा, किं क्रीडाशकटी करोति विकटीभावं शिशूनां मुदः ।। ५ ।।

अत्र च यथाक्रममङ्गोपाङ्गाद्यागमप्रकरणविचारा उद्देशकादिक्रमेण लिख्यन्ते । तत्र च प्रथममाचाराङ्गविचारास्तत्राऽपि पूर्वं ज्ञानाधिकारतया मंगलत्वेन जातिस्मृतिमान् कियतो भवाञ्जानातीति जिज्ञासया च तत्स्वरूपं लिख्यते -

" से जं पुण जाणेज्जा सहसम्मइयाए " इत्येतस्य निर्युक्तौ- "एत्थ य सहसम्मइयाए जं पयं तत्थ जाणणा होइ । ओहीमणपज्जवनाणकेवले जाइसरणे य ॥६४॥" एतद्वृत्तिश्च- अत्र च 'सहसम्मइयाएत्ति' सूत्रे यत्पदं तत्र 'जाणणत्ति' ज्ञानमुपात्तं भवति 'मन ज्ञाने' मननं मतिरितिकृत्वा, तच्च किंभूतं ? इति दर्शयति - अवधिमनःपर्यायकेवलजातिस्मरणरूपमिति । तत्रावधिज्ञानि संख्येयानसंख्येयश्च भवाञ्जानाति । एवं मनःपर्यायज्ञान्यपि । केवलज्ञानी तु नियमतोऽनन्तान् । जातिस्मरणस्तु नियमतः संख्येयानिति । शेषं स्पष्टम् । इत्याचारांगप्रथमश्रुतस्कन्ध-प्रथमाध्ययनप्रथमोद्देशकनिर्युक्तिगाथावृत्तौ २३७ प्रतौ १४ पत्रे ॥१॥

एकपर्याप्तकाश्रयेणासंख्येया अपर्याप्तका भवन्तीति जिज्ञासया लिख्यते -

" जे बायरे विहाणा, पज्जत्ता तत्तिया अपज्जत्ता । सुहुमावि होंति दुविहा, अपजत्ता चेव पज्जत्ता ॥ ७९ ॥" 'जे बायरे इत्यादि' यानि बादरपृथ्वीकाये विधानानि भेदाः प्रतिपादिताः, तानि यावन्ति पर्याप्तकानां तावन्त्येवापर्याप्तकानामपि । अत्र च भेदानां तुल्यत्वं द्रष्टव्यं न तु जीवानाम् । यत एकपर्याप्तकाश्रयेणासंख्येया अपर्याप्तका भवन्ति । सूक्ष्मा अपि पर्याप्तकापर्याप्तकभेदेन द्विविधा एव । किंत्वपर्याप्तकनिश्रया पर्याप्तकाः समुत्पद्यन्ते, यत्रैकोऽपर्याप्तकस्तत्र नियमादसंख्येयाः पर्याप्तकाः स्युः । इत्याचाराङ्गप्रथमश्रुतस्कन्धप्रथमाध्ययन-द्वितीयोद्देशकनिर्युक्तिगाथावृत्तौ २३७ प्रतौ १९ पत्रे ॥ २ ॥

पृथिव्युपमर्देन तज्जीवानां यादृशी वेदना भवति तज्जिज्ञासया लिख्यते -

" पायच्छेयणभेयण जंघोरु तहेव अंगुवंगेसु । जह हुंति नरा दुहिया, पुढविकाए तहा जाण ॥ ९७ ॥ "

'पायेत्यादि' यथा पादादिकेष्वङ्गप्रत्यङ्गेषु छेदनभेदादिकया क्रियया नरा दुःखितास्तथा पृथिवीकायेऽपि वेदनां जानीहि, यद्यपि पादशिरोग्रीवादिन्यङ्गानि पृथिवीकायिकानां न सन्ति, तथापि तच्छेदनानुरूपा वेदनास्त्येवेति दर्शयितुमाह-"णत्थि य सि अंगमंगा, तयाणुरूवा य वेयणा तेसिं । केसिंचि उदीरेंति, केसिंचि य घायए पाणे ॥९८॥ पूर्वार्द्धं गतार्थम् । केषाञ्चित्पृथिवीकायिकानां तदारम्भिणः पुरुषा वेदनामुदीरयन्ति ।

केषाञ्चित्तु प्राणानप्यतिपातयेयुरिति । तथा हि भगवत्यां दृष्टान्त उपात्तो यथा-चतुरङ्ग(न्त)चक्रवर्तिनो गन्धपेषिका यौवनवर्त्तिनी बलवत्यार्द्रामलकप्रमाणं सचित्तपृथिवीगोलकमेकविंशतिकृत्वो गन्धपट्टके कठिनशिलापुत्रकेण पिंष्यात्ततस्तेषां पृथिवीजीवानां कश्चित्सङ्घट्टितः । कश्चित्परितापितः । कश्चिद्व्यापादितः । कश्चित्परं किल न तेन शिलापुत्रकेण स्पृष्टोऽपि । इत्याचाराङ्गप्रथमश्रुतस्कन्धप्रथमाध्ययनद्वितीयोद्देशकनिर्युक्तिगाथावृत्तौ २३७ प्रतौ २१ पत्रे ॥३॥

व्यवहारं हि केवलिनोऽपि सुतरां मन्यन्त इत्यर्थगर्भितो जलविचारो लिख्यते-

॥३॥ " संति पाणा उदयनिस्सिया जीवा अणेगे, इह च खलु भो अणगाराणां उदयजीवा वियाहिया " इत्येतस्य वृत्तौ-शाक्यादयस्तूदकाश्रितानेव द्वीन्द्रियादिजीवानिच्छन्ति नोदकमित्येतदेव दर्शयति-खलुशब्दोऽवधारणे । इहैव ज्ञातपुत्रीये प्रवचने द्वादशाङ्गे गणिपिटकेऽनगाराणां साधूनामुदकरूपा जीवाः । चशब्दात्तदाश्रिताश्च पूतरकच्छेदनकलोद्दनकभ्रमरकमत्स्यादयो जीवा व्याख्याताः । अवधारणफलं च नान्येषामुदकरूपा जीवाः प्रतिपादिताः । यद्येवमुदकमेव जीवस्ततोऽवश्यं तत्परिभोगे सति पातकभाजः साधव इत्यत्रोच्यते-नैव त(नैत) देवं यतो वयं त्रिविधमप्कायमाचक्ष्महे-सचित्तं मिश्रमचित्तं च । तत्र योऽचित्तोऽप्कायस्तेनोपयोगविधिः साधूनां नेतराभ्यां, कथं पुनरसौ भवत्यचित्तः ? किं स्वभावादाहोस्विच्छस्त्रसम्बन्धात् ? उभयथाऽपीति । तत्र यः स्वभावादेवाऽचित्तीभवति न बाह्यशस्त्रसम्बन्धात्तमचित्तं जानाना अपि केवलमनःपर्यायावधिश्रुतज्ञानिनो न परिभुञ्जते, अनवस्थाप्रसङ्गभीरुतया । यतोऽनुश्रूयते-भगवता किल श्रीवर्द्धमानस्वामिना विमलसलिलसमुल्लसत्तरङ्गः शैवलपटलत्रसादिरहितो महाह्रदो व्यपगताशेषजलजन्तुकोऽचित्तवारिपूर्णः स्वशिष्याणां तृड्बाधितानामपि पानाय नानुजज्ञे, तथाऽचित्ततिलशकटस्थण्डिलपरिभोगानुज्ञा चानवस्थादोषसंरक्षणाय भगवता न कृतेति, श्रुतज्ञानप्रामाण्यज्ञापनार्थं च, तथाहि-सामान्यश्रुतज्ञानी बाह्येन्धनसम्पर्कारुषितस्वरूपमेवाचित्तमिति व्यवहरन्ति जलं, न पुनर्निरिन्धनमेवेति । अतो यद्बाह्यशस्त्रसंपर्कात्परिणामान्तरापन्नं वर्णादिभिस्तदचित्तं साधुपरिभोगाय कल्पते । इत्याचाराङ्गप्रथमश्रुतस्कन्धप्रथमाध्ययन ३ उद्देशकवृत्तौ २३७ प्रतौ २९ पत्रे ॥ ४ ॥

केचिद्वासं प्रति विप्रतिपद्यन्ते, तेन वासविधिसत्तासूचक उपस्थानपनाविधिर्लिख्यते, कः पुनरुपस्थापने विधिरित्यत्रोच्यते- ॥३॥

शोभनेषु तिथिकरणनक्षत्रमुहूर्त्तेषु द्रव्यक्षेत्रभावेषु च भगवतां प्रतिकृतीरभिवन्द्य प्रवर्द्धमानाभिः स्तुतिभिरथ पादपतितोत्थितः सूरिः

सह शिष्येण महाव्रतारोपणप्रत्ययं कायोत्सर्गमुत्सार्यैकैकं महाव्रतमादित आरभ्य त्रिरुच्चारयेद्यावन्निशिभुक्तिविरतिरविकला त्रिरुच्चारिता पश्चादिदं त्रिरुच्चारितव्यम्- " इच्चेइयाइं पंच महव्वयाइं राइभोयणवेरमणछट्ठाइं अत्तहियट्ठयाए उवसंपज्जित्ताणं विहरामि " पश्चाद्वन्दनकं दत्त्वोत्थितोऽवनताङ्गयष्टिः सन्दिशत किं भणामीति भणति । सूरिः प्रत्याह-वन्दित्वाऽभिधत्स्वेत्येवमुक्तोऽभिवन्द्योत्थितो भणति, युष्माभिर्मम महाव्रतान्यारोपितानीच्छाम्यनुशिष्टिमिति । आचार्योऽपि प्रणिगदति, निस्तारकपारगो भवाचार्यगुणैर्वर्द्धस्व, वचनविरतिसमनन्तरं च सुरभिवासचूर्णमुष्टिं शिष्यशिरसि किरति, पश्चाद्वन्दनकं दत्त्वा प्रदक्षिणीकरोत्याचार्यं नमस्कारमावर्त्तयन्, पुनरपि वन्दते । तथैव च करोति सकलक्रियानुष्ठानम् । एवं त्रिः प्रदक्षिणीकृत्य विरमति शिष्यः । शेषाः साधवश्चास्य मूर्ध्नि युगपद्वासमुष्टिं विमुञ्चन्ति सुरभिपरिमलां यतिजनसुलभकेसराणि वा । पश्चात्कारितकायोत्सर्गः सूरिरभिदधाति-गणस्तव कोटिकः, स्थानीयं कुलम्, वैराख्या शाखा, अमुकाभिधान आचार्य उपाध्यायश्च । साध्व्याः प्रवर्तिनी तृतीयोद्देष्टव्या । यथासन्नं चोपस्थाप्यमाना रत्नाधिका भवन्ति । पश्चादाचाम्लं निर्विकृतिकं वा स्वगच्छसन्ततिसमायातं समाचरन्ति । इत्याचाराङ्गप्रथमश्रुतस्कन्धशस्त्रपरिज्ञाध्ययनसप्तमोद्देशकान्ते 'तं परिण्णाय मेहावीति' गाथावृत्तौ २३७ प्रतौ ४७ पत्रे ॥ ५ ॥

देवानामपि जरासद्भावोऽस्तीति जिज्ञासया लिख्यते -

"जरामच्चुवसोवणीए नरे सततं मूढे धम्मं नाभिजाणइत्ति" । वृत्तिर्यथा ' जरा इत्यादि ' जरा च मृत्युश्च ताभ्यामात्मवशमुपनीतो नरः प्राणी सततमनवरतं मूढो महामोहेन मूढमतिर्धर्मं स्वर्गापवर्गमार्गं नाभिजानीते नाभिगच्छति । तत्संसारे स्थानमेव नास्ति यत्र जरामृत्यू न स्तः । देवानां जराऽभावः ? इति चेन्न तत्राप्युपान्त्यकाले लेश्याबलसुखवर्णप्रभुत्वहान्युपपत्तेरस्त्येव तेषामपि जरासद्भावः । उक्तं च- " देवाणं भंते ! सव्वे समवन्ना ? नो इणट्ठे समट्ठे, से केणट्ठेणं भंते ! एवं वुच्चति ?, गोयमा ! देवा दुविहा पण्णत्ता । तंजहा- पुव्वोववन्नगा य पच्छोववन्नगा य । तत्थ णं जे ते पुव्वोववन्नगा ते णं अविसुद्धवन्नयरा । जे णं पच्छोववन्नगा ते विसुद्धवन्नयरा " एवं लेश्याद्यपीति । च्यवनकाले तु सर्वस्यैवैतद्भवति, तद्यथा - " माल्यम्लानिः कल्पवृक्षप्रकम्पः, श्रीह्रीनाशो वाससां चोपरागः । दैन्यं तन्द्रा कामरागाङ्गभङ्गौ, दृष्टेर्भ्रंशो वेपथुश्चारतिश्च ॥ १ ॥" इत्याचाराङ्गप्रथमश्रुतस्कन्धतृतीयाध्ययनप्रथमोद्देशकवृत्तौ २३७ प्रतौ ९६ पत्रे ॥ ६ ॥

केचित्केवलिशरीरात्सर्वथा जीवविराधना न भवतीत्यूचुः । आगमाज्ञया तु केवलिनां यावच्छैलेशीप्रतिपन्नानामपि शरीरादवश्यं भावितया जायमाना जीवविराधना न विरुध्यते । कर्मबन्धवैचित्र्यं भवतु नाम । इत्यर्थविजिज्ञापयिषया लिख्यते -

" एगया गुणसमितस्स रीयतो कायफासमणुचिन्ना एगतिया पाणा उद्दायंतित्ति " । वृत्तिर्यथा-एकदा कदाचिद्गुणसमितस्य गुणयुक्तस्याप्रमत्तयतेः रीयमाणस्य सम्यगनुष्ठानवतोऽभिक्रामतः प्रतिक्रामतः सङ्कुचतः प्रसारयतो विनिवर्त्तमानस्य संपरिमृजतः कस्याञ्चिदवस्थायां कायः शरीरं तत्संस्पर्शमनुचीर्णाः कायसङ्गमागताः संपातिमादयः प्राणिन एके परितापमाप्नुवन्त्येके ग्लानतामुपयान्त्येके च ध्वंसमापद्यन्ते । अपश्चिमावस्थां तु सूत्रकृदेव दर्शयति-एके प्राणाः प्राणिनोऽपद्रान्ति प्राणैर्विमुच्यंते । अत्र च कर्मबन्धं प्रति विचित्रता । तथाहि-शैलेश्यवस्थायां मशकादीनां कायसंस्पर्शेन प्राणत्यागेऽपि बन्धोपादानकारणयोगाभावान्नास्ति बन्धः । उपशान्त११क्षीण-मोह१२सयोगिकेवलिनां १३ स्थितिनिमित्तकषायाभावात्सामयिकः । अप्रमत्तयतेर्जघन्यतोऽन्तर्मुहूर्त्तमुत्कुष्टतोऽन्तःकोटाकोटी स्थितिरिति । प्रमत्तस्य त्वनाकुट्टिकयोपेत्य प्रवृत्तस्य क्वचित्पाण्याद्यवयवसंस्पर्शात्प्राण्युपतापनादौ जघन्यतः कर्मबन्ध उत्कृष्टतश्च प्राक्तन एव विशेषिततर इत्यादि । इत्याचाराङ्गप्रथमश्रुतस्कन्धपञ्चमलोकसाराध्ययनचतुर्थोद्देशकवृत्तौ २३७ प्रतौ १३२ पत्रे ॥ ७ ॥

अभव्यस्य भव्यत्वाभव्यत्वशङ्का न स्यादित्यभिप्रायो लिख्यते -

" सिया वेगे अणुगच्छन्ति असिया वेगे अणुगच्छंति अणुगच्छमाणेहिं अणणुगच्छमाणे कहं न निव्विज्जे " । वृत्तिर्यथा- ' सिया इत्यादि ' सिताः पुत्रकलत्रादिभिरवबद्धाः, वाशब्द उत्तरापेक्षया पक्षान्तरमाह, " एगे अणुगच्छंतित्ति", एके लघुकर्माणः सम्यक्त्वं प्रतिपादयन्तमाचार्यमनुगच्छन्त्याचार्योक्तं प्रतिपद्यन्ते । तथा, असिता वा गृहपाशविमुक्ता वैके विचिकित्सावादरहिता आचार्यमार्गमनुगच्छन्ति, तेषां च मध्ये यदि कश्चित्कङ्कटुकदेश्यः स्यात्, स तान् प्रभूताननपाचीनमार्गप्रतिपन्नानवलोक्यासावपि कर्मविवरतः प्रतिपद्येताऽपीति दर्शयितुमाह-'अणुगच्छमाणेहिं इत्यादि ' आचार्योक्तं सम्यक्त्वमनुगच्छद्भिर्विरतैर्विरताविरतैः सह संवसंस्तैर्वा चोद्यमानोऽननुगच्छन्नप्रतिपद्यमानः कथं न निर्वेदं गच्छेद् ? असदनुष्ठानस्य मिथ्यात्वादिरूपां विचिकित्सां परित्यज्याचार्योक्तं सम्यक्त्वमेव प्रतिपद्यत इत्यर्थः । यदि वा सितासितैराचार्योक्तमनुगच्छद्भिर्बुध्यमानैः सद्भिः कश्चिदज्ञानोदयान्मतिजाड्यतया क्षपकादिश्चिरप्रव्रजितोऽप्यननुगच्छन्नवधारयन् कथं न

निर्विद्येत न निर्वेदं तपःसंयमयोर्गच्छेत् ? निर्विण्णश्चेदमपि विभावयेद्यथा नाहं भव्यः स्यां न च मे संयतभावोऽप्यस्तीति, यतः स्फुटविकटमपि कथितं नावगच्छामि, एवं च निर्विण्णस्याचार्याः समाधिमाहुः, यथा-भो साधो ! मा विषादमवलम्बिष्ठाः, भव्यो भवान् यतो भवता सम्यक्त्वमभ्युपगतं तच्च न ग्रन्थिभेदमृते तद्भेदश्च न भव्यत्वमृतेऽभव्यस्य हि भव्याभव्यशङ्काया अभावादिति भावः । किं चायं विरतिपरिमाणो द्वादशकषायक्षयोपशमाद्यन्यतमसद्भावे सति भवति, स च भवतावाप्तः । तदेवं दर्शनचारित्रमोहनीये भवतः क्षयोपशमं समागते दर्शनचारित्रान्यथानुपपत्तेः । यत्पुनः कथ्यमानेपि समस्तपदार्थावगतिर्न भवति, तज्ज्ञानावरणीयविजृम्भितम् । तत्र च श्रद्धानरूपं सम्यक्त्वमालम्बनमित्याह । इत्याचाराङ्गप्रथमश्रुतस्कन्धपञ्चमलोकसाराध्ययनपंचमोद्देशके २३७ प्रतौ १३६ पत्रे ॥ ८ ॥

केषाञ्चित्सिद्धान्ततात्पर्यानभिज्ञानामेकान्ततो दयाविडम्बिनां ' सव्वे पाणा सव्वे भूया सव्वे जीवा सव्वे सत्ता न हंतव्वा ' इत्याद्युपदेष्टा कथं भगवान् जलपुष्पजीवोपमर्दिनीं प्रतिमापूजामुपदिशति ? इत्यादि वृथावावदूकानामुत्सर्गापवादाद्यनेकविचारवितानगहनश्रीजिनागमसूत्रवैचित्र्यदर्शनाय तादृशं चक्रवर्त्तिगन्धपेषिकापेषणादनचित्तीभवदसंख्यातजीवात्मकमपि लवणमजानता गृहीतं तत्स्वामिना चानुज्ञातं कारणात्स्वयं भुंजीत साधर्मिकेभ्यो वा दद्यात्साधुरिति सूत्रार्थौ लिख्येते -

" से भिक्खू वा भिक्खुणी वा जाव समाणे सिया परो अभिहट्टु अंतो पडिग्गहतो बिडं वा लोणं उब्भियं वा लोणं परिभाएत्ता णीहट्टु दलएज्जा तहप्पगारं पडिग्गहं परहत्थंसि वा परपायंसि वा अफासुयं जाव नो पडिगाहेज्जा । से आहच्च पडिग्गाहिते सिया तं च णातिदूरगए जाणिज्जा से तमायाए तत्थ गच्छेज्जा । पुव्वामेव आलोएज्जा-आउसोत्ति भइणित्ति वा इमं ते किं जाणया दिन्नं उदाहु अजाणया दिन्नं ? सो अ भणेज्जा-णो खलु मए जाणया दिन्नं अजाणया दिन्नं, कामं खलु आउसो इयाणिं निसिरामि तं भुंजह च णं परिभाएह च णं । तं परेहिं समणुण्णायं समणुसिट्ठं तत्तो संजयामेव भुंजेज्ज वा पिएज्ज वा जं च णो संचाएति भोत्तए वा पात्तए वा साहम्मिया तत्थ वसंति संभोइया समणुण्णा अपरिहारिया अदूरगया तेसिमणुप्पदायव्वं सिया " इति । वृत्तिर्यथा- ' से इत्यादि ' स भिक्षुर्गृहादौ प्रविष्टस्तस्य स्यात्कदाचित् परो गृहस्थः । ' अभिहट्टु अंतो इति ' अन्तः प्रविश्य पतद्गृहे काष्टच्छब्बकादौ ग्लानाद्यर्थं खण्डादियाचने सति बिडं वा लवणं खनिविशेषोद्भवमुद्भिजं वा लवणाकराद्युत्पन्नं "परिभाएत्तात्ति" दातव्यं विभज्य दातव्यद्रव्यात्किञ्चिदंशं

गृहीत्वेत्यर्थः, निःसृत्य दद्यात्तथाप्रकारं परहस्तादिगतमेव प्रतिषेधयेत्तच्च " आहच्चत्ति " सहसा प्रतिगृहीतं भवेत्तं च दातारमदूरगतं ज्ञात्वा स भिक्षुस्तल्लवणादिकमादाय तत्समीपं गच्छेत् । गत्वा च पूर्वमेव तल्लवणादिकमालोकयेद्दर्शयेदेतच्च ब्रूयात्, अमुक इति वा, भगिनी इति वा । एतल्लवणादिकं त्वया जानता दत्तमुताजानता ? एवमुक्तः सन् पर एवं वदेद्यथा-पूर्वं मया जानता दत्तं साम्प्रतं तु यदि भवतोऽनेन प्रयोजनं ततो दत्तमेतत्परिभोगं कुरुध्वम् । तदेवं परैः समनुज्ञातं समनुसृष्टं सत्प्रासुकं कारणवशादप्रासुकं वा मुञ्जीत पिबेद्वा । यच्च न शक्नोति भोक्तुं वा पातुं वा तत्साधर्मिकेभ्यो दद्यात्तदभावे च बहुपर्यापन्नविधिं प्राक्तनं विदध्यादेतत्तस्य भिक्षोः सामग्र्यम् । इत्याचाराङ्गद्वितीयश्रुतस्कन्धपिण्डैषणाध्ययनदशमोद्देशके २३७ प्रतौ २०३ पत्रे ॥ ९ ॥

इह हि केचिच्चिरन्तनाज्ञानवासनातिमिरनिरुद्धान्तरदृशः परमकृपापीयूषपूरपूतान्तरश्रीजिनेश्वराज्ञैकजीवितां परमार्थदयामजानाना मणिबुद्ध्या ग्रहिलगृहीतोपलशकलन्यायेन स्वमनीषिकाविजृम्भितमेव श्रेयो मन्यमानाः पारगतप्रतिमापूजानिषेधादि यत्किञ्चिद्ब्रुवते, न च तत्तेषां सूत्राज्ञया विहरतां नद्याद्युत्तरतां कारणाद् वृक्षाद्यवलम्बतामाद्यव्रतरक्षणक्षमं द्वितीयव्रतरक्षणक्षमं च । तस्मादाज्ञामनोज्ञैव दयाऽऽश्रयणीया । अन्यथा दयाज्ञयोर्विरोधापत्तिः स्यादिति दर्शनाय लिख्यते-

" से भिक्खू वा भिक्खुणी वा गामाणुगामं दूइज्जमाणे वा अंतरा से वप्पाणि वा फलिहाणि वा पागाराणि वा तोरणाणि वा अग्गलाणि वा अग्गलपासगाणि वा गड्डाओ वा दरिओ वा संते परक्कमे संजयामेव परक्कमेज्जा नो उज्जुअं गच्छेज्जा । केवली बूया आयाणमेयं, से तत्थ परक्कममाणे पयलेज्ज वा पवडेज्ज वा से तत्थ पयलमाणे वा पवडमाणे वा रुक्खाणि वा गुम्माणि वा लयाओ वा वल्लीओ वा तणाणि वा गहणाणि वा हरिताणि वा अवलंबिय अवलंबिय उत्तरेज्जा से (जे) तत्थ पाडिपहिया उवागच्छंति ते पाणी जाएज्जा तओ संजयामेव अवलंबिय अवलंबिय उत्तरेज्जा तओ संजयामेव गामाणुग्गामं दूइज्जेज्जत्ति । " वृत्तिर्यथा - ' से इति ' स भिक्षुर्ग्रामान्तराले यदि वप्रादिकं पश्येत्ततः सत्यन्यस्मिन् संक्रमे तेन ऋजुना पथा न गच्छेद्यतस्तत्र गर्त्तादौ पतन् सचित्तं वृक्षादिकमवलम्बेत्तच्चायुक्तमथ कारणिकस्तेनैव गच्छेत् । कथञ्चित्पतितश्च गर्तगतो वल्ल्यादिकमवलम्ब्य प्रातिपथिकहस्तं वा याचित्वा संयत एव गच्छेत् । इत्याचाराङ्गद्वितीयश्रुतस्कन्धतृतीयाध्ययनद्वितीयोद्देशके २३७ प्रतौ २१९ पत्रे ॥ १० ॥

॥७॥

आस्तामगीतार्थानां सभासमक्षं व्याख्यानकरणादि, अविदितैतत्षोडशविधवचनानां जल्पनमप्यनुचितमित्यभिप्रायो लिख्यते -

" समियाए संजए भासं भासेज्जा । तंजहा - एगवयणं १ दुवयणं २ बहुवयणं ३ इत्थीवयणं ४ पुरिसवयणं ५ नपुंसगवयणं ६ अज्झत्थवयणं ७ उवनीतवयणं ८।१ अवणीयवयणं ९।२ उवणीयअवणीयवयणं १०।३ अवणीयउवणीयवयणं ११। तीयवयणं १२ पडुप्पन्नवयणं १३ अणागयवयणं १४ पच्चक्खवयणं १५ परोक्खवयणं १६। से एगवयणं वदिस्सामीति एगवयणं वदेज्जा जाव परोक्खवयणं वदिस्सामीति परोक्खवयणं वएज्जा । " वृत्तिर्यथा - भाषासमित्या समतया वा रागद्वेषाकरणलक्षणया षोडशवचनविधिज्ञो भाषां भाषेत । याद्दग्भूता च भाषितव्या तां षोडशवचनविधिगतां दर्शयति, तद्यथेत्ययमुपदर्शनार्थः-एकवचनं वृक्षः१ द्विवचनं वृक्षौ २ बहुवचनं वृक्षाः ३ इति । स्त्रीवचनं वीणा कन्या इत्यादि ४। पुंवचनं घटः पट इत्यादि ५। नपुसंकवचनं पीठं देवकुलमित्यादि ६। अध्यात्मवचनं आत्मन्यधि अध्यात्मं हृदयगतं तत्परिहारेणान्यद्भणिष्यतस्तदेव सहसा पतितम् ७। उपनीतवचनं प्रशंसावचनं यथा रूपवती स्त्री ८। तद्विपर्ययेणापनीतवचनं, यथेयं रूपहीनेति ९। उपनीतापनीतवचनं कश्चिद् गुणः प्रशस्यः कश्चिन्निन्द्यः, यथा रूपवतीयं स्त्री किं त्वसद्वृत्तेति १०। अपनीतोपनीतवचनं यथाऽरूपवती कुरूपा स्त्री किं तु सद्वृत्तेति ११। अतीतवचनं कृतवान् १२। वर्त्तमानवचनं करोति १३। अनागतवचनं करिष्यति १४ । प्रत्यक्षवचनमेष देवदत्तः १५। परोक्षवचनं स देवदतः १६। इत्येतानि षोडशवचनान्यमीषां च स भिक्षुरेकार्थविवक्षायामेकवचनमेव ब्रूयाद्यावत्परोक्षवचनमेव ब्रूयात् । इत्याचाराङ्गद्वितीयश्रुतस्कन्धचतुर्थभाषाध्ययनप्रथमोद्देशके २३७ प्रतौ २२१ पत्रे ॥ ११ ॥

निर्लक्षण उपधिर्ज्ञानदर्शनचारित्रोपघातकारित्वान्मुनिभिर्न रक्षणीय इत्यभिप्रायजिज्ञापयिषया लिख्यते -

" से भिक्खू वा भिक्खुणी वा से जं पुण वत्थं जाणिज्जा अप्पंडं जाव संताणगं अनलं अथिरं अधुवं अधारणिज्जं रोइज्जंतं न रोच्चइ तहप्पगारं वत्थं अफासुअं जावनो पडिगाहेज्जा " इति । वृत्तिर्यथा- ' से भिक्खू इत्यादि ' स भिक्षुर्यत्पुनरेवंभूतं वस्त्रं जानीयात्तद्यथा-अल्पाण्डं यावदल्पसन्तानकं किं त्वनलमभीष्टकार्यासमर्थं हीनादित्वात्तथाऽस्थिरं जीर्जमध्रुवं स्वल्पकालानुज्ञापनात्तथाऽधारणीय-मप्रशस्तदेशं खञ्जनादिकलङ्काङ्कितत्वात्, तथा चोक्तम्-" चत्तारि देवया भागा, दुवे भागा य माणुसा । आसुरा य दुवे भागा, मज्झे

वत्थस्स रक्खसो ॥ १ ॥ देवेसु उत्तमो लाभो, ॥ २ ॥" किं च- 'लक्खणहीणो उवही, उवहणइ दीयमानमपि दात्रा न रोचते साधवे न कल्पत इत्यर्थः ।

देव	असुर	देव
मनुष्य	राक्षस	मनुष्य
देव	असुर	देव
इदं वस्त्रविभागयंत्रम् ।		

माणुसेसु अ मज्झिमो । आसुरेसु अ गेलन्नं, मरणं जाण रक्खसे णाणदंसणचरित्तमित्यादि'। तदेवंभूतमप्रायोग्यं रोच्यमानं प्रशस्यमानं इत्याचाराङ्गद्वितीयश्रुतस्कन्धपञ्चमाध्ययनप्रथमोद्देशके २३७ प्रतौ २२३ पत्रे ॥ १२ ॥

वस्त्रपरिकर्मणा साधूनामनुचितेति जिज्ञापयिषया लिख्यते-

॥९॥

" से भिक्खू वा भिक्खुणी वा अहेसणिज्जाइं वत्थाइं जाइज्जा अहापरिग्गहियाइं वत्थाइं धारेज्जा नो धोएज्जा नो रएज्जा नो धोअरत्ताइं वत्थाइं धारेज्जा अपलीउंचमाणे गामंतरेसु ओमचेलिए एतं खलु वत्थधारिस्स सामग्गियं " इति । वृत्तिर्यथा- ' से भिक्खू इत्यादि ' स भिक्षुर्यथैषणीयान्यपरिकर्माणि वस्त्राणि याचेत यथापरिगृहीतानि च धारयेन्न तत्र किञ्चित्कुर्यादिति दर्शयति । तद्यथा-न तद्वस्त्रं गृहीतं सत्प्रक्षालयेन्नाऽपि रञ्जयेत्तथा नाऽपि बाकुशिकतया धौतरक्तानि धारयेत्तथाभूतानि न गृह्णीयादित्यर्थः । तथाभूताधौतरक्तवस्त्रधारी च ग्रामान्तरे गच्छन् "अपलिउंचमाणेत्ति " अगोपयन् सुखेनैव गच्छेद्यतोऽसाववमचेलिकोऽसारवस्त्रधारीत्येतत्तस्य भिक्षोर्वस्त्रधारिणः सामग्र्यं संपूर्णो भिक्षुभावो । यदेवंभूतवस्त्रधारणमित्येतच्च सूत्रं जिनकल्पिकोद्देशेन द्रष्टव्यम् । वस्त्रधारित्वविशेषणाद्गच्छान्तर्गतेऽपि चाविरुद्धम् । इत्याचाराङ्गद्वितीयश्रुतस्कन्धपञ्चमाध्यनद्वितीयोद्देशके २३७ प्रतौ २२५ पत्रे ॥ १३ ॥

केचिद्दण्डकग्रहणमनागमिकमिति वदन्ति तच्चासत्, राद्धान्ते दण्डकग्रहणस्य स्पष्टमुक्तत्वात् । न च वाच्यं कारणिकोऽयं विधिर्ग्लानादीनां नाशेषाणामिति, तथात्रानुक्तत्वात् । न च वाच्यं छत्रकवदस्याऽपि कारणिकता भावनीया, इहैवाऽग्रे वक्ष्यमाणेषु श्रीभगवतीसूत्राक्षरेषु हे आयुष्मन् ! एको दण्डकस्त्वया ग्राह्योऽन्ये साधर्मिकेभ्यो देया इंत्यत्र सर्वेषां ग्लानादिकताकल्पनस्याऽनुचितत्वात् । अत्रैव सूत्रकृताङ्गतरङ्गे 'पाणहाउ य छत्तं च ' इत्यादिना छत्रकनिषेधवद्दण्डकनिषेधस्य कुत्राऽप्यश्रूयमाणत्वाच्चालं कल्पनया । सिद्धान्त एव प्रमाणम् । स चाऽयं लिख्यते -

" समणे भविस्सामि अणगारे अकिंचणे अपुत्ते अपसू परदत्तभोई पावं कम्मं नो करिस्सामीति समुट्ठाए, सव्वं भंते !

अदिण्णादाणं पच्चक्खामि । से अणुपविसित्ता गामं वा जाव रायहाणिं वा नेव सयं अदिन्नं गिण्हेज्जा, नेवन्नेणं अदिन्नं गिण्हावेज्जा, नेवन्नं अदिन्नं गिण्हतंपि समणुजाणेज्जा । जेहिं वि सद्धिं संपव्वइए तेसिं पि याइं भिक्खू छत्तयं वा मत्तयं वा दंडगं वा जाव चम्मच्छेयणगं वा तेसिं पुव्वामेव उग्गहं अणणुन्नविय अपडिलेहिय अप्पमज्जिय नो उगिण्हेज्ज वा पगिण्हेज्ज वा, तेसिं पुव्वामेव उग्गहं अणुन्नविअ पडिलेहिय पमज्जिय तओ संजयामेव उगिण्हेज्ज वा पगिण्हेज्ज वा " इति । वृत्तिर्यथा- ' समणे इत्यादि ' श्राम्यतीति श्रमणस्तपस्वी । यतोऽहमेवंभूतो भविष्यामीति दर्शयति-'अनगारो ' अगा वृक्षास्तैर्निष्पन्नमगारम्, तन्न विद्यते यस्येत्यनगारस्त्यक्तगृहवास इत्यर्थः । तथा न विद्यते किमप्यस्येत्यकिञ्चनो निःपरिग्रह इत्यर्थः । तथाऽपुत्रः स्वजनबन्धुरहितो निर्मम इत्यर्थः । एवमपशुर्द्विपदचतुष्पदादिरहितः । यत एवमतः परदत्तभोजी सन् पापं कर्म न करिष्यामीत्येवं समुत्थायैतत्प्रतिज्ञो भवामीति दर्शयति-यथा सर्वं भदन्तादत्तादानं प्रत्याख्यामि दन्तशोधनमात्रमपि परकीयमदत्तं न गृहणामीत्यर्थः । तदनेन विशेषणकदम्बकेनापरेषां शाक्यसरजस्कादीनां सम्यक् श्रमणत्वं निराकृतं भवति, स चैवंभूतोऽकिञ्चनः श्रमणोऽनुप्रविश्य ग्रामं वा यावद्राजधानीं वा नैव स्वयमदत्तं गृहणीयानैवापरेण ग्राहयेन्नाप्यपरं गृहणन्तं समनुजानीयात् । यैर्वा साधुभिः सह सम्यक् प्रव्रजितस्तिष्ठति तेषामपि सम्बन्ध्युपकरणमननुज्ञाप्य न गृहणीयादिति दर्शयति-तद्यथा- ' छत्रकं ' इति, छद अपवारणे छादयतीति छत्रं वर्षाकल्पादि, यदि वा कारणिकः क्वचित्कौङ्कणदेशादावतिवृष्टिसंभवाच्छत्रकमपिगृहणीयाद्यावच्चर्मच्छेदनकमप्यननुज्ञाप्याप्रत्युपेक्ष्य वाऽप्रमृज्य च नावगृहणीयात्सकृत्प्रगृहणीयादनेकशः । तेषां सम्बन्धि यथा गृहणीयात्तथा दर्शयति-पूर्वमेवताननुज्ञाप्य प्रत्युपेक्ष्य चक्षुषा प्रमृज्य रजोहरणादिना सकृदनेकशो वा गृहणीयात् । इत्याचाराङ्गद्वितीयश्रुतस्कन्धसप्तमाध्ययनप्रथमोद्देशके २३७ प्रतौ २२७ पत्रे ॥ १४ ॥

॥ इति श्रीमद्कब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालशालातिशालिशीलश्रीहीरविजयसूरीश्वरशिष्योपाध्याय-श्रीकीर्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे विशेषसमुच्चयापरनाम्नि श्रीआचाराङ्गकियद्विचारसमुच्चयनामा प्रथमस्तरङ्गः ॥ १ ॥

। इति श्रीविचाररत्नाकरे प्रथमस्तरंगः सम्पूर्णः ।

॥ अथ द्वितीयस्तरङ्गः ॥

अनन्तचैतन्यविकासनाय, सर्वज्ञलक्ष्मीकनकासनाय ।
कृतान्यतीर्थोन्नतिनाशनाय, नमो नमः श्रीजिनशासनाय ॥ १ ॥

अथ क्रमायाताः श्रीसूत्रकृताङ्गविचारा लिख्यन्ते-

इह हि केचिदसद्ग्रहग्रस्तहृदयाः प्रतिपदमालोक्यमानश्रीजिनप्रतिमाक्षरभीरवः सूत्रसूचितार्थसार्थसमर्थितान्यपि प्रकरणसिद्धान्तविवरणानि न स्वीकुर्वते, न च ते विदन्ति सिद्धान्तार्था एवैते । तत्र चागमो लिख्यते- ॥99॥

" सुत्तेण सूचियं चिय, अत्था तह सूचिया य जुत्ता य । तो बहुविहप्पउत्ता, एया पसिद्धा अणादीया ॥२१॥ " निर्युक्तिगाथा । वृत्तिर्यथा-अर्थस्य सूचनात्सूत्रम् तेन सूत्रेण केचिदर्थाः साक्षात्सूचिताः मुख्यतयोपात्तास्तथाऽपरे सूचिता अर्थापत्त्याक्षिप्ताः । साक्षादनुपादानेऽपि दध्यानयनचोदनया तदाधारानयनचोदनावदिति । एवं च कृत्वा चतुर्दशपूर्वविदः परस्परं षट्स्थानपतिता भवन्ति । तथा चोक्तम्- " अक्खरलंभेण समा, ऊणहिया होंति मतिविसेसेहिं । ते वि य मईविसेसा, सुयनाणम्भिंतरे जाण ॥ १ ॥ " तत्र ये साक्षादुपात्तास्तान् प्रति सर्वेऽपि तुल्याः, ये पुनः सूचितास्तदपेक्षया कश्चिदनन्तभागाधिकमर्थं वेत्त्यपरोऽसंख्येयभागाधिकमन्यः संख्येयभागाधिकं तथाऽन्यः संख्येयासंख्येयानन्तगुणमिति । ते च सर्वेऽपि युक्ता युक्त्युपपन्नाः सूत्रोपात्ता एव वेदितव्याः । तथा चोक्तम्-' ते वि य मईविसेसा ' इत्यादि, ननु किं सूत्रोपात्तेभ्योऽन्येऽपि केचनार्थाः सन्ति येन तदपेक्षया चतुर्दशपूर्वविदां षट्स्थानपतित्वमुद्घुष्यते, बाढं विद्यन्ते, यतोऽभिहितम् " पण्णवणिज्जा भावा, अणंतभागो उ अणभिलप्पाणं । पण्णवणिज्जाणं पुण, अणंतभागो सुयनिबद्धो ॥१॥ " इति श्रीसूत्रकृताङ्गप्रथमश्रुतस्कन्धप्रथमाध्ययने २७१ प्रतौ ५ पत्रे ॥१॥

अधिकरणकारि वचनं वदतः साधोर्भूयसी हानिर्भवतीति यतिजनजिज्ञापयिषया लिख्यते-

" अहिगरणकडस्स भिक्खुणो, वयमाणस्स पसज्ज दारुणं । अट्ठे परिहायइ बहु, अहिगरणं न करेज्ज पंडिए ॥१९॥ "' अहिगरण ' इत्यादि, अधिकरणं कलहस्तत्करोति तच्छीलश्चेत्यधिकरणकरस्तस्यैवंभूतस्य भिक्षोस्तथाऽधिकरणकरीं दारुणां वा भयानकां ॥99॥

प्रसह्य प्रकटमेव वाचं ब्रुवतः सतोऽर्थो मोक्षस्तत्कारणभूतो वा संयमः स बहुः परिहीयते ध्वंसमुपयाति इदमुक्तं भवति, बहुना कालेन यदर्जितं विकृष्टेन तपसा महत्पुण्यं तत्कलहं कुर्वतः परोपघातिनीं वाचं ब्रुवतस्तत्क्षणमेव ध्वंसमुपयाति । तथा हि-" जं अज्जियं समीखल्लएहिं तवनियमबंभमईएहिं । मा हु तयं छड्डेहह, कलहंता सागपत्तेहिं ॥ १ ॥ " इत्येवं मत्वा मनागप्यधिकरणं न कुर्यात्पण्डितः सदसद्विवेकी । इति सूत्रकृताङ्गाद्यश्रुतस्कन्धद्वितीयवैतालीयाध्ययने द्वितीयोद्देशकवृत्तौ २७१ प्रतौ ४२ पत्रे ॥ २ ॥

दुःकर्मवशतो नारका अशुच्यादिविरूपमाहारमाहारयन्तीति जिज्ञासया लिख्यते-

" ते हम्ममाणा णरगे पडंति, पुन्ने दुरूवस्स महाभितावे । ते तत्थ चिट्ठंति दुरूवभक्खी, तुट्टंति कम्मोवगया किमीहिं ॥ २० ॥ " ते वराका नारका हन्यमानास्ताड्यमाना नरकपालेभ्यो नष्टा अन्यस्मिन् घोरतरे नरकैकदेशे पतन्ति गच्छन्ति । किंभूते नरके ? पूर्णे भृते, दुष्टं रूपं यस्य तद्दुरूपम् विष्टाऽसृग्मांसादिकमलं तस्य भृते । तथा महाभितापेऽतिसन्तापोपेते ते नारकाः स्वकर्मावबद्धास्तत्रैवंभूते नरके दुरूपभक्षिणोऽशुच्यादिभक्षकाः प्रभूतं कालं यावत्तिष्ठन्ति । तथा कृमिभिर्नरकपालापादितैः परस्परकृतैश्च स्वकर्मोपगताः स्वकर्मढौकितास्तुद्यन्ते व्यथ्यन्त इति । तथा चागमः-" छट्ठीसत्तमीसु णं पुढवीसु नेरइया पहू महंताइं लोहियकुंथुरूवाइं विउव्वित्ता अन्नमन्नस्स कायं समतुरंगेमाणा समतुरंगेमाणा अणुघायमाणा अणुघायमाणा चिट्ठंति " । इति सूत्रकृताङ्गप्रथमश्रुतस्कन्धे निरयविभत्तिनामपञ्चमाध्ययनप्रथमोद्देशे २७१ प्रतौ ७७ पत्रे ॥ ३ ॥

न च परभवकृतमेव कर्मात्र भुज्यते, अत्र कृतं परत्रैव भोक्तव्यमिति निर्भीकता । नापि च- ' अत्युग्रपापपुण्यानामिहैव फलमाप्यते ' इदं लौकिकमेव, आगमेऽप्यस्य श्रूयमाणत्वात् । स चायम्-

" अस्सिं च लोए अदुवा परत्था, सयग्गसो वा तह अन्नहा वा । संसारमावन्न परं परं ते, बंधंति वेयंति य दुन्नियाइं ॥ ४ ॥ " ' अस्सिं च ' इत्यादि, यान्याशुकारीणि कर्माणि तान्यास्मिन्नेव जन्मनि विपाकं ददति, अथवा परस्मिन् जन्मनि नरकादौ तस्य कर्मविपाकं ददति । एकस्मिन्नेव जन्मनि विपाकं तीव्रं ददति, शताग्रशो वेति बहुषु जन्मसु । येनैव प्रकारेण तदशुभमाचरन्ति तथैवोदीर्यते तथाऽन्यथा वेति, इदमुक्तं भवति, किञ्चित्कर्म तद्भव एव विपाकं ददाति किञ्चिज्जन्मान्तरे, यथा मृगापुत्रस्य दुःखविपाकाख्ये विपाकश्रुताङ्गश्रुतस्कन्धे

कथितमिति । दीर्घकालस्थितिकं परजन्मान्तरकृतं वेद्यते, येन प्रकारेण सकृत्तथैवाऽनेकशो वा । यदि वान्येन प्रकारेण सकृत्सहस्रशो वा शिरश्छेदादिकं हस्तपादच्छेदादिकं चानुभूयत इति । तदेवं ते कुशीला आयतदण्डाश्चतुर्गतिकसंसारमापन्ना अरघट्टघटीयन्त्रन्यायेन संसारसागरं पर्यटन्तः परं परं प्रकृष्टं प्रकृष्टं दुःखमनुभवन्ति । जन्मान्तरकृतं कर्मानुभवन्तश्चैकमार्त्तध्यानोपहता अपरं बध्नन्ति वेदयन्ति च, दुष्टं नीतानि दुर्नीतानि दुष्कृतानि । न हि स्वकृतस्य कर्मणो विनाशोऽस्तीति भावः । तदुक्तम्- " मा होहि रे विसन्नो, जीव तुमं विमणदुम्मणो दीणो । ण हु चिंतिएण फिट्टइ, तं दुक्खं जं पुरा रइयं ॥ १ ॥ जइ पविससि पायालं, अडविं व दरिं गुहं समुद्दं वा । पुव्वकयाओ न चुक्कसि, अप्पाणं घाइसे जइ वि ॥ २ ॥ " एवं तावदोघतः कुशीलाः प्रतिपातिताः । इति सूत्रकृताङ्गप्रथमश्रुतस्कन्धसप्तमकुशीलाध्ययने २७१ प्रतौ ९२ पत्रे ॥ ४ ॥

सन्निधिदोषदुष्टस्य स्नातुर्वस्त्रविभूषणप्रक्षालनादिकारिणश्च दूरे संयम इत्यर्थप्रतिपादनपरा सार्था सूत्रगाथा लिख्यते-

" जे धम्मलद्धं वि निहाय भुंजे, वियडेण साहट्टु य जे सिणाइ । जो धावई लूसई य वत्थ, अथाहु से नागणियस्स दूरे ॥ २२॥ " ये केचन शीतलविहारिणो धर्मेण सुधिकया लब्धं धर्मलब्धमौदेशिकक्रीतकृतादिदोषरहितमित्यर्थः । तदेवंभूतमप्याहारजातं निधाय व्यवस्थाप्य सन्निधिं कृत्वा भुञ्जते । तथा ये विकटेन प्रासुकोदकेनापि सङ्कोच्याङ्गानि प्रासुक एव प्रदेशे देशसर्वस्नानं कुर्वन्ति । तथा यो वस्त्रं धावति प्रक्षालयति तथा लूषयति शोभार्थम् । दीर्घं सत्पाटयित्वा ह्रस्वं करोति ह्रस्वं वा सन्धाय दीर्घं करोति, एवं लूषयति । तदेवं स्वार्थं परार्थं वा यो वस्त्रं लूषयति । अथासौ " नागणियस्स त्ति " निर्ग्रन्थभावस्य संयमानुष्ठानस्य दूरे वर्तते, न तस्य संयमो भवतीत्येवं तीर्थकरगणधरादय आहुः । इति सूत्रकृताङ्गप्रथमश्रुतस्कन्धकुशीलपरिभाषानाम्नि सप्तमाध्ययने २७१ प्रतौ ९६ पत्रे ॥ ५ ॥

परिणतपत्रफलशाकाद्यादरणे तु तत्तत्कालीनसंविग्नगीतार्थाचारणैव प्रमाणं, परं सर्वथा निषिद्धत्वं तु न संभाव्यते, यतोऽत्र तात्पर्यतोऽपरिणतानामेव निषेधस्य टीकाकारव्याख्यातत्वात् । सा गाथा चेयम्-

" कम्मं परिन्नाय दगंसि धीरे, वियडेण जीविज्जइ आदिमोक्खं । से बीअकंदाइ अभुंजमाणे, विरए सिणाणाइसु इत्थिआसु ॥२२॥ " " कम्मं परिन्नाय " इत्यादि, धिया राजत इति धीरो बुद्धिमान्, ' दगंसि त्ति ' उदकसमारम्भे सति कर्मबन्धो भवतीति परिज्ञाय

॥१३॥

किं कुर्यादित्याह-विकटेन प्रासुकोदकेन सौवीरादिना जीव्यात्प्राणधारणं कुर्यात् । च शब्दादन्येनाप्याहारेण प्राशुकेनैव प्राणवृत्तिं कुर्यात् । आदिः संसारस्तस्मान्मोक्ष आदिमोक्षः संसारविमुक्तिं यावदिति, धर्मकारणानां वादिभूतं शरीरं तद्विमुक्तिं यावत्, यावज्जीवमित्यर्थः । किं चासौ साधुर्बीजकन्दादीनभूञ्जानः । आदि ग्रहणान्मूलपत्रफलादीनि गृह्यन्ते, एतान्यप्यपरिणतानि परिहरन् विरतो भवति । कुतः ? इति दर्शयति- स्नानाभ्यङ्गोद्वर्त्तनादिक्रियासु निःप्रतिकर्मशरीरतयाऽन्यासु च चिकित्सादिक्रियासु न वर्त्तते, तथा स्त्रीषु च विरतः । वस्तिनिरोधग्रहणादन्येऽप्याश्रवा गृह्यन्ते । यश्चैवंभूतः सर्वेभ्योऽप्याश्रवद्वारेभ्यो विरतो नासौ कुशीलदोषैर्युज्यते, तदयोगाच्च न संसारं बभ्रमीति । इति सूत्रकृताङ्गप्रथमश्रुतस्कन्धकुशीलपरिभाषानाम्नि सप्तमाध्ययने २७१ प्रतौ ९६ पत्रे ॥ ६ ॥

मुनीनामाहाराद्यर्थं गृहस्थप्रशंसनं परमापायकारणमिति जिज्ञापयिषया लिख्यते-

" णिक्खम्म दीण परभोयणंमि, मुहमंगलिए उदराणुगिद्धे । नीवारगिद्धे व महावराहे, अदूरए एहति घातमेव ॥ २५ ॥ " यो ह्यात्मीयं धनधान्यहिरण्यादिकं त्यक्त्वा निष्क्रान्तो निष्क्रम्य च परभोजने पराहारविषये दीनो दैन्यमुपगतो जिह्वेन्द्रियवशादार्त्तो बन्दिवन्मुखमाङ्गलिको भवति, मुखेन मङ्गलानि प्रशंसावाक्यानीदृशस्तादृशस्त्वमित्येवं दैन्यभावमुपगतो वक्ति । यदुक्तम्-" सो एसो जस्स गुणा, विअरंतनिवारिया दसदिसासु । इहरा कहासु सुच्चसि, पच्चक्खं अज्ज दिट्ठोसि ॥ १ ॥ " इत्येवमौदर्यं प्रतिगृद्धोऽध्युपपन्नः किमिव ? नीवारः शूकरादिमृगभक्ष्यविशेषस्तस्मिन् गृद्ध आसक्तमना गृहीत्वा च स्वयूथं महावराहो महाकायः शूकरः, स चाहारमात्रगृद्धोऽतिसङ्कटे प्रविष्टः सन्नदूर एव शीघ्रमेव घातं विनाशमेष्यति प्राप्स्यति । एवकारोऽवधारणे । अवश्यं तस्य विनाश एव नापरा गतिरस्तीति । एवमसावपि कुशील आहारमात्रगृद्धः संसारोदरे पौनःपुन्येन विनाशमेवैति । इति सूत्रकृताङ्गप्रथमश्रुतस्कन्धकशीलपरिभाषानाम्नि सप्तमाध्ययने २७१ प्रतौ ९७ पत्रे ॥ ७ ॥

साधूनां परस्परक्रिया " अहं त्वदीयं पात्रं सज्जीकरोमि, त्वं मदीयं वस्त्रं सज्जीकुरु " इत्यादिरूपा न कल्पते इत्यादिप्रतिपादनपरा गाथा लिख्यते-

" पाणहाउ य छत्तं च, णालीयं वालवीयणं । परकिरियं अन्नमन्नं च तं विज्जं परिजाणिया ॥ १८ ॥ " उपानहौ काष्ठपादुके

च, तथा तापादिनिवारणाय छत्रं, तथा नालिका द्यूतक्रीडाविशेषस्तथा वालैर्मयूरपिच्छैर्वा व्यजनकं, तथा परेषां सम्बन्धिनीं क्रियामन्योन्यं परस्परतोऽन्यनिष्पाद्यामन्यः करोत्यपरनिष्पाद्यां चापर इति, चः समुच्चये, तदेतत्सर्वं विद्वान् पण्डितः कर्मोपादानकारणत्वेन ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेदिति । इति श्रीसूत्रकृताङ्गप्रथमश्रुतस्कन्धनवमधर्माध्ययने २७१ प्रतौ १०२ पत्रे ॥ ८ ॥

केचिदविदितपरमार्थाः " पाडिहारियपीढफलग " इत्यादि दर्शयन्तो गृहस्थवस्त्रव्यापारणं स्वीकुर्वते तच्चासङ्गतम् । येन 'पाडिहारिय' इति, प्रतिगृहीतत्वेन पीढफलकादिविशेषणं मन्तव्यम् । तथैव च गृहस्थवस्त्रपात्रभोगनिषेधः श्रूयते सिद्धान्ते, स चायम्-

" परमत्ते अन्नपाणं न भुंजेज्ज कयाइ वि । परवत्थं अचेलो वि, तं विज्जं परिजाणिया ॥ २० ॥ " " परमत्ते " इत्यादि, परस्य गृहस्थस्यामत्रं भाजनं परामत्रम्, तत्र पुरःकर्मपश्चात्कर्मभयात् (तद्भयात्) हतनष्टादिदोषसम्भवाच्चान्नं पानं च मुनिर्न कदाचिदपि भुञ्जीत, यदि वा पतद्ग्रहधारिणश्छिद्रपाणेः पाणिपात्रं परंपात्रम्, यदि वा पाणिपात्रस्याच्छिद्रपाणेर्जिनकल्पिकादेः पतद्ग्रहः परपात्रं तत्र संयमविराधनाभयान्न भूञ्जीत । तथा परस्य गृहस्थस्य वस्त्रं परवस्त्रम्, तत्साधुरचेलोऽपि सन् पश्चात्कर्मादिदोषभयात् हतनष्टादिदोषसंभवाच्च न बिभृयात्, यदि वा जिनकल्पिकोऽचेलो भूत्वा सर्वमपि वस्त्रं परवस्त्रमिति कृत्वा न बिभृयात् । तदेतत्सर्वं परपात्रभोजनादिकं संयमविराधकत्वेन ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेदिति । इति सूत्रकृताङ्गप्रथमश्रुतस्कन्धनवमाध्ययने २७१ प्रतौ १०२ पत्रे ॥ ९ ॥

एतेन प्रतिग्रामं ये गृहस्थस्य घटादिपात्रं व्यापारयन्ति, ते निरस्ता द्रव्टव्याः ॥

केचिदिह कुमतितमस्विनीयक्त्यमुक्त्यध्वानः प्रतिपदमागमोक्तमपि योगोद्वहनमस्वीकुर्वाणाः सिद्धान्तपदान्यगारिणामगणिताशातनाः पाठयन्ति । ते च संसारं पल्लवयन्ति सिद्धान्तनिषिद्धत्वात् । निषेधश्चैतद्गाथातात्पर्यार्थावगमगम्यः, सा चेयम्-

" गिहे दीवमपासंता, पुरिसादाणिया नरा ते । वीरा बंधणुम्मुक्का, नावकंखंति जीवियं ॥ ३४ ॥ " ' गिहे दीवं ' इत्यादि, गृहे गृहवासे गृहपाशे वा गृहस्थभाव इति यावत्, ' दीवं ति ' दीपी दीप्तौ, दीपयति प्रकाशयतीति दीपः, स च भावदीपः श्रुतज्ञानलाभः, यदि वा द्वीपः समुद्रादौ प्राणिनामावासभूतः, स च भावद्वीपः संसारसमुद्रे सर्वज्ञोक्तचारित्रलाभस्तदेवंभूतं दीपं द्वीपं वा गृहस्थभावेऽपश्यन्त अप्राप्नुवन्तः सन्तः सम्यक् प्रव्रज्योत्थानेनोत्थिता उत्तरोत्तरगुणलाभेनैवंभूता भवन्तीति दर्शयति-नराः पुरुषाः पुरुषोत्तमत्वाद्धर्मस्य नरोपादनमन्यथा

स्त्रीणामप्येतद्गुणभाक्त्वं भवति, अथवा देवादिव्युदासार्थमिति । मुमुक्षूणां पुरुषाणां आदानीया आश्रयणीयाः पुरुषादानीया (महतोऽपि) महीयांसो भवन्ति, यदि वा आदानीयो हितैषिणां मोक्षस्तन्मार्गो वा सम्यग्दर्शनादिकः पुरुषाणां मनुष्याणामादानीयः, स विद्यते येषामिति विगृह्य मत्त्वर्थीयोऽर्श आदिभ्योऽजिति । तथा ये एवंभूतास्ते विशेषेणेरयंत्यष्टप्रकारं कर्मेति वीरास्तथा बन्धनेन सबाह्याभ्यन्तरेण पुत्रकलत्रादिस्नेहरूपेणोत्प्राबल्येन मुक्ता बन्धनोन्मुक्ताः सन्तो जीवितमसंयमजीवितं प्राणधारणं वा नाभिकाङ्क्षन्ति नाभिलषन्ति । इति सूत्रकृताङ्गप्रथमश्रुतस्कन्धनवमधर्माध्ययनप्रान्ते २७२ प्रतौ १११ पत्रे ॥ १० ॥

अथ केचिदनध्यक्षमिति पृथिव्यादिजीवत्वं प्रति विप्रतिपद्यन्ते वदन्ति च । नास्माकमागमः प्रमाणम्, केवलं युक्तिप्रिया हि वयम् । ततस्तान् प्रति युक्तिसन्दर्भित आगमो लिख्यते-

यथा-" सव्वाहिं अणुजुतीहिं, मइमं पडिलेहिआ । सव्वे अक्कंतदुक्खाय, अतो सव्वे न हिंसया ॥ ९ ॥" ' सव्वाहिंति ' सर्वा याः काश्चनाऽनुरूपाः पृथिव्यादिजीवसाधनत्वेऽनुकूला युक्तयः साधनानि । यदि वाऽसिद्धविरुद्धानैकान्तिकपरिहारेण पक्षधर्मत्वसपक्षसत्वविपक्षव्यावृत्तिरूपतया युक्तिसङ्गता युक्तयोऽनुयुक्तयस्ताभिरनुयुक्तिभिर्मतिमान् सदसद्विवेकी पृथिव्यादिजीवनिकायान् प्रत्युपेक्ष्य पर्यालोच्य जीवत्वेन प्रसाध्य तथा सर्वेपि प्राणिनोऽकान्तदुःखा दुःखाद्विषः सुखलिप्सवश्च मत्वाऽतो मतिमान् सर्वानपि प्राणिनो न हिंस्यादिति । युक्तयश्च तत्प्रसाधिकाः सङ्क्षेपेणेमाः । सात्मिका पृथिवी तदात्मनां विद्रुमलवणोपलादीनां समानजातीयाङ्कुरसद्भावादर्शोविकारांकुरवत् । तथा सचेतनमम्भो भूमिखननादाविष्कृतस्वभावसंभवाद्दर्दुरवत् । तथा सात्मकं तेजस्तद्योग्याहारवृद्ध्यावृद्ध्युपलब्धेर्बालवत् । तथा सात्मको वायुः अपरप्रेरितनियततिरश्चीनगतिमत्त्वाद्गोवत् । तथा सचेतना वनस्पतयः जन्मजरामरणरोगशोकादीनां समुदितानां सद्भवात् स्त्रीवत् । तथा क्षतसंरोहणाहारोपादानदौहदसद्भावसङ्कोचसायाह्नस्वापप्रबोधाश्रयोपसर्पणादिभ्यो हेतुभ्यो वनस्पतेश्चैतन्यसिद्धिः । द्वीन्द्रियादीनां तु पुनः कृम्यादीनां स्पष्टमेव चैतन्यम् । तद्वेदनाश्चोपक्रमिकाः स्वाभाविकाश्च समुपलभ्यमाना मनोवाक्कायैः कृतकारितानुमतिभिश्च नवकेन भेदेन तत्पीडाकारिण उपमर्दान्निवर्त्तितव्यम् । इति सूत्रकृताङ्गप्रथमश्रुतस्कन्धैकादशमोक्षमार्गाध्ययने २७१ प्रतौ १२२ पत्रे ॥ ११ ॥

साधूनां केनचिद्विप्रादिना वापीकूपसत्रादिषु पुण्यं न वेति पृष्टे सति तैर्यत्कार्यं तदभिधायिन्यौ सूत्रगाथे लिख्यते-

" जे अ दाणं पसंसंति, वहमिच्छंति पाणिणं । जे अ णं पडिसेहंति, वित्तिच्छेयं, करंति ते ॥ २० ॥ " ' जे अ दाणमित्यादि ' ये केचन प्रपासत्रादिकं दानं बहूनां जन्तूनामुपकारीतिकृत्वा प्रशंसन्ति-श्लाघन्ते, ते परमार्थानभिज्ञाः प्रभूततरप्राणिनां तत्प्रशंसाद्वारेण वधं-प्राणातिपातमिच्छन्ति । तद्दानस्य प्राणातिपातमन्तरेणानुपपत्तेः । येऽपि च किल सूक्ष्मधियो वयमित्येवं मन्यमाना आगमसद्भावानभिज्ञाः प्रतिषेधयन्ति-निषेधयंति, तेऽप्यगीतार्थाः प्राणिनां वृत्तिच्छेदं-वर्त्तनोपायविघ्नं कुर्वन्तीति ॥ २० ॥ तदेवं राज्ञा अन्येन वेश्वरेण कूपतडागयागसत्रदानाद्युद्यतेन पुण्यसद्भावं पृष्टैर्मुमुक्षुभिर्यद्विधेयं तद्दर्शयितुमाह-" दुहओवि ते ण भासंति, अत्थि वा नत्थि वा पुणो । आयं रयस्स हेच्चा णं, निव्वाणं पाउणंति ते ॥ २१ ॥ " ' दुहओवीत्यादि ' यद्यस्ति पुण्यमित्येवमूचुः ततोऽनन्तानां सत्त्वानां सूक्ष्माणां बादराणां सर्वदा प्राणत्याग एव स्यात् । प्रीणनमात्रं तु पुनः स्वल्पानां स्वल्पकालीयमतोऽस्तीति न वक्तव्यम् । नास्ति पुण्यमित्येवं प्रतिषेधेऽपि तदर्थिनामन्तरायः स्यादित्यतो द्विधाप्यस्ति नास्ति वा पुण्यमित्येवं ते मुमुक्षवः साधवः पुनर्न भाषन्ते, किं तु पृष्टैः सद्धिर्मौनं समाश्रयणीयम् । निर्बन्धे त्वस्माकं द्विचत्वारिंशद्दोषवर्जित आहारः कल्पते, एवंविधविषये मुमुक्षूणामधिकार एव नास्तीति, उक्तंच-" सत्यं वप्रेषु शीतं शशिकरधवलं वारि पीत्वा प्रकामं, व्युच्छिन्नाशेषतृष्णाः प्रमुदितमनसः प्राणिसार्था भवन्ति । शोषं नीते जलौघे दिनकरकिरणैर्यान्त्यनन्ता विनाशं, तेनोदासीनभावं व्रजति मुनिगणः कूपवप्रादिकार्ये ॥ १ ॥ " तदेवमुभयथापि भाषिते रजसः-कर्मण आयो लाभो भवति अतस्तमायं रजसो मौनेनानवद्यभाषणेन वा हित्वा-त्यक्त्वा तेऽनवद्यभाषिणो निर्वाणं-मोक्षं प्राप्नुवन्ति ॥ २१ ॥ इति सूत्रकृताङ्गप्रथमश्रुतस्कन्धैकादशमोक्षमार्गाध्ययने २७१ प्रतौ १२४ पत्रे ॥ १२ ॥

औदयिकादिभावस्वरूपं जिज्ञासया लिख्यते-

" भावसमोसरणं पुण, णायव्वं छव्विहंमि भावंमि । अहवा किरिय अकिरिया, अण्णाणी चेव वेणइया ॥ २ ॥ " ' भावसमो-सरणमित्यादि ' भावानामौदयिकादीनां समवसरणमेकत्र मेलापको भावसमवसरणम् । तत्रौदयिको भाव एकविंशतिभेदः । तद्यथा-गतिश्चतुर्धा, कषायाश्चतुर्विधाः, एवं लिङ्गं त्रिविधम्, मिथ्यात्वाज्ञानासंयतत्वासिद्धत्वानि प्रत्येकमेकैकविधानि, लेश्याः कृष्णादिभेदेन षड्विधा भवन्ति १। औपशमिको द्विविधः, सम्यक्त्वचारित्रोपशमभेदात् २। क्षायोपशमिकोऽष्टादशभेदः । तद्यथा-ज्ञानं मतिश्रुतावधिमनः-

-पर्यायभेदाच्चतुर्विऽधम् । अज्ञानं मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानभेदात्त्रिविधिम्, दर्शनं चक्षुरचक्षुरवधिदर्शनभेदात्त्रिविधम्, लब्धिः दानलाभभोगोपभोग-वीर्यभेदात्पञ्चधा, सम्यक्त्वचारित्रसंयमासंयमाः प्रत्येकमेकैकप्रकारा इति ३। क्षायिको नवप्रकारः । तद्यथा-केवलज्ञानं केवलदर्शनं दानादिलब्धयः पञ्च सम्यक्त्वं चारित्रं चेति ४। जीवत्वभव्यत्वाभव्यत्वभेदात्पारिणामिकस्त्रिविधः ५। सान्निपातिकस्तु द्वित्रिचतुःपञ्चकसंयोगै-र्भवति । तत्र द्विकसंयोगः सिद्धस्य क्षायिकपारिणामिकभावद्वयसद्भावादवगन्तव्यः । त्रिकसंयोगस्तु मिथ्यादृष्टिसम्यग्दृष्ट्य-विरतविरतानामौदयिकक्षायोपशमिकपारिणामिकभावसद्भावादवगंतव्यः, तथा भवस्थकेवलिनोऽप्यौदयिकक्षायिकपारिणामिकभावसद्भावाद्विज्ञेय इति । चतुष्कसंयोगोपि क्षायिकसम्यग्दृष्टीनामौदयिकक्षायिकक्षायोपशमिकपारिणामिकभावसद्भावात्, तथौपशमिक-सम्यग्दृष्टीनामौद-यिकौपशमिकक्षायोपशमिकपारिणामिकभावसद्भावाच्चति । पञ्चकसंयोगस्तु क्षायिकसम्यग्दृष्टीनामुपशमश्रेण्यां समस्तोपशान्तचारित्रमोहानां भावपञ्चकसद्भावाद्विज्ञेय इति । तदेवं भावानां द्विकत्रिकचतुष्कपञ्चकसंयोगात्संभविनः सान्निपातिकभेदाः षड् भवन्ति । एत एव त्रिकसंयोगचतुष्कसंयोगगतिभेदात् पञ्चदशधा प्रदेशान्तरेऽभिहिताः । इति सूत्रकृताङ्गप्रथमश्रुतस्कन्धद्वादश-समवसरणाध्ययननिर्युक्तिगाथा २७१ प्रतौ १२७ पत्रे ॥ १३ ॥

अत्र केचित्कठिनहठाः प्राक्कृतकर्मैकप्राधान्यवादिनः केचिच्चोद्यमप्राधान्यैकवादिन एवं कालादिप्राधान्यवादिनोऽपि, तच्चासत् । जैनसिद्धान्तवेदिभिस्तु समुदाय एव प्राधान्येन वाच्य इत्यर्थसूचको विचारो लिख्यते-

इदानीं तेषां सम्यग्मिथ्यावादित्वं विभागेन यथा भवति तथा दर्शयितुमाह-" सम्मद्दिट्ठी किरियावादी मिच्छा य सेसगा वादी । जहिऊण मिच्छवायं, सेवह वायं इमं सच्चं ॥ ६ ॥ " ' सम्मद्दिट्ठीत्यादि ' सम्यगविपरीता दृष्टिर्दर्शनं पदार्थपरिच्छित्तिर्यस्याऽसौ सम्यग्दृष्टिः । कोऽसावित्याह-क्रियामस्तीत्येवंभूतां वदितुं शीलमस्येति क्रियावादी । अत्र क्रियावादीत्येतत् ' अत्थित्ति किरियवादी ' इत्यनेन प्राक्प्रसाधितं सदनूद्य सम्यग्दृष्टित्वं विधीयते, तस्यासिद्धत्वादिति । तथाहि-अस्ति लोकालोकविभागः । अस्त्यात्मा । अस्ति पुण्यपापविभागः । अस्ति तत्फलं स्वर्गनरकावाप्तिलक्षणम् । अस्ति कालः कारणत्वेनाऽशेषस्य जगतः प्रभववृद्धिस्थितिविनाशेषु साध्येषु तथा शीतोष्णवर्षावनस्पतिपुष्पफलादिषु चेति । तथा चोक्तम्-" कालः पचति भूतानि, कालः संहरते प्रजाः । कालः सुप्तेषु जागर्ति,

कालो हि दुरतिक्रमः ॥ १ ॥ " तथाऽस्ति स्वभावोऽपि कारणत्वेनाशेषस्य जगतः स्वो भावः स्वभाव इति कृत्वा, तेन हि जीवाजीवभव्यत्वाभव्यत्वमूर्त्तत्वामूर्त्तत्वानां स्वस्वरूपानुविधानात् । तथा धर्माधर्माकाशकालादीनां च गतिस्थित्यवगाहपरत्वापरत्वादिस्वरूपापादनादिति । तथाचोक्तम्-' क कण्टकानां ' इत्यादि । तथा नियतिरपि कारणत्वेनाश्रीयते । तथा पदार्थानां नियतेरेव निष्पन्नत्वात् । तथाचोक्तम्- "प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः, सोऽवश्यं भवति नृणां शुभोऽशुभो वा । भूतानां महति कृतेऽपि हि प्रयत्ने, नाभाव्यं भवति न भाविनोऽस्ति नाशः ॥ १ ॥ " तथा पुराकृतं तच्च शुभाशुभमिष्टानिष्टफलकारणम् । तथा चोत्कम्-" यथा यथा पूर्वकृतस्य कर्मणः, फलं निधानस्थमिहोपतिष्ठते । तथा तथा पूर्वकृतानुसारिणी, प्रदीपहस्तेव मतिः प्रवर्त्तते ॥ १ ॥ " तथा- " स्वकर्मणा युक्त एव, सर्वो ह्युत्पद्यते जनः । स तथा कृष्यते तेन, न यथा स्वयमिच्छति ॥ २ ॥ " इत्यादि । तथा पुरुषकारोऽपि कारणं, यस्मान्न पुरुषकारमन्तरेण किञ्चित्सिध्यति । तथा चोक्तम्-" न दैवमिति सञ्चिन्त्य, त्यजेदुद्योगमात्मनः । अनुद्यमेन कस्तैलं, तिलेभ्यः प्राप्तुमर्हति ? ॥ १ ॥ " तथा-" उद्यमाच्चारुचित्राङ्गि ! नरो भद्राणि पश्यति । उद्यमात्कृमिकीटोऽपि, भिनत्ति महतो द्रुमान् ॥ २ ॥ " तदेवं सर्वानपि कालादीन् कारणत्वेनाभ्युपगच्छंस्तथाऽऽत्मपुण्यपापपरलोकादिकं चेच्छन् क्रियावादी सम्यग्दृष्टित्वेनाभ्युपगन्तव्यः । शेषकास्तु वादा अक्रियावादा-ज्ञानवादवैनयिकवादा मिथ्यावादा इत्येवं द्रष्टव्याः, तथाहि-अक्रियावादी अत्यन्तनास्तिकोऽध्यक्षसिद्धं जीवाजीवादिपदार्थजातमपह्नुवन्मिथ्यादृष्टिरेव भवति अज्ञानवादी तु सति मत्यादिके हेयोपादेयप्रदर्शके ज्ञानपञ्चकेऽज्ञानमेव श्रेय इत्येवं वदन् कथं नोन्मत्तः स्यात् ? । तथा विनयवाद्यपि विनयादेव केवलाद् ज्ञानक्रियासाध्यां सिद्धिमिच्छन्नपकर्णयितव्यः । तदेवं विपरीतार्थाभिधायितयैते मिथ्यादृष्टयोऽवगन्तव्याः । ननु च क्रियावाद्यप्यशीत्युत्तरशतभेदोऽपि तत्र तत्र प्रदेशे कालादीनभ्युपगच्छन्नेव मिथ्यावादित्वेनोपन्यस्तः, तत्कथमिह सम्यग्दृष्टित्वेनोच्यत इति, उच्यते, स तत्रास्त्येव जीव इत्येवं सावधारणतयाऽभ्युपगमं कुर्वंस्तथा काल एवैकः सर्वस्यास्य जगतः कारणम् तथा स्वभाव एव नियतिरेव पूर्वकृतमेव पुरुषकार एवेत्येवमपरनिरपेक्षतयैकान्तेन कालादीनां कारणत्वेनाश्रयणान्मिथ्यात्वम् । तथाहि-अस्त्येव जीव इत्येवमस्तिना सह जीवस्य सामान्याधिकरण्याद्यदस्ति तज्जीव इत्येवं प्राप्तमतो निरवधारणपक्षसमाश्रयणादिह सम्यक्त्वमभिहितम् । तथा कालादीनामपि समुदितानां परस्परसव्यपेक्षाणां कारणत्वेनेहाश्रयणादिह सम्यक्त्वमभिहितमिति । ननु च कथं कालादीनां प्रत्येकं निरपेक्षाणां मिथ्यात्वस्वभावत्वे

॥१९॥

सति समुदिते सम्यक्त्वसद्भावः ?, न हि यत्प्रत्येकं नास्ति तत्समुदाये भवितुमर्हति, सिकतातैलवत् । नैतदस्ति । प्रत्येकं पद्मरागादिमणिष्वविद्यमानाऽपि रत्नावली समुदाये भवन्ती दृष्टा । न हि दृष्टेऽनुपपन्नं नामेति यत्किञ्चिदेतत् । इति सूत्रकृताङ्गप्रथमश्रुतस्कन्धद्वादशाध्ययने २७१ प्रतौ १३४ पत्रे ॥ १४ ॥

अत्र केषाञ्चिदन्यदर्शनिनामपि ज्योतिर्निमित्तशकुनादिभिर्भाविवस्तुसंवादीनि ज्ञानान्यालोक्याविदितपरमार्थैरहो एतेऽप्यतिशयवन्तः प्रशस्या इति व्यामोहो न विधेयः । तेषां तद्गतानामपि ज्योतिर्निमित्तादिज्ञानानां पूर्वान्तःपातित्वेन गणधरप्रणीतत्वात् । तत्र चागमः-

॥20॥

" संवच्छरं सुविणं लक्खणं च, निमित्तदेहं च उपाइयं च । अट्ठंगमेयं बहवे अहित्ता, लोगंसि जाणंति अणागयाइं ॥ ९ ॥ "

'संवत्सरमित्यादि' सांवत्सरं ज्योतिषं, स्वप्नप्रतिपादको ग्रन्थः स्वप्नस्तमधीत्य, लक्षणं श्रीवत्सादिकं, च शब्दादान्तरबाह्यभेदभिन्नं, निमित्तं वाक्प्रशस्तशकुनादिकम्, देहे भवं दैहं मषतिलकादिकम्, उत्पाते भवमौत्पातिकमुल्कापातदिग्दाहनिर्घातभूमिकंपादिकम्, तथाऽष्टाङ्गं च निमित्तमधीत्य । तद्यथा- भौममुत्पातं स्वप्नं आन्तरिक्षं आङ्गं स्वरं लक्षणं व्यञ्जनं इत्येवंरूपं नवमपूर्वतृतीयाचारवस्तुविनिर्गतं सुखदुःखजीवितमरणलाभालाभादिसंसूचकं निमित्तमधीत्य लोकेऽस्मिन्नतीतानि वस्तूनि अनागतानि च जानन्ति परिच्छिदन्ति । न च शून्यादिवादेष्वेतद्घटते, तस्मादप्रमाणमेव तैरभिधीयते, इत्येवं व्याख्याते सति आह परः-ननु व्यभिचार्यपि श्रुतमुपलभ्यते । तथाहि-चतुर्दशपूर्वविदामपि षट्स्थानपतित्वमागम उद्घुष्यते, किं पुनरष्टाङ्गनिमित्तशास्त्रविदाम् ? । अत्र चाङ्गेर्वर्जितानां निमित्तशास्त्राणामानुष्टुभेन छंदसाऽर्द्धत्रयोदशशतानि सूत्रम्, तावन्त्येव सहस्राणि वृत्तिः, तावत्प्रमाणलक्षा परिभाषेति । अङ्गस्यार्द्धत्रयोदशसहस्राणि सूत्रम्, तावत्परिमाणलक्षा वृत्तिः, अपरिमितं वार्त्तिकमिति ॥ ९ ॥ तदेवमष्टाङ्गनिमित्तवेदिनामपि परस्परतः षट्स्थानपतित्वेन व्यभिचारित्वमत इदमाह-" केई निमित्ता तहिया भवंति, केसिंच तं विप्पडिएति णाणं । ते विज्जभावं अणहिज्जमाणा, आहंसु विज्जापरिमोक्खमेव । (जाणाम लोगंसि वयंति मंदा) ॥ १० ॥ " 'केई णिमित्ता इत्यादि ' छान्दसत्वात्प्राकृतशैल्या वा लिङ्गव्यत्ययः कानिचिन्निमित्तानि तथ्यानि सत्यानि भवन्ति । केषाञ्चित्तु निमित्तानां निमित्तवेदिनां वा बुद्धिवैकल्यात्तथाविधक्षयोपशमाभावेन तन्निमित्तज्ञानं विपर्यासं-व्यत्ययमेति । आर्हतानामपि निमित्तव्यभिचारः समुपलभ्यते, किं पुनरन्यतीर्थिकानां (स्तीर्थिकानाम्) । तदेवं निमित्तशास्त्रस्य व्यभिचारमुपलभ्य ते अक्रियावादिनो विद्यासद्भावमनधीयमानाः सन्तो

निमित्तं तथा चान्यथा च भवतीति मत्वा ते ' आहंसु विज्जा परिमोक्खमेव ' विद्यायाः-श्रुतस्य व्यभिचारेण तस्य परिमोक्षं-परित्यागमाहुरुक्तवन्तः । यदि वा क्रियाया अभावाद्विद्यया-ज्ञानेनैव मोक्षं सर्वकर्मच्युतिलक्षणमाहुरिति । क्वचिच्चरमपादस्यैवं पाठः-' जाणाम लोगंसि वयंति मंदा त्ति ' विद्यामनधीत्यैव स्वयमेव लोकमस्मिन् वा लोके भावान्वयं जानीमः, एवं मन्दा-जडा वदन्ति । नच निमित्तस्य तथ्यता । तथाहि-कस्यचित्क्वचित्क्षुतेऽपि गच्छतः कार्यसिद्धिदर्शनात्, शकुनसद्भावेपि कार्यविघातदर्शनात्, अतो निमित्तबलेनादेशविधायिनां मृषावाद एव केवलमिति । नैतदस्ति । नहि सम्यगधीतस्य श्रुतस्यार्थे विसंवादोऽस्ति । यदपि षट्स्थानपतित्वमुद्घुष्यते तदपि पुरुषाश्रितक्षयोपशमवशेन ।

॥२१॥

। नच प्रमाणाभासव्यभिचारे सम्यक्प्रमाणव्यभिचारशङ्का कर्तुं युज्यते । तथाहि-मरुमरीचिकाजले (निचये) जलग्राहिप्रत्यक्षं व्यभिचरतीतिकृत्वा किं सत्यजलग्राहिणोऽपि प्रत्यक्षस्य व्यभिचारो युक्तिसङ्गतो भवति ? । नहि मशकवर्त्तिरग्निसिद्धावुपदिश्यमाना व्यभिचारिणीति सत्यधूमस्यापि व्यभिचारो । नहि सुविवेचितं कार्यं कारणं व्यभिचरतीति । ततश्च प्रमातुरयमपराधो न प्रमाणस्य । एवं सुविवेचितं निमित्तश्रुतमपि न व्यभिचारीति । यश्च क्षुतेऽपि कार्यसिद्धिदर्शनेन व्यभिचारः शङ्क्यते, सोऽनुपपन्नः । तथाहि-कार्याकूतात्क्षुतेऽपि गच्छतो या कार्यसिद्धिः साऽपान्तरालेतरशोभननिमित्तबलात्सञ्जातेत्येवमवगन्तव्यम् । शोभननिमित्तप्रस्थितस्यापीतरनिमित्तबलात्कार्यव्याघात इति । तथा च श्रुतिः-किल बुद्धः स्वशिष्यानाहुयोक्तवान् यथा-द्वादशवार्षिकमत्र दुर्भिक्षं भविष्यत्यतो देशान्तराणि गच्छत यूयम् । ते च तद्वचनाद्गच्छन्तस्तेनैव प्रतिषिद्धाः यथा-मा गच्छत यूयम् । इहाद्यैव पुण्यवान् महासत्त्वः सञ्जातः, तत्प्रभावात्सुभिक्षं भविष्यति । तदेवमन्तरापरनिमित्तसद्भावान्न तद्व्यभिचारशङ्केति स्थितम् । इति श्रीसूत्रकृताङ्गप्रथमश्रुतस्कन्धे द्वादशे समवसरणाध्ययने २७१ प्रतौ १४७ पत्रे ॥ १५ ॥

एतेन ये केचन वदन्ति शकुनादिनिमित्तमनैकान्तिकत्वाद्व्यभिचारित्वाच्चान्वयव्यतिरेकाभ्यामप्रमाणमिति तेऽपि निरस्ता वेदितव्याः ॥

केचिच्चाऽत्रामुद्राज्ञाननिद्रामुद्रितान्तःकरणाः स्वमतविशेषदर्शनाय च स्त्रीषु नाग्न्यमेव विशेषः, इति न्यायमङ्गीकृत्य यथोक्तावसरविधेयामपि वाङ्मात्रेण निद्रां निषिद्ध्य स्वपाण्डित्यं दर्शयन्ति । स च गृहज्वालनात्कीर्त्युत्पादनमयमेव न्यायः, शास्त्रे निद्राकालस्याप्युक्तत्वात्, स चायं सूत्रार्थाभ्यां लिख्यते-

" संजमंजायामायावत्तियं बिलमिव पन्नगभूतेणं अप्पाणेणं आहारं आहारेज्जा । अन्नं अन्नकाले, पाणं पाणकाले, वत्थं वत्थकाले,

॥२१॥

लेणं लेणकाले, सयणं सयणकाले, से भिक्खू मायन्ने अन्नयरं दिसं अणुदिसं वा पडिवन्ने धम्मं आइक्खे विभए किट्टे उवट्ठिएसु वा अणुवट्ठिएसु वा सुस्सूसमाणेसु पवेदए ॥ " इति । वृत्तिर्यथा-संयमयात्रायां मात्रा संयमयात्रामात्रा, यावत्याऽऽहारमात्रया संयमयात्रा भवति सा तथा तया संयमयात्रामात्रया वृत्तिर्यस्य तत्तथा । तदपि बिलप्रवेशपन्नगभूतेनात्मनाऽऽहारमाहरेत् । इदमुक्तं भवति । यथा-अहिर्बिलं प्रविशंस्तूर्णं प्रविशति, एवं साधुनाप्याहारस्तत्स्वादमनास्वादयता शीघ्रं प्रवेशयितव्य इति यदिवा सर्पेणेवाहारो लब्ध्वाऽनास्वादमभ्यवहार्यत इति । तदेव चाहारादिकं दर्शयितुमाह- अन्नं भक्तं अन्नकाले सूत्रार्थपौरुष्यनन्तरकाले, भिक्षाकाले प्राप्ते पुरःपश्चात्कर्मपरिहृतं भवति । यथोक्तभिक्षाटनेन ग्रहणकालावाप्तं भैक्ष्यं परिभोगकाले भूञ्जीत । तथा पानकं पानकाले, नातितृषितो भूञ्जीत, नाऽप्यतिबुभुक्षितः पानकं पिबेदिति । वस्त्रं वस्त्रकाले गृह्णीयादुपभोगं वा कुर्यात् । तथा लयनं-गृहादिकमाश्रयस्तस्य वर्षास्ववश्यमुपादानमन्यदा त्वनियमः । तथा शय्यतेऽस्मिन्निति शयनं संस्तारकः, स च शयनकाले । तत्राप्यगीतार्थानां प्रहरद्वयं निद्राविमोक्षो गीतार्थानां तु प्रहरमेकमिति । स भिक्षुराहारोपधिशयनस्वाध्यायध्यानादीनां मात्रां जानातीति तद्विधिज्ञः सन्नन्यतरां दिशं अनुदिशं वा प्रतिपन्नः समाश्रितो धर्ममाख्यापयेत्प्रतिपादयेत, येन यद्विधेयं तद्यथायोगं विभजेत्, धर्मफलानि च कीर्त्तयेदाविर्भावयेत्, तच्च धर्मकर्मकथनं परहितार्थप्रवृत्तेन साधुना सम्यगुपस्थितेष्वनुपस्थितेषु वा कौतुकादिप्रवृत्तेषु शुश्रूषमाणेषु-श्रोतुं प्रवृत्तेषु स्वपरहिताय प्रवेदयेदावेदयेत् । इति सूत्रकृताङ्गद्वितीयश्रुतस्कन्धप्रथमपुण्डरीकाध्ययने २७१ प्रतौ १९१ पत्रे ॥ १६ ॥

यः साधूनामवज्ञाकारी भवति स आगाढमिथ्यादृष्टिरुच्यते, इत्यभिप्रायो लिख्यते-

" से एगइओ समणं वा माहणं वा दिस्सा णाणाविधेहिं पावकम्मेहिं अत्ताणं उवक्खाइत्ता भवइ । अदुवा णं अच्छराते आफालेत्ता भवइ । अदुवाणं फरुसं वइत्ता भवइ । कालेणवि से अणुपविट्ठस्स असणं वा पाणं वा जाव नो दवावेत्ता भवइ । जे इमे भवंति वोन्नमंता भारोक्कंता अलसगा वसलगा किवणगा पव्वयंति " इति । वृत्तिर्यथा-सांप्रतं विपर्यस्तदृष्टयो गाढमिथ्यादृष्टयोऽभिधीयन्ते 'से एगइओ' इत्यादि । अथैकक: कश्चिदभिगृहीतमिथ्यादृष्टिरभद्रकः साधुप्रत्यनीकतया श्रमणादीनां निर्गच्छतां प्रविशतां वा स्वतश्च निर्गच्छन् प्रविशन् वा नानाविधैः पापोपादानभूतैः कर्मभिरात्मानमुपख्यापयिता भवतीति । एतदेव दर्शयति-अथवेत्ययमुत्तरापेक्षया पक्षान्तरोपग्रहार्थः । क्वचित्साधुदर्शने

सति मिथ्यात्वोपहतदृष्टितया अपशकुनोऽयमित्येवं मन्यमानः सन् दृष्टिपथादपसारयन् साधुमुद्दिश्यावज्ञयाऽप्सरायाः-चप्पुटिकाया आस्फालयिता भवति । अथवा तत्तिरस्कारमापादयन् परुषं वचो ब्रूयात् । तद्यथा-ओदन (उदर) मुंड ! निरर्थककायक्लेशपरायणदुर्बुद्धे ! अपसराग्रतस्तदसौ भृकुटिं वा विदध्यादसभ्यं वा ब्रूयात् । तथा भिक्षाकालेनापि से-तस्य भिक्षोरन्येभ्यो भिक्षाचरेभ्योऽनुपश्चात्प्रविष्टस्य सतोऽत्यन्तदुष्टतयाऽन्नादेर्नो दापयिता भवति, अपरं च दानोद्यतं निषेधयति । तत्प्रत्यनीकतयैतच्च ब्रूते-ये इमे पाखण्डिका भवन्ति ते एवंभूता भवन्तीत्याह-' वोण्णत्ति' तृणकाष्ठहारादिकं अधमं कर्म, तद्विद्यते येषां ते तद्वन्तः । तथा भारेण कुटुम्बभारेण पोट्टलिकादिभारेण वाऽऽक्रान्ताः-पराभग्नाः सुखलिप्सवोऽलसा क्रमागतं कुटुम्बकं पालयितुसमर्थास्ते पाखण्डव्रतमाश्रयन्ति । तथा चोक्तम् -"गृहाश्रमपरो धर्मो, न भूतो न भविष्यति । पालयन्ति नराः शूराः, क्लीवाः पाखण्डमाश्रिताः ॥ १ ॥" तथा-' वसलगा ' इति, वृषला अधमाः शूद्रजातयस्त्रिवर्गप्रतिचारकास्तथा कृपणाः क्लीवा अकिञ्चित्कराः श्रमणा भवन्ति प्रव्रज्यां गृहणन्तीति । इति सूत्रकृताङ्गद्वितीयश्रुतस्कन्धद्वितीयक्रियास्थानाख्याध्ययने २७१ प्रतौ २०४ पत्रे ॥ १७ ॥

एतेन ये केचिज्जैनश्राद्धतया विदिता अपि मुनीनामाहारादि निषेधयन्ति, साधुतया विदिताश्च ये केचन तमुपदेशं ददति ते उभयेऽपि आगाढमिथ्यात्विनो द्रष्टव्याः ।

अपरे च केचन केवलिनामाहारमनागमिकमयौक्तिकं च मन्वते ततस्तदवबोधाय तत्र युक्त्यागमौ लिख्येतें-

" अंतोमुहुत्तमद्धा, सेलेसीए भवे अणाहारो । सादीयमणिधणं पुण, सिद्धाणाहारगा होंति ॥ ८ ॥" ' अंतोमुहुत्तमित्यादि ' । शैलेश्यवस्थाया आरभ्य सर्वथाऽनाहारकः सिद्धावस्थाप्राप्तावनन्तमपि कालं यावदिति । पूर्वं तु कावलिकव्यतिरेकेण प्रतिसमयमाहारकः । कावलिकेन तु कादाचित्क इति । ननु केवलिनो घातिकर्मक्षयेऽनन्तवीर्यत्वान्न भवत्येव कावलिकाहारः । तथाहि-आहारादाने यानि वेदनीयादीनि षट् कारणान्यभिहितानि तेषां मध्ये एकमपि न विद्यते केवलिनि, तत्कथमसावाहारं बहुदोषदुष्टं गृहणीयात् ? । तत्र न तावत्तस्य वेदनोत्पद्यते, तद्वेदनीयस्य दग्धरज्जुस्थानिकत्वात्सत्यामपि न तस्य तत्कृता पीडा, अनन्तवीर्यत्वात् । वैयावृत्यकारणं तु भगवति सुरासुरनराधिपतिपूज्यत्वे न संभाव्यते एवेति । ईर्यापथः(थं) केवलज्ञानावरणपरिक्षयात् सम्यगवलोकयत्येवासौ । संयमस्तु तस्य

॥23॥

॥२४॥

यथाख्यातचारित्रिणो निष्ठितार्थत्वादनन्तवीर्यत्वान्नाहारग्रहणाय कारणीभवति । प्राणवृत्तिस्तु तस्यानपवर्त्तित्वादायुषोऽनन्तवीर्यत्वाच्चान्यथा सिद्धैव । धर्मचिंतावसरस्त्वपगतो निष्ठितार्थत्वात् । तदेवं केवलिनः कावलिक आहारो बह्वपायत्वान्न कथञ्चिद्घटते इति स्थितम् । अत्रोच्यते । तत्र यत्तावदुक्तं घातिकर्मक्षये केवलज्ञानोत्पत्तावनन्तवीर्यत्वान्न केवलिनो भुक्तिरिति । तदागमानभिज्ञस्य तत्त्वविचाररहितस्य युक्तिहृदयमजानतो वचनम् । तथाहि-यदाहारनिमित्तं वेदनीयं कर्म तत्तस्य तथैवास्ते । किमिति शारीरी स्थितिः प्राक्तनी न भवति ? प्रमाणं च-अस्ति केवलिनो भुक्तिः समग्रसामग्रीकत्वात्पूर्वभुक्तिवत् । सामग्री चेयं प्रक्षेपाहारस्य, तद्यथा-पर्याप्तत्वं वेदनीयोदयः आहारपाक्तिनिमित्तं तैजसशरीरं दीर्घायुष्कत्वं चेति । तानि च समस्तान्यपि केवलिनि सन्ति । यदपि दग्धरज्जुस्थानिकत्वमुच्यते वेदनीयस्य तदप्यनागमिकमयुक्तिसङ्गतं च, आगमे ह्यत्यन्तोदयः सातस्य केवलिन्यभिधीयते, युक्तिरपि-यदि घातिकर्मक्षयाद् ज्ञानादयस्तस्याऽभूवन् वेदनीयोद्भवायाः क्षुधः किमायातं ? येनाऽसौ न भवति । न तयोश्छायातपयोरिव सहानवस्थानलक्षणो नापि भावाभावयोरिव परस्परपरिहारलक्षणः कश्चिद्विरोधोऽस्तीति । सातासातयोश्चान्तर्मुहूर्त्तपरिवर्त्तमानतया यथा सातोदय एवमसातोदयोऽपीत्यनन्तवीर्यत्वे सत्यपि शरीरबलापचयः क्षुद्वेदनीयोद्भवा पीडा च भवत्येव । न चाहारग्रहणे तस्य किञ्चित्क्षीयते, केवलमाहोपुरुषिकामात्रमेवेति । यदप्युच्यते वेदनीयस्योदीरणाया अभावात्प्रभूततरपुद्गलोदयाभावः, तदभावाच्चात्यन्तं वेदनीयपीडाऽभावः, इति वाङ्मात्रम् । तथाहि-अविरतसम्यग्दृष्टयादिष्वेकादशसु गुणस्थानकेषु वेदनीयस्य गुणश्रेणीसद्भावात्प्रभूतपुद्गलोदयसंभवः किं तेषु प्राक्तनेभ्योऽधिकपीडासद्भाव ? इति । अपि च यो जिने सातोदयस्तीव्रः किमसौ प्रचुरपुद्गलोदये ? नेत्यतो यत्किञ्चिदेतदिति । तदेवं सातोदयवदसातोदयोऽप्यनिवारित इति, तयोरल्पमुहूर्त्तकालेन परिवर्त्तमानत्वात्, यदपि कैश्चिदभिधीयते-विपच्यमानतीर्थकरनाम्नो देवस्य च्यवनकाले षण्मासकालं यावदत्यन्तं सातोदय एवेति । असावपि यदि स्यान्न नो बाधायै, केवलिनां भुक्तेरनिवारितत्वात् । यदप्युच्यते आहारविषयाकाङ्क्षारूपा क्षुद्भवति, अभिकाङ्क्षा चाहारपरिग्रहबुद्धिः, सा च मोहनीयविकारस्तस्य चापगतत्वात् केवलिनो न भुक्तिरिति । एतदप्यसमीचीनम् । यतो मोहनीयविपाका क्षुन्न भवति । तद्विपाकस्य प्रतिपक्षभावनया प्रतिसंख्यानेन निवर्त्त्यमानत्वात् । तथाहि-कषायाः प्रतिकूलभावनया निवर्त्तन्ते । तथा चोक्तम्-" उवसमेण हणे कोहं, माणं मद्दवया जिणे । मायं चऽज्जवभावेण, लोहं संतुट्ठिए जिणे ॥ १ ॥ " मिथ्यात्वसम्यक्त्वयोश्च परस्परनिवृत्तिर्भावनाकृता प्रतीतैव ।

वेदोदयोऽपि विपरीतभावनया निवर्त्तते । तदुक्तम्- " काम ! जानामि ते मूलं, सङ्कल्पात्किल जायसे । ततस्तं न करिष्यामि, ततो मे न भविष्यसि ॥ १ ॥ " हास्यादिषट्कमपि चेतोविकाररूपतया प्रतिसंख्यानेन निवर्त्तते । क्षुद्वेदनीयं तु रोगशीतोष्णादिवज्जीवपुद्गलविपाकितया न प्रतीपवासनामात्रेण विनिवर्त्तते अतो न मोहस्वभावा क्षुदिति । तदेवं व्यवस्थिते यत्कैश्चिदाग्रहगृहीतैरभिधीयते यथा-" अपवर्त्तते कृतार्थं, नायुर्ज्ञानादयो न हीयन्ते । जगदुपकृतावनन्तं, वीर्यं किं गततृषो भुक्तिः ॥ १ ॥ " इति । तदेतत्प्लवते, यतश्छद्मस्थावस्थायामप्येतदस्तीति तत्रापि किमिति भुङ्क्ते ? तत्र समस्तवीर्यान्तरायक्षयाभावाद्भुक्तिसद्भावः इति चेत्तदयुक्तम् । यतः-किं तत्रायुष्कस्यापवर्त्तनं स्यात् ? किं वा चतुर्णां ज्ञानानां काचिद्धानिः स्यात् ? येन भुक्तिः, इति । तस्माद्यथा दीर्घकालस्थितेरायुष्कं कारणम् एवमाहारोऽपि । यथा सिद्धिगतेर्व्युपरतक्रियस्य ध्यानस्य चरमक्षणः कारणम् एवं सम्यक्त्वादिकमपीति । अनन्तवीर्यताऽपि तस्याहारग्रहणे सति न विरुद्ध्यते । यथा तस्य देवच्छन्दादीनि विश्रामकारणानि गमननिषीदनानि च भवन्ति एवमाहारक्रियाऽपि विरोधाभावात्, न ह्यत्र बलवत्तरस्य वीर्यवतोऽल्पीयसी क्षुदिति । एवं व्यवस्थिते यत्किञ्चिदेतत् । अपि च-एकादशपरीषहा वेदनीयकृता जिने प्रादुष्यन्ति । अपरे त्वेकादश ज्ञानावरणीयादिकृतास्तत्क्षयेऽपगता इतीयमप्युपपत्तिः केवलिनि भुक्तिं साधयति । तथाहि-क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्यानिषद्याशय्याक्रोशवधयाच्ञालाभरोग-तृणस्पर्शमलसत्कारपुरस्कारप्रज्ञाज्ञानदर्शनानि, इत्येते द्वाविंशतिः मुमुक्षूणां परिषोढव्याः परीषहाः । तेषां च मध्ये ज्ञानावरणीयोत्थौ प्रज्ञाज्ञानाख्यौ, दर्शनमोहनीयसंभवो दर्शनपरीषहो, अन्तरायोत्थोऽलाभपरीषहः, चारित्रमोहनीयसंभवास्त्वमी-नाग्न्यारतिस्त्रीनिषद्याऽऽक्रोशया-च्यासत्कारपुरस्काराः, एते चैकादशापि जिने केवलिनि न संभवन्ति । तत्कारणानां कर्मणामपगतत्वात्, न हि कारणाभावे क्वचित्कार्योत्पत्तिः, शेषास्त्वेकादश जिने संभवन्ति, तत्कारणस्य वेदनीयस्य विद्यमानत्वात् । ते चामी-क्षुत्पिपासाशीतोष्णदंशमशकचर्याशय्यावधरोगतृणस्पर्शमलाख्याः, एते च वेदनीयप्रभवास्तत्र केवलिनि विद्यन्ते । न च निदानानुच्छेदे निदानिन उच्छेदः संभाव्यते; अतः केवलिनि क्षुद्वेदनीयादिपीडा संभाव्यते । केवलमसावनन्तवीर्यत्वान्न विह्वलीभवति । न चासौ निष्ठितार्थो निष्प्रयोजनमेव पीडामधिसहते । न च शक्यते वक्तुम् एवंविधमेव तस्य भगवतः शरीरं यदुत क्षुत्पीडया न बाध्यते आहारमन्तरेण च वर्त्तते, यथा स्वभावेनैव स्वेदादिरहितम् एवं प्रक्षेपाहाररहितमिति । एतच्चाप्रमाणकत्वादपकर्णनीयम् । अपि च केवलोत्पत्तेः प्राग्भुक्तेरभ्युपगमात्केवलोत्पत्तावपि तदेवौदारिकं शरीरमाहाराद्युपस्कार्यं, अथान्यथाभावः

कैश्चिदुच्यते असावपि युक्तिरहितत्वादभ्युपगमकमात्र एवेति । तदेवं देशोनपूर्वकोटिकालस्य केवलिस्थितेः संभवादौदारिकशरीरस्थितेश्च यथायुष्कं कारणमेवं प्रक्षेपाहारोऽपि, तथाहि-तैजसशरीरेण मृदूकृतस्याभ्यवहृतस्य द्रव्यस्य स्वपर्याप्त्या परिणामितस्योत्तरोत्तरपरिणाम-क्रमेणौदारिकशरीरिणामनेन प्रकारेण क्षुदुद्भवो भवति वेदनीयोदये सतीयं च सामग्री सर्वाऽपि भगवति केवलिनि संभवति तत्किमर्थमसौ न भुङ्क्त इति ? । न च घातिचतुष्टयस्य सहकारिकारणभावोऽस्ति येन तदभावात्तदभाव इत्युच्येत, तदेवं संसारस्था जीवा विग्रहगतौ जघन्येनैकं समयम्, उत्कृष्टतः समयत्रयम् । भवस्थकेवली समुद्घातावस्थः समयत्रयमनाहारकः । शैलश्यवस्थायां त्वन्तर्मुहूर्त्तं सिद्धास्तु सादिकमपर्यन्तमनाहारका इति स्थितम् । इति सूत्रकृताङ्गद्वितीयश्रुतस्कन्धतृतीयाहारपरिज्ञाध्ययने २७१ प्रतौ २१६।२१७ पत्रे ॥ १७ ॥

एते एव च स्त्रीणां मुक्तिं न मन्वते । तत्पूर्वोत्तरपक्षौ तु इहैवाग्रे वक्ष्यमाणान्नन्दीविचारतरङ्गादवसेयौ ॥ १८ ॥

ननु मूर्तामूर्त्तयोर्जीवकर्मणोः कथं सम्बन्धः येऽपि च क्षीरनीरसुवर्णमृत्तिकादयो दृष्टान्तास्तेऽपि वैधर्म्याध्यासिताः, तत्राभयोर्मूर्त्तत्वात्, इयं हि शङ्का भूयसां चेतांसि मलिनयति । ततस्तदाशङ्कानिरासाय युक्तिसन्दर्भित आगमो लिख्यते-

" नत्थि बंधे व मोक्खे वा, नेवं सन्नं निवेसए । अत्थि बंधे व मोक्खे वा, एवं सन्नं निवेसए ॥ १५ ॥ " वृत्तिर्यथा-बन्धः प्रकृतिस्थित्यनुभावप्रदेशात्मकतया कर्मपुद्गलानां जीवेन स्वव्यापारतः स्वीकरणम् । स चामूर्त्तस्यात्मनो गगनस्येव न विद्यते, इत्येवं संज्ञां नो निवेशयेत् । तथा तदभावाच्च मोक्षस्याप्यभावः, इत्येवमपि संज्ञां नो निवेशयेत् कथं तर्हि संज्ञां निवेशयेत्, ? इत्युत्तरार्द्धेन दर्शयति-अस्ति बन्धः कर्मपुद्गलैर्जीवस्येत्येवं संज्ञां निवेशयेदिति । यत्तूच्यते-मूर्त्तस्यामूर्तिमता सम्बन्धो न युज्यते इति, तदयुक्तम् । आकाशस्य सर्वव्यापितया पुद्गलैरपि सम्बन्धो दुर्निवार्यः, तदभावे तद्व्यापित्वमेव न स्यात् । अन्यच्चास्य विज्ञानस्य हृत्पूरमदिरादिना विकारः समुपलभ्यते, न चासौ सम्बन्धमृते, अतो यत्किञ्चिदेतदिति । अपि च संसारिणामसुमतां सदा तैजसकार्मणशरीरसद्भावादात्यन्तिकममूर्त्तत्वं न भवतीति । तथा तत्प्रतिपक्षभूतो मोक्षोऽप्यस्ति, तदभावे बन्धस्याप्यभावः स्यादित्यतोऽशेषबन्धनापगमस्वभावो मोक्षोऽप्यस्ति, इत्येवं संज्ञां निवेशयेत् । इति सूत्रकृताङ्गद्वितीयश्रुतस्कन्धपञ्चमाचारश्रुताख्याध्ययने २७१ प्रतौ २३६ पत्रे ॥ १९ ॥

ननु भगवत्यादौ ऋषभदत्तादय एकादशाङ्गिनः श्रूयन्ते, तत्सम्बन्धाश्चैकादशाङ्गान्तःपातिनः, कथमिदं घटते ? कथं वा द्वादशाङ्ग्या

नित्यत्वं घटते ?। एतच्छङ्कातङ्कापनोदाय लिख्यते-

" कामं दुवालसंगं, जिणवयणं सासतं महाभागं । सव्वज्झयणाणि तथा, सव्वक्खरसन्निवाया य ॥ ५ ॥ तहवि य कोई अत्थो, उप्पज्जति तम्मि तस्मि समयंमि । पुव्वं भणिओऽणुमओ य, होइ इसिभासितेसु जहा ॥ ६ ॥ " ननु शाश्वतमिदं द्वादशाङ्गमपि गणिपिटकमागमे आर्द्रककथानकं तु श्रीवर्द्धमानतीर्थावसरे तत्कथमस्य शाश्वतत्वमित्याशंक्याह ॥ " काममित्यादि काममित्येतदभ्युपगमे इष्टमेवैतदस्माकम् । तद्यथा-द्वादशाङ्गमपि जिनवचनं नित्यं शाश्वतं महाभागं-महानुभावम्, आमर्षौषध्यादिऋद्धिसमन्वितत्वान्न केवलमिदम् ॥२७॥ सर्वाण्यप्यध्ययनान्येवंभूतानि । तथा सर्वाक्षरसन्निपाताश्च-मेलापका द्रव्यार्थादेशान्नित्या एवेति । ननु मतानुज्ञानाम निग्रहस्थानं भवत इत्याशङ्क्याह-'तहवियइत्यादि' । यद्यपि सर्वमपीदं द्रव्यार्थतः शाश्वतम्, तथाऽपि कोऽप्यर्थस्तस्मिन् समये तथा क्षेत्रे कुतश्चिदार्द्रकादेः सकाशादाविर्भावमास्कन्दति, स तेन व्यपदिश्यते । तथा पूर्वमप्यसावर्थोऽन्यमुद्दिश्योक्तोऽनुमतश्च भवति, ऋषिभाषितेषु उत्तराध्ययनेषु यथा । इति सूत्रकृताङ्गद्वितीयश्रुत-स्कन्धषष्ठाध्ययननिर्युक्तौ २७१ प्रतौ २४३ पत्रे ॥ २० ॥

केचिच्चात्रासदभिमानकवलितविशदाशयाः पण्डितंमन्याः परेषां भोजनाद्यनुकम्पादानमपि निषेधयन्ति, वदन्ति चासद्वचनानि, मण्डूकपिण्डेन भुजगभोजनतुल्यं तद्दानमित्यादीति तच्चाज्ञानम्, यतोऽनुकम्पादानस्य श्रीजिनशासने कुत्राप्यनिषिद्धत्वात् । प्रत्युत श्रीराजप्रश्नीये केशी गणधरः श्रीप्रदेशिनं प्रति पूर्वं रमणीयो भूत्वा पश्चादरमणीयो मा भूया इत्यादिवाक्यैरनुकम्पादानस्य विहितत्वेन प्रतीयमानत्वात् । नच वाच्यम् । ' सुहिएसु अ दुहिएसु अ, जा मे अस्संजएसु अणुकंपा । रागेण व दोसेण व, तं निंदे तं च गरिहामि ' । इत्यत्र तद्दानस्य प्रतिक्रान्तत्वादिति । तत्र निषेधतात्पर्यस्य रागद्वेषयोरेव विश्रान्तत्वात् । तथा चात्रापि तद्धर्मप्रशंसा पूर्वं सद्धर्मनिन्दापूर्वं च यदसंयतिभोजनं तदेव निषिद्धम् । विशेषणस्य विशेषार्थोद्दीपकत्वात् । सा गाथा चेयम्-

" दयावरं धम्म दुगुंछमाणो, वहावहं धम्म पसंसमाणो । इक्कंपि जो भोअयती असीलं, णिवो णिसं जाति कुतोऽसुरेहिं ? ॥ ४५ ॥ " दया-प्राणिषु कृपा तया वरः-प्रधानो यो धर्मः तमेवंभूतं धर्मं जुगुप्समानो-निन्दन् । तथा वधं प्राण्युपमर्दमावहतीति वधावहः तं तथाभूतं धर्मं प्रशंसन्-स्तुवन्नेकमप्यशीलं-निर्व्रतं षट्जीवकायोपमर्देन यो भोजयेत्, किं पुनः प्रभूतान् । नृपो राजन्यो वा यः कश्चिन्मूढमतिधार्मिकमात्मानं ॥२७॥

मन्यमानः; स वराको निशेव नित्यान्धकारत्वान्निशा-नरकभूमिस्तां याति । कृतस्तस्यासुरेष्वधमदेवेष्वपि प्राप्तिः । इति सूत्रकृताङ्गद्वितीयश्रुत-स्कन्धषष्ठाध्ययने २७१ प्रतौ २५४ पत्रे ॥ २१ ॥

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवार्द्धितश्रीजिनधर्मरसालसालातिशालिशीलश्रीहीरविजयसूरीश्वरशिष्योपाध्याय-श्रीकीर्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे विशेषसमुच्चयापरनाम्नि श्री सूत्रकृताङ्गकियद्विचारसमुच्चयनामा द्वितीयस्तरङ्गः ॥ २ ॥

। इति श्रीविचाररत्नाकरे द्वितीयस्तरंगः सम्पूर्णः ।

॥ अथ तृतीयस्तरङ्गः ॥

"रसाश्रितं दुर्मदवादिवादग्रीष्मोष्मकाषङ्गषमाप्तशब्दम् ।
सतां सदा शस्यफलाप्तिहेतुं, प्रीत्याऽऽश्रये श्रीजिनशासनाब्दम् ॥ १ ॥"

अथ क्रमायाताः श्रीस्थानाङ्गविचारा लिख्यन्ते-तत्र प्रथमं कृष्णपाक्षिकशुक्लपाक्षिकयोः स्वरूपजिज्ञासया लेश्यास्वरूपविषये मतान्तरजिज्ञासया च सटीकं सूत्रद्वयं लिख्यते-

" एगा कण्हपक्खियाणं वग्गणा एगा सुक्कपक्खियाणं वग्गणा १। एगा कण्हलेसाणं वग्गणा एगा नीललेसाणं वग्गणा एवं जाव सुक्कलेसाणं वग्गणा २। " वृत्तिर्यथा-' एगा कण्हपक्खियाणं वग्गणा इत्यादि 'कृष्णपाक्षिकेतरयोर्लक्षणम्-" जेसिमवड्ढो पोग्गलपरियट्टो सेसओ उ संसारो । ते सुक्कपक्खिया खलु, अहिए पुण कण्हपक्खी य ॥ १ ॥ इति " एतद्विशेषितोऽन्यो दण्डकः । ' एगा किण्हलेसाणं इत्यादि ' । लिश्यते प्राणी कर्मणा यया सा लेश्या । यदाह-' श्लेष इव वर्णबन्धस्य कर्मबन्धस्थितिविधात्र्यः ' । तथा- ' कृष्णादिद्रव्यसाचिव्यात्, परिणामो य आत्मनः । स्फटिकस्येव तत्रायं, लेश्याशब्दः प्रयुज्यते ॥ १ ॥ इति ' । इयं य शरीरनाम-कर्मपरिणतिरूपा, योगपरिणतिरूपत्वात् । योगस्य च शरीरनामकर्मपरिणतिविशेषत्वात्, यत उक्तं प्रज्ञापनावृत्तिकृता । " योगपरिणामो लेश्या, कथं पुनर्योगपरिणामो लेश्या ?, यस्मात्सयोगिकेवली शुक्ललेश्यापरिणामेन विहृत्यान्तर्मुहूर्त्ते शेषे योगनिरोधं करोति, ततोऽयोगत्वमलेश्यत्वं च प्राप्नोति, अतोऽवगम्यते योगपरिणामो लेश्येति । स पुनर्योगः शरीरनामकर्मपरिणतिविशेषः । यस्मादुक्तं कर्म हि कार्मस्य कारणम् अन्येषां च शरीराणामिति । तस्मादौदारिकादिशरीरयुक्तस्यात्मनो वीर्यपरिणतिविशेषः कायोयोगः १ तथौदारिकवैक्रियाहारकशरीरव्यापाराहृ-तवाग्द्रव्यसमूहसाचिव्यात् जीवव्यापारो यः स वाग्योगः २ तथौदारिकादिशरीरव्यापाराहृतमनोद्रव्यसमूहसाचिव्यात् जीवव्यापारो यः स मनोयोगः ३ ततो यथैव कायादिकरणयुक्तस्यात्मनो वीर्यपरिणतिर्योग उच्यते तथैव लेश्यापीति " । अन्ये तु व्याचक्षते-कर्मनिष्यन्दो लेश्येति, सा च द्रव्यभावभेदाद् द्विधा । तत्र द्रव्यलेश्या कृष्णादिद्रव्याण्येव, भावलेश्या तज्जन्यो जीवपरिणाम इति । इयं च षट्प्रकाराजम्बूखाद-कपुरुषषट्कदृष्टान्ताद् ग्रामघातकपुरुषषट्कदृष्टान्ताद्वा आगमप्रसिद्धादवसेयम् । इति श्रीस्थानाङ्गप्रथमस्थानके ४४० प्रतौ ३१।३२ पत्रे ॥ १ ॥

पारम्पर्यवर्जिताः केचन विशिष्टक्षमाश्रमणप्रत्युपेक्षणादिकं गुरुपरम्परागतं योगविधिस्वरूपमजानाना दुष्करतराचाम्लादिलघुकर्मैक-

साध्यनिरन्तरतपःक्रियाभीरवश्च योगोद्वहनं उद्देशसमुद्देशानुज्ञादिवचनैः प्रतिपदमागमोक्तमपि नाङ्गीकुर्वन्ति, तच्च तेषां चलनभ्रमभिया मार्गत्यागपूर्वकं गर्त्तापातप्रायम्, योगविधिसत्तासूचकः सिद्धान्तश्चायम्-" दो दिसाओ अभिगिज्झ कप्पति निग्गंथाण वा णिग्गंथीण वा पव्वावित्तए-पाईणं चेव उदिणं चेव, एवं मुंडावित्तए सिक्खावित्तए उट्ठावित्तए संभुंजित्तए संवसित्तए सज्झायं उद्दिसित्तए सज्झायं समुद्दिसित्तए सज्झायमणुजाणित्तए आलोइत्तए पडिक्कमित्तए निंदित्तए गरहित्तए विउट्टित्तए विसोहित्तए अकरणयाए अभ्भुट्ठित्तए अहारिहं पायच्छितं तवोकम्मं पडिवज्जित्तए "। वृत्तिर्यथा ' दो दिसाओ इत्यादि ' द्वे दिशौकाष्ठे अभिगृह्य-अङ्गीकृत्य तदभिमुखीभूयेत्यर्थः । कल्पते-युज्यते, निर्गता ग्रंथाद्धनादेरिति निर्ग्रंथाः-साधवस्तेषां निर्ग्रंथ्यः-साध्व्यस्तासां प्रव्राजयितुं रजोहरणादिदानेन प्राचीं-पूर्वामित्यर्थः उदीचीमुत्तरामित्यर्थः । उक्तंच-" पुव्वामुहो उ उत्तरमुहोव्व देज्जाऽहवा पडिच्छेज्जा । जीए जिणादओ वा हविज्ज जिणचेइयाइं च ॥ १ ॥ " इति । एवं इति यथा प्रव्राजनसूत्रं दिग्द्वयाभिलापेनाधीतम् एवं मुण्डनादिसूत्राण्यपि षोडशाध्येतव्यानीति । तत्र मुण्डयितुं-शिरो लुंचनतः १ शिक्षयितुं-ग्रहणशिक्षापेक्षया सूत्रार्थौ ग्राहयितुमासैवनाशिक्षापेक्षया तु प्रत्युपेक्षणादि शिक्षयितुमिति । २ उत्थापयितुं-महाव्रतेषु व्यवस्थापयितुं ३ संभोजयितुं-भोजनमण्डल्यां निवेशयितुं ४ संवासयितुं-संस्तारकमण्डल्यां निवेशयितुं ५ सुष्ठु आ-मर्यादयाऽधीयते इति स्वाध्यायोऽङ्गादिस्तमुद्देष्टुं-योगविधिक्रमेण सम्यग्योगेनाधीष्वेदमित्येवमुपदेष्टुमिति । ६ समुद्देष्टुं-योगसामाचार्यैव स्थिरपरिचितं कुर्विदमिति वक्तुमिति ७ अनुज्ञातुं-तथैव सम्यगेतद्धारयान्येषां च प्रवेदयेत्येवमभिधातुमिति ८ आलोचयितुं-गुरवे अपराधान्निवेदयितुमिति ९ प्रतिक्रमितुं-प्रतिक्रमणं कर्तुमिति १० निन्दितुं-अतिचारान् स्वसमक्षं जुगुप्सितुं ११ आह् च-'सचरित्तपच्छायावो निंदत्ति ' गर्हितुं-गुरुसमक्षं तामेव जुगुप्सितुं १२ आह च-' गरहावि तहा जातीयमेव नवरं परप्पयासणयत्ति ' 'विउट्टित्तएत्ति' व्यतिवर्त्तयितुं वित्रोटयितुं विकुट्टयितुं वा, अतिचारानुबन्धं विच्छेदयितुमित्यर्थः १३ विशोधयितुमतिचारपङ्कापेक्षयाऽऽत्मानं विमलीकर्त्तुमिति । १४ अकरणतया पुनर्न करिष्यामीत्येवमभ्युत्थातुमभ्युपगन्तुमिति १५ यथार्हमतिचाराद्यपेक्षया यथोचितं पापच्छेदकत्वात्प्रायश्चित्तविशोधकत्वाद्वा प्रायश्चित्तम्, उक्तंच-" पावं छिंदइ जम्हा, पायच्छित्तं तु भण्णते तेण । पाएण वावि चित्तं, विसोहए तेण पच्छितं ॥ १ ॥ " त्ति । तपःकर्म निर्विकृतिकादिकं प्रतिपत्तुम्-अभ्युपगन्तुमिति १६ । इति श्रीस्थानाङ्गद्वितीयस्थानकप्रथमोद्देशके ४४० प्रतौ ५४।५५ पत्रे ॥ २ ॥

केचिच्चानागमज्ञा मुनीनामशुद्धाशनादिदानं नरकायुर्बन्धफलमिति वदन्ति, तच्चानागमिकम्, अल्पायुष्कताया एवागमे तत्फलत्वेनोक्तत्वात्, अत्राशङ्कासमाधाने तु एतत्सूत्रतात्पर्यावबोधावगम्ये, तच्चेदम्-

" तिहिं ठाणेहिं जीवा अप्पाउयत्ताए कम्मं पकरेंति । तंजहा-पाणे अइवाइत्ता भवति १ मुसं वइत्ता भवति २ तहारूवं समणं वा माहणं वा अफासुएणं अणेसणिज्जेणं असणपाणखाइमसाइमेणं पडिलाभेत्ता भवति ३ इच्चेतेहिं तिहिं ठाणेहिं जीवा अप्पाउयत्ताए कम्मं पकरेंति " इति वृत्तिर्यथा-' तिहिं ठाणेहिं इत्यादि ' त्रिभिः स्थानैः-कारणैर्जीवाः-प्राणिनः 'अप्पाउयत्ताएत्ति' अल्पं-स्तोकं आयुर्जीवितं यस्य सोऽल्पायुः तद्भावस्तत्ता तस्यै अल्पायुष्कतायै तदर्थं तन्निबन्धनमित्यर्थः । कर्मायुष्कादि । अथवा अल्पमायुर्जीवितं यत् आयुषस्तदल्पायुः तद्भावस्तत्ता तया कर्मायुर्लक्षणं प्रकुर्वन्ति-बध्नन्तीत्यर्थः । तद्यथा-प्राणान् स प्राणिनोऽतिपातयितेति शीलार्थे तृनि तृन्नन्तमिति कर्मणि द्वितीयेति, प्राणिनां विनाशनशील इत्यर्थः । एवंभूतो यो भवति, एवं मृषावादं वक्ता यश्च भवति, तथा तत्प्रकारं रूपं-स्वभावो नेपथ्यादिर्वा पस्य स तथारूपो दानोचित इत्यर्थः तं श्राम्यति-तपस्यतीति श्रमणस्तपोयुक्तस्तं मा हन इत्याचष्टे यः परं प्रति स्वयं हननिवृत्तः सन्निति स माहनो मूलगुणधरस्तं, वाशब्दौ विशेषणसमुच्चयार्थौ । प्रगता असवोऽसुमन्तः प्राणिनो यस्मात्तत्प्रासुकम् तन्निषेधादप्रासुकं सचेतन मित्यर्थः । तेन इष्यते गवेष्यते उद्गमादिदोषविकलतया साधुभिर्यत्तदेषणीयं कल्प्यं तन्निषेधादनेषणीयं तेन । अश्यते भुज्यते इत्यशनं-ओदनादि । पीयते इति पानं-सौवीरकादि । खादनं खादस्तेन निर्वृत्तं खादनार्थं तस्य निर्वर्त्त्यमानत्वादिति खादिमं-भक्तौषधादि । स्वादनं स्वादः, तेन निर्वृत्तं स्वादिमं च-दन्तपावनादीति । समाहारद्वन्द्वः तेन, गाथाश्चात्र " असणं ओदणसत्तुग मुग्ग जगाराइ खज्जगविही य । खीरादि सूरणादि मंडगपभिई य विन्नेयं ॥ १ ॥ पाणं सोवीरजवोदगाइ चित्तं सुराइयं चेव । आउक्काओ सव्वो कक्कडगजलाइयं च तहा ॥ २ ॥ भत्तोसं दंताई खज्जूरं नालिकेरदक्खाइं । कक्कडिअंबगफणसाइ, बहुविहं खाइमं नेयं ॥ ३ ॥ दंतवणं तंबोलं, चित्तं अज्जगकुहेडगाईयं । महुपिप्पलिसुंठाई, अणेगहा साइमं होइत्ति " ॥ ४ ॥ प्रतिलम्भयिता लाभवन्तं करोतीत्येवंशीलो यश्च भवति । ते अल्पायुष्कतया कर्म प्रकुर्वन्तीति प्रक्रमः । 'इच्चेतेहिंति' इत्येतैः प्राणातिपातादिभिरुक्तप्रकारैस्त्रिभिः स्थानैर्जीवा अल्पायुष्कतया कर्म प्रकुर्वन्तीति निगमनमिति । इह च प्राणातिपातयित्रादिपुरुषनिर्देशेऽपि प्राणातिपातादीनामेवाल्पायुर्बन्धनिबन्धनत्वेन

॥३१॥

तत्कारणत्वमुक्तं द्रष्टव्यमिति । इयं चास्य सूत्रस्य भावना । अध्यवसायविशेषेणैतत्त्रयं यथोक्तफलं भवतीति । अथवा यो हि जीवो जिनादिगुणपक्षपातितया तत्पूजाद्यर्थं पृथिव्याद्यारंभेण न्यासापहारादिना च प्राणातिपातादिषु वर्त्तते तस्य सरागसंयमनिरवद्यदाननिमित्तायुष्कापेक्षये-यमल्पायुष्टा समवसेया । अथ नैतदेवं निर्विशेषणत्वात्सूत्रस्याल्पायुष्कस्य क्षुल्लकभवग्रहणरूपस्यापि प्राणातिपातादिहेतुतो युज्यमानत्वादतः कथमभिधीयते स विशेषणप्राणातिपातादिवर्त्ती जीव आपेक्षिकी चाल्पायुष्कता इति ?, उच्यते, अविशषणेऽपि सूत्रस्य प्राणातिपातादेर्विशेषणमवश्यं वाच्यम् यत इतस्तृतीयसूत्रे प्राणातिपातादित एवाशुभदीर्घायुष्टां वक्ष्यति । न हि समानहेतोः कार्यवैषम्यं युज्यते, सर्वत्रानाश्वासप्रसङ्गात् । तथा-' समणोवासयस्स णं भंते ! तहारूवं समणं वा माहणं वा अफासुएणं अणेसणिज्जेणं असणपाणखाइमसाइमेणं पडिलाभेमाणस्स किं कज्जइ ? गोयमा ! बहुतरिया से निज्जरा कज्जइ अप्पतराए से पावे कम्मे कज्जइ ' इति भगवतीवचनश्रवणादवसीयते नैवेयं क्षुल्लकभवग्रहणरूपा अल्पायुष्टा । नहि स्वल्पपापबहुनिर्जरानिबन्धनस्यानुष्ठानस्य क्षुल्लकभवग्रहणनिमित्तता संभाव्यते, जिनपूजाद्यनुष्ठानस्यापि तथाप्रसङ्गात् । अथाप्रासुकदानस्य भवतूक्ता अल्पायुष्टा प्राणातिपातमृषावादयोस्तु क्षुल्लकभवग्रहणमेव फलमिति, नैतदेवम्, एकयोगप्रवृत्तत्वादविरुद्धत्वाच्चेति । अथ मिथ्यादृष्टिश्रमणब्राह्मणानां यदप्रासुकदानं ततो निरुपचरितैवाल्पायुष्टा युज्यते इतराभ्यां तु को विचार इति ?, नैवम्, अप्रासुकेनेति तत्र विशेषणस्यानर्थकत्वात्, प्रासुकस्यापि अल्पायुष्टाफलत्वाविरोधात्, उक्तंच भगवत्याम्- " समणोवासयस्स णं भंते ! तहारूवं असंजयअविरयअपडिहयपच्चक्खायपावकम्मं फासुएण वा अफासुएण वा एसणिज्जेण वा अणेसणिज्जेण वा असणपावखाइमसाइमेणं पडिलाभेमाणस्स किं कज्जइ ?, गोयमा ? एगंतसो पावे कम्मे कज्जइ णो से काइ निज्जरा कज्जइत्ति " । यच्च पापकर्मण एव कारणं तदल्पायुष्टाया अपि कारणमिति । नन्वेवं प्राणातिपातमृषावादावप्रासुकदानं च कर्त्तव्यमापन्नमिति, उच्यते, आपद्यतां नाम भूमिकापेक्षया को दोषः ? यतः-" अधिकारिवशाच्छास्त्रे धर्मसाधनसंस्थितिः । व्याधिप्रतिक्रिया तुल्या, विज्ञेया गुणदोषयोः ॥ १ ॥ " तथा-गृहिणं प्रति जिनभवनकारणफलमुक्तं-" एतदिह भावयज्ञः, सद्गृहिणो जन्मफलमिदं परमम् । अभ्युदयाव्युच्छित्त्या, नियमादपवर्गबीजमिति ॥ १ ॥ " तथा-" भन्नइ जिणपूयाए, कायवहो जइवि होइ उ कहिंचि । तहवि तई परिसुद्धा गिहीण कूवाहरणजोगो ॥ २ ॥ असदारंभपवत्ता, जं च गिही तेण तेसि विन्नेया । तन्निव्वित्तिफलच्चिय, एसा परिभावणीयमिदं ॥ ३॥ " दानाधिकारे तु श्रूयते, द्विविधाः श्रमणोपासकाः-

संविग्नभाविता लुब्धकदृष्टान्तभाविताश्चेति । यथोक्तम्-" संविग्गभावियाणं, लुद्धयदिट्ठंतभावियाणं च । मोत्तूण खेत्तकाले, भावं च कहिंति सुद्धंछं ॥ १ ॥ " इति तत्र लुब्धकदृष्टान्तभाविता यथाकथञ्चिद्ददति । संविग्नभावितास्त्वौचित्येनेति । तच्चेदम्-" संथरणंमि असुद्धं, दुण्हवि गिण्हंतदिंतयाणऽहियं । आउरदिट्ठंतेणं, तं चेव हियं असंथरणे ॥ १ ॥ " तथा- " नायागयाणं कप्पणिज्जाणं अन्नपाणाईणं दव्वाणं देसकालसद्धासक्कारकमजुयमित्यादि " क्वचित् ' पाणे अइवाइत्ता मुसं वइत्ता ' इत्येवं भवति शब्दवर्जा वाचना तत्रापि स एवार्थः । क्त्वाप्रत्ययान्तं (न्ततया) वा व्याख्येया । प्राणानतिपात्य मृषोक्त्वा श्रमणं प्रतिलंभ्य अल्पायुष्कतया कर्म बध्नन्तीति प्रक्रमः, शेषं तथैव । अथवा प्रतिलंभनस्थानकस्यैवेतरे विशेषणे, तथाहि-प्राणानतिपात्याधाकर्मादिकरणतो मृषोक्त्वा यथा-भोः साधो ! स्वार्थसिद्धमिदं भक्तादि कल्पनीयं वो न शङ्का कार्येत्यादि, ततः प्रतिलंभ्य तथा कर्म कुर्वन्तीति प्रक्रमः । इह च द्वयस्य विशेषणत्वेनैकस्य विशेष्यत्वेन त्रिस्थानकत्वमवगन्तव्यम् । गम्भीरार्थं चेदं सूत्रम्, अतोऽन्यथाऽपि भावनीयम् । इति श्रीस्थानाङ्गतृतीयस्थानकप्रथमोद्देशके ४४० प्रतौ ९८।९९ पत्रे ॥ ३ ॥

इह हि जगद्गुरुणा श्रीवर्द्धमानस्वामिनाऽप्यनुमतयोः परमोपकारिणोर्मातापित्रोर्भक्त्यतिशयाय धर्मोवबोधादिशुभोदर्काय च सर्वथा यतनीयं प्राज्ञैः । नच वाच्यं स्वस्ववेदविक्रयोपशमनाय प्रवृत्ताभ्यां ताभ्यां महीजलसंयोगोत्पन्नतृणन्यायेन कर्मवशादुत्पन्नाय प्राणिने किमुपकृतमिति ? । तदनन्तरमपि धारणपालनपोषणवात्सल्याद्यनेकोपकारकारित्वादशक्यप्रत्युपकारत्वमेव तयोः । नचेदं लौकिकमेव, आगमेऽपि (तथोक्तेः) । स चायम्-

" तिण्हं दुप्पडियारं समणाउसो !, तंजहा-अम्मापिऊणो भट्टिस्स धम्मायरियस्स, संपाओविय णं केइ पुरिसे अम्मापियरं सयपागसहस्सपागेहिं तिल्लेहिं अब्भंगित्ता गंधवट्टएण उव्वट्टित्ता तीहिं उदएहिं मज्जवित्ता सव्वालंकारविभूसियं करेत्ता मणुण्णं थालीपागसुद्धं अट्ठारसवंजणाउलं भोयणं भोयावित्ता जावज्जीवाए पिट्ठिवडिंसयाए परिवहेज्जा, तेणावि तस्स अम्मापिउस्स दुप्पडियारं भवइ, अहे णं से तं अम्मापियरं केवलिपन्नत्ते धम्मे आघवइत्ता पन्नवइत्ता परूवइत्ता ठावित्ता भवइ तेणामेव तस्स अम्मापिउस्स " वृत्तिर्यथा-'तिण्हं' इत्यादि 'तिण्हं' त्रयाणां दुःखेन-कृच्छ्रेण प्रतिक्रियते-कृतोपकारेण पुंसा प्रत्युपक्रियते इति खल्प्रत्यये सति दुष्प्रतिकारं प्रत्युपकर्त्तुमशक्यमितियावत्

हे श्रमण ! हे आयुष्यमन् ! समस्तनिर्देशो वा हे श्रमणायुष्मन् ! इति भगवता शिष्यः संबोधितः । अम्बया-माता सह पिता-जनकः अम्बापिता तस्येत्यैकं स्थानम्, जनकत्वेनैकत्वविवक्षणात् । तथा-' भट्टिस्स ' त्ति भर्तुः पोषकस्य स्वामिन इत्यर्थः, इति द्वितीयम् । धर्मदाता चाचार्यो धर्माचार्यस्तस्येति तृतीयम् । आह च-" दुष्प्रतिकारौ मातापितरौ स्वामी गुरुश्च लोकेऽस्मिन् । तत्र गुरुरिहामुत्र च, सुदुष्करतरप्रतीकारः ॥ १ ॥ " इति तत्र जनकदुष्प्रतिकार्यतामाह-' संपाओ 'त्ति प्रातः-प्रभातं तेन समं संप्रातः संप्रातरपिच-प्रभातसमकालमपि च यदैव प्रातः संवृत्तं तदैवेत्यर्थः, अनेन कार्यान्तराव्यग्रतां दर्शयति, संशब्दस्यातिशयार्थत्वाद्वा अतिप्रभाते प्रतिशब्दार्थत्वाद्वाऽस्य प्रतिप्रभातमित्यर्थः । कश्चिदिति कुलीन एव न तु सर्वोऽपि पुरुषो-मानवः, देवतिरश्चौरेवंविधव्यतिकरासंभवात् । शतं पाकानाम्-औषधिक्वाथानां पाके यस्य, औषधिशतेन वा सह पच्यते यत्, शतकृत्वो वा पाको यस्य, शतेन वा रूपकाणां मूल्यतः पच्यते यत्तच्छतपाकम् । एवं सहस्रपाकमपि । ताभ्यां तैलाभ्यां ' अब्भंगित्ता ' अभ्यङ्गं कृत्वा ' गंधवट्टएणं 'ति गन्धाष्टकेन-गन्धद्रव्यक्षोदेन उद्वर्त्योद्वलनं कृत्वा त्रिभिरुदकैः-गन्धोदकोष्णोदकशीतोदकैर्मज्जयित्वा-स्नपयित्वा मनोज्ञं-कलमौदनादि स्थाली-पिठरी तस्यां पाको यस्य तत्तथा, अन्यत्र हि पक्वमपक्वं वा न तथाविधं स्यादितीदं विशेषणमिति शुद्धं-भक्तदोषवर्जितम् स्थालीपाकं च तच्छुद्धं च स्थालीपाकेन वा शुद्धमिति विग्रहः । अष्टादशभिर्लोकप्रसिद्धैर्व्यञ्जनकैः-शालनकैस्तक्रादिभिः (सूपादिभिः) वा संकुलं सङ्कीर्णं यत्तत्तथा, अथवाऽष्टादशभेदं च तद्व्यञ्जनाकुलं चेति, अत्र भेदपदलोपेन समासः । भोजनं भोजयित्वा । एते चाष्टादश भेदाः-" सूओ १ दणो २ जवन्नं ३, तिन्नि य मंसाइ ६ गोरसो ७ जूसो ८ । भक्खा ९ गुललावणिया १०, मूलफला ११ हरियगं १२ सागो १३ ॥ १ ॥ होइ रसालू य तहा १४, पाणं १५ पाणीय १६ पाणगं चेव । अट्ठारसमो सागो १८, निरुवहओ लोइओ पिंडो ॥ २ ॥ " मांसत्रयं जलजादिसत्कम्, जूषो-मुद्गतन्दुलजीरककटुभाण्डादिरसः, भक्ष्याणि-खण्डखाद्यादीनि, गुडलावणिका-गुडपर्पटिका लोकप्रसिद्धा गुडधाना वा, मूलफलान्येकमेव पदम्, हरितकं-जीरकादि, शाको-वस्तूलादिभर्जिका,रसालू-मज्जिका तल्लक्षणमिदम्-" दो घयपला महुपलं, दहियस्सऽद्धाढयं मरिय वीसा । दस खंडगुल पलाइं, एस रसालू निवइजोग्गो ॥ १ ॥ " पानं-सुरादि, पानीयं-जलम्, पानकं-द्राक्षापानादि, शाकस्तक्रसिद्ध इति । यावान् जीवो-यावज्जीवं यावत्प्राणधारणम् पृष्ठौ-स्कन्धे अवतंस इवावतंसः-शेखरस्तस्य करणमवतंसिका पृष्ठ्यवतंसिका तया परिवहेत, पृष्ट्यारोपितमित्यर्थः ।

तेनापि परिवाहकेन परिवहनेन वा तस्यां वा पितुर्दुष्प्रतिकारमशक्यप्रतीकार इत्यर्थः, अनुभूतोपकारत्या तस्य प्रत्युपकारित्वात् । आह च- " कयउपयारो जो होइ सज्जणो होइ को गुणो तस्स ? । उवयारबाहिरा जे, हवंति ते सुंदर । सुअण ॥ १ ॥ " त्ति । ' अहे णं से त्ति ' अथ चेत् णमिति वाक्यालङ्कारे स पुरुषस्तमम्बापितरं धर्मे स्थापयिता-स्थापनशीलो भवति अनुष्ठानतः स्थापयतीत्यर्थः । किं कृत्वा ? इत्याह-' आघवइत्ता ' धर्ममाख्याय प्रज्ञाप्य-बोधयित्वा प्ररूप्य भेदत इति, अथवाऽऽख्याय-सामान्यतो यथा कार्यो धर्मः, प्रज्ञाप्य-विशेषतो यथाऽसावहिंसादिलक्षणः, प्ररूप्य-भेदतो यथा शीलाङ्गसहस्ररूप इति, शीलार्थतृन्नंतानि वैतानीति । ' तेणामेवात्ति ' ततस्तेनैव धर्मस्थापनेनैव न परिवहनेन, अथवा तेनैव धर्मस्थापकपुरुषेण न परिवाहिना तस्य प्रत्युपकरणीयस्याऽम्बापितुः । इति स्थानाङ्गतृतीयस्थानके-प्रथमोद्देशके ४४० प्रतौ १०७ पत्रे ॥ ४ ॥

उपस्थापनाया अक्षराणि लिख्यन्ते-

" तओ सेहभूमीओ पण्णत्ता, । तंजहा-उक्कोसा मज्झिमा जहन्ना । उक्कोसा छम्मासा, मज्झिमा चउम्मासा, जहन्ना सत्त राइं दिया इति " वृत्तिर्यथा-व्रतारोपणे कालविशेषानाह-' तओ सेहेत्यादि ' सुगमम् । किंतु 'सेहत्ति' ' षिध् संराद्धौ ' इति वचनात् सिध्यते- निष्पाद्यते यः स सेधः शिक्षां वाऽधीत इति शैक्षः तस्य भूमयो-महाव्रतानामारोपणकाललक्षणाः अवस्थाः पदव्य इति सेधभूमयः शैक्षभूमयो वेति, अयमभिप्रायः- उत्कृष्टतः षड्भिर्मासैरुत्थाप्यते न तानतिक्रम्यते । मध्यमतश्च चतुर्भिर्मासैरुत्थाप्यते। जघन्यतः सप्तभिरेव रात्रिंदिवैर्गृहीतशिक्षत्वादिति । उक्तं च-" सेहस्स तिन्नि भूमी, जहन्न तह मज्झिमा य उक्कोसा । राइंदि सत्त चउमासिया य छम्मासिया चेव ॥ १ ॥ " त्ति आसु चायं व्यवहारोक्तो विभागःपुव्वोवट्ठपुराणे, करणजयट्ठा जहन्निया भूमी । उक्कोसा दुस्से(म्मे)हं, पडुच्च दुस्सदद्दहाणं च ॥ १ ॥ एमेव य मज्झिमगा, अणहिज्जंते असद्दहंते य । भावियमेहाविस्सवि, करणजयट्ठा य मज्झिमगा ॥ २ ॥ " इति श्रीस्थानाङ्गतृतीयस्थानकद्वितीयोद्देशके ४४० प्रतौ ११ पत्रे ॥ ५॥

सिद्धान्ताध्ययनं साधूनामेव सम्मतं न गृहस्थानाम्, यदि तेषामपि तत्स्यात्तर्हि तेषामपि मुनीनामिव श्रुतस्थविरत्वमुक्तं स्यात्, न च तत्तथोक्तं, मुनीनां तूक्तमेव । तत्पाठश्चायम्-

" तओ थेरभूमीओ पण्णत्ता, तंजहा-जाइथेरे सुयथेरे परियायथेरे, सट्ठिवासजाए समणे निग्गंथे जाइथेरे ठाणसमवायधरे समणे निग्गंथे सुअथेरे वीसवासपरियाए णं समणे निग्गंथे परियायथेरे । इति " वृत्तिर्यथा-' तओ थेरेत्यादि ' व्यक्तम् । नवरं स्थविरो-वृद्धस्तस्य भूमयः-पदव्यः स्थविरभूमय इति । जातिर्जन्म, श्रुतमागमः, पर्यायः प्रव्रज्या, तैः स्थविरा-वृद्धा ये ते तथोक्ता इति इह च भूमिकाभूमिकावतोरभेदादेवमुपन्यासः, अन्यथा भूमिका उद्दिष्टा इति ता एव वाच्याः स्युरिति । एतेषां च त्रयाणां क्रमेणानुकम्पापूजावन्दनानि विधेयानि । यत उक्तं व्यवहारे-"आहारे उवही सेज्जा, संथारे खेत्तसंकम्मे । किइच्छंदाणुवत्तीहिं, अणुकंपइ थेरगं ॥ १ ॥ उट्ठाणासणदाणाइं, जोगाहारप्पसंसणा । नीयसेज्जाइणिद्देसवत्तिए पूयए सुअं ॥ २ ॥ उट्ठाणं वंदणं चेव, गहणं दंडगस्स य । अगुरुणोवि य णिद्देसे, तईयाए पवत्तए ॥ ३ ॥ " इति । इति श्रीस्थानाङ्गतृतीयस्थानकद्वितीयोद्देशके ४४० प्रतौ ११५ पत्रे ॥ ६ ॥

अल्पवृष्टिकारणानि लिख्यन्ते-

" तिहिं ठाणेहिं अप्पवुट्ठिकाए सिया । तंजहा-तंसि च णं देसंसि वा पदेसंसि वा नो बहवे उदगजोणिया जीवा य पोग्गला य उदगत्ताए वक्कमंति विउक्कमंति चयंति उववज्जंति १। देवा णागा जक्खा भूया नो सम्मं आराहिया भवंति । तत्थ समुट्ठियं उदगपोग्गलं परिणयं वासिउकामं अन्नं देसं साहरंति २। अब्भवद्दलं च णं समुट्ठियं परिणयं वासिउकामं वाउकाए विधुणाइ ३ । इच्चेहिं तिहिं ठाणेहिं अप्पवुट्ठिकाए सिया । इति "वृत्तिर्यथा-' तिहिं ' इत्यादिभिरष्टाभिः सूत्रैराह । सुगमानि चैतानि किं तु ' अप्पवुट्ठिकाएत्ति ' अल्पः-स्तोकोऽविद्यमानो वा वर्षणं-वृष्टिरधःपतनं वृष्टिप्रधानः कायो-जीवनिकायो व्योमनिपदप्काय इत्यर्थः, वर्षणधर्मयुक्तं वोदकं वृष्टिः, तस्याः कायो-राशिर्वृष्टिकायः, अल्पश्चासौ वृष्टिकायश्च अल्पवृष्टिकायः स स्याद्भवेत्तस्मिंस्तत्र मगधादौ । चशब्दोऽल्पवृष्टिकारणान्तरसमुच्चयार्थः । णमित्यलङ्कारे देशे-जनपदे, प्रदेशे तस्यैवैकदेशरूपे, वाशब्दौ विकल्पार्थौ, उदकस्य योनय उदकयोनयः-परिणामकारणभूता उदकयोनयः त एवोदकयोनिका उदकजननस्वभावा व्युत्क्रामन्ति-उत्पद्यन्ते, व्यपक्रामन्ति-च्यवन्ते । एतदेव यथायोगं पर्यायत आचष्टे-च्यवन्ते उत्पद्यन्ते क्षेत्रस्वभावादित्येकम् । तथा देवा-वैमानिका ज्योतिष्काः, नागा-नागकुमारा भवनपत्युपलक्षणमेतत्, यक्षा भूता इति व्यन्तरोपलक्षणम् । अथवा देवा इति सामान्यम्, नागादयस्तु विशेषः, एतद्ग्रहणं च प्राय एषामेवंविधे कर्मणि प्रवृत्तिरिति ज्ञापनाय विचित्रत्वाद्वा सूत्रगतेरिति

। नो सम्यगाराधिता भवन्ति, अविनयकरणाज्जानपदैरिति गम्यते । ततश्च तत्र मगधादौ देशे प्रदेशे वा तस्यैव समुत्थितम्-उत्पन्नं उदकप्रधानं पौद्गलं-पुद्गलसमूहो मेघ इत्यर्थः । उदकपौद्गलं तथा परिणतं उदकदायकावस्थाप्राप्तम् अत एव विद्युदादिकरणाद्वर्षितुकामं सत् अन्यं देशं मगधादिकं संहरन्ति-नयन्तीति द्वितीयम् । अभ्राणि-मेघास्तैर्वार्दलकं दुर्दिनं अभ्रवार्दलकं ' वाउआएत्ति ' वायुकायः-प्रचण्डवातो विधुनाति-ध्वंसयतीति तृतीयम् । ' इच्चे इत्यादि ' निगमनम् । इति स्थानाङ्गतृतीयस्थानकतृतीयोद्देशके ४४० प्रतौ १२६ पत्रे ॥ ७ ॥

इह केचिदज्ञानिनो भूयोभूयः सयुक्तिभिः सिद्धान्तोक्तिभिः सुविहितगीतार्थैर्बोधिता अपि योगापलापाग्रहं न त्यजन्ति, ततस्तान् प्रति ' अश्रान्ताः परोपकारे सन्त ' इत्यङ्गीकृत्य पुनरपि योगविधिसत्तासूचकं सूत्रं लिख्यते-

" तओ न कप्पंति वाइत्तए (तओ अवायणिज्जा पण्णत्ता) तंजहा-अविणीए विगइपडिबद्धे अविउसियपाहुडे । इति " वृत्तिर्यथा-' तओ इत्यादि ' सुगमं नवरं न वाचनीयाः-सूत्रं न पाठनीयाः अत एवार्थमप्यश्रावणीयाः सूत्रादर्थस्य गुरुत्वात्, तत्राविनीतः-सूत्रार्थदातुर्वन्दनादि-विनयरहितः, तद्वाचने हि दोषाः । यत उक्तम्- " इहरहविनाणथज्झवत्तणुइ, अविणीओ लंभिओ किमु सुएणं ?। माणद्धो नासिहिई खएव खारोवसेगो उ ॥ १ ॥ गोजूहस्स पडागा, सयं पलायस्स वड्ढई वेगं । दोसोदए य समणं, न होइ न नियाणतुल्लं व ? ॥ २ ॥ " निदानतुल्यमेव भवतीत्यर्थः । " विणयाहीया विज्जा, देइ फलं इह परे य लोगंमि । न फलइ अविणयगहिआ, सस्साणिव तोअहीणाइं ॥ १ ॥ " तथा विकृतिप्रतिबद्धो-घृतादिरसविशेषगृद्धोऽनुपधानकारीति भावः । इहापि दोष एव । यदाह-" अतवो न होइ जोगो, न य फलए इच्छियफलं विज्जा । अवि फलति विउलमगुणं, साहणहीणा जहा विज्जा ॥ १ ॥ " त्ति अव्यवसितम्-अनुपशान्तं प्राभृतमिव प्राभृतं नरकपालकौशलिकः परमक्रोधो यस्य सोऽव्यवसितप्राभृतः । उक्तं च-" अप्पेवि पारमाणिं, अवराहे वयइ खामियं तं च । बहुसो उदीरयंतो, अविउसियपाहुडो स खलु ॥ १ ॥ " त्ति पारमाणिं-परमक्रोधसमुद्घातं व्रजतीति भावः । एतस्य वाचने इहलोकतस्त्यागोऽस्य प्रेरणायां कलहनात्, प्रान्तदेवताछलनाच्च, परलोकतोऽपि त्यागः, तत्र श्रुतस्य दत्तस्य निष्फलत्वात्, ऊषरक्षिप्तबीजवदिति । आह च-" दुविहो उ परिच्चाओ इह चोअणकलह देवयाछलणं । परलोगंमि अ अफलं, खित्तंपिव ऊसरे बीयं ॥ १ ॥ " त्ति इति स्थानाङ्गतृतीयस्थानकचतुर्थोदेशके ॥ ८ ॥

केचिदेकान्ततो रागिणोऽपरे च छिद्रान्वेषिण इत्यादि श्रावकेष्वपि वैचित्र्यदर्शनान्न व्यामोहो विधेयो, नापि छिद्रान्वेषिष्वश्रावकधीः कर्त्तव्या, चातुर्विध्यस्यागमे उक्तत्वात् । स चायम्-

" चत्तारि समणोवासगा पण्णत्ता, तंजहा-अम्मापिईसमाणे भाइसमाणे मित्तसमाणे सवत्तिसमाणे । चत्तारि समणोवासगा पण्णत्ता । तंजहा-अद्दागसमाणे पडागसमाणे खाणुसमाणे खरंटयसमाणे इति " वृत्तिर्यथा-' अम्मापिइसमाणे इति ' मातापितृसमानः-उपचारं विनापि साधुषु एकान्तेनैव वत्सलत्वात् । भ्रातृसमानः-अल्पतरप्रेमत्वात्तत्वविचारादौ निष्ठुरवचनादप्रीतेः तथाविधप्रयोजनेष्वत्यन्तवत्सलत्वाच्चेति । मित्रसमानः-सोपचारवचनादिना विना प्रीतिक्षतेः, तत्क्षतौ चापद्यप्युपेक्षकत्वादिति । समानः-साधारणः पतिरस्याः सा सपत्नी यथा सा सपत्न्या ईर्ष्यावशादपराधान् वीक्षते एवं यः साधुषु दूषणदर्शनतत्परोऽनुपकारी च स सपत्नीसमानोऽभिधीयते इति । ' अद्दागत्ति ' आदर्शसमानो, यो हि साधुभिःप्रज्ञाप्यमानानुत्सर्गापवादादीनागमिकान् भावान् यथावत्प्रतिद्यते संनिहितार्थानादर्शकवत् स आदर्शसमानः । यस्यानवस्थितो बोधो विचित्रदेशनावायुना सर्वतोऽपह्रियमाणत्वात्पताकेव स पताकासमानः । यस्तु कुतोऽपि कदाग्रहान्न गीतार्थदेशनया चाल्यते सोऽनमनस्वभावबोधत्वेनाप्रज्ञापनीयः स्थाणुसमान इति । यस्तु प्रज्ञाप्यमानो न केवलं स्वाग्रहान्न चलति अपितु प्रज्ञापकं दुर्वचनकष्टकैर्विध्यति स खरकण्टकसमानः । खरा-निरन्तरा निष्ठुरा वा कण्टका यस्मिंस्तत्खरकण्टकं बब्बूलादिडालम्, खरणमिति लोके यदुच्यते तच्च विलग्नं चीवरं न केवलमविनाशितं न मुञ्चति अपितु दद्विमोचकपुरुषादिकं हस्तादिषु कण्टकैर्विध्यति । अथवा खरण्टयति लेपवन्तं करोति यत्तत्खरण्टमशुच्यादि तत्समानः, यो हि कुबोधापनयनप्रवृत्तं संसर्गमात्रादेव दूषणवन्तं करोति । कुबोधकुशीलतादुष्प्रसिद्धिजनकत्वेनोत्सूत्रप्ररूपकोऽयमित्यसद्दूषणोद्भावकत्वेन वेति । इति श्रीस्थानाङ्गचतुर्थे स्थानके तृतीयोद्देशके ६४० प्रतौ २०५ पत्रे ॥ ९ ॥

ननु निरर्थकं धर्माचरणं, फलवन्ध्यत्वात्, यद्येतस्याशेषस्य यथोक्तफलाव्यभिचारः स्यात्तदा भूयांसोऽप्यनशनादिसदनुष्ठानेन विपन्नाः कथं स्वेन्द्रत्वादिविभवं न दर्शयन्ति ?, मैवं, तदनागमने हेतुचतुष्टयस्य शास्त्रे प्रतिपादितत्वान् । पूर्वकाले तत्कारणसद्भावे कथमागतास्ते श्रूयन्ते इति चेत्तत्र पुण्यप्राबल्यं कारणमिति, सर्वं सुस्थं, देवानागमनहेतुप्रतिपादकं शास्त्रं चेदम् -

" चउहिं ठाणेहिं अहुणोववन्ने देवे देवलोएसु इच्छेज्जा माणुसं लोगं हव्वमागच्छित्तए नो चेव णं संचाएइ हव्वमागच्छित्तए । तंजहा-अहुणोववन्ने देवे देवलोएसु दिव्वेसु कामभोएसु मुच्छिए गिद्धे गढिए अज्झोववन्ने से णं माणुस्से कामभोए नो आढाइ नो परियाणाइ नो अट्ठं बंधइ नो नियाणं पकरेइ नो ठिइप्पकप्पं करेइ १। अहुणोववन्ने देवे देवलोएसु दिव्वेसु कामभोएसु मुच्छिए तस्स णं माणुस्से पेम्मे वोच्छिणे दिव्वे संकते भवइ । अहुणोववन्ने देवे देवलोएसु दिव्वेसु कामभोएसु मुच्छिए ४ तस्स णं एवं भवइ-एयण्णं (इया णिंह) गच्छं मुहुत्तेणं गच्छं तेणं कालेणं अप्पाउआ मणुस्सा कालधम्मुणा संपन्ना भवंति ३। अहुणोववण्णे देवे देवलोएसु दिव्वेसु कामभोएसु मुच्छिए ४ तस्स णं माणुस्से गंधे पडिकूले पडिलोमे यावि भवइ । उड्ढंपिय णं माणुस्सए गंधे चत्तारि पंच जोयणसयाइं हव्वमागच्छइ इच्चेतेहिं चउहिं ठाणेहिं अहुणोववन्ने देवे देवलोएसु इच्छेज्जा माणुस्सलोगं हव्वमागच्छित्तए नो चेव णं संचाएइ हव्वमागच्छित्तए ४। इति " वृत्तिर्यथा-' चउहिं ठाणेहिं नो संचाएइ त्ति ' सम्बधस्तथा देवलोकेषु-देवमध्ये इत्यर्थः । ' हव्वं ' शीघ्रं 'संचाएइ त्ति' शक्नोति कामभोगेषु-मनोज्ञशब्दादिषु मूर्च्छित इव मूर्च्छितो-मूढस्तत्स्वरूपस्यानित्यत्वादेर्विबोधाक्षमत्वात्, गृद्धस्तदाकाङ्क्षावान् अतृप्त इत्यर्थः, ग्रथित इव ग्रथितस्तद्विषयस्नेहरज्जुभिः सन्दर्भित इत्यर्थः, अध्युपपन्नोऽत्यन्तं तन्मना इत्यर्थः नाद्रियते-न तेष्वादरवान् भवति, न परिजानाति-एतेऽपि वस्तूभूता इत्येवं न मन्यते, तथा तेष्विति गम्यते नो अर्थं बध्नाति-एतैरिदं प्रयोजनमिति निश्चयं करोति, तथा नो तेषु निदानं प्रकरोति-एते मे भूयासुरित्येवमिति, तथा नो तेषु स्थितिविकल्पम्-अवस्थानविकल्पनम् एतेष्वहं तिष्ठामि एते वा मम तिष्ठंतु-स्थिरा भवन्तु इत्येवंरूपम्, स्थित्या वा-मर्यादया प्रकृष्टः कल्प-आचारः स्थितिप्रकल्पस्तं प्रकरोति-कर्तुमारभते, प्रशब्दस्यादिकर्मार्थत्वादिति । एवं दिव्यविषयप्रसक्तिरेकं कारणम् । तथा यतोऽसावधुनोत्पन्नो देवः कामेषु मूर्च्छितादिविशेषणोऽतस्तस्य मानुष्यकमित्यादीति दिव्यप्रेमसंक्रान्तिर्द्वितायम् । तथाऽसौ देवो यतो भोगेषु मूर्च्छितादिवेशेषणो भवति ततस्तत्प्रतिबन्धात् ' तस्स णं इत्यादि ' देवकार्याऽऽयत्ततया मनुष्यकार्याऽनायत्तत्वं तृतीयम् । तथा दिव्यभोगमूर्च्छितत्वादिविशेषणत्वात्तस्य मनुष्याणामयं मानुष्यः स एव मानुष्यको गन्धः प्रतिकूलो दिव्यगन्धविपरीतवृत्तिः प्रतिलोमश्चापि इन्द्रियमनसोरनाल्हादकत्वादेकार्थौ चैतावत्यन्तामनोज्ञताप्रतिपादनायोक्ताविति यावत् । इति परिमाणार्थः । ' चत्तारिपंचेति ' विकल्पदर्शनार्थं कदाचिद्भरतादिष्वेकान्तसुषमादौ चत्वार्येव अन्यदा तु पञ्चापि मनुष्यपञ्चेन्द्रियतिरश्चां बहुत्वेनौदारिकशरीराणां

तदवयवतन्मलानां च बहुत्वेन दुरभिगन्धप्राचुर्यादिति । आगच्छति मनुष्यक्षेत्रादाजिगमिषुं देवं प्रतीति । इदं च मनुष्यक्षेत्रस्याशुभस्वरूपत्वमेवोक्तम् । न च देवोऽन्यो वा नवभ्यो योजनेभ्यः परत आगतं गन्धं जानातीति अथवा अत एव वचनात् । यदिन्द्रियविषयप्रमाणमुक्तं तदौदारिकशरीरेन्द्रियापेक्षयैव संभाव्यते कथमन्यथा विमानेषु योजनलक्षादिप्रमाणेषु दूरस्थिता देवा घण्टाशब्दं शृणुयुः, यदि परं प्रतिशब्दद्वारेणान्यथा वेति । नरभवाशुभत्वं चतुर्थमनागमनकारणमिति, शेषं सुगमम् । इति स्थानाङ्गचतुर्थस्थानकतृतीयोद्देशके ४४० प्रतौ २० पत्रे ॥ १० ॥

न केवलमुरगा एवाशीविषाः, किंतु मनुष्यादयोऽपि तथोक्ताः सन्ति, इति जिज्ञासया उरगादिविषविषयजिज्ञासया च लिख्यते-

" चत्तारि जाइ आसीविसा पण्णत्ता । तंजहा-विच्छुजाइ आसीविसे, मंडुक्कजाइ आसीविसे, उरगजाइ आसीविसे, मणुस्सजाइ आसीविसे । विच्छुजाइ आसिविसस्सणं भंते ! केवइए विसए पण्णत्ते ? गोयमा ! पभू णं विच्छुजाइआसीविसे अद्धभरहप्पमाणमेत्तं बोंदिं विसेणं विसपरिणयं विसट्टमाणीं करित्तए विसए से विसट्टयाए नो चेव णं संपत्तीए करेंसु वा करेंति वा करिस्संति वा । मंडुक्कजाइआसीविसस्स पुच्छा, पभू णं मंडुक्कजाइआसीविसे भरहप्पमाणमेत्तं बोंदिं विसेणं विसपरिणयं विसट्टमाणीं करित्तए जाव करिस्संति वा । उरगजाइआसीविसस्स पुच्छा ? पभू णं उरगजाइआसीविसे जंबुद्दीवप्पमाणमेत्तं बोंदिं विसेणं सेसं तं चेव जाव करिस्संति वा । मणुस्सजाइआसीविसस्स पुच्छा ?, पभू णं मणुस्सजाइआसीविसे समयखेत्तप्पमाणमेत्तं बोंदिं विसेणं विसपरिणयं विसट्टमाणिं करित्तए विसए से विसट्टयाए नो चेव णं जाव करिस्संतीति । वृत्तिर्यथा-सुगमं चेदं नवरम् ' आसीविसत्ति ' आश्यो-दंष्ट्राः तासु विषं येषां ते आशीविषाः, ते च कर्मतो जातितश्च । तत्र कर्मतस्तिर्यङ्मनुष्याः कुतोऽपि गुणादाशीविषाः स्युः, देवाश्चाऽऽसहस्राराच्छापादिना परव्यापादनादिति । उक्तं च- " आसी दाढा तग्गयमहाविसाऽऽसीविसा दुविहभेया । ते कम्मजाइभेएण णेगहा चउविहविगप्प ॥ १ ॥ "

त्ति जातित आशीविषा जात्याशीविषा वृश्चिकादयः । ' केवइयत्ति ' कियान् विषयो-गोचरो विष स्येति गम्यते । प्रभुः समर्थः । अर्द्धभरतस्य यत्प्रमाणं सातिरेकत्रिषष्ट्यधिकयोजनशतद्वयलक्षणं तदेव मात्राप्रमाणं यस्या साऽर्द्धभरतप्रमाणमात्रा ताम् । ' बोंदिं ' शरीरं विशेष-स्वकीयाशीविषेण करणभूतेन विषपरिणतां-विषरूपापन्नां, विषपरिगतामिति क्वचित्पाठः, तत्र तद्व्याप्तामित्यर्थः । ' विसट्टमाणिं ' विकसन्तीं-विदलन्तीं कर्त्तुंविधातुं विषयः स गोचरोऽसौ । अथवा ' से ' तस्य वृश्चिकस्य विषमेवार्थो विषार्थः तद्भावस्तत्ता तस्या-

विषार्थताया विषत्वस्य तस्यां वा ' नो चेवत्ति ' नैवेत्यर्थः । संपत्त्या एवंविधबोंदिसंप्राप्तिद्वारेण अकार्षुर्वृश्चिका इति गम्यते । इह चैकवचनप्रक्रमेऽपि बहुवचननिर्देशो वृश्चिकाशीविषाणां बहुत्वज्ञापनार्थम्, एवं कुर्वन्ति करिष्यन्ति । त्रिकालनिर्देशश्चामीषां त्रैकालिकत्वज्ञापनार्थः । समयक्षेत्रं-मनुष्यक्षेत्रम् । इति स्थानाङ्गचतुर्थस्थानकचतुर्थोद्देशके ४४० प्रतौ २२५ पत्रे ॥ ११ ॥

साधूनामाचार्योपाध्यायैः सह कलहस्थानानि लिख्यन्ते-

" आयरियोवज्झायस्स णं गणंसि पंच वुग्गहठाणा पण्णत्ता, तंजहा-आयरियोवज्झाए णं गणंसि आणं वा धारणं वा नो सम्मं पउंजित्ता भवइ १। आयरियोवज्झाएणं गणंसि अहारायणियाए किइकम्मं वेणइयं नो सम्मं पउंजित्ता भवइ २। आयरियोवज्झाए णं गणंसि जे सुअपज्जवजाते धारेइ, ते काले २ नो सम्मं अणुप्पवाइत्ता भवइ ३। आयरियोवज्झाए णं गणंसि गिलाणसेहवेयावच्चं नो सम्मं अब्भुट्ठित्ता भवइ ४। आयरियोवज्झाए णं गणंसि अणापुच्छियचारिया भवइ इति ५। " वृत्तिर्यथा-आचार्योपाध्यायस्येति समाहारद्वन्द्वः, कर्मधारयो वा, ततश्चाचार्यस्योपाध्यायस्य चाचार्योपाध्यायस्य वा ' गणंसित्ति ' गणे विग्रहस्थानानि-कलहाश्रयाः । आचार्योपाध्यायो द्वयं वा गणे-गणविषये आज्ञां हे साधो ! भवतेदं विधेयमित्येवंरूपामादिष्टाम् । धारणां-न विधेयमित्येवंरूपां नोनैव सम्यगौचित्येन प्रयोक्ता भवतीति साधवः परस्परं कलहायन्ते, असम्यङ्नियोगाद् दुर्नियंतृत्वाच्च । अथवा अनौचित्येन नियोक्तारमाचार्यादिकमेव कलहायन्ते, इत्येवं सर्वत्रेति । अथवा गूढार्थपदैरगीतार्थस्य पुरतो देशान्तरस्थगीतार्थनिवेदनाय गीतार्थो यदतिचारनिवेदनं करोति साऽऽज्ञा, असकृदालोचनादानेन यत्प्रायश्चित्तविशेषावधारणं सा धारणा, तयोर्न सम्यग्प्रयोक्तेति कलहभागिति प्रथमम् । तथा स एव ' अहारायणियाए इति ' रत्नानि द्विधा, द्रव्यतो भावतश्च, तत्र द्रव्यतः कर्केतनादीनि भावतो ज्ञानादीनि । तत्र रत्नैर्ज्ञानादिभिर्व्यवहरतीति रात्निकः- बृहत्पर्यायो यो रात्निको यथारात्निकं तद्भावस्तत्ता तया यथारात्निकतया-यथाज्येष्ठं कृतिकर्म-वन्दनकं विनय एव वैनयिकं तच्च न सम्यक् प्रयोक्ता अन्तर्भूतकारितार्थत्वाद्वा प्रयोजयिता भवतीति द्वितीयम् । तथा स एव यानि श्रुतस्य पर्यवजातानि-सूत्रार्थप्रकारान् धारयति-धारणाविषयीकरोति तानि काले काले-यथावसरं न सम्यगनुप्रवाचयिता भवति न पाठयतीत्यर्थः इति तृतीयम् । कालेऽनुप्रवाचयितेत्युक्तम्, तत्र गाथाः-

" कालक्कमेण पत्तं, संवच्छरमाइणा उ जं जंमि । तं तंमि चेव धीरो, वाएज्जा सो य कालोऽयं ॥ १ ॥ तिवरिसपरियागस्स उ,

आयारपकप्पनाममज्झयणं । चउवरिसस्स य सम्मं, सूअगडं नाम अंगंति ॥ २ ॥ दसकप्पव्ववहारा, संवच्छरपणगदिक्खियस्सेव । ठाणं समवाओवि य, अंगे ते अट्ठवासस्स ॥ ३ ॥ दसवासस्स विवाहो, एकारसवासयस्स य इमे उ । खुड्डियविमाणमाई, अज्झयणा पंच नायव्वा ॥ ४ ॥ बारसवासस्स तहा, अरुणुववायाइ पंच अज्झयणा तेरसवासस्स तहा, उट्ठाणसुयाइया चउरो ॥ ५ ॥ चउदसवासस्स तहा, आसीविसभावणं जिणा बिंति । पन्नरसवासस्स य, दिट्ठीविसभावणं तह य ॥ ६ ॥ सोलसवासाईसुं, एकोत्तरवुड्ढिएसु जहसंखं । चारणभावणमहसुविणभावणा तेअगनिसग्गा ॥ ७ ॥ एगूणवीसगस्स उ, दिट्ठीवाओ दुवालसममंगं । संपुण्णवीसवरिसो, अणुवाई सव्वसुत्तस्स ॥ ८ ॥" तथा स एव ग्लानशैक्षवैयावृत्त्यं प्रति न सम्यक् स्वयमभ्युत्थाता-अभ्युपगन्ता भवतीति चतुर्थम् । तथा स एव गणं अनुपृच्छ्य चरति क्षेत्रान्तरसंक्रमादि करोतीत्येवंशीलोऽनापृच्छ्यचारीति पञ्चमं विग्रहस्थानम् । इति स्थानाङ्गपञ्चमस्थानकप्रथमोद्देशके ४४० प्रतौ २५३ पत्रे ॥ १२ ॥

एतेनैव च सूत्रेण ' काले अणुप्पवाइत्ता ' इत्यादिवाक्यात्साधूनामपि यथोक्तवर्षातिक्रमे यथोक्तं शास्त्राध्यापनमुक्तम् । ततश्च ये गृहस्थान् सूत्रमध्यापयन्ति, ते निरस्ता द्रष्टव्याः ।

केचिदवश्यंभावितयाऽपि केवलिशरीराज्जीवविराधनां न स्वीकुर्वते, चलोपकरणतां च जानाना अपि साग्रहाशयत्वाद्, वदन्ति च जानन्नपि केवली कथं जीवघ्नं व्यापारं कुर्यात् ? तच्चासत् । अवश्यंभाविभावस्य केवलिभिरशक्यप्रतीकारत्वाद्, अन्यथा जानन्नपि केवली कथं छद्मस्थवदपक्रोशकवस्त्रापहारकपुरुषसकाशं गच्छति ? कथं वा तस्माद् दूरमुपसर्पतस्तस्य वस्त्रापहाराद्यापद्येत ? तस्मादवश्यंभावि-भावोऽशक्यप्रतीकार एव । छद्मस्थकेवलिवस्त्रापहारादिसूत्रे चेमे-

" पंचहिं ठाणेहिं छउमत्थे उदिन्ने परीसहोवसग्गे सम्मं सहेज्जा खमेज्जा तितिक्खेज्जा अहियासेज्जा । तंजहा-उदिण्णकम्मे खलु अयं पुरिसे उम्मत्तगभूए तेण मे ऐस पुरिसे अक्कोसइ वा अवहसइ वा निच्छोडेइ वा निब्भत्थेइ वा बंधेइ वा रुंधइ वा छविच्छेयं वा करेइ पमारं वा नेइ उद्दवेइ वा वत्थं वा पडिग्गहं वा कंबलं वा पायपुञ्छणं वा आछिंदइ वा विच्छिंदइ वा भिंदइ वा अवहरइ वा १। जक्खाइट्ठे खलु अयं पुरिसे तेण मे एस पुरिसे अक्कोसइ वा तहेव जाव अवहरइ वा २। ममं च णं तब्भववेयणिज्जे कम्मे उदिन्ने भवइ तेण मे

एस पुरिसे अक्कोसइ वा जाव अवहरइ वा ३। ममं च णं सम्ममसहमाणस्स जाव अणहियासेमाणस्स किं मन्ने कज्जइ ? एगंतसो मे पावे कम्मे कज्जइ ४। ममं च णं सम्मं सहमाणस्स जाव अहियासेमाणस्स किं मन्ने कज्जइ ? एगंतसो मे निज्जरा कज्जइ ५। इच्चेतेहिं पंचाहिं ठाणेहिं छउमत्थे उदिन्ने परीसहोवसग्गे सम्मं सहेज्जा जाव अहियासेज्जा ॥ पंचहिं ठाणेहिं केवली उदिन्ने परीसहोवसग्गे सम्मं सहेज्जा जाव अहियासेज्जा । तंजहा-खेत्तचित्ते खलु अयं पुरिसे तेण मे एस पुरिसे अक्कोसइ वा तहेव जाव अवहरइ वा १ दित्तचित्ते खलु अयं पुरिसे तेण मे एस पुरिसे जाव अवहरइ वा २ जक्खाइट्ठे खलु अयं पुरिसे तेण मे एस पुरिसे जाव अवहरइ वा ३ ममं च णं तब्भववेयणिज्जे कम्मे उदिन्ने भवइ तेण मे एस पुरिसे जाव अवहरइ वा ४ ममं च णं सम्मं सहमाणे खममाणे तितिक्खमाणे अहियासेमाणे पासित्ता बहवे अन्ने छउमत्था समणा निग्गंथा उदिन्ने २ परीसहोवसग्गे एवं सम्मं सहिस्संति जाव अहियासिस्संति ५ इच्चेतेहिं पंचहिं ठाणेहिं केवली उदिन्ने परिसहे सम्मं सहेज्जा जाव अहियासेज्जा इति " । वृत्तिर्यथा-' पंचहीत्यादि ' स्फुटं किंतु छाद्यते येन तच्छद्म-ज्ञानावरणादिघातिकर्मचतुष्टयं तत्र तिष्ठतीति छद्मस्थः-सकषाय इत्यर्थः । उदीर्णान्-उदितान् परीषहोपसर्गानभिहितस्वरूपान् सम्यक्कषायोदयनिरोधादिना सहेत भयाभावेनाविचलनाद्भटवत्, क्षमेत क्षान्त्या, तितिक्षेत अदीनतया, अध्यासीत परीषहादावेवाधिक्येनासीत न चलेदिति । उदीर्णमुदितं प्रबलं वा कर्म-मिथ्यात्वमोहनीयादि यस्य स उदीर्णकर्मा खलु वाक्यालङ्कारे अयं प्रत्यक्षः पुरुष उन्मत्तको मदिरादिना विप्लुतचित्तः स इव उन्मत्तकभूतः, भूतशब्दस्योपमानार्थत्वात्, उन्मत्तक एव वा उन्मत्तकभूतो भूतशब्दस्य प्रकृत्यर्थत्वादुदीर्णकर्मा, यतोऽयं उन्मत्तकभूतःपुरुषः तेन कारणेन ' मे इति ' मां एषःअयमाक्रोशति शपति, ' उपहसइत्ति ' उपहासं करोति, अपघर्षति अपघर्षणं करोति, निश्छोटयति सम्बन्धान्तरसम्बन्धं हस्तादौ गृहीत्वा बलात्क्षिपति, निर्भर्त्सयति दुर्वचनैः, बध्नाति रज्वादिना, रुणद्धि कारागारप्रवेशादिना, छवेः-शरीरावयवस्य हस्तादेःछेदं करोति, प्रमारं-मरणप्रारंभः प्रमारोमूर्च्छाविशेषो मारणस्थानं वा तं नयतिप्रापयतीति, अपद्रावयति मारयति, अथवा प्रमारं मरणमेव ' उद्दवेइत्ति ' उपद्रवयति उपद्रवं करोतीति, पतद्ग्रहं-पात्रं कम्बलं प्रतीतं पादप्रोञ्छनं-रजोहरणं आच्छिनत्ति-बलादुद्दालयति, विच्छिनत्ति-विच्छिन्नं करोति दूरे व्यवस्थापयतीत्यर्थः, अथवा वस्त्रमीषच्छिनत्ति-आच्छिनत्ति, विशेषेण छिनत्ति-विच्छिनत्ति, भिनत्तिपात्रं स्फोटयति अपहरति-चोरयति । वाशब्दाः सर्वे विकल्पार्थाः, इत्येकं परीषहादिसहनालम्बनस्थानं । इदं चाक्रोशादिकमिह

प्राय आक्रोशवधाभिधानपरीषहद्वयरूपं मन्तव्यम्, उपसर्गविवक्षायां तु मानुष्यकं प्राद्वेषिकाद्युपसर्गरूपमिति । तथा यक्षाधिष्ठितो-देवताधिष्ठितोऽयं, तेनाक्रोशयतीत्यादि द्वितीयम् । तथा अयं हि परीषहोपसर्गकारी मिथ्यात्वादिकर्मवशवर्त्ती ' ममं च णंति ' मम पुनस्तेनैव मानुष्यकेण भवेन जन्मना वेद्यते-अनुभूयते यत्तत्तद्धववेदनीयं कर्मोदीर्णं भवति अस्ति तेनैष मामाक्रोशयतीत्यादि तृतीयम् । तथा एष बालिशः पापाभीतत्वात्करोतु नामाक्रोशनादि मम पुनरसहमानस्य ' किं मन्नेत्ति ' मन्ये इति निपातो वितर्कार्थः ' कज्जइत्ति ' संपद्यते इह विनिश्चयमाह-' एगंतसोत्ति ' एकान्तेन सर्वथा पापं कर्मा-असातादि क्रियते-संपद्यते इति चतुर्थः । तथा अयं तावत्पापं बध्नाति मम चेदं सहतो निर्जरा क्रियते इति पञ्चमम् । ' इच्चेतेहीत्यादि ' निगमनमिति, शेषं सुगममिति । छद्मस्थविपर्ययः केवलीति तत्सूत्रम् । तत्र च क्षिप्तचित्तः पुत्रशोकादिना नष्टचित्तः । दृप्तचित्तः पुत्रजन्मादिना दर्पवच्चित्तनुन्मत्त एवेति । मां च सहमानं दृष्ट्वा अन्येऽपि सहिष्यन्त्युत्तमानुसारित्वात्प्राय इतरेषाम् । यदाह-" जो उत्तमेहिं मग्गो, पहओ सो दुक्करो न सेसाणं । आयरियंमि जयंते, तयणुचरा केण सीएज्ज ॥ १ ॥ " त्ति ' इच्चेतेहि इत्यादि ' अत्रापि निगमनं, शेषं सुगमम् ॥ इति स्थानाङ्गपञ्चमस्थानकप्रथमोद्देशके ४४० प्रतौ २५५।२५६ पत्रे ॥ १३ ॥

श्रीजिनशासने कुत्रापि नैकान्ततो हठो विधेयो, यतो निषिद्धमाद्रियते कारणात्, क्वचिदादृतमपि निषिध्यते । नैकान्ततः किञ्चिन्निषिद्धमादृतं वा,सूत्राज्ञैव सर्वत्र प्रमाणं, न स्वमतिकल्पना । एवं प्रतिमापूजादिष्वपि ज्ञेयम् । तथैव च साधूनां परमनिषिद्धोऽपि स्त्रीस्पर्शो निर्ग्रन्थ्यवलम्बनादौ विहितत्वेनोक्तः समीचीनतामञ्चति । तत्सूत्रं चेदम्-

" पंचहिं ठाणेहिं समणे निग्गंथे निग्गंथिं गिण्हमाणे वा अवलंबमाणे वा णाइक्कमइ, तंजहा-निग्गंथिं च णं अन्नयरे पसुजाइए वा पक्खिजाइए वा ओहाएज्जा, तत्थ निग्गंथे निग्गंथिं गिण्हमाणे वा अवलंबमाणे वा नाइक्कमइ १। निग्गंथे निग्गंथिं दुग्गंसि वा विसमंसि वा पक्खलमाणिं वा पवडमाणिं वा गिण्हमाणे वा अवलंबमाणे वा नाइक्कमइ २। निग्गंथे निग्गंथिं सेयंसि वा पंकंसि वा पणगंसि वा उदगंसि वा उवक्कसमाणिं वा उवुज्झमाणिं वा गिण्हमाणे वा अवलंबमाणे वा नाइक्कमइ ३। निग्गंथे निग्गंथिं नावं आरुहमाणे ओरुहमाणे वा णाइक्कमइ ४। खित्तइत्तं दित्तइत्तं जक्खाइट्ठं उम्मायपत्तं वा उवसग्गपत्तं वा साहिगरणं सपायच्छित्तं भत्तपाणपडियाइक्खित्तं अट्ठजायं निग्गंथे निग्गंथिं गिण्हमाणे वा अवलंबमाणे वा णाइक्कमइ ५। " वृत्तिर्यथा-' पंचहिं इत्यादि ' सुगमम्

नवरं ' गिण्हमाणेत्ति ' बाह्वादावङ्गे गृह्णन् अवलंबमानः-पतन्तीं बाह्वादौ गृहीत्वा धारयन्, अथवा ' सव्वंगियं तु गहणं, करेण अवलंबणं तु देसंमित्ति ।' नातिक्रामति स्वाचारमाज्ञां वा गीतार्थः स्थविरो वा निर्ग्रन्थिकाभावेन यथाकथञ्चित्पशुजातीयो दृप्तो गवादिः, पक्षिजातीयो गृध्रादिः,' ओहाएज्जत्ति ' उपहन्यात्तत्र उपहनने गृह्णन्नातिक्रामति, कारणिकत्वान्निष्कारणत्वे तु दोषाः, यदाह-" मिच्छत्तं उड्डाहो विराहणा फासभावसंबंधो, पडिगमणाई दोसा भुत्ताभुत्ते य नायव्वा ॥ १ ॥ इत्येकम् । तथा दुःखेन गम्यतेऽसौ दुर्गः । स च त्रिधा-वृक्षदुर्गः श्वापददुर्गो म्लेच्छादिमनुष्यदुर्गः । तत्र वामार्गे, उक्तं च-" तिविहं च होइ दुग्गं, रुक्खे सावयमणुस्सदुग्गं च " त्ति । तथा विषमे वा-गर्त्तापाषाणाद्याकुले पर्वते वा प्रस्खलन्तीं वा गत्या प्रपतन्तीं वा भुवि । अथवा " भूमीए असंपत्तं पत्तं वा हत्थजाणुणादीहिं । पक्खलणं नायव्वं पवडणभूमीय गत्तेहिं । १ ।" गृह्णन्नातिक्रामतीति द्वितीयम् । तथा पङ्कः पनको वा सजलो यत्र निमज्जते स सेकस्तत्र वा, पङ्कः कर्दमस्तत्र वा, पनके वा आगन्तुकप्रतनुद्रवरूवे कर्दम एव वा अपकसन्तीं पङ्कपनकयोः परिहसन्तीं अपोह्यमानां सेके पनके वा नीयमानां गृह्णन्नातिक्रामतीति । गाथा चेह-" पंको खलु चिक्खिल्लो, आगंतुपतणुओ दवो पणओ । सोच्चिय सजलो सेओ, सिइज्जइ जत्थ दुविहेवि ॥ १ ॥ त्ति । पंकपणएसु नियमा, उवकसणं वुज्झणं सिया सेए । निग्गमि निमज्जणा य, सजले सेए सिया दोवि ॥ २ ॥ " त्ति इति तृतीयम् । तथा-' नावमारुहमाणेत्ति ' आरोहयन् ' ओरुहमाणेत्ति ' अवरोहयन्नुत्तारयन्नित्यर्थो नातिक्रामतीति चतुर्थम् । तथा-क्षिप्तं-नष्टं रागभयापमानैश्चित्तं यस्याः सा क्षिप्तचित्ता तां वा । उक्तं च-" रागेण वा भयेण वा, अहवा अवमाणिया महंतेहिं । एतेहिं खित्तचित्तत्ति " तथा दृप्तं-सन्मानाद्दर्पवच्चित्तं यस्याः सा दृप्तचित्ता तां वा । उक्तं च-" इति एस असंमाणा, खित्तो संमाणओ भवे दित्तो । अग्गीव इंधणेणं, दिप्पइ चित्तं इमेहिं तु ॥ १ ॥ लाभमएण व मत्तो, अहवा जेऊण दुज्जयं सत्तुंति " । यक्षेण-देवेन आविष्टा-अधिष्ठिता यक्षाविष्टा तां वा । अत्रोक्तम्-" पुव्वभववेरिएणं, अहवा रागेण रागिया संती । एतेहिं जक्खइट्ठत्ति " उन्मादं उन्मत्ततां प्राप्ता उन्मादप्राप्ता तां वा । अत्राप्युक्तम्-" उम्माओ खलुदुविहो, जक्खाएसो य मोहणिज्जो य। जक्खाएसो वुत्तो, मोहेण इमं च वोच्छामि ॥ १ ॥ रूवंगं दट्ठूणं, उम्माओ अहव पित्तमुच्छाएत्ति " उपसर्गं-उपद्रवं प्राप्ता उपसर्गप्राप्ता तां वा । इहाप्युक्तम्-" तिविहे खलु उवस्सग्गे, दिव्वे माणुस्सए तिरिक्खे य । दिव्वे य पुव्वभणिए, माणुस्से आभिओगे य ॥ १ ॥ विज्जाए मंतेण य, चुण्णेण व जोइया अणप्पवसत्ति "

तथा सहाधिकरणेन साधिकरणा युद्धार्थमुपस्थिता तां वा । सह प्रायश्चित्तेन सप्रायश्चित्ता ताम् । भावना चेह-" अहिगरणंमि कयंमि उ, खामेत्तुमुवट्ठियाए पच्छित्तं । तप्पढमयाभएणं, होइ किलं ताव वहमाणी ॥ १ ॥ " तथा भक्तपाने आभवं प्रत्याख्याते यया सा भक्तपानप्रत्याख्याता, तां वा । इह गाथा-" अट्ठं वा हेउं वा, समणीणं विरहए कहिंतस्स । मुच्छाए विवडियाए, कप्पइ गहणं परिण्णाए ॥ १ ॥ " तथा अर्थः-कार्यमुत्प्रव्राजनतः स्वकीयपरिणेत्रादेर्जातं यया सा अर्थजाता, पतिचौरादिना संयमाच्चाल्यमानेत्यर्थः तां वा । इह गाथा अन्नोवि जीए कज्जं संजायं एस अत्थजायो उ । तं पुण संजमभावा, चालिज्जंति समवलंबं ॥ १ ॥" ति इति स्थानाङ्गपञ्चमस्थानकद्वितीयोद्देशके २४२ प्रतौ १५१ पत्रे ॥ १४ ॥

केचिदशास्त्रज्ञाः प्रतिपादयन्ति, यथा यादृशस्तादृशो भवतु परं तीर्थङ्करासनोपविष्टत्वात्तीर्थङ्करतुल्यत्वाच्चाचार्यो न त्याज्यः । असत्प्ररूपणे तु तस्य संसारवृद्धिः, किमन्येषामित्यादि । तच्च कुमतिविजृंभितं, कैश्चित् कारणैराचार्योपाध्यायस्यापि गणापक्रमणं भवतीत्युक्तत्वात् । तच्चेदम्-

" पंचहिं ठाणेहिं आयरियउवज्झायस्स गणावक्कमणे पण्णत्ते । तंजहा-आयरियउवज्झाए गणंसि आणं वा धारणं वा नो सम्मं पउंजित्ता भवइ १ । आयरियउवज्झाए गणंसि अहारायणियाए किइकम्मं वेणइयं णो सम्मं पउंजित्ता भवइ २ । आयरियउवज्झाए गणंसि जे सुअपज्जवजाए धारिंति ते काले काले नो सम्ममणुप्पवाएत्ता भवइ ३ । आयरियउवज्झाए गणंसि सगणियाए वा परगणियाए वा निग्गंथीए बाहिल्लेसे भवइ ४ । मित्तणाइगणे वा से गणाओ अवक्कमेज्जा तेसिं संगहोवग्गहट्ठयाए गणावक्कमणे पन्नत्ते इति " वृत्तिर्यथा-' पंचहिं इत्यादि ' सुगमम् । नवरं आचार्योपाध्यायस्य आचार्योपाध्यायर्योर्वा गणात्-गच्छादपक्रमणं-निर्गमो गणापक्रमणम् । आचार्योपाध्याययोर्गणे गच्छविषये आज्ञां वा योगेषु प्रवर्त्तनलक्षणां धारणां वा धेयेषु प्रवर्त्तनलक्षणां नो -नैव सम्यग् यथौचित्यं प्रयोक्ता तयोः प्रवर्त्तनशीलो भवति, इदमुक्तं भवति-दुर्विनीतत्वाद्गणस्य ते प्रयोक्तुमशक्नुवन् गणादपक्रामति, कालिकाचार्य-वदित्येकम् । तथा गणविषये रत्नाधिकतया यथाज्येष्ठं कृतिकर्म तथा वैनयिकं-विनयं नो-नैव सम्यक् प्रयोक्ता भवति, आचार्यसंपदां साभिमानत्वात् । यत आचार्येणापि प्रतिक्रमणक्षामणादिषूचितानामुचितविनयः कर्त्तव्य एवेति द्वितीयम् । तथाऽसौ यानि श्रुतपर्यवजातानि-

यान् श्रुतपर्यायप्रकारानुद्देशकाध्ययनादीन् धारयति हृद्यविस्मरणतस्तानि काले काले यथावसरं नो सम्यगनुप्रवाचयिता-तेषां पाठयिता भवति। ' गणेत्ति ' इह संबध्यते, तेन गणे-गणविषये गणमित्यर्थः। तस्याविनीतत्वात्स्वस्य वा सुखलंपटत्वान्मन्दप्रज्ञत्वाद्वेति गणादपक्रामतीति तृतीयम्। तथाऽसौ गणे वर्तमानः ' सगणियाएत्ति ' स्वगणसम्बन्धिन्यां ' परगणियाएत्ति ' परगणसत्कायां वा निर्ग्रन्थ्यां तथाविधाशुभकर्मवशवर्त्तितया सकलकल्याणाश्रयसंयमसौधमध्याद्बहिर्लेश्या-अन्तःकरणं यस्यासौ बहिर्लेश्य आसक्तो भवतीत्यर्थः एवं गणादपक्रामतीति। न चेदमधिकगुणत्वेनास्यासंभाव्यम् यतः पठ्यते-" कम्माइं नूणं घणचिक्कणाइं गुरुयाइं वज्जसाराइं। नाणड्ढियंपि पुरिसं, पंथाओ उप्पहं नेति॥ १॥ " इति चतुर्थम् तथा मित्रं-ज्ञातिर्गणो वा सुहृत्स्वजनवर्गो वा से-तस्याचार्यादेः कृतोऽपि कारणाद्गणादपक्रमेत्, अतस्तेषां सुहृत्स्वजनानां संग्रहाद्यर्थं गणादपक्रामणं प्रज्ञप्तम्। तत्र संग्रहस्तेषां स्वीकार उपग्रहो वस्त्रादिभिरूपष्टंभ इति पञ्चमम्। इति स्थानाङ्गपंचमस्थानकद्वितीयोद्देशके २४२ प्रतौ १५२ पत्रे॥ १५॥

केचिच्च वयं सिद्धान्तोक्तमेव स्वीकुर्म इत्यादि वृथा प्रलपन्तः परंपराचरणाद्यपलपन्ति, तच्चाज्ञानविलसितम्। यतः शास्त्रे मुनीनां प्रायश्चित्तदानाधिकारे आगमश्रुताज्ञाधारणाजीतानां पञ्चानामपि व्यवहारत्वेनोक्तत्वात्। तच्चेदम्

" पंचविहे ववहारे पण्णत्ते, तंजहा-आगमे सुए आणा धारणा जीए। जहा से तत्थ आगमे सिया, तत्थ आगमेणं ववहारं पट्ठवेज्जा १। नो से तत्थ आगमे सिया, जहा से तत्थ सुते सिया, सुतेणं ववहारं पट्ठवेज्जा २। नो से तत्थ सुते सिया, एवं जाव जहा से तत्थ जीए सिया, जीएणं ववहारं पट्ठवेज्जा। इच्चेतेहिं पंचहिं ववहारं पट्ठवेज्जा। तंजहा-आगमेणं जाव जीएणं, जहा जहा से तत्थ आगमे जाव जीए तहा तहा ववहारं पट्ठवेज्जा इति " वृत्तिर्यथा-' पंचविहे इत्यादि '। व्यवहरणं व्यवहारः, व्यवहारो-मुमुक्षप्रवृतिनिवृत्तिरूपः, इह तु तन्निबन्धनत्वाद् ज्ञानविशेषोऽपि व्यवहारः। तत्रागम्यन्ते-परिच्छिद्यन्ते अर्था अनेनेत्यागमः केवलमनःपर्यायावधिपूर्वचतुर्दशकदशकनवकरूपः १ शेषं श्रुतमाचारप्रकल्पादि श्रुतम् २ नवादिपूर्वाणां श्रुतत्वेऽप्यतीन्द्रियार्थज्ञानहेतुत्वेन सातिशयत्वादागमव्यपदेशः केवलवदिति। यदगीतार्थस्य पुरतो गूढार्थपदैर्देशान्तरस्थगीतार्थनिवेदनायातिचारालोचनमितरस्यापि तथैव शुद्धिदानं साऽऽज्ञा ३ गीतार्थसंविग्नेन द्रव्याद्यपेक्षया यत्रापराधे यथा या विशुद्धिःकृता तामवधार्य यदन्यस्तत्रैव तथैव तामेव प्रयुंक्ते सा धारणा। वैयावृत्त्यकरोदेर्वा गच्छोपग्रहकारिणोऽशेष-

स्यानुचितस्योचितप्रायश्चित्तपदानां प्रदर्शितानां धारणं धारणेति । ४ । तथा द्रव्यक्षेत्रकालभावपुरुषप्रतिषेवानुवृत्त्या संहननधृत्यादिपरिहाणिमवेक्ष्य यत्प्रायश्चित्तदानम् यो वा यत्र गच्छे सूत्रातिरिक्तः कारणतः प्रायश्चित्तव्यवहारः प्रवर्त्तितो बहुभिरन्यैश्चानुवर्त्तितस्तज्जीतमिति, अत्र गाथाः-" आगमसुयववहारो, मुणह जाह धीर पुरिसपन्नत्तो पच्चक्खो य, परोक्खो सो वि अ दुविहो मुणेयव्वो ॥ १ ॥ पच्चक्खो वि य दुविहो, इंदियजो चेव नो य इंदियओ । इंदियपच्चक्खो वि य, पंचसु विसएसु नेयव्वो ॥ २ ॥ नोइंदियपच्चक्खो, ववहारो सो समासओ तिविहो । ओहिमणपज्जवे या, केवलनाणे य पच्चक्खो ॥ ३ ॥ पच्चक्खागमसरिसो, होइ परोक्खो वि आगमो जस्स । चंदमुहीव उ सो वि हु, आगमववहारवं होइ ॥ ४ ॥ परोक्खं ववहारं, आगमओ सुयहरा ववहरंति । चोद्दसदसपुव्वधरा, नवपुव्विग गंधहत्थी य ॥ ५ ॥ (एते गन्धहस्तिसमाः) " जं जह मोल्लं रयणं, तं जाणइ रयखवाणिओ निउणं । इय जाणइ पच्चक्खी, जो सुज्झइ जेण दिन्नेणं ॥ ६ ॥ कप्पस्स य निज्जुत्तिं, ववहारस्सेव परमनिउणस्स । जो अत्थओ वियाणइ सो ववहारी अणुन्नाओ ॥ ७ ॥ तं चेव अणुसज्जंते, (अनुसरन्) ववहारविहिं पउंजइ जहुत्तं । एसो सुअववहारो, पन्नत्तो वीयरागेहिं ॥ ८ ॥ अपरक्कमो तवस्सी, गंतुं जो सोहिकारगसमीवे । न चएई आगंतुं, सो सोहिकरो विदेसाओ ॥ ९ ॥ अह पट्ठवेइ सीसं, देसंतरगमणनट्ठचेट्ठाओ । इच्छामऽज्जो काउं, सोहिं तुब्भं सगासंमि ॥ १० ॥ सो ववहारविहिन्नू, अणुसज्जित्ता सुओवएसेणं । सीसस्स देइ आणं तस्य इमं देह पच्छित्तं ॥ ११ ॥ ' गूढपदैरुपदिशतीति ' । ३ । जेणऽन्नयाइ दिट्ठं, सोहीकरणं परस्स कीरंतं । तारिसयं चेव पुणो, उप्पन्नं कारणं तस्स ॥ १२ ॥ सो तंमि चेव दव्वे, खित्ते काले य कारणे पुरिसे । तारिसयं चेव पुणो, करिंतु आराहओ होइ ॥ १३ ॥ वेयावच्चकरो वा, सीसो वा देसहिंडओ वावि ' देसं अवधारंतो, चउत्थओ होइ ववहारो ॥ १४ ॥ त्ति ' बहुसो बहुस्सुएहिं, जो वत्तो नो निवारिओ होइ । वत्तणुवत्तपमाणं, जीएणं कयं हवइ एयं ॥ १५ ॥ तथा-जं जस्स उ पच्छित्तं, आयरियपरंपराए अविरुद्धं । जोगा य बहुविहीया, एसो खलु जीयकप्पो उ ॥ १६ ॥ " इति । जीतं-आचरितमिदं चास्य लक्षणम्. " असढेण समाइन्नं, जं कत्थइ केणई असावज्जं । न निवारियमन्नेहिं, बहुमणुमयमेयमायरियं ॥ १७ ॥ " इति, आगमादीनां व्यापारणे उत्सर्गापवादावाह-' यथेति '-यत्प्रकारः केवलादीनामन्यतमः ' से ' तस्य व्यवहर्त्तुः स च उक्तलक्षणः । तत्र तेषु पञ्चसु व्यवहारेषु मध्ये तस्मिन् वा प्रायश्चित्तदानादिव्यवहारकाले व्यवहर्त्तव्ये वा

वस्तुनि विषये आगमः-केवलादिः स्यात्-भवेत्ताद्दशेनेति शेषः। आगमेन व्यवहारं-प्रायश्चितदानादिकं प्रस्थापयेत्-प्रवर्त्तयेन्न शेषैः, आगमेऽपि षड्विधे केवलेनावन्ध्यबोधकत्वात्तस्य तदभावे च मनःपर्यायेणैवं प्रधानतराभावे इतरेणेति, अथवा ' नो ' नैव ' से ' तस्य स वा तत्र व्यवहर्त्तव्यादावागमः स्यात् यथा-यत् प्रकारं तत्र श्रुतं स्यात्ताद्दशेन श्रुतेन व्यवहारं प्रस्थापयेदिति। ' इच्चेतेहिं ' इत्यादि निगमनं सामान्येनेति। यथा यथासौ तत्रागमादिः स्यात्तथा तथा व्यवहारं प्रस्थापयेदिति तु विशेषनिगमनम्। इति स्थानाङ्गपञ्चमस्थानकाद्वितीयोद्देशके ४४० प्रतौ २६६ पत्रे ॥ १६ ॥

ननु धर्मपुण्ययोः कः प्रतिविशेष ? उच्यते, धर्मः श्रुतचारित्रादिः। पुण्यं तत्फलभूतं शुभं कर्म। अयमेव भगवतीवृत्तावभिप्रायस्तथाऽत्रापि-

' णवविहे पुन्ने पन्नत्ते। तं जहा-अन्नपुन्ने १ पाणपुन्ने २ वत्थपुन्ने ३ लेणपुन्ने ४ सयणपुन्ने ५ मणपुन्ने ६ वतिपुन्ने ७ कायपुन्ने ८ नमोक्कारपुन्ने ९। इति। वृत्तिर्यथा-' पुन्ने ' त्यादि, पात्रायान्नदानाद्यस्तीर्थङ्करनामादिपुण्यप्रकृतिबन्धस्तदन्नपुण्यमेवं सर्वत्र। नवरं ' लेण ' त्ति लयनं-गृहम्, शयनं-संस्तारकः, मनसा गुणिषु तोषात्, वाचा प्रशंसनात्, कायेन पर्युपासनात् नमस्काराच्च, यत्पुण्यं तन्मनःपुण्यादीनि। उक्तं च " अन्नं १ पानं २ च वस्त्रं ३ च, आलयः ४ शयना ५ सनम् ६। शुश्रूषा ७ वन्दनं ८ तुष्टिः ९, पुण्यं नवविधं स्मृतम् ॥ १ ॥ " इति स्थानाङ्गनवमस्थानके ४४० प्रतौ ३३७ पत्रे ॥ १७ ॥

दुर्लभबोधिनः प्रतिमापलापिनः केचन स्थापनां नाङ्गीकुर्वते, तच्च तेषां भूताविष्टहसितप्रायं, सिद्धान्ते स्थापनायाः सत्यत्वेनोक्तत्वात्। सचायम्-

" दसविधे सच्चे पन्नत्ते। तं जहा-जणवय १ संमय २ ठवणा ३, नामे ४ रूवे ५ पडुच्चसच्चे य ६। ववहार ७ भाव ८ जोगे ९, दसमे ओवम्मसच्चे य १०। ॥ १ ॥ " वृत्तिर्यथा-' जणवय ' त्ति सत्यशब्दः प्रत्येकमभिसंबन्धनीयः ततश्च जनपदेषु-देशेषु दद्यदर्थवाचकतया रूढं देशान्तरेऽपि तत्तदर्थवाचकतया प्रयुज्यमानं सत्यं-अवितथमिति जनपदसत्यम्, यथा कोङ्कणादिषु पयः पिच्चं नीरमुदकमित्यादि, सत्यत्वं चास्यादुष्टविवक्षाहेतुत्वान्नानाजनपदेष्विष्टार्थप्रतिपत्तिजनकत्वव्यवहारप्रवृत्तेरेवं शेषेष्वपि भावना कार्येति। 'संमय' त्ति संमतं च तत्सत्यं चेति संमतसत्यम्, तथाहि-कुमुदकुवलयोत्पलतामरसानां समाने पङ्कसंभवे गोपालादीनामपि संमतमरविन्दमेव

पङ्कजमिति, अतस्तत्र संमततया पङ्कजशब्दः सत्यः, कुवलयादावसत्योऽसंमतत्वादिति । ' ठवण ' त्ति स्थाप्यते इति स्थापना-यल्लेप्यकर्माहदादिविकल्पेन स्थाप्यते तद्विषये सत्यं स्थापनासत्यम्, यथाऽजिनोऽपि जिनोऽयमनाचार्योऽप्याचार्योऽयमिति ॥ ' नामे ' त्ति नाम-अभिधानं तत्सत्यं नामसत्यम्, तथा कुलमवर्द्धयन्नपि कुलवर्द्धन उच्यते एवं धनवर्द्धन इति । ' रूवे 'त्ति-रूपापेक्षया सत्यम् रूपसत्यं, यथा प्रपञ्चयतिः प्रव्रजितरूपं धारयन् प्रव्रजित उच्यते, नचासत्यताऽस्येति । ' पडुच्चसच्चे ' त्ति प्रतीत्य-आश्रित्य वस्त्वन्तरं सत्यम् प्रतीत्यसत्यं यथा अनामिकाया दीर्घत्वं ह्रस्वत्वं चेति । तथाहि-तस्यानन्तपरिणामस्य द्रव्यस्य तत्तत्सहकारिकारणसंनिधानेन तत्तद्रुपमभिव्यज्यत इति सत्यता । ' व्यवहार ' त्ति व्यवहारेण सत्यं व्यवहारसत्यम्, यथा दह्यते गिरिर्गलति भाजनम्, अयं च गिरिगततृणादिदाहे व्यवहारः प्रवर्त्तते, उदके च गलतिसतीति । ' भाव ' त्ति भावं-भूयिष्ठशुक्लादिपर्यायमाश्रित्य सत्यं भावसत्यम्-यथा शुक्ला बलाकेति, सत्यपि हि पञ्चवर्णसंभवे शुक्लवर्णोत्कटत्वात् शुक्लेति । ' जोगे ' त्ति योगतः-संबन्धतः सत्यं योगसत्यं, यथा दण्डयोगाद्दण्डश्छत्रयोगाच्छत्र एवोच्यते । दशममौपम्यसत्यमिति उपमैवौपम्यं तेन सत्यमौपम्यसत्यम्, यथा समुद्रवत्तडागं, देवोऽयं, सिंहस्त्वमिति सर्वत्रैकारः प्रथमैकवचनार्थो द्रष्टव्यः । इति स्थानाङ्गदशमस्थानके ४४० प्रतौ ४०४ पत्रे ॥ १८ ॥

दानस्वरूपजिज्ञासया किञ्चिल्लिख्यते-

" दसविहे दाणे पन्नत्ते, तं जहा-अणुकंपा १ संगहे २ चेव, भये ३ कालुणिएइ य ४ । लज्जाए ५ गारवेणं च ६ अधम्मे ७ उण सत्तमे ॥ १ ॥ धम्मे ८ य अट्ठमे वुत्ते, काहीइ ९ य कयंति १० य । वृत्तिर्यथा-दानस्य भेदानामनुयोगमाह-'दस' इत्यादिः, अणुकंपेत्यादिश्लोकः सार्द्धः, ' अणुकंप ' इति दानशब्दसंबन्धादनुकम्पया-कृपया दानं दीनानाथविषयमनुकंपादानमथवा अनुकंपातो यद्दानं तदनुकंपैवोपचारात्, उक्तं च वाचकमुख्यैरुमास्वातिपूज्यपादैः-" कृपणे ऽनाथदरिद्रे, व्यसनप्राप्ते च रोगशोकहते । यद्दीयते कृपार्थादनुकंपा तद्भवेद्दानम् ॥ १ ॥ " सङ्गहणं सङ्ग्रहो-व्यसनादौ सहायकरणं, तदर्थं दानं सङ्ग्रहदानम्, अथवा अभेदाद्दानमपि सङ्ग्रह उच्यते, आह च-" अभ्युदये व्यसने वा, यत्किञ्चिद्दीयते सहायार्थम् । तत्सङ्ग्रहतोऽभिमतं, मुनिभिर्दानं न मोक्षाय ॥ १ ॥ " तथा भयाद्यद्दानं तद्भयदानम्, भयनिमित्ताद्वा दानमपि भयमुपचारा. दिति । उक्तं च-राजारक्षपुरोहितमधुमुखमावल्लदण्डपाशिषु च । यद्दीयते

भयार्थं तद्भयदानं बुधैर्ज्ञेयम् ॥ १ ॥ ३, ' कालुणिएइ य ' त्ति कारुण्यं-शोकस्तेन पुत्रवियोगादिजनितेन तदीयस्यैव तत्पादेः स जन्मान्तरे सुखितो भवत्विति वासनातोऽन्यस्य वा यद्दानं तत्कारुण्यदानं, कारुण्यजन्यत्वाद्वा दानमपि कारुण्यमुक्तमुपचारादिति ४, लज्जया-ह्रिया दानं यत्तल्लज्जादानमुच्यते । उक्तं च-"अभ्यर्थितः परेण तु, यद्दानं जनसमूहमध्यगतः । परचित्तरक्षणार्थं, लज्जायास्तद्भवेद्दानम् ॥ १ ॥ "५, इति, ' गारवेणं च ' त्ति गौरवेण-गर्वेण यद्दीयते तद्गौरवदानमिति । उक्तं च-" नटनर्त्तमुष्टिकेभ्यो, दानं संबन्धिबन्धुमित्रेभ्यः । यद्दीयतेयशोऽर्थं, गर्वेण तु तद्भवेद्दानम् ॥ १ ॥ "६, अधर्मपोषकम् दानमधर्मदानम्, अधर्मकारणत्वाद्वाऽधर्म एवेति । उक्तं च-" हिंसानृतचौर्योद्यतपरदारपरिग्रहप्रसक्तेभ्यः । यद्दीयते हि दानं, तज्जानीयादधर्माय ॥ १ ॥ " ७ इति, धर्मकारणं यत्तद्धर्मदानं धर्मे एव वा । उक्तं च-"सममणितृणमुक्तेभ्यो, यद्दानं दीयते सुपात्रेभ्यः । अक्षयमतुलमनन्तं, तद्दानं भवति धर्माय ॥ १ ॥ " ८, इति ' काहीइ य ' त्ति करिष्यति कञ्चनोपकारं ममायमिति बुद्ध्या यद्दानं तत्करिष्यति दानमुच्यते ९, तथा कृतं ममानेनैतत्प्रयोजनमिति प्रत्युपकारार्थं यद्दानं तत्कृतमिति दानमुच्यते । उक्तं च-" शतशः कृतोपकारो, दत्तं च सहस्रशो ममानेन । अहमपि ददामि किञ्चित्प्रत्युपकाराय तद्दानम् ॥ १ ॥ " इति १० । इति श्रीस्थानाङ्गदशमस्थानके ४४० प्रतौ ४११ पत्रे ॥ १९ ॥

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालशालातिशालिशीलश्रीश्रीहीरविजयसूरीश्वरशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे विशेषसमुच्चयापरनाम्नि स्थानाङ्गकियद्विचारनामा तृतीयस्तरङ्गः ॥ ३ ॥

॥५१॥

विनमत जिनमतमभिमतफलवितरणसततसज्जममितनयम् ।
मुखरपरवादिमण्डलनिष्ठुरमुखमूकतामन्त्रम् ॥ १ ॥

अथ क्रमायाताः श्रीसमवायाङ्गविचारा लिख्यन्ते-

केचिच्चासद्वादिनः श्रीजिनप्रतिमापूजकान् विगायन्ति-अहो एते पूजाधर्मोपदेशेन जलपुष्पादिजन्तुहिंसका इत्यादि । तच्च सकर्णैरपकर्णनीयम् । यत एकाद्दशं किमपि कायिकं वाचिकं धर्मानुष्ठानं नास्ति, यत्र जीवविराधनाऽभावः । ' जावं च णं एयइ वेयइ ' इत्यादिवचनात्, तथा च किमपि धर्मानुष्ठानं नानुष्ठेयं स्यात् । विराधना चेयं कूपखननन्यायेन प्रतिमापूजनोद्भुतसुकृतप्राग्भारप्लावितेति न दुष्टा, यतो ज्ञानत्रयबन्धुरैरतिचतुरैर्निर्जरैरपि मृदुशीतलजलदेन रजःशमने पृथिव्यादीनां, महेन्द्रध्वजेन वायोः, जलजस्थलजकुसुमवृष्टया वनस्पतेरित्यादिविराधनायाः स्वीकृतत्वात् । यतः श्रीत्रिजगद्गुरोः सहजातिशयाश्चत्वारः, एकादश च कैवल्योद्भुताः, एकोनविंशतिश्च सुरकृताः, सर्वे चतुस्त्रिंशत् सिद्धान्ते उक्ताः तथा हि-

" चोत्तीसं बुद्धाइसेसा पन्नत्ता । तं जहा-अवट्ठिए केसमंसुरोमणहे १, निरामया निरुवलेवा य गायलट्ठी २, गोखीरपंडुरे मंससोणिए ३, पउमुप्पलगंधिए उस्सासणिस्सासे ४, पच्छन्ने आहारनीहारे अदिस्से मंसचक्खुणा ५, आगासगयं चक्कं ६, आगासगयं छत्तं ७, आगासगयाओ सेतवरचामराओ ८, आगासफालियामयं सपायपीठं सीहासणं ९, आगासगओ कुडभीसहसपरिमंडियाभिरामो इंदज्झओ पुरओ गच्छइ १०, जत्थ जत्थ वि य णं अरहंता भगवंता चिट्ठंति वा णिसीयंति वा तत्थ तत्थ वि य णं तक्खणा चेव संछन्नपत्तपुप्फपल्लवसमाउलो सच्छत्तो सज्झओ सघंटो सपडाओ असोगवरपायवो अभिसंजायइ ११, ईसिं पिट्ठओ मउडट्ठाणंमि तेयमंडलं संजायइ अंधकारे वि य णं दसदिसाओ पभासेइ १२, बहुसमरमणिज्जे भूमिभागे १३, अहोसिरा कंटया भवंति १४, ऊऊ विवरीया सुहफासा भवंति १५, सीयलेणं सुहफासेणं सुरभिणा मारुएणं जोअणपरिमंडलं सव्वओ समंता संपमज्जिज्जइ १६, जुत्तफुसिएण मेहेण निहयरयरेणुयं किज्जइ १७, जलथलयभासुरप्पभूएणं बिंटट्ठाइखा दसद्धवन्नेणं कुसुमेणं जाणुस्सेहप्पमाणमित्ते पुप्फोवयारे किज्जइ १८, अमणुन्नाणं सद्दफरिसरसरूवगंधाणं अवकरिसो भवइ १९, मणुन्नाणं सद्दफरिसरसरूवगंधाणं पाउब्भावो भवइ २०, पच्चाहरओ वि य

णं हिययगमणीओ जोअणनीहारी सरो २१, भगवं च णं अद्धमागधीए मासाए धम्ममाइक्खइ २२, सावि य णं अद्धमागधी भासा भासिज्जमाणी तेसिं सव्वेसिं आरियमणारियाणं दुपयचउप्पयपसुपक्खिसरीसिवाणं अप्पप्पणो हियसिवसुहदा सभासत्ताए परिणमइ २३, पुव्वबद्धवेरा वि य णं देवासुरनागसुवन्नजक्खरक्खसकिंनरकिंपुरिसगरुलगंधव्वमहोरगा अरहओ पायमूले पसंतचित्तमाणसा धम्मं निसामेंति २४, अन्नउत्थियपावणीया वि य णं आगया वंदंति २५, आगया समाणा अरहओ पायमूले निप्पडिवयणा भवंति २६, जओ जओ वि य णं अरहंतो भगवंतो विहरंति, तओ तओवि य णं जोयणपणवीसाएणं ईती न भवइ २७, मारी न भवइ २८, सचक्कं न भवइ २९, परचक्कं न भवइ ३०, अइवुट्ठी न भवइ ३१, अणावुट्ठी न भवइ ३२, दुब्भिक्खं न भवइ ३३, पुव्वुप्पन्ना वि य णं उप्पाइया वाही खिप्पामेव उवसमंति ३४, इति । वृत्तिर्यथा-

अथ चतुस्त्रिंशत्स्थानके किमपि लिख्यते-' बुद्धाइसेसा ' इति बुद्धानां-तीर्थकृतामतिशेषा-अतिशया बुद्धातिशयाः । अवस्थितं-अवृद्धिस्वभावम् केशाश्च-शिरोजाः श्मश्रूणि च-कुर्चरोमाणि रोमाणि च-शेषशरीरलोमानि नखाश्च प्रतीता इति द्वन्द्वैकत्वमित्येकः १ । निरामया-नीरोगा, निरुपलेपा-निर्मला गात्रयष्टिः-तनुलतेति द्वितीयः २ । गोक्षीरपाण्डुरं मांसशोणितमिति तृतीयः ३ । तथा पद्मं च-कमलं गन्धद्रव्यविशेषो वा यत्पद्मकमिति रूढम् उत्पलं च-नीलोत्पलमुत्पलकुष्ठं वा गन्धद्रव्यविशेषस्तर्योगन्धः स यत्रास्ति तत्तथोच्छ्वासनिश्वासमिति चतुर्थः ४ । प्रच्छन्नमाहारनीहारं-अभ्यवहरणं मूत्रपुरीषोत्सर्गौ प्रच्छन्नत्वमेव स्फुटतरमाह-अदृश्यं मांसचक्षुषा न पुनरवध्यादिलोचनेन पुंसेति पञ्चमः ५ । एतच्च द्वितीयादिकमतिशयचतुष्कं जन्मप्रत्ययम् । तथा-' आगासगयं ' ति आकाशगतं-व्योमवर्त्ति आकाशकं वा प्रकाशकमित्यर्थः, चक्रं-धर्मचक्रमिति षष्ठः ६। एवं आकाशगं छत्रं छत्रत्रयमित्यर्थः इति सप्तमः ७ । आकाशके-प्रकाशके श्वेतवरचामरे प्रकीर्णके इत्यर्थः इत्यष्टमः ८ । ' आगासफालियामय ' त्ति आकाशमिव यदत्यन्तमच्छं स्फटिकं तन्मयं सिंहासनं सह पादपीठेन सपादपीठमिति नवमः ९ । ' आगासगओ ' त्ति आकाशगतोऽत्यर्थं तुङ्ग इत्यर्थः ' कुडभि ' त्ति लघुपताकाः संभाव्यन्ते तत्सहस्रैः परिमण्डितश्चासावभिरामश्चअतिरमणीयः इति विग्रहः ' इंदज्झओ ' त्ति शेषध्वजापेक्षयाऽतिमहत्वादिन्द्रश्चासौ ध्वजश्च इन्द्रध्वजः इति विग्रहः इन्द्रत्वसूचको ध्वज इति वा ' पुरओ ' त्ति जिनस्याग्रतो गच्छतीति दशमः १० । ' चिट्ठंति वा निसीयंति व ' त्ति तिष्ठन्ति-गतिनिवृत्त्या निषीदन्तिउपविशन्ति ' तक्खणा चेव '

त्ति तत्क्षणमेवाकालहीनमित्यर्थः, पत्रैः संछन्नः पत्रसंछन्न इति वक्तव्ये प्राकृतत्वात् संछन्नपत्र इत्युक्तं स चासौ पुष्पपल्लवसमाकुलश्च इतिविग्रहः पल्लवा-अंकुराः सच्छत्रः सध्वजः सघण्टः सपताकोऽशोकवरपादप इत्येकादशः ११ । ' ईसि 'त्ति ईषत्त-अल्पं 'पिट्ठओ ' त्ति पृष्ठतः पश्चाद्भागे ' मउडट्ठाणंमि ' त्ति मस्तकप्रदेशे तेजोमण्डलं-प्रभापटलमिति द्वादशः १२ । बहुसमरमणीयो भूमिभाग इति त्रयोदशः १३ । ' अहोसिर 'त्ति अधोमुखाः कण्टका भवन्तीति चतुर्दशः १४ । ऋतवोऽविपरीताः कथमित्याह-सुखस्पर्शा भवन्तीति पञ्चदशः १५ । योजनं यावत्क्षेत्रशुद्धिः संवर्त्तकवातेनेति षोडशः १६ । ' जुत्तफुसिएण ' त्ति उचितबिन्दुनिपातेन ' निहयरयरेणुयं ' ति वातोत्खातमाकाशवर्त्तिरजो भूवर्ती तु रेणुरिति गन्धोदकवर्षाभिधानः सप्तदशः १७ । जलस्थलजं यद्भास्वरं प्रभूतं च कुसुमं तेन वृन्तस्थायिना-ऊर्द्धमुखेन दशार्द्धवर्णेन-पञ्चवर्णेन जानुनोरुत्सेधस्य-उच्चत्वस्य यत्प्रमाणं तदेव प्रमाणं यस्य स जानूत्सेधप्रमाणमात्रपुष्पोपचारः-पुष्पप्रकर इत्यष्टादशः १८ । तथा ' कालागुरुपवरकुंदुरुक्कतुरुक्कधूवमघमघंतगंधुद्धुयाभिरामे भवइ ' त्ति कालागुरुश्च-गन्धद्रव्यविशेषः प्रवरकुंदुरुक्कं च-चीडाभिधानं गन्धद्रव्यमिति तुरुष्कं च-शिल्हकाभिधानं गन्धद्रव्यमिति द्वन्द्वः तत एतल्लक्षणो यो धूपस्तस्य मघमघायमानो-बहुलसौरभ्यो यो गन्ध उद्धुत-उद्भूतस्तेनाभिरामं-अतिरमणीयं यत्तत्तथा स्थानं-निषदनस्थानमिति प्रक्रम इत्येकोनविंशतितमः १९ । ' उभओ पासिं च णं अरहंताणं भगवंताणं दुवे जक्खा कडगतुडियथंभियभुया चामरुक्खेवं करेंति 'त्ति कटकानि-प्रकोष्टाभरणविशेषास्त्रुटितानि-बाह्याभरणविशेषास्तैरतिबहुत्वेन स्तंभितावि स्तंभितौ भुजौ ययोस्तौ तथा यक्षौ-देवाविति विंशतितमः २० । बृहद्वाचनायामनन्तरोक्तमतिशयद्वयं नाभिधीयते अतस्तस्यां पूर्वेष्टादशैव, अमनोज्ञानां शब्दादीनामपकर्षो-अभाव इत्येकोनविंशतितम्: २१ । मनोज्ञानां प्रादुर्भाव इति विंशतितमः २० । ' पच्चाहरओ ' त्ति प्रत्याहरतो-व्याकुर्वतो भगवतः ' हिययगमणीओ ' त्ति हृदयङ्गमः ' जोयणनीहारी सरो ' त्ति योजनातिक्रमी स्वर इत्यकविंशः २१ । ' अद्धमागहीए ' त्ति प्राकृतादीनां षण्णां भाषाविशेषाणां मध्ये या मागधी नाम भाषा ' रसोर्लशौ मागध्या ' मित्यादिलक्षणवती सा असमाश्रितस्वकीयसमग्रलक्षणाऽर्द्धमागधीत्युच्यते, तया धर्ममाख्याति,तस्या एवातिकोमलत्वादिति द्वाविंशः २२ । ' भासिज्जमाणी ' त्ति भगवताऽभिधीयमाना ' आरियमणारियाणं ' आर्यानार्यदेशोत्पन्नानां द्विपदामनुष्याश्चतुष्पदा-गवादयः, मृगा-आटव्याः, पशवो-ग्राम्याः, पक्षिणः-प्रतीताः, सरीसृपा-उरःपरिसर्पा भुजपरिसर्पाश्चेति, तेषां किमात्मन आत्मन-आत्मीयया आत्मीययेत्यर्थः

॥५४॥

भाषातया भाषाभावेन परिणमतीति संबन्धः, किंभूतासौ भाषा ? इत्याह-हितं-अभ्युदयं शिवं-मोक्षं सुखं-श्रवणकालोद्भवमानन्दं ददातीति हितशिवसुखदा इति त्रयोविंशः २३ । ' पुर्वबद्धवेरा ' त्ति । पूर्वं-भवान्तरे अनादिकाले वा जातिप्रत्ययं बद्धं-निकाचितं वैरं-अमित्रभावो यैस्ते तथा, तेऽपि च आसतामन्ये देवावैमानिकाः असुराः नागाश्च-भवनपतिविशेषाः सुवर्णाः-शोभनवर्णोपेतत्वात् जोतिष्का यक्षराक्षसकिंनराः किंपुरुषा व्यन्तरविशेषाः गरुडा-गरुडलांच्छनत्वात् सुपर्णकुमारा भवनपतिविशेषाः गन्धर्वा महोरगाश्च-व्यन्तरविशेषाः एव एतेषां द्वन्द्वः, ' पसंतचित्तमाणसा ' प्रशान्तानि-शमं गतानि चित्राणि रागद्वेषाद्यनेकविधविकारयुक्ततया विविधानि मानसानि-अन्तःकरणानि येषां ते प्रशान्तचित्तमानसा धर्मं निशामयन्तीति चतुर्विंशः २४ । बृहद्वाचनायामिदमन्यदतिशयद्वयमभिधीयते-यदुत अन्यतीर्थिकप्रावचनिका अपि च णं वन्दन्ते भगवन्तमिति गम्यते इति पंचविंशः २५ । आगताः सन्तोऽर्हतः पादमूले निष्प्रतिवचना भवन्तीति षड्विंशः २६ । ' जओ जओ वि य णं ' इति यत्र यत्रापि च देशे ' तओ तओ ' त्ति तत्र तत्रापि च पंचविंशतौ योजनेषु ईतिः-धान्याद्युपद्रवकारी प्रचुरमूषिकादिप्राणिगण इति सप्तविंशः २७ । मारिः-जनमरक इत्यष्टाविंशः २८ । स्वचक्रं-स्वकीयराजसैन्यं तदुपद्रवकारि न भवतीत्येकोनत्रिंशः २९ । एवं परचक्रं-परराजसैन्यमिति त्रिंशः ३० । अतिवृष्टिःअधिकवर्ष इत्येकत्रिंशः ३१ । अनावृष्टिः- वर्षणाभाव इति द्वात्रिंशः ३२ । दुर्भिक्षं-दुःकाल इति त्रयस्त्रिंशः ३३ । ' उप्पाइया वाहि ' त्ति उत्पाता-अनिष्टसूचका रुधिर-वृष्ट्यादयस्तद्धेतुका येऽनर्थास्ते औत्पातिकाः तथा व्याधयो-ज्वराद्याः तदुपशमोअभावो भवतीति चतुस्त्रिंशत्तमः ३४ । अन्यच्च ' पच्चाहरओ ' ति आरभ्य येऽभिहितास्ते प्रभामण्डलं च कर्मक्षयकृताः, शेषाः भवप्रत्ययेभ्योऽन्ये देवकृता इति । एते च यदन्यथाऽपि दृश्यन्ते तन्मतान्तरमवगन्तव्यम् । इति समवायाङ्गे चतुस्त्रिंशे स्थानके ८५ प्रत्रौ ३३ पत्रे ॥ १ ॥

केचिच्च श्रावकाणामुपधानोद्वहनं न मन्यते, तच्च सिद्धान्तापरिज्ञानम् । यतः उवासगदसासु णं उवासगाणं तवोवहाणाइं इत्यादिनात्र श्रावकोपधानोद्वहनस्योक्तत्वात् । नच वाच्यं अत्र च वक्ष्यते इत्युक्तं तत्र तु न दृश्यते इत्यादि, कालेन ग्रन्थस्य व्यवच्छिन्नत्वात्, अन्यथा स्थानद्विगुणतयाऽस्य भगवत्यादिभ्योऽपि महत्तरताया पूज्यमानत्वात्, अन्येषामप्यत्र वाच्यतयोक्तानां तत्र नोक्तानां जल्पानाम(न)ङ्गीकार्यतापत्तेश्चेति दिक् । उपधानाक्षरावबोधाय च साद्यन्तमिदं सूत्रं लिख्यते-

॥५५॥

" से कि तं उवासगदसाओ ? उवासगदसासु णं उवासगाणं नगराइं उज्जाणाइं, चेइयाइं, वणखंडा, रायाणो अम्मापियरा, समोसरणाइं, धम्मायरिया, धम्मकहाओ, इहलोइयपरलोइयइड्ढिविसेसा, उवासगाणं च सीलव्वयवेरमणगुणपच्चक्खाणपोसहोववासपडिवज्जणयाओ सुअपरिग्गहा, तवोवहाणाइं, पडिमाओ, उवसग्गा, संलेहणाओ, भत्तपच्चक्खाणाइं, पाओवगमणाइं, देवलोगगमणाइं, सुकुलपच्चायाया पुणो बोहिलाभो अंतकिरियाओ आघविज्जंति । उवासगदसासु णं उवासगाणं रिद्धिविसेसा परिसा वित्थरधम्मसवणाणि बोहिलाभअभिगम सम्मत्तविसुद्धया थिरत्तं मूलगुणुत्तरगुणअइआरा ठिइविसेसा बहुविसेसा पडिमाभिग्गहग्गहणपालणाओ उवसग्गाहियासणाणिरुवसग्गया य तवो य विचित्ता सीलव्वयगुणवेरमणपच्चक्खाणपोसहोववासा अपच्छिममारणंतिया य संलेहणाझोसणाहिं अप्पाणं जह य भावइत्ता बहुणि भत्ताणि अणसणाए छेयइत्ता उववन्ना कप्पवरविमाणुत्तमेसु जह अणुभवंति सुरवरविमाणवरपुंडरिएसु सुक्खाइं अणोवमाइं कमेण उत्तमाइं, तओ य आउक्खएणं चुया समाणा जह जिणमयंमि बोहिं लद्धूण य संजमुत्तमं तमरयोघविप्पमुक्का उवेंत्ति जह अक्खयं सव्वदुक्खमोक्खं, एते अन्ने य एवमादि त्ति " । वृत्तिर्यथा-' सेकिंतमित्यादि ' अथ कास्ता उपासकदशाः ? उपासकाः-श्रावकास्तद्गत-क्रियाकलापप्रतिबद्धा दशाः- दशाध्ययनोपलक्षिता उपाशकदशाः ता एवाह- ' उपासगदसासु णं ' उपासकानां नगराणि उद्यानानि चैत्यानि वनखण्डा राजानः अम्बापितरौ समवसरणानि धर्माचार्या धर्मकथा ऐहलौकिकपारलौकिकाद्धिऋविशेषाः, उपासकानां च शीलव्रतविरमणगुणप्रत्याख्यानपोषधोपवासप्रतिपादनताः, तत्र शीलव्रतानि-अणुव्रतानि विरमणानि- रागादिविरतयः गुणा-गुणव्रतानि प्रत्याख्यानानि-नमस्कारसहितादीनि पौषधो-अष्टम्यादिपर्वदिनं तत्रोपवसनं-आहारशरीरसत्कारादित्यागः पौषधोपवासः ततो द्वन्द्वे सत्येतेषां प्रतिपादनताः-प्रतिपत्तय इति विग्रहः, श्रुतपरिग्रहास्तपउपधानानि च प्रतीतानि ' पडिमाओ ' त्ति-एकादश उपासकप्रतिमाः कायोत्सर्गा वा उपसर्गा-देवादिकृतोपद्रवाः संलेखना-भक्तपानप्रत्याख्यानानि पादपोपगमनानि देवलोकगमनानि सुकुलप्रत्यायातिः पुनर्बोधिलाभोऽन्तक्रिया चाख्यायन्ते पूर्वोक्तमेवेतो विशेषत आह-' उवासगे ' त्यादि, तत्र ऋद्धिविशेषा-अनेक कोटीसंख्याद्रव्यादिसंपद्विशेषाः तथा परिषदः-परिवाारविशेषाः यथा-मातापितृपुत्रादिकाऽभ्यन्तरपरिषत् दासीदासमित्रादिका बाह्यपरिषदिति, विस्तरधमश्रर्वणानि महावीरसंनिधौ, ततो बोधिलाभो,ऽभिगमः, सम्यक्त्वस्य विशुद्धता, स्थिरत्वं सम्यक्त्वशुद्धेरेव, मूलगुणोत्तरगुणाअणुव्रतादयः, अतिचारास्तेषामेव वधबन्धादिना

खण्डितानि, स्थितिविशेषाश्च उपासकपर्यायस्य कालमानभेदाः, बहुविशेषाः, प्रतिमाः-प्रभूतभेदाः सम्यग्दर्शनादिप्रतिमा, अभिग्रहग्रहणानि, तेषामेव पालनानि, उपसर्गाधिसहनानि, निरुपसर्गं-चोपसर्गाभावश्चेत्यर्थः, तपांसि च विचित्राणि, शीलव्रतादयोऽनन्तरोक्तरूपाः, अपश्चिमाः-पश्चात्कालभाविन्यः अकारस्त्वमङ्गल्परिहारार्थं मरणरूपे अन्ते भवा मारणान्तिकाः आत्मनः शरीरस्य जीवस्य च संलेखनाः- तपसा रागादिजयेन च कृशीकरणानि आत्मसंलेखनाः ततः पदत्रयस्य कर्मधारयः तासां, ' झोसणं ' ति जोषणाः-सेवनाः करणानीत्यर्थः ताभिरपश्चिममारणान्तिकात्मसंलेखनाजोषणाभिरात्मानां यथा भावयित्वा बहूनि भक्तानि अनशनतया-निर्भोजनतया छेदयित्वा-व्यवच्छेद्य उपपन्ना मृत्वेति गम्यते केषु ? कल्पवरेषु यानि विमानान्युत्तमानि, तेषु । यथाऽनुभवन्ति सुरवरविमानानि वरपुण्डरीकाणीव वरपुण्डरीकाणि यानि तेषु । कानि ? सौरव्यान्यनुपमानि क्रमेण भुक्त्वोत्तमानि, तत आयुष्कक्षयेण च्युताः सन्तो यथा जिनमते बोधिं लब्ध्वा इति शेषः, लब्ध्वा च संयमोत्तमं-प्रधानसंयमं तमोरजओघविप्रमुक्ता-अज्ञानकर्मप्रवाहविप्रमुक्ता उपयान्ति यथा अक्षयं-अपुनरावृत्तिकं सर्वदुःखमोक्षं-कर्मक्षयमित्यर्थः । तथोपासकदशासु आख्यायते इति प्रक्रमः । इति समवायाङ्गे संख्याक्रमसमाप्त्यनन्तरं ९५ प्रतौ ७० पत्रे ॥ २ ॥

आधुनिकाः पण्डिम्मन्याः केचन ' इच्चेइयं दुवालसंगं ' इत्यादिसूत्रं दर्शयन्तो जमालेरनन्तभवत्वं निश्चिनवते, अनेन च तेषामेतत्सूत्र-तात्पर्यानवबोधो निश्चियते, तथा हि यद्यप्यत्र टिकायां चातुरन्तसंसारकान्तारभ्रमणे जमालिर्दृष्टान्तीकृतोऽस्ति तथाऽपि एकदेशेनैवाऽयं दृष्टान्तो, न हि दृष्टान्तदार्ष्टान्तिकयोः सर्वात्मना तुल्यत्वम्, मुखमाह्लादकारिचन्द्रवदित्यादिवत्तेन च संसारभ्रमणे एव जमालिदृष्टान्तो न तु चातुरन्तसंसारकान्तारे, संसारभ्रमणं च जमालेः पञ्चदशभिर्भवैः संपन्नमेव, यदि च दृष्टान्तस्यैकदेशत्वानङ्गीकारेण सर्वात्मना जमालिर्दृष्टान्तस्तर्हि भगवत्या सह विरोधः संपनीपद्यते । यथा अत्र चातुरन्तसंसारकान्तारभ्रमणमुक्तं तत्र तु जमालेः ' चत्तारि पंच देवमणुयतिरिक्खजोणियभवग्गहणाइं ' इत्यादिना गतित्रय एव पञ्चदशानामेव भवानामुक्तत्वादित्यलं व्यासेन, अनेन सूत्रेण नैवानन्तभवत्वं निर्णेतुं शक्यमिति । सूत्रं च यथा-" इच्चेइयं दुवालसंगं गणिपिडगं अतिते काले अणंता जीवा आणाए विराहित्ता चाउरंतसंसारकंतारं अणुपरियट्टिंसु । इच्चेइयं दुवालसंगं गणिपिडगं पडुप्पन्ने काले परित्ता जीवा आणाए विराहित्ता चाउरंतसंसारकंतारं अणुपरियट्टंति । इच्चेइयं दुवालसंगं गणिपिडगं अणागए काले अणंता जीवा आणाए विराहित्ता चाउरंतसंसारकंतारं अणुपरियट्टिस्संति । इच्चेइयं दुवालसंगं गणिपिडगं अतीते काले अणंता

जीवा आणाए आराहित्ता चाउरंतसंसारं वितिवइंसु । एवं पडुप्पन्नेवि अणागएवि । त्ति, वृत्तिर्यथा-सांप्रतं द्वादशाङ्गविराधनानिष्पन्नं त्रैकालिकं फलमुपदर्शयन्नाह-' इच्चेइममित्यादि ' इत्येतद्द्वादशाङ्गं गणिपिटकमतीते काले अनन्ता जीवा आज्ञया विराध्य चतुरंतसंसारकान्तारं ' अणुपरियट्टिंसु ' त्ति अनुपरिवृतवन्तः । इदं हि द्वादशाङ्गं सूत्रार्थोभयभेदेन त्रिविधम्, ततश्चाज्ञया सूत्राज्ञया अभिनिवेशतोऽन्यथा पाठादिलक्षणया अतीते काले अनन्ता जीवाश्चतुरन्तं संसारकान्तारंनरकतिर्यग्नरामरविविधवृक्षजालदुस्तरं भवाटवीगहनमित्यर्थः, अनुपरावृत्तवन्तो जमालिवत् । अर्थाज्ञया पुनरभिनिवेशतोऽन्यथा प्ररूपणादिलक्षणया गोष्ठामाहिलादिवत् । उभयाज्ञया पुनः पंचविधाचारपरिज्ञानकरणोद्यतगुर्वादेशारन्यथाकरणलक्षणया गुरुप्रत्यनीकद्रव्यलिङ्गधार्यनेकश्रमणवत् सूत्रार्थोभयैर्विराध्येत्यर्थः । अथवा द्रव्यक्षेत्रकालभावापेक्षमागमोक्तानुष्ठानमेवाज्ञा तया तदकरणेनेत्यर्थः । ' इच्चेइय'मित्यादि गतार्थमेव, नवरं ' परित्ता जीवा ' इति । संख्येया जीवा वर्त्तमानविशिष्टविराधकमनुष्यजीवानां संख्येयत्वात् ' अणुपरियट्टंति ' त्ति अनुपरावर्त्तन्ते भ्रमन्तीत्यर्थः ' इच्चेइय ' मित्यादि इदमपि भावितार्थमेव नवरं ' अणुपरियट्टिस्संति ' त्ति अनुपरावर्त्तिष्यन्ति-पर्यटिष्यन्तीत्यर्थः । ' इच्चेइयमित्यादि ' कंठ्यं नवरं ' विईवइंसु ' त्ति व्यतिव्रजितवन्तः-चतुर्गतिकसंसारोल्लङ्घनेन मुक्तिमवाप्ता इत्यर्थः । एवं प्रत्युत्पन्नेऽपि, नवरं अयं विशेषः । ' विईवइंति ' त्ति, व्यतिव्रजंति व्यतिक्रामन्तीत्यर्थः । अनागतेऽप्येवं, नवरं ' वीइवइस्संति ' त्ति व्यतिव्रजिष्यन्ति व्यतिक्रमिष्यन्तीत्यर्थः । इति समवायाङ्गे ८५ प्रतौ ७० पत्रे ॥ ६ ॥

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरीश्वरशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे विशेषसमुच्चयाऽपरनाम्नि समवायाङ्गविचारनामा चतुर्थस्तरङ्गः ॥ ४ ॥

त्रिजगत्प्रसरद्रुचिर्मृदुर्नयनागोचरवस्तुशंसिनी ।
मम चित्तमलङ्करोतु सा जिनवाणी मणिदीपिकाधिका ॥ १ ॥

अथ क्रमप्राप्ताः श्री पञ्चमाङ्गविचाराः प्रस्तूयन्ते-

केचिच्च लिखितं पुस्तकादिकं पादस्पर्शादिनाऽशातनाऽस्वीकारेणावगणयन्ति, तच्च तेषां संसारकारणम्, यतः श्री भगवतीमारभद्भिः श्रीगणधरपादैरपि नमस्कृतत्वेनास्य पूज्यतमत्वात् । तथा च सूत्रम्-

" नमो बंभीए लिवीए " त्ति । लिपिः-पुस्तकादावक्षरविन्यासः, सा चाष्टादशप्रकारापि श्रीमन्नाभेयजिनेन स्वसुताया ब्राह्मीनामिकाया दर्शिता ततो ब्राह्मीत्यभिधीयते । आह च-" लेहं लिवीविहाणं जिणेण बंभीइ दाहिणकरेण " इत्यतो ब्राह्मीति स्वरूपविशेषणं लिपेरिति । नन्वधिकृतशास्त्रस्यैव मङ्गलत्वात् किं मङ्गलेन अनवस्थादिदोषप्राप्तेः ?, सत्यं, किं तु शिष्यमतिमङ्गलपरिग्रहार्थं मङ्गलोपादानम् । इति श्रीभगवतीप्रथमशतकप्रथमोद्देशके ॥ १ ॥

इह च केचनाविवेकिनः कदाग्रहग्रहीता वदन्ति-यदेते ये केचन सम्यग्दृष्टिव्यतिरिक्तास्तपस्यन्ति-मुक्त्यर्थमपि कायकष्टमनुतिष्ठन्ति तेन तेषामकामनिर्जरैव, न तु सकामा, तच्च विचार्यमाणमसारमाभासते, यतोऽकामानां-निर्जराद्यनभिलाषिणां सतां तृट् अकामतृट् इत्याद्यकामनिर्जरास्वरूपमुक्तम्, किंच अत्राकामनिर्जरावतां व्यन्तरेषूत्पत्तिरुक्ता, द्वितीयोद्देशके तु उत्पादाधिकारे तापसादीनां मिथ्यादृशामपि ज्योतिष्कब्रह्म (लोक) ग्रैवेयकादौ श्रूयते ततोऽवसीयते तेषां सकामैव, तथैव चाकामनिर्जरावतां मनोलब्धिरहितानामसंज्ञिनां व्यन्तरेष्वेवोत्पत्तिः ततश्च सधर्माभिलाषिणां शुभानुष्ठायिनां सकामैव, अन्येषामकामेति तत्त्वम् । तत्र च अकामनिर्जरास्वरूपसूत्रं अकामनिर्जरावतां गतिप्रतिपादकं लिख्यते-

" जे इमे जीवा गामागरणगरणिगमरायहाणिखेडकब्बडमंडपदोणमुहपट्टणासमसन्निवेसेसु अकामतण्हाए अकामच्छुहाए अकामबंभचेरवासेणं अकामसीयायवदंसमसगअण्हाणगसेअजल्लमलपंकपरिदाहेणं अप्पतरो वा भुज्जतरो वा कालं अप्पाणं परिकिलेसंति । परिकिलेसित्ता कालमासे कालं किच्चा अन्नयरेसु वाणमंतरेसु देवलोएसु देवत्ताए उववत्तारो भवंति त्ति । " वृत्तिर्यथा-गामेत्यादि, ग्रामादिष्वधिकरणभूतेषु, तत्र ग्रामो-जनपदप्रायजनाश्रितस्थानविशेषः, आकरो-लोहाद्युत्पत्तिस्थानं, नकरं-कररहितं, निगमो-वणिग्जनप्रधानं स्थानं, राजधानी-यत्र राजा स्वयं वसति, खेटं-धूलिप्राकारं, कर्बटं-कुनगरं, मडंबं-सर्वतो दूरवर्त्तिसन्निवेशान्तरं, द्रोणमुखं-जलपथस्थलपथोपेतं, पत्तनं-

॥५९॥

विविधदेशागतपण्यस्थानं, तच्च द्विधा जलपत्तनं स्थलपत्तनं चेति रत्नभूमिरित्यन्ये, आश्रमः-तापसादिस्थानं, सन्निवेशो-घोषादिः एषां द्वन्द्वस्ततस्तेषु, अथवा ग्रामादयो ये संनिवेशास्ते तथा तेषु ' अकामतण्हाए ' त्ति अकामानां-निर्जराद्यनभिलाषिणां सतां तृष्णा-तृड् अकामतृष्णा तया एवमकामक्षुधा ' अकामबंभचेरवासेणं ' ति अकामानां-निर्जराद्यनभिलाषिणां संता, अकामो वा-निरभिप्रायो ब्रह्मचर्येण-स्त्र्यादिपरीभोगाभावमात्रलक्षणेन वासो-रात्रौ शयनं अकामब्रह्मचर्यवासोऽतस्तेन ' अकामअण्हाणगसेयजल्लमलपंकपरिदाहेणं ' ति आकामा ये अस्नानकादयस्तेभ्यो यः परिदाहः स तथा तेन तत्र स्वेदः-प्रस्वेदः याति-लगति चेति जल्लो-रजोमात्रं, मलः-कठिनीभूतं रज एव, पङ्को-मल एव स्वेदेनाद्रीभूत इति, ' अप्पतरो वा भुज्जतरो वा कालं 'ति प्राकृतत्वेन विभक्तिपरिणामादल्पतरं वा भूयस्तरं वा बहुतरं कालं यावत् वाशब्दौ देवत्वं प्रत्यल्पेतरकालयोः समताभिधानार्थौ, केवलं देवत्वे सामान्यतः सत्यपि अल्पतरकालमकामनिर्जरावताम-विशिष्टं तत्स्यात् इतरेषां तु विशिष्टमिति । ' अप्पाणं परिकिलेसंति ' त्ति विबाधयन्ति । ' कालमासे 'त्ति कालो-मरणं तस्य मासः प्रक्रमादवसरः कालमासस्तत्र ' कालं किच्च ' त्ति कालं कृत्वा ' वाणमंतरेसु ' त्ति वनान्तरेषु वनविशेषेषु भवा अवर्णागमकरणाद्वानमन्तराः अन्येत्वाहुः वनेषु भवा वानास्ते च ते व्यन्तराश्चेति वानव्यन्तरास्तेषामेते वानमन्तरा वानव्यन्तरा वा अतस्तेषु देवलोकेषु देवाश्रयेषु ' देवताए उववत्तारो भवंति ' त्ति ये इमे इत्यत्र यच्छब्दोपादानात्ते देवतयोपपत्तारो भवन्तीति द्रष्टव्यम् । ' तेसिं ' ति ये देवलोकेष्वकामनिर्जरावन्तो देवतयोत्पद्यन्ते तेषामिति । इति श्री भगवतीप्रथमशतकप्रथमोद्देशके ८६ प्रतौ ३५ पत्रे ॥ २ ॥

तापसादीनामुत्पादसूत्रं चेदम्-

" अह णं भंते ! असंजयभवियदव्वदेवाणं १ अविराहियसंजमाणं २ विराहियसंजमाणं ३ अविराहियसंजमासंजमाणं ४ विराहियसंजमासंजमाणं ५ असन्नीणं ६ तावसाणं ७ कंदप्पियाणं ८ चरगपरिव्वायगाणं ९ किव्विसियाणं १० तेरिच्छियाणं ११ आजीवियाणं १२ आभियोगियाणं १३ सलिंगीणं दंसणवावन्नगाणं १४ एएसिणं देवलोएसु उववज्जमाणाणं कस्स कहिं उववाए पन्नत्ते ? गोयमा ! असंजयभवियदव्वदेवाणं जहन्नेणं भवणवासीसु उक्कोसेणं उवरिमगेवेज्जगेसु १, अविराहियसंजमाणं जहन्नेणं सोहम्मे कप्पे उक्कोसेणं सव्वट्ठसिद्धे विमाणे २, विराहियसंजमाणं जहन्नेणं भवणवासीसु उक्कोसेणं सोहम्मे कप्पे ३, अविराहियसंजमासंजमाणं

जहन्नेणं सोहम्मे कप्पे उक्कोसेणं अच्चुए कप्पे ४, विराहियसंजमासंजमाणं भवणवासीसु उक्कोसेणं जोइसिएसु ५, असन्नीणं जहन्नेणं भवणवासीसु उक्कोसेणं वाणमंतरेसु ६, आवसेसा सव्वे जहन्नेणं भवणवासीसु उक्कोसगं वोच्छामि-तावसाणं जोइसिएसु ७, कंदप्पियाणं सोहम्मे कप्पे ८, चरगपरिव्वायगाणं बंभलोए कप्पे ९, किव्विसियाणं लंतगे कप्पे १०, तिरिच्छियाणं सहस्सारे कप्पे ११, आजीवियाणं अच्चुए कप्पे १२, आभिओगाणं अच्चुए कप्पे १३, संलिगीणं दंसणवावन्नगाणं उवरिमगेवेज्जएसु १४।" वृत्तिर्यथा-कर्मलेशादन्तक्रियाया अभावे केचिज्जीवा देवेषूत्पद्यन्ते अतस्तद्विशेषाभिधानायाह-' अह णं भंते ! ' इत्यादि व्यक्तं, नवरं अथेति परिप्रश्नार्थः। ' असंजयभवियदव्वदेवाणं ' ति इह प्रज्ञापनाटीका लिख्यते असंख्याताः-चरणपरिणामशून्या भव्या-देवत्वयोग्या अत एव द्रव्यदेवाः, समासश्चैवम्-असंयाताश्च ते भव्यद्रव्यदेवाश्चेति असंयतभव्यद्रव्यदेवाः। तत्रैते असंयतसम्यग्दृष्टयः किलेत्येके, यतः किलोक्तम्-" अणुवयमहव्वएहि य, बालतवोकामनिज्जराए य। देवाउयं निबंधइ, सम्मद्दिट्ठी य जो जीवो ॥ १ ॥" एतच्चायुक्तम्। यतोऽमीषामुत्कृष्टत उपरिमग्रैवयकेषूपपात उक्तः। समयक्दृष्टीनां तु देशविरतानामपि न तत्रासौ विद्यते देशविरतश्रावकाणामच्युतादूर्द्ध्वमगमनात्। नाप्येते निह्नवाः, तेषामिहैव भेदेनाभिधानात्, तस्मान्मिथ्यादृष्टय एवाभव्या भव्या वा असंयतभव्यद्रव्यदेवाः श्रमणगुणधारिणो निखिलसामाचार्यनुष्ठानयुक्ता द्रव्यलिङ्गधारिणो गृह्यन्ते। ते ह्यखिलकेवलक्रियाप्रभावत एवोपरिमग्रैवेयकेषूत्पद्यन्ते, इति। असंयताश्च ते सत्यप्यनुष्ठाने चारित्रपरिणामशून्यत्वात्। ननु ते कथमभव्या भव्या वा श्रमणगुणधारिणो भवन्ति ? इत्येत्रोच्यते, तेषां हि महामिथ्यादर्शनमोहप्रादुर्भावे सत्यपि चक्रवर्तिप्रभृत्यनेकभूपतिप्रवरपूजासत्कारसन्मानदानान्साधून् समवलोक्य तदर्थं प्रव्रज्याक्रियाकलापानुष्ठानं प्रति श्रद्धा जायते, ततश्च यथोक्तक्रियाकारिण इति। ' अविराहियसंजमाणं ' ति प्रव्रज्याकालादारभ्याभग्नचारित्रपरिणामानां संज्वलनकषायसामर्थ्यात्प्रमत्तगुणस्थानकसामर्थ्याद्वा स्वल्पमायादिदोषसंभवेऽप्यनाचरितचरणोपघातानामित्यर्थः। ' विराहियसंजमाणं ' ति उक्तविपरीतानां, अविराहियसंजमासंजमाणं' ति प्रतिपत्तिकालादारभ्याखण्डितदेशविरतिपरिणामानां श्रावकाणां ' विराहियसंजसमासंजमाणं ' ति उक्तव्यतिरेकिणां ' असन्नीणं ' ति मनोलब्धिरहितानामकामनिर्जरावतां, तथा ' तावसाणं ' ति पतितपत्राद्युपभोगवतां बालतपस्विनां, तथा ' कंदप्पियाणं ' ति कन्दर्पः-परिहासः स येषामस्ति तेन वा ये चरन्ति ते कन्दर्पिकाः कान्दर्पिका वा व्यवहारतश्चरणवन्त एव कंदर्पकौकुच्यादिकारकाः। तथा हि-"

कहकहकहस्स हसणं, कंदप्पो अनिहुआ य उल्लावा । कंदप्पकहाकहणं, कंदप्पुवएससंसा य ॥ १ ॥ भूनयणवयणदसणच्छदेहिं करपायकन्नमाईहिं । तं तं करेइ जह जह, हसइ परो अत्तणा अहसं ॥ २ ॥ वायाकुक्कुइओ पुण, तं जंपइ जेण हस्सए अन्नो । नाणाविहजीवरुए, कुव्वइ मुहतूरए चेव ॥ ३ ॥ " इत्यादि " जो संजओवि एयासु, अप्पसत्थासु भावणं कुणइ । तो तव्विहेसु गच्छइ, सुरेसु भइओ चरणहीणो ॥ ४ ॥ " त्ति, अतस्तेषां कन्दर्पिकाणां ' चरगपरिव्वायगाणं ' ति चरकपरिव्राजका-धाटीभिक्षोपजीविनस्त्रिदण्डिनः अथवा चरकाः-कच्छोटकादयः, परिव्राजकास्तु-कपिलमुनिसूनवः अतस्तेषां ' किव्विसियाणं ' ति किल्विषं-पापं तदस्ति येषां ते किल्विषिकाः, ते च व्यवहारतश्चरणवन्तोऽपि ज्ञानाद्यवर्णवादिनः, यथोक्तम्-" णाणस्य केवलीणं, धम्मायरियस्स सव्वसाहूणं । माई अवन्नवाई, किव्विसियं भावणं कुणइ ॥ १ ॥ " अतस्तेषां ' तेरिच्छिआणं ' ति तिरश्चामश्वगवादीनां देशविरतिभाजां, ' आजीवियाणं ' ति पाखण्डिविशेषाणां नाग्न्यधारिणां, गोशालकशिष्याणामित्यन्ये, आजीवन्ति वा ये अस्तित्वेन अविवेकिलोकतो लब्धिपूजाख्यात्यादिभिस्तपश्चरणादीनि ते आजीविकाः अतस्तेषां ' आभिओगाणं ' ति अभियोजनं-विद्यामन्त्रादिभिः परेषां वशीकरणादि अभियोगः, सच द्विधा, यदाह-" दुविहो खलु अभिओगो, दव्वे भावे य होइ नायव्वो । दव्वंमि होइ जोगा, विज्जा मंता य भावंमि ॥ २ ॥ " त्ति । सोऽस्ति येषां, तेन वा चरन्ति ये ते अभियोगिकाः आभियोगिका वा ते च व्यवहारतश्चरणवन्त एव मन्त्रादिप्रयोक्तारः । यदाह-" कोउयभूईकम्मे, पसिणापसिणे निमित्तमाजीवी । इड्ढिरससायगुरुओ, आभिओगं भावणं कुणइ ॥ १ ॥ " त्ति । कौतुकं-सौभाग्याद्यर्थं स्नपनकं, भूतिकर्म-ज्वरितादिभूतिदानम्, प्रश्नाप्रश्नं-स्वप्नविद्यादि, ' सलिंगीणं ' ति रजोहरणादिसाधुलिङ्गवतां, किंविधानाम् ? इत्याह-' दंसणवावन्नगाणं ' ति दर्शनं-सम्यक्त्वं व्यापन्नं-भ्रष्टं येषां ते तथा तेषां निह्नवानामित्यर्थः । ' एएसि णं देवलोएसु उववज्जमाणाणं ' ति अनेन देवत्वादन्यत्रापि केचिदुत्पद्यन्ते इति प्रतिपादितम् । ' विराहियसंजमाणं जहन्नेणं भवणवासीसु उक्कोसेणं सोहम्मे कप्पे ' त्ति इह कश्चिदाह विराधितसंयमानामुत्कर्षेण सौधर्मे कल्पे इति यदुक्तं तत्कथं घटते द्रौपद्याः सुकुमालिकाभवे विराधितसंयमाया अपि ईशाने उत्पादश्रवणात् ? इत्यत्रोच्यते तस्याः संयमविराधनोत्तरगुणविषया बकुशत्वमात्रकारिणी न मूलगुणविराधनेति । सौधर्मोत्पादश्च विशिष्टतरसंयमविराधनायां स्यात् । यदि पुनर्विराधनामात्रमपि सौधर्मोत्पत्तिकारकं स्यात्तदा बकुशादीनामुत्तरगुणप्रतिसेवावतां कथमच्युतादिषूत्पत्तिःस्यात्, कथञ्चिद्विराधकत्वात्ते-

षामिति । ' असन्नीणं जहन्नेणं भवणवासीसु उक्कोसेणं वाणमंतरेसु ' त्ति इह यद्यपि ' चमरबलिसारमहिय ' मित्यादिवचनादसुरादयो महर्द्धिका ' पलिओवममुक्कोसं वंतारियाणं ' ति वचनात् व्यन्तरा अल्पर्द्धिकाः तथाप्यत एव वचनादवसीयते सन्ति व्यन्तरेभ्यः सकाशादल्पर्द्धयो भवनपतयः केचन । इति भगवतीप्रथमशतकद्वितीयोद्देशके ८०६ प्रतौ ४६ । ४७ पत्रे । ३ ।

केचिच्च परेषां भिक्षुकादीनां दानं निषेधयन्ति, अपरे च चतुर्दशीं विहाय पूर्णिमावास्ययोरेव पौषधं प्ररुपयन्ति, ते उभयेऽपि अनेन श्रावकवर्णनसूत्रेण निरस्ता द्रष्टव्याः । तथा हि-

" तेणं कालेणं तेणं समएणं तुंगियाणामं णगरी होत्था, वन्नओ तीसे णं तुंगियाए नयरीए बहिया उत्तरपुरच्छिमे दिसीभाए पुप्फवइए नामं चेइए होत्था, वन्नओ, तत्थ णं तुंगियाए णगरीए बहवे समणोवासया परिवसंति । अड्ढा दित्ता विच्छिन्नविपुलभवणसयणासणजाणवाहणाइन्ना बहुधणबहुजायरूवयरया आओगपओगसंपउत्ता विच्छड्डियविपुलभत्तपाणा बहुदासीदासगोमहिसगवेलगप्पभूया बहुजणस्स अपरिभूया अभिगयजीवाजीवा उवलद्धपुण्णपावा आसवसंवरणिज्जरकिरियाहिगरणबन्धमोक्खकुसला असहेज्जा देवासुरणागसुवण्णजक्खरक्खसकिंनरकिंपुरिसगरूलगंधव्वमहोरगादिएहिं देहगणेहिं निग्गंथाओ पावयणाओ अणतिक्कमणिज्जा णिग्गंथे पावयणे णिस्संकिया णिकंखिया निव्वितिगिच्छा लद्धट्ठा गहिअट्ठा पुच्छियट्ठा अभिगहियट्ठा विणिच्छियट्ठा अट्ठिमिंजपेमाणुरागरत्ता अयमाउसो निग्गंथे पावयणे अट्ठे अयं परमट्ठे सेसे अणट्ठे ऊसियफलिहा अवंगुयदुवारा चियत्तंतेउरघरप्पवेसा बहूहिं सीलव्वयगुणवेरमणपच्चक्खाणपोसहोववासेहिं चाउद्दसट्ठमुद्दिट्ठपुण्णिमासिणीसु पडिपुण्णं पोसहं सम्मं अणुपालेमाणा समणे निग्गंथे फासुएसणिज्जेणं असणपाणखाइमसाइमेणं वत्थपडिग्गहकंबलपायपुच्छणेणं पीढफलगसेज्जासंथारएणं ओसहभेसज्जेण य पडिलाभेमाणा अहापरिग्गहिएहिं तवोकम्मेहिं अप्पाणं भावेमाणा विहरंति "त्ति । वृत्तिर्यथा-' अड्ढ ' त्ति आढ्या-धनधान्यादिभिः परिपूर्णाः ' दित्त ' त्ति दीप्ताः-प्रसिद्धाः दृप्ता वा-दर्पिताः ' विच्छिण्णविपुलभवणसयणासणजाणवाहणाइन्ना ' विस्तीर्णानि-विस्तारवन्ति विपुलानि-प्रचुराणि भवनानि-गृहाणि शयनासनवाहनैराकीर्णानि येषां ते तथा, अथवा विस्तीर्णानि-विपुलानि भवानानि येषां ते शयनासनवाहनानि चाकीर्णानि-गुणवन्ति येषां ते तथा, तत्र यानं-गंत्र्यादि वाहनं-त्वश्वादि, ' बहुधणबहुजायरूवरयया ' बहु-प्रभूतं धनं गणिमादिकं तथा बह्वेव जातरूपं-सुवर्णं रजतं च-रूप्यं येषां

ते तथा, ' आओगपओगसंपउत्ता ' आयोगो-द्विगुणादिवृद्ध्यर्थप्रदानं, प्रयोगश्च-कंलान्तरं तौ संप्रयुक्तौ व्यापारितौ यैस्ते तथा । ' विच्छड्डियविपुलभत्तपाणा ' विच्छर्दितं-विविधमुज्झितं बहुलोकभोजनत उच्छिष्टावशेषसंभवात् विच्छर्दितं वा विविधविच्छित्तिमद्विपुलं भक्तं च पानकं च येषां ते तथा, ' बहुदासीदासगोमहिसगवेलगप्पभूया ' बहवो दासीदासा येसां ते गोमहिषगवेलकाश्च प्रभूता येषां ते तथा, गवेलकाउरभ्राः, ' बहुजणस्स अपरिभूया ' बहोर्लोकस्यापरिभवनीयाः, ' आसवे ' इत्यादि, क्रियाः कायिक्यादिकाः अधिकरणं-गन्त्रीयन्त्रकादि । ' कुसल ' त्ति आश्रवादीनां हेयोपादेयतास्वरूपवेदिनः । ' असहेज्जे ' त्यादि अविद्यमानं साहाय्यं-परसाहायकं, अत्यन्तसमर्थत्वाद्येषां ते असहाय्यास्ते च ते देवादयश्चेति कर्मधारयः, अथवा व्यस्तमेवेदं तेन असहाय्या-आपद्यपि देवादिसाहायकानपेक्षाः स्वयं कृतं कर्म स्वयमेव भोक्तव्यमित्यदीनमनोवृत्तय इत्यर्थः । अथवा पाखण्डिभिः प्रारब्धाः सम्यक्त्वाविचलनं प्रति न परसहायकमपेक्षन्ते स्वयमेव तत्प्रतिघातसमर्थत्वात्, जिनशासनात्यन्तभावितत्वाच्चेति, तत्र देवा वैमानिकाः । ' असुर ' त्ति असुरकुमाराः ' नाग ' त्ति नागकुमाराः उभयेऽप्यमी भवनपतिविशेषाः, ' सुवण्ण' त्ति सद्वर्णा ज्योतिष्काः यक्षराक्षस किंनरकिंपुरुषाः-व्यन्तरविशेषाः ' गरूल ' त्ति गरुडध्वजाः - सुवर्णाकुमाराः -भवनपतिविशेषा;, गन्धर्वा महोरगाश्च व्यन्तरविशेषाः ' अणतिक्कमणिज्ज 'त्ति अनतिक्रमणीया अचालनीयाः, ' लद्धट्ठ ' त्ति अर्थश्रवणात् ' गहियट्ठ ' त्ति अर्थावधारणात् ' पुच्छियट्ठ ' त्ति सांशयिकार्थप्रश्नकरणात् ' अभिगहियट्ठ ' त्ति प्रश्नितार्थस्याभिगमनात् ' विणिच्छियट्ठ 'त्ति ऐदंपर्यार्थस्योपलम्भात्, अत एव ' अट्ठिमिंजपेम्माणुरागरत्ता ' अस्थीनि च कीकसानि, मिञ्जा च तन्मध्यवर्त्तिधातुरस्थिमिञ्जास्ताः प्रेमानुरागेण-सर्वज्ञप्रवचनप्रीतिरूपकुसुम्भादिरागेण रक्ता इव रक्ता येषां ते तथा, अथवा अस्थिमिञ्जासु जिनशासनगतप्रेमानुरागेण रक्ता ये ते तथा, केनोल्लेखेन ? इत्याह- ' अयमाउसे ' इत्यादि, अयमिति प्राकृतत्वादिदं ' आउसो ' त्ति आयुष्मन् इति पुत्रादेरामंत्रणं ' सेसे ' त्ति शेषं निर्ग्रन्थप्रवचनव्यतिरिक्तं धनधान्यपुत्रकलत्रमित्रकुप्रवचनादिकमिति ।' उसियफलिह ' त्ति उच्छ्रितं-उन्नतं स्फटिकमिव स्फटिकं चित्तं येषां ते उच्छ्रितस्फटिकाः मौनीन्द्रप्रवचनावाप्त्या परितुष्टमानसा इत्यर्थः, इति वृद्धव्याख्या, अन्ये त्वाहुः-उच्छ्रितो-ऽर्गलास्थानादपनीयोर्द्धीकृतो न तिरश्चीनः । कपाटपक्षाद्भागादपनीत इत्यर्थः परिघो-ऽर्गला येषां ते उच्छ्रितपरिघाः । अथवा उच्छ्रितो-गृहद्वारादपगतः परिघो येषां ते उच्छ्रितपरिघाः । औदार्यातिशयादतिशयदानदायित्वेन भिक्षुकाणां

गृहप्रवेशनार्थमनर्गलितगृहद्वारा इत्यर्थः, ' अवंगुअदुवारे ' त्ति अप्रावृतद्वाराः कपाटादिभिरस्थगितगृहद्वारा इत्यर्थः, सद्दर्शनलाभेन न कुतोऽपि पाखण्डिकादिभ्यो बिभ्यति शोभनमार्गपरिग्रहेणोद्घाटशिरसस्तिष्ठन्तीति भावः इति वृद्धव्याख्या, अन्ये त्वाहुः- भिक्षुकप्रवेशार्थमौदार्यादस्थगितगृहद्वारा इत्यर्थः । ' चियत्तंतेउरघरप्पवेसा ' 'चियत्तो' त्ति लोकानां प्रीतिकर एव अन्तःपुरे वा गृहे वा प्रवेशो येषां ते तथा, अतिधार्मिकतया सर्वत्रानाशङ्कनीयास्ते इत्यर्थः अन्ये त्वाहुः-' चियत्तो ' त्ति नाप्रीतिकरोऽन्तःपुरगृहयोः प्रवेशः शिष्टजनप्रवेशनं येषां ते तथा अनीर्ष्यालुताप्रतिपादनपरं चेत्थं विशेषणमिति । अथवा ' चियत्तो ' त्ति त्यक्तोऽन्तःपुरगृहयोः परकीययोर्यथाकथञ्चित्प्रवेशो यैस्ते तथा, ' बहूहिं ' इत्यादि, शीलव्रतानि-अणुव्रतानि गुणा-गुणव्रतानि विरमणानि-औचित्येन रागादिनिवृत्तयः, प्रत्याख्यानानि पौरुष्यादीनि, पौषधं-पर्वदिनानुष्ठानं, तत्रोपवासो-अवस्थानं पौषधोपवासः, एषां द्वन्द्वः अतस्तैर्युक्ता इति गम्यम् । पौषधोपवास इत्युक्तं (तत्) पौषधं च यदा यथाविधं च ते कुर्वन्तो विहरन्ति, तद्दर्शयन्नाह ' चाउद्दसे ' त्यादि, इहोद्दिष्टा-अमावास्या, ' पडिपुण्णं पोसहं ' ति अहोरात्रादिभेदाच्चतुर्विधमपि सर्वतः, ' वत्थपडिग्गहकंबलपायपुच्छणेणं ' ति इह पतद्ग्रहः-पात्रं, पादप्रोञ्छनं-रजोहरणं, ' पीढे ' त्यादि पीढं-आसनं, फलकं-अवष्टंभनफलकं, शय्या-वसतिर्वृहत्संस्तारको वा, संस्तारको-लघुतरः, एषां समाहारद्वन्द्वोऽतस्तेन, ' अहापरिग्गहिएहिं ' ति यथाप्रतिपन्नैर्न पुनर्ह्रासं नीतैः । इति भगवतीद्वितीयशतकपञ्चमोद्देशके ८०६ प्रतौ ११३ पत्रे ॥ ४ ॥

श्री जिनप्रतिमारिपून् प्रति जिनप्रतिमाक्षराणि लिख्यन्ते -

" अत्थि णं भंते ! असुरकुमाराणं देवाणं उड्ढं गइविसए ? हंता अत्थि । केवइयं च णं भंते ! असुरकुमाराणं देवाणं उड्ढं गतिविसए पण्णत्ते ? गोयमा ! जाव अच्चुए कप्पे, सोहम्मं पुण कप्पं गया य गमिस्संति य । किं पत्तिएणं भंते ! असुरकुमारा देवा सोहम्मं कप्पं गया य गमिस्संति य ? गोयमा ! तेसिं देवाणं भवपच्चइए वेराणुबंधे, तेणं देवा विकुव्वेमाणा परियारेमाणा वा आयरक्खे देवे वित्तासेंति, वित्तासेंतित्ता अहालहुस्सयाइं रयणाइं गहाय आयाए एगंतमवक्कमंति । अत्थि णं भंते ! तेसिं देवाणं अहालहुस्सगाइं रयणाइं ? हंता अस्थि । से कहमिदाणिं पकरेंति ? तओ से पच्छा कायं पव्वहंति । पभू णं भंते ! ते असुरकुमारा देवा तत्थ गया चेव समाणा ताहिं अच्छराहिं सद्धिं दिव्वाइं भोगभोगाइं भुंजमाणा विहरित्तए ? णो तिणट्ठे समट्ठे, ते णं तओ पडिनियतंति२त्ता इहमागच्छंति२त्ता

जइ णं ताओ अच्छराओ आढायंति परियाणंति पभू णं भंते ! ते असुरकुमारा देवा ताहिं अच्छराहिं सद्धिं दिव्वाइं भोगभोगाइं भुंजमाणा विहरित्तए, अह णं ताओ अच्छराओ णो आढायंति णो परियाणंति णो णं पभू ते असुरकुमारा देवा ताहिं अच्छराहिं सद्धिं दिव्वाइं भोगभोगाइं भुंजमाणा विहरित्तए । एवं खलु गोयमा ! असुरकुमारा देवा सोहम्मं कप्पं गया य गमिस्संति य । केवइकालस्स णं भंते ! असुरकुमारा देवा उड्ढं उप्पयंति ? जाव सोहम्मं कप्पं गया य गमिस्संति य ? गोयमा ! अणंताहिं उस्सप्पिणीहिं अणंताहिं अवसप्पिणीहिं समतिक्कंताहिं । अत्थि णं एस भावे लोगच्छेरयभूए समुप्पज्जइ जन्नं असुरकुमारा देवा उड्ढं उप्पयंति जाव सोहम्मे कप्पे । किं णिस्साए णं भंते ! असुरकुमारा देवा उड्ढं उप्पयंति जाव सोहम्मे कप्पे ? गोयमा ! से जहा णामए इह सबरा इ वा बब्बरा इ वा ढंकणा इ वा वुचुया इ वा पल्हाया इ वा पुलिंदा इ वा एगं महं वणं वा गड्डं वा दुग्गं वा दरिं वा विसमं वा पव्वयं वा निस्साए सुमहल्लमवि आसबलं वा हत्थिबलं वा जोहबलं वा धणुबलं वा आगलेंति । एवामेव असुरकुमारा देवा, णण्णंत्थ अरिहंते वा अरिहंतचेइयाणि वा अणगारे वा भावियप्पणो णिस्साए उड्ढं उप्पयंति " इति । वृत्तिर्यथा-' विउव्वेमाणा व ' त्ति संरंभेण महद्वैक्रियशरीरं कुर्वन्तः, ' परियारेमाण ' त्ति परिचारयन्तः-परकीयदेवीनां भोगं कर्तुकामा इत्यर्थः । ' अहालहुस्सगाइं ' ति यथेति-यथोचितानि लघुस्वकानि-अमहास्वरूपाणि, महतां हि तेषां नेतुं गोपयितुं वाऽशक्यत्वादिति यथालघुस्वकानि । अथालघुनि-महान्ति वरिष्ठानीति वृद्धाः । ' आयाए ' त्ति आत्मना स्वयमित्यर्थः । ' एगतं ' ति विजनं, ' अंतं 'ति देशं, ' से कहामियाणिं पकरेंति ' अथ किमिदानीं रत्नग्रहणानन्तरमेकान्तापक्रमणकाले प्रकुर्वन्ति वैमानिका रत्नादात्द्दणामिति, ' तओ से पच्छा कायं पव्वहंति ' त्ति ततो रत्नादानात् ' पच्छ ' त्ति अनन्तरं ' से ' त्ति एषां रत्नादात्द्दणामसुराणां कायं-देहं प्रव्यथन्ते-प्रहारैर्मर्थ्नन्ति वैमानिका देवाः, तेषां च प्रव्यथितानां वेदना भवति, जघन्येनान्तर्मुहूर्त्तमुत्कुष्टतः षण्मासान् यावत् । ' सबरा इ वेत्यादौ ' शबरादयोऽनार्यविशेषाः, ' गड्डं व ' त्ति गर्त्तां, ' दुग्गं व ' त्ति जलदुर्गादि, ' दरिं व ' त्ति दरीं-पर्वतकन्दरां, ' विसमं व ' त्ति विषमं गर्त्ता तर्वाद्याकुलभूमिकारूपं, ' निस्सा ए ' त्ति निश्रया-आश्रित्य, ' धणुबलं व ' त्ति धनुर्धरबलं, ' आगलेंति ' त्ति आकलयन्ति, जेष्याम इत्यध्यवस्यन्तीति । ' णण्णत्थ ' त्ति ननु-निश्चितमत्र-इहलोके । अथवा ' अरिहंते वा णिस्साए उड्ढं उप्पयंति ' नान्यत्र-तन्निश्रया अन्यत्र न तां विनेत्यर्थः । इति भगवती तृतीयशतकद्वितीयोद्देशके ८०६ प्रतौ १३० पत्रे ॥ ५ ॥

अथ ये केचन सर्वथा केवलिशरीराज्जीवविराधना न भवतीति साक्षात्सिद्धान्तापलापप्रलापिन संसारं पल्लवयन्ति, तदुपकाराय पुनरपि शास्त्रं लिख्यते-

" से जहा णामए हरए सिया, पुणे पुण्णप्पमाणे वोलट्टमाणे वोसट्टमाणे समभरघडत्ताए चिट्ठइ ? () हंता चिट्ठइ । अहे णं केइ पुरिसे तंसि हरयंसि एगं महं णावं सतासवं सयछिद्दं ओगाहेज्जा, से नूणं मंडियपुत्ता ! सा नावा तेहिं आसवदारेहिं आपूरेमाणी आपूरेमाणी पुन्ना पुन्नप्पमाणा वोलट्टमाणा वोसट्टमाणा समभरघडत्ताए चिट्ठइ ? हंता चिट्ठइ । अहे णं केइ पुरिसे तीसे नावाए सव्वओ समंता आसवदाराइं पिहेइ, पिहेइत्ता नावाओ उस्सिंचणएणं उदयं उस्सिंचेज्जा, से नूणं मंडियपुत्ता ! सा नावा तंसि उदयंसि उस्सिचिज्जंसि समाणंसि खिप्पामेव उड्ढं उदाइ ? हंता उदाइ । एवामेव मंडियपुत्ता ! अत्तत्तासंवुडस्स अणगारस्स इरियासमियस्स जाव गुत्तबंभयारिस्स आउत्तं गच्छमाणस्स चिट्ठमाणस्स णिसीयमाणस्स तुयट्टमाणस्स आउत्तं वत्थपडिग्गहकंबलपायपुंच्छणं गिण्हमाणस्स णिक्खिवमाणस्स जाव चक्खुपम्हणिवायमवि वेमाया सुहुमा इरियावहिया किरिया कज्जइ । सा पढमसमयबद्धपुट्ठा, बितियसमयवेइया, तइयसमयणिज्जरिया, सा बद्धा पुट्ठा उदीरिया वेदिया य णिज्जिण्णा सेयकाले अकम्मं वावि भवइ, से तेणट्ठेणं मंडियपुत्ता ! एवं वुच्चइ, जावं च णं से जीवे सया समियं णो एयइ जाव अंते अंतकिरिया भवइ " इति । वृत्तिर्यथा-अथ निःक्रियस्यैवान्तक्रिया भवतीति नौदृष्टान्तेनाह-' से जहा नामए ' इत्यादि इह शब्दार्थः प्राग्वत्, नवरं ' उदाइ 'त्ति उद्याति जलस्योपरि वर्त्तते, ' अत्तत्तासंवुडस्स ' त्ति आत्मन्यात्मना संवृतस्य प्रतिसंकीनस्येत्यर्थः । एतदेव ' इरियासमियस्स ' इत्यादिना प्रपञ्चयति- ' आउत्तं ' ति आयुक्तमुपयोगपूर्वकमित्यर्थः । ' जाव चक्खुपम्हनिवायमवि ' त्ति किं बहुना आयुक्तगमनादिना स्थूलक्रिया जालेनोक्तेन यावच्चक्षुःपक्ष्मनिपातोऽपि, प्राकृतत्वाल्लिङ्गव्यत्ययः, उन्मेषनिमेषमात्रक्रियाऽप्यस्ति, आस्तां गमनादिका तावदिति शेषः । ' वेमाय ' त्ति विविधमात्रा अन्तर्मुहूर्त्तादेर्देशोनपूर्वकोटिपर्यन्तस्य क्रियाकालस्य विचित्रत्वात् । वृद्धाः पुनरेवमाहुः-यावच्चक्षुषोर्निमेषोन्मेषमात्राऽपि क्रिया क्रियते, तावताऽपि कालेन विमात्रया स्तोकमात्रयाऽपि इति । क्वचिद्विमात्रेत्यस्य स्थाने ' सपेहाए ' त्ति दृश्यते, तत्र च स्वप्रेक्षया स्वेच्छया चक्षुःपक्ष्मनिपातो न तु परकृतः, ' सुहुम 'त्ति सूक्ष्मबन्धादिकालः, ' इरियावहिय ' त्ति इर्यापथो-गमनमार्गस्तत्र भवा ऐर्यापथिकी केवलकाययोगप्रत्ययेति भावः । ' किरिय ' त्ति कर्म

॥६७॥

सातवेदनीयमित्यर्थः । ' कज्जइ ' त्ति क्रियते भवतीत्यर्थः । उपशान्तमोहक्षीणमोहसयोगिकेवलिलक्षणगुणस्थानकत्रयवर्त्तिवीतरागोऽपि हि सक्रियत्वात्सातवेद्यं कर्म बध्नातीति भावः ' से ' त्ति ईर्यापथक्रिया ' पढमसमयबद्धपुट्ठ ' त्ति (प्रथम समये) बद्धा कर्मतापादनात्स्पृष्टा जीवप्रदेशैः स्पर्शनात् ततः कर्मधारये तत्पुरुषे च सति प्रथमसमयबद्धस्पृष्टा, तथा द्वितीयसमये वेदिता-अनुभूतस्वरूपा, एवं तृतीयसमये निर्जीणा-अनुभूतस्वरूपत्वेन जीवप्रदेशेभ्यः परिशटितेति, एतदेव वाक्यान्तरेणाह-सा बद्धा स्पृष्टा प्रथमे समये, द्वितीये तु उदीरिता-उदयमुपनीता, किमुक्तं भवति ? वेदिता, न ह्येकस्मिन् समये बन्ध उदयश्च सम्भवतीयेवं व्याख्यातं, तृतीये तु निर्जीर्णा, ततश्च ' सेयकाले ' त्ति एष्यत्काले ' अकम्मं वावि ' त्ति अकर्माऽपि च भवति, इह च यद्यपि तृतीयेऽपि समये कर्माकर्म भवति तथापि तत्क्षण एवातीतभावकर्मत्वेन द्रव्यकर्मत्वात् तृतीये निर्जीर्णं कर्मेति व्यपदिश्यते, चतुर्थादिसमयेषु त्वकर्मेति ' अत्तत्तासंवुडस्से ' त्यादिना चेदमुक्तं-यदि संयतोपि साश्रवः कर्म बध्नाति तदा सुतरामसंयतः, अनेन च जीवनावः कर्म्मजलपूर्यमाणतयार्थतोऽधो निमज्जनमुक्तं, सक्रियस्य कर्मबन्धभणनाच्चाक्रियस्य तद्विपरीतत्वात्कर्मबन्धाभाव उक्तः, तथा च जीवनावोऽनाश्रवतायामूर्द्ध्वगमनसामर्थ्यादुपनीतमवसेयम् । इति । भगवतीतृतीयशतकतृतीयोद्देशके ८०६ पत्रौ १३७ पत्रे ॥ ६ ॥

ननु अष्टमीचतुर्दश्यादौ वेलावृद्धिहानी किं निबन्धने ? इत्याशङ्कानिराचिकीर्षया लिख्यते-

' कम्हा णं भंते ! लवणसमुद्दे चाउद्दसट्ठमुद्दिट्ठिपुण्णिमासिणिसु अइरेगं वड्ढइ वा हायइ वा जहा जीवाभिगमे लवणसमुद्दवत्तवया णेयव्वा, जाव लोकट्ठिई, जण्णं लवणसमुद्दे जंबुद्दीवं दीवं णो उप्पीलति । णो चेव णं एगोदगं करेइ (लोयट्ठिई) लोगाणुभावे सेवं भंते ! भंते ! जाव विहरइ ' त्ति । "वृत्तिर्यथा-' भंते ' त्ति इत्यादि । ' अतिरेगं 'ति तिथ्यन्तरापेक्षया अधिकतरमित्यर्थः । ' लवणसमुद्दवत्तव्वया नेयव्व ' त्ति जीवाभिगमोक्ता, कियद्दूरं यावदित्याह-' जाव लोयट्ठिई ' इत्यादि । सा चैवमर्थतः कस्माद्भदन्त ! लवणसमुद्रश्चतुर्दश्यादिष्वपि अतिरेकेण बर्द्धते हीयते वा ? । इह प्रश्ने उत्तरम् - लवणसमुद्रस्य मध्यभागे दिक्षु चत्वारो महापातालकलशा योजनलक्षप्रमाणाः सन्ति, तेषां चाधस्तने त्रिभागे वायुर्मध्यमे त्रिभागे वायूदके उपरितने तूदकमिति । तथाऽन्ये क्षुद्रपातालकलशा योजनसहस्रप्रमाणाश्चतुरशीत्युत्तराष्टशताधिकसप्तसहस्रसंख्या वाय्वादियुक्तत्रिभागवन्तः सन्ति । तदीयवातविक्षोभवशाज्जलवृद्धिहानी अष्टम्यादिषु

स्याताम्। तथा लवणशिखाया दशयोजनानां सहस्राणि विष्कम्भः षोडशोच्छ्रयः योजनार्द्धमुपरि वृद्धिहानी, इत्यादि। अथ कस्माल्लवणो जंबूद्वीपं नोत्प्लावयति, अर्हदादिप्रभावाल्लोकस्थितिर्वैषेति एतदेवाह-' लोगट्ठिई ' त्ति लोकव्यवस्था। ' लोयाणुभावे ' त्ति लोकप्रभावः। इति भगवतीतृतीयशतकतृतीयोद्देशके ८०६ प्रतौ १३८ पत्रे ॥ ७ ॥

युद्धे हताः स्वर्गं गच्छन्तीति मिथ्याजनप्रसिद्धिनिराकरणाय लिख्यते-

" बहुजणे णं भंते ! अण्णमण्णस्स एवं आइक्खंति जाव परूवेंति, एवं खलु बहवे मणुस्सा आणयरेसु उच्चावएसु संगामेसु अभिमुहा चेव पहया समाणा कालमासे कालं किच्चा अण्णयरेसु देवलोएसु देवत्ताए उववत्तारो भवंति, से कहमेयं ? भंते ! एवं गोयमा ! जण्णं से बहुजणो अण्णमण्णस्स एवं आइक्खइ जाव उववत्तारो भवंति, जे ते एवमाहंसु मिच्छं ते एवमाहंसु, अहं पुण गोयमा ! एवमाइक्खामि जाव परूवेमि-एवं खलु गोयमा ! तेणं कालेणं तेणं समएणं वेसालीनामं नगरी होत्था। वण्णओ, तत्थ णं वेसालीए नगरीए वरुणे नामं णागणत्तुए परिवसइ। अड्ढे जाव अपरिभूए समणोवासए अभिगयजीवाजीवे जाव पडिलाभेमाणे छट्ठं छट्ठेणं अणिक्खित्तेणं तवोकम्मेणं अप्पाणं भावेमाणे विहरइ। तते णं से वरुणे णागणत्तुए अण्णदा कदायि रायाभिओगेणं गणाभिओगेणं बलाभिओगेणं रहमुसले संगामे आणत्ते समाणे छट्ठभत्तिए अट्ठमभत्तं अणुवड्ढेइ अणुवड्ढइत्ता कोडुंबियपुरुसे सद्दावेइ२त्ता एवं वयासी खिप्पामेव भो देवाणुप्पिया ! चाउग्घंटं आसरहं जुत्तामेव उवट्ठावेह हयगयरहपवरजाव सणाहेत्ता मम एयमाणत्तियं पच्चप्पिणह। तते णं ते कोडुंबियपुरिसा जाव पडिसुणेत्ता खिप्पामेव सच्छत्तं सज्झयं जाव उवट्ठविंति हयगयरहजाव सण्णाहेंति जेणेव वरुणे णागणत्तुए जाव पच्चप्पिणंति। तते णं से वरुणे णागणत्तुए जेणेव मज्जणघरे तेणेव उवागच्छइ उवागच्छित्ता जहा कूणिओ जाव पायच्छित्ते सव्वालंकारविभूसिए सण्णद्धबद्धसकोरिंटमल्लदामं जाव धरिण्णमाणेणं अणेगगणणायगजाव दूयसंधिवालसद्धिंसंपरिवुडे मज्जणघराओ पडिनिक्खमइ, पडिनिक्खमित्ता जेणेव बाहिरिया उवट्ठाणसाला जेणेव चाउग्घंटे आसरहे तेणेव उवागच्छइ, उवागच्छित्ता चाउग्घंटं आसरहं दुरूहइ, दुरूहित्ता हयगयरह जाव संपरिवुडे महया भडचडगजाव परिक्खित्ते जेणेव रहमुसले संगामे तेणेव उवागच्छइ उवागच्छित्ता रहमुसलं संगामं ओयाए। तए णं से वरुणे नागनत्तुए रहमुसलं संगामं ओयाए समाणे अयमेयारूवं अभिग्गहं अभिगिण्हइ-

॥६९॥

कप्पइ मे रहमुसलं संगामं संगामेमाणस्स जे पुव्वि पहणइ तं पडिहणित्तए, अवसेसे णो कप्पइ त्ति, अयमेतारूवं अभिग्गहं अभिगिण्हइ२त्ता रहमुसलं संगामं संगामेइ । तते णं तस्स वरुणस्स णागणत्तुयस्स रहमुसलं संगामं संगामेमाणस्स एगे पुरिसे सरिसए सरित्तए सरिव्वए सरिसभंडमत्तोवगरणे रहेणं पडिरहं हव्वमागते । तते णं से पुरिसे वरुणं णागणत्तुयं एवं वयासी-पहण भो वरुणा ! णागणत्तुया ! तते णं से वरुणे णागणत्तुए तं पुरिसं एवं वयासी-णो खलु मे कप्पइ देवाणुप्पिया ! पुव्वि अहयस्स पहणित्तए, तुमं चेव पुव्वि पहणाहि । तते णं से पुरिसे वरुणेणं णगणत्तुएणं एवं वुत्ते समाणे आसुरुत्ते जाव मिसिमिसेमाणे धणुं परामुसइ परामुसित्ता उसुं परामुसइ उसुं परामुसित्ता ठाणं ठाइ ठिच्चा आयतकन्नायतं उसुं करेइ करेत्ता वरुणं णागणत्तुयं गाढप्पहारी करेइ । तते णं से वरुणे णागणत्तुए तेणं पुरिसेणं गाढप्पहारीकए समाणे आसुरुत्ते जाव मिसिमिसेमाणे धणुं परामुसइ परामुसित्ता उसुं परामुसइ उसुं परामुसित्ता आयतकन्नायतं उसुं करेइ करेत्ता तं पुरिसं एगाहच्चं कूडाहच्चं जीवियाओ ववरोवेइ । तते णं से वरुणे णागणत्तुए तेणं पुरिसेणं गाढप्पहारीकए समाणे अत्थामे अबले अवीरिए अपुरिसक्कारपरक्कमे अधारिणज्जमिति कट्टु, तुरए णिगिण्हइ णिगिण्हित्ता रहं परावत्तेइ रहं परावत्तित्ता रहमुसलाओ संगामाओ पडिनिक्खमइ, पडिनिक्खमित्ता एगंतमतं अवक्कमइ अवक्कमित्ता तुरए णिगिण्हइ निगिण्हइत्ता रहं ठावइ ठावेत्ता रहाओ पच्चोरुहइ पच्चोरुहित्ता रहाओ तुरए मोएइ मोएत्ता तुरए पडिविसज्जेइ पडिविसज्जेत्ता दब्भसंथारगं संथरइ संथरित्ता दब्भसंथारगं दुरूहइ दुरूहित्ता पुरत्थाभिमुहे संपलियंकनिसन्ने करयलपरिग्गहियं जाव कट्टु एवं वदासी-नमोत्थु णं अरहंताणं जाव णमोत्थु णं समणस्स भगवओ महावीरस्स आइगरस्स जाव संपाविउकामस्स मम धम्मायरियस्स धम्मोवदेसगस्स वंदामि णं भगवंतं तत्थ गतं इह गते जाव वंदति णमंसति वंदित्ता नमंसित्ता एवं वदासी-पुव्विंपि णं मए समणस्स भगवओ महावीरस्स अंतियं थूलए पाणातिवाए पच्चक्खाते जावज्जीवाए, एवं जाव थूलए परिग्गहे पच्चक्खाए जावज्जीवाए, इयाणिं पि य णं अहं तस्सेव भगवओ महावीरस्स अंतियं सव्वं पाणाइवायं पच्चक्खामि जावज्जीवाए, एवं जहा खंदओ जाव एयं पि य णं चरिमेहिं ऊसासनीसासेहिं वोसिरिस्सामि त्तिकट्टु संण्णाहपट्टं मुयइ मुइत्ता सलुद्धरणं करेइ करेत्ता आलोइयपडिक्कंते समाहिपत्ते आणुपुव्वीए कालगते । तेए णं तस्स वरुणस्य णागणत्तुयस्स एगे पियबालवयंसए रहमुसलं संगामं संगामेमाणे एगेणं पुरिसेणं गाढप्पहारीकए समाणे अत्थामे जाव अधारणिज्जमितिकट्टु,

वरुणं णागणत्तुयं रहमुसलाओ संगामाओ पडिणिक्खम्ममाणं पासइ पासित्ता तुरइ णिगिण्हइ णिगिण्हित्ता जहा वरुणे जाव तुरए विसज्जेइ विसज्जेत्ता दब्भसंथारगं दुरूहइ२त्ता पुरत्थाभिमुहे जाव अंजलिं कट्टु एवं वदासि-जाइ णं भंते मम पियबालवयंसस्स वरुणस्स णागणत्तुयस्स सीलाइं वयाइं गुणाइं वेरमणाइं पच्चक्खाणपोसहोववासाइं ताइ णं ममंपि भवंतु त्तिकट्टु सण्णाहपट्टं मुयइ मुइत्ता सल्लुद्धरणं करेइ करेत्ता आणुपुव्वीए कालगए। तए णं तं वरुणं णागणत्तुयं कालगयं जाणित्ता अहासंनिहिएहिं वाणमंतरेहिं देवेहिं दिव्वे सुरभिगंधोदगवासे वुट्ठे दसद्धवण्णे कुसुमे णिवाइए दिव्वे य गीयगंधव्वणिणाए कए यावि होत्था। तण णं तस्स वरुणस्य णागणत्तुयस्स तं दिव्वं देविड्ढिं दिव्वं देवज्जुत्तिं दिव्वं देवाणुभागं सुणित्ता य पासित्ता य बहुजणो अण्णमण्णस्स एवमाइक्खइ जाव परूवेइ, एवं खलु देवाणुप्पिया ! बहवे मणुस्सा जाव उववत्तारो भवंति। वरुणेणं भंते ! णागणत्तुए कालमासे कालं किच्चा कहिं गए कहिं उववन्ने ? गोयमा ! सोहम्मे कप्पे अरुणाभे विमाणे देवत्ताए उववण्णे, तत्थ णं अत्थे गइयाणं देवाणं चत्तारि पलिओवमाइं ठिई पन्नत्ता, तत्थ णं वरुणस्स वि देवस्स चत्तारि पलिओवमाइं ठिई पण्णत्ता। से णं भन्ते ! वरुणे देवे ताओ देवलोयाओ आउखएणं भवखएणं जाव महाविदेहे वासे सिज्झिहिति जाव अंतंकरेहिति। वरुणस्स णं भंते ! नागनत्तुयस्स पियबालवयंसए कालमासे कालं किच्चा कहिं उववन्ने ? गोयमा ! सुकुले पच्चायाते से णं भंते ! तओहिंतो अणंतरं उव्वट्टित्ता कहिं गच्छिहिति कहिं उववज्जिहिति ? गोयमा ! महाविदेहे वासे सिज्झिहिति जाव अंतं करेहिति " इति ! वृत्तिर्यथा-' जन्नं से बहुजणो अण्णमण्णस्स एवमाइक्खइ ' इत्यत्रैकवचनप्रक्रमे ' जे ते एवमाहंसु ' इत्यत्र यो बहुवचननिर्देशः, स व्यक्त्यपेक्षोऽवसेयः। ' अहिगयजीवाजीवे ' इत्यत्र यावत्करणात् ' उवलद्धपुन्नपावे ' इत्यादि दृश्यम्। ' पडिलाभेमाणे 'त्ति इदं च ' समणे निग्गंथे फासुएणं एसणिज्जेणं असणपाणखाइमसाइमेणं वत्थपडिग्गहकंबलरओहरणेणं पीढफलगसेज्जासंथारएणं पडिलाभेमाणे विहरइ ' इत्येवं दृश्यम्। ' चाउग्घंटं ' ति घण्टाचतुष्टयोपेतं ' आसरहं 'ति अश्ववहनीयरथं ' जुत्तामेव ' त्ति युक्तमेव रथसामग्र्येति गम्यम्। ' सज्झयं ' इत्यत्र यावत्करणादिदं दृश्यम्-' सघंटं सपडागं सतोरणवरं सणंदिघोसं सखिखिणीहेमजालपेरंतपरिक्खित्तं ' इति सकिङ्किणीकेन-क्षुद्रघण्टिकायुक्तेन हेमजालेन पर्यन्तेषु परिक्षिप्तो यः सः तथा तम्, हेमवयचित्ततेणिसकणगनिउत्तदारुयागं ' हैमवतानि-हिमवद्गिरिजातानि चित्राणि-विचित्राणि तैनिशानि-तिनिशाभिधानवृक्षसंबन्धीनि, स हि

दृढो भवतीति तद्ग्रहणं, कनकनियुक्तानि-नियुक्तकनकानि दारूणि यत्र स तथा तम्, ' सुसंविद्धचक्कमंडलधुरागं ' सुष्ठु संविद्धे चक्रे यत्र, मंडला च-वृत्ता च धूर्यत्र स तथा तम्, ' कालायससुकयनेमिजंतकम्मं ' कालायसेन-लोहविशेषेण सुष्ठु कृतं नेमेःचक्रमण्डलमालाया यन्त्रकर्मबन्धनक्रिया यत्र स तथा तम् । ' आइण्णवरतुरयसुसंपउतं ' जात्यप्रधानाश्वैः सुष्ठु संप्रयुक्तमित्यर्थः, ' कुसलनरच्छेयसारहिसुसंपग्गहियं ' कुशलनररूपो यश्छेकसारथिः-दक्षप्राजिता तेन सुष्ठु संप्रगृहीतो यः स तथा तम्, ' सरसयबत्तीसतोणपरिमंडियं ' शराणां शतं प्रत्येकं येषु ते शरशताः तैर्द्वात्रिंशता तूणैः-शरधिभिः परिमण्डितो यः स तथा तम्, ' सकंकडवडेंसगं ' सहकण्टकैः-सकवचैरवतंसैश्च-शेखरकैः शिरस्त्राणभूतैः यः स तथा तम्, ' सचावसरपहरणावरणभरियजोहजुद्धसज्जं ' सहचापशरैर्यानि प्रहराणानिखड्गादीनि आवरणानि-स्फुरकादीनि तेषां भृतः अत एव योधानां युद्धसज्जश्च-युद्धप्रगुणो यः सः तथा तम्, ' चाउग्घंटं आसरहं जुत्तामेव 'त्ति वाचनान्तरे तु साक्षादेवेदं दृश्यते इति, ' अयमेयारूवं ' ति प्राकृतत्वादिममेतद्रूपम् वक्ष्माणरूपं 'सरिसए 'त्ति सदृशकः-समानः, सरित्तए 'त्ति सदृशत्वक, ' सरिव्वए 'त्ति सदृक्वयाः, ' सरिसभंडमत्तोवगरण 'त्ति सदृशी भाण्डमात्रा-कोशप्रहरणादिरूपा, उपकरणं च कंटकादिकं यस्य सः तथा तम्, ' पडिरहं ' त्ति रथं प्रति ' आसुरुत्ते ' त्ति आशुशीघ्रं रुप्तः-कोपोदयाद्विमूढो, ' रुप लुप विमोहने ' इति वचनात् स्फुरितकोपलिङ्गो वा, यावत्करणादिदं दृश्यम्-' रुट्ठे कुविए चंडिक्कए ' त्ति तत्र रुष्टः-उदितक्रोधः, कुपितः-प्रवृद्धकोपोदयः, चाण्डिकितः सज्जातचाण्डिक्यः-प्रकटितरौद्ररूप इत्यर्थः । ' मिसिमिसिमाणे 'त्ति क्रोधाग्निना दीप्यमान इव एकार्थिका वैते शब्दाः कोपप्रकर्षप्रतिपादनार्थमुक्ताः । ' ठाणं 'त्ति पादन्यासविशेषलक्षणम् 'ठाइ ' करोति ' आयतकण्णायतं ' ति आकृष्टः सामान्यतः स एव कर्णायत आकर्णमाकृष्ट आयतकर्णायतस्तम्, ' एगाहच्चं ' ति एका हत्या-हननं प्रहारो यत्र जीवितव्यरोपणे तदेकाहत्यम् तद्यथा भवति-' कूडाहच्चं 'ति कूटे इव-तथाविधपषाणसंपुटादौ कालविलम्बाभावसाधर्म्यादाहत्या-हननं यत्र तत्कूटाहत्यम् । ' अत्थामो 'त्ति अस्थामासामान्यतः शक्तिविकलः, ' अबले 'त्ति शरीरशक्तिवर्जितः, ' अवीरीए 'त्ति मनःशक्तिवर्जितः ' अपुरिसक्कारपरकम्मे ' त्ति व्यक्तम्, नवरं-पुरुषकारः-पुरुषाभिमानः स एव निष्पादितस्वप्रयोजनः पराक्रमः ' अधारणिज्जं ' ति आत्मनो धारणं कर्त्तुमशक्यं ' इतिकट्टु ' त्ति इति कृत्वा, इति हेतोरित्यर्थः, ' तुरए णिगिण्हइ ' ति अश्वान् गच्छतो निरुणद्धीत्यर्थः । ' एगंतमंतं ' ति एकान्तं-विजनं अंतं-भूमिभाग । ' शीलाइं ' ति

फलानपेक्षाः प्रवृत्तयस्ताश्च प्रक्रमाच्छुभाः ' अणुवयाइं ' ति अहिंसादीनि ' गुणाइं ' ति गुणव्रतानि ' वेरमणाइं ' ति सामान्येन रागादिविरतयः, ' पच्चक्खाणपोसहोववासाइं ' ति प्रत्याख्यानं-पौरुष्यादिविषयं, पौषधोपवासः-पर्वदीनोपवासः । ' गीयगंधवनिनाए ' त्ति गीतं-गानमात्रं गन्धर्वं-तदेव मुरजादिध्वनिसनाथं तल्लक्षणो निनादः-शब्दो गीतगन्धर्वनिनादः, ' कालमासे 'त्ति कालकरणमासे मासस्योपलक्षणत्वात्कालदिवसे इत्याद्यपि द्रष्टव्यम् । ' कहिं गए कहिं उववन्ने 'त्ति प्रश्नद्वये ' सोहम्मे कप्पे ' इत्याद्येकमेवोत्तरं, गमनपूर्वकत्वादुत्पादस्योत्पादाभिधाने गमनं सामर्थ्यादवगतमेवेत्यभिप्रायादिति । आयुःकर्मदलिकनिर्जरणेन, ' भवक्खएणं ' ति देवभवनिबन्धनदेवगत्यादिकर्मनिर्जरणेन, ' ठिइक्खएणं ' त्ति आयुष्कादिकर्मणां स्थितिनिर्जरणेनेति । इति भगवतीसप्तमशतकनवमोद्देशके ८०६ प्रतौ २३२ । २३३ पत्रे ॥ ८ ॥

पुनरपि दण्डकग्रहणाक्षराणि लिख्यन्ते-

" णिग्गंथं च णं गाहावइकुलं जाव केइ दोहिं पडिग्गहेहिं उवणिमंतेज्जा, एगं आउसो ! अप्पणा परिभुंजाहि, एगं थेराणं दलयाहि । से य तं पडिग्गहेज्जा । तहेव जाव तं णो अप्पणा परिभुंजेज्जा णो अण्णेसिं दावए, सेसं तं चेव जाव परिट्ठवियव्वे सिया, एवं जाव दसहिं पडिग्गहेहिं, एवं जहा पडिग्गहवत्तव्वया भणिया, एवं गोच्छगरयहरणचोलपट्टगकंबललट्ठीसंथारगवत्तव्वया य भाणियव्वा जाव दसहिं संथारएहिं उवणिमंतेज्जा " । एतत्सूत्रस्य टीका तु सुगमत्वान्नास्ति । इति श्रीभगवत्यष्टमशतकषष्ठोद्देशके ८०६ प्रतौ २६९ पत्रे ॥ ९ ॥

ये केचन जीवोपयोगस्वरूपास्तेऽवर्णा यावदस्पर्शाः तथा च मतिज्ञानादयोऽपि तथैव । तथा हि-

" कन्हलेसा णं भन्ते ! कइ वन्ना ? पुच्छा गोयमा ! दव्वलेसं पडुच्च पंचवन्ना जाव अट्ठफासा पन्नत्ता, भावलेसं पडुच्च अवन्ना४, एवं जाव सुक्कलेस्सा सम्मद्दिट्ठी३ चक्खुदंसणे४ आभिणिबोहियनाणे जाव विभंगनाणे, आहारसन्ना जाव परिग्गहसन्ना, एयाणि अवन्नाणि४ " इति । एतत्सूत्रस्य टीका तु सुगमत्वान्नास्ति ॥ इति श्रीभगवती द्वादशशतक पञ्चमोद्देशके ८०६ प्रतौ ३९५ पत्रे ॥ १० ॥

पुष्पदन्तग्रहणमाश्रित्य मिथ्यादृग्विकल्पितकल्पनाजालनिराकरणाय लिख्यन्ते-

रायगिहे जाव एवं वयासी-बहुजणे णं भंते ! अण्णमण्णस्स एवमाइक्खइ जाव एवं परूवेइ-एवं खलु राहू चंदं गेण्हति, एवं० २ से कहमेयं भंते ! एवं ? गोयमा ! जण्णं से बहुजणे अण्णमण्णस्स एवमाइक्खइ जाव मिच्छं ते एवमाहंसु । अहं पुण गोयमा ! एवमाइक्खामि जाव एवं परूवेमि-एवं खलु राहू देवे महिड्ढीए जाव महेसक्खे वरवत्थधरे वरमल्लधरे वरगंधधरे वराभरणधरे, राहुस्स णं देवस्स नव नामधिज्जा पण्णत्ता, तं जहा-सिंघाडए२ जडिलए२ खत्तए३ खरए४ दद्दुरे५ मच्छे६ कच्छभे७ कन्हसप्पे८ मगरे९ । राहूस्स णं देवस्स विमाणा पंचवन्ना पन्नत्ता । तं जहा-किन्हा१ नीला२ लोहिया३ हालिद्दा४ सुक्किला ५ ॥ अत्थि कालए राहुविमाणे खंजणवन्नाभे प० । अत्थि नीलए राहुविमाणे लाउयवन्नाभे प० । अत्थि लोहिए राहुविमाणे मंजिट्ठिवन्नाभे प० । अत्थि पीतए राहुविमाणे हालिद्दवन्नाभे पन्नत्ते । अत्थि सुक्किलए राहुविमाणे भासरासिवन्नाभे पन्नत्ते । जदा णं राहुदेवे आगच्छमाणे वा गच्छमाणे वा विउव्वमाणे वा परियारेमाणे वा चंदलेस्सं पुरच्छिमेणं आवरेत्ता णं पच्चच्छिमेणं वीईवयइ, तदा णं पुरच्छिमेणं चंदे उवदंसेति, पच्चच्छिमेणं राहु । जदा णं राहू आगच्छमाणे वा गच्छमाणे वा विउव्वमाणे वा परियारेमाणे वा चंदलेस्सं पच्चच्छिमेणं आवरेत्ता णं पुरच्छिमेणं वीईवयइ, तदा णं पच्चच्छिमेणं चंदे उवदंसेति, पुरच्छिमेणं राहू । एवं जहा पुरच्छिमेणं पच्चच्छिमेण य दोआलावगा भणिया तहा दाहिणेण उत्तरेण य दोआलावगा भाणियव्वा । एवं उत्तरपुरच्छिमेणं दाहिणपच्चच्छिमेण य दोआलावगा भाणियव्वा । एवं दाहिणपुरच्छिमेणं उत्तरपच्चच्छिमेणं य दोआलावगा भाणियव्वा । एवं चेव जाव तदा णं उत्तरपच्चच्छिमेणं चंदे उवदंसेति, दाहिणपुरच्छिमेणं राहू । जदा णं राहू आगच्छमाणे वा गच्छमाणे वा विउव्वमाणे वा परियारेमाणे वा चंदलेस्सं आवरेमाणे२ चिट्ठइ, तदा णं मणुस्सलोए मणुस्सा वदंति एवं खलु राहू चंदं गिण्हइ । एवं जदा णं राहू आगच्छमाणे वा४ चंदलेस्सं आवरेत्ता णं पासेणं वीईवयइ, तदा णं मणुस्सलोए मणुस्सा वदंति-एवं खलु चंदेणं राहुस्स कुच्छी भिन्ना । एवं जदा णं राहू आगच्छमाणे४ चंदलेस्सं आवरेत्ता णं पच्चोसक्कइ, तदा णं मणुस्सलोए मणुस्सा वदंति-एवं खलु राहूणा चंदे वंते । एवं जदा णं राहू आगच्छमाणे वा४ जाव परियारेमाणे वा चंदलेस्सं अहे सपक्खिं सपडिदिसिं आवरेत्ता चिट्ठइ, तदा णं मणुस्सलोए मणुस्सा वदंति-एवं राहुणा चंदे घत्थे " इति । वृत्तिर्यथा-' मिच्छं ते एवमाहंसु ' त्ति इह तद्वचनं मिथ्यात्वमप्रमाणिकत्वात्कुप्रवचनसंस्कारोपनीतत्वाच्च, ग्रहणं हि राहुचन्द्रयोर्विमानापेक्षं, न च विमानयोर्ग्रासकग्रसनीयसंभवोऽस्ति

आश्रयंमात्रत्वान्नरभवनानामिव । अथेदं गृहमनेन ग्रस्तमिति दृष्टस्तद्व्यवहारः ? सत्यं, स खल्वाच्छाद्याच्छादकभावे सति नान्यथा । आच्छादक भावेन च ग्रासविवक्षायामिहापि न विरोधः इति । अथ यदत्र सम्यक् तद्दर्शयितुमाह-' अहं पुणे ' त्यादि ' खंजणवन्नाभे ' त्ति खञ्जनं दीपमल्लिकामलस्तस्य यो वर्णः तद्वदाभा यस्य तत्तथा । ' लाउयवन्नाभे ' त्ति ' लाउयं ' ति ' तुंबकं तच्चेहापक्कावस्थं ग्राह्यमिति । ' भासरासिवन्नाभे ' त्ति भस्मराशीवर्णाभम् । ततश्च किमित्याह-' जया ण ' मित्यादि ' आगच्छमाणे व ' त्ति गत्वा अतिचारेण ततः प्रतिनिवर्त्तमानः कृष्णवर्णादिना विमानेनेति शेषः ' गच्छमाणे व ' त्ति स्वभावचारेण चरन्, एतेन च पदद्वयेन स्वाभाविकी गतिरुक्ता । ' विउव्वमाणे व ' त्ति विकुर्वणां कुर्वन्, ' परियारेमाणे व ' त्ति परिचारयन्-कामक्रीडां कुर्वन्, एतस्मिन् द्वये अतित्वरया प्रवर्त्तमानो विसंस्थुलचेष्टया स्वविमानसमज्जसं चलयति, एतच्च द्वयमस्वाभाविकविमानगतिग्रहणायोक्तमिति । ' चंदलेस्सं पुरच्छिमेणं आवरेत्ता णं ' ति स्वविमानेन चन्द्रविमानावरणे चन्द्रदीप्तेरावृतत्वाच्चन्द्रलेश्यां पुरस्तादावृत्य ' पच्चच्छिमेणं वीईवयइ ' त्ति चन्द्रापेक्षयाऽपरेण यातीत्यर्थः । पुरच्छिमेणं चंदे उवदंसेइ पच्चच्छिमेणं राहु ' त्ति राह्वपेक्षया पूर्वस्यां दिशि चन्द्र आत्मानमुपदर्शयति, चन्द्रापेक्षया च पश्चिमायां राहुरात्मानमुपदर्शयतीत्यर्थः । एवंविधस्वभावतायां च राहोश्चन्द्रस्य यद्भवति तदाह-' जया णं ' इत्यादि ' आवरेमाणे ' इत्यत्र द्विर्वचनं तिष्ठतीति क्रियाविशेषणत्वात् । ' चंदेणं राहुस्स कुच्छी भिन्ना ' त्ति राहोरंशस्य मध्येन चन्द्रो गतः इति वाच्ये चन्द्रेण राहोः कुक्षिर्भिन्न इति व्यपदिशन्तीति । ' पच्चोसक्कइ ' त्ति प्रत्यवसर्पति व्यावर्त्तते । ' वंते ' त्ति वान्तः-परित्यक्तः । ' सपक्खिं सपडिदिसिं ' ति सपक्षं-समानदिक् यथा भवति सप्रतिदिक्-समानविदिक् च यथा भवतीत्येवंचन्द्रलेश्यामावृत्यावष्टभ्य तिष्ठतीत्येवं योगः । अत आवरणमात्रमेवेदं वैस्रसिकं चन्द्रस्य राहुणा ग्रसनं, न तु कार्मणम् । इति श्रीभगवतीद्वादशशतकषष्ठोद्देशके ८० प्रतौ ३९५ । ३९६ पत्रे ॥ ११ ॥

केचिद्वदन्ति स्वल्पपरिमाणभूगोलं परितोऽरघट्टघटीन्यायेन भ्राम्यन्तौ सूर्याचन्द्रमसौ महत्परिमाणौ यथाक्रमं चारं चरतः, ततश्च सूर्यकान्तयः स्फटिकमये चन्द्रे प्रतिबिंबिता भवन्ति, ता एव च ज्योत्स्नाः, तथा च प्रतिपदि द्वितीयायां क्रमेण सन्मुखवृद्ध्याधिकमधिकं चन्द्रांशेषु सूर्यकान्तिप्रसारः, एवं च पौर्णमास्यां चारविशेषक्रमेणाधः सूर्य उपरि च चन्द्र एवं तिष्ठतः तेन च सकलोऽपि चन्द्रः सूर्यकान्तिव्याप्तो भवति एवं स्थितयोश्च तयोर्यावति प्रदेशे भूगोलस्तावति चन्द्रमध्यभागे सूर्यकान्तेरप्रसारोऽप्राप्तसूर्यकान्तित्वाच्च स श्याम-

॥७५॥

तयोपलभ्यते, स एव च भूगोलच्छायाच्छादितचन्द्रमध्यभाग एव कलङ्क इति व्यपदिश्यते इति मिथ्यादृग्गणकसिद्धान्ते अनुचितं चैतत्, चन्द्रे कालिमानमालोक्यैतावतो व्यतिकरस्य कल्पितत्वात् । सा कालिमा च चन्द्रविमानस्य मृगाङ्कत्वाङ्गीकारेण विना कल्पनामुपपद्यते । तथैव सिद्धान्तः-

" से केणट्ठेणं भंते ! एवं वुच्चइ चंदे ससी ? गोयमा ! चंदस्स णं जोइसिंदस्स जोइसरन्नो मियंके विमाणे कंता देवा कंताओ देवीओ कंताइं आसणसयणखंभभंडमत्तोवगरणाइं अप्पणा वि य णं चंदे जोतिसिंदे जोतिसराया सोमे कंते सुभए पियदंसणे सुरूवे से तेणेट्ठेणं जाव ससी । से केणट्ठेणं भंते ! एवं वुच्चइ सूरे आइच्चे सूरे ? गोयमा ! सूरादियाणं समयाइ वा आवलियाइ जाव आइच्चे " वृत्तिर्यथा- ' से केणट्ठेणमित्यादि ' । ' मियंके ' त्ति मृगचिह्नत्वान्मृगाङ्के विमानेऽधिकरणभूते ' सोमे ' त्ति सौम्यो-अरौद्राकारो नीरोगो वा ' कंते ' त्ति कान्तियोगात्, ' सुभए ' त्ति सुभगः-सौभाग्ययुक्तत्वाद्वल्लभो जनस्य ' पियदंसणे ' त्ति प्रियकारिदर्शनः, कस्मादेवमत आह-' सुरूवे से तेणट्ठेण ' मित्यादि सुरूपोऽयं तेन कारणेनोच्यते-' ससी ' त्ति सह श्रिया वर्त्तते इति सश्रीः तदीयदेवादीनां स्वस्य च कान्त्यादियुक्तत्वादिति, प्राकृतभाषापेक्षया च ससीति सिद्धम् । अथादित्यशब्दस्यान्वर्थाभिधानायाह-' से केणट्ठेण ' मित्यादि ' सूराइय ' त्ति सूर आदिः प्रथमो येषां ते सूरादिकाः के ? इत्याह-' समयाइ व ' ति समया अहोरात्रादिकालभेदानां निर्विभागा अंशाः । तथा हि-सूर्योदयमवधीकृत्याहोरात्रारंभकः समयो गण्यते । आवलिका मुहूर्त्तादयश्चेति । ' से तेणट्ठेण ' मित्यादि अथ तेनार्थेन सूर-आदित्य इत्युच्यते । आदौ अहोरात्रसमयादीनां भव आदित्यः, इति व्युत्पत्तेर्त्यप्रत्ययश्चेहार्षत्वात् इति भगवतीद्वादशशतकषष्ठोद्देशके ८०६ प्रतौ ३९६ पत्रे ॥ १२ ॥

ये केचन स्वकल्पितमतस्थापनाय नवीनयुक्तिजालं कल्पयन्ति, तेऽर्हदाद्याशातनाकारिणो भवन्तीत्यभिप्रायो लिख्यते-

" महुयादि समणे भगवं महावीरे महुयं समणोवासगं एवं वदासी-सुट्ठु णं महुया ! तुमं ते अन्नउत्थिए एवं वदासी साहू णं महुया ! तुमं ते अन्नउत्थिए एवं वदासी जे णं महुया ! अट्ठं वा हेउं वा पसिणं वा वागरणं वा अण्णायं अदिट्ठं असुयं अमतं अविण्णायं बहुजणस्स मज्झे आघवेइ पण्णवेइ जाव उवदंसेइ । से णं अरिहंताणं आसायणाए वट्टइ । अरिहंतपन्नत्तस्स धम्मस्स आसायणाए वट्टति । केवलीणं

आसायणाए वट्टति । केवलिपण्णत्तस्स धम्मस्स आसायणाए वट्टति । तं सुट्ठु णं तुमं मद्दुया ! ते अन्नउत्थिए एवं वदासी " इति । वृत्तिर्यथा-' सुट्ठु णं मद्दुया तुमं ' ति सुष्ठु त्वं हे मद्दुका ! येन त्वयाऽस्तिकाया न जानता न जानीम इत्युक्तम् । अन्यथाऽजानन्नपि यदि जानीम इत्यभणिष्यस्तदाऽर्हदादीनामाशातनाकारकोऽभविष्यस्त्वम् । इति भगवत्यष्टादशशतकसप्तमोद्देशके ८०६ प्रतौ ४९५ पत्रे ॥ १३ ॥

देवैर्निक्षिप्तं तृणाद्यपि प्रहरणीभवति, न चेदं लौकिकमेव । शास्त्रेऽप्यस्योक्तत्वात् । तथा हि-

" देवे णं भंते ! महिड्ढिए जाव महेसक्खे रूवसहस्सं विउव्वित्ता पभू अन्नमन्नेणं सद्धिं संगामं संगामित्तए ? हंता पभू, ताओ णं भंते ! बोंदीओ किं एगजीवफुडाओ अणेगजीवफुडाओ ? गोयमा ! एगजीवफुडाओ णो अणेगजीवफुडाओ, तेसि णं भंते ! बोंदीणं अंतरा किं एगजीवफुडा अणेगजीवफुडा ? गोयमा ! एगजीवफुडा णो अणेगजीवफुडा । पुरिसे णं भंते ! अंतरे हत्थेण वा एवं जहा अट्ठमसए तइयउद्देसए जाव नो खलु तत्थ सत्थं कमइ । अत्थि णं भंते ! देवासुराणं संगामे ? हंता अत्थि । देवासुरेसु णं भंते ! संगामेसु वट्टमाणेसु किं णं तेसिं देवाणं पहरणरयणत्ताए परिणमति ? गोयमा ! जन्नं देवा तणं वा कट्ठं वा पत्तं वा सक्करं वा परामुसंति तं तं तेसिं देवाणं पहरणरयणत्ताए परिणमति । जहेव देवाणं तहेव असुरकुमाराणं ? नो इणट्ठे समट्ठे, असुरकुमाराणं देवाणं णिच्चं विउव्विया पहरणा " इति । वृत्तिर्यथा-' देवे ण ' मित्यादि । ' तेसि बोदीणं अंतर ' त्ति तेषां विकुर्वितशरीराणामंतराणि ' एवं जहा अट्ठमसए ' इत्यादि अनेन यत्सूचितं तदिदम् -" पाएण वा अंगुलियाए वा सिलागाए वा कट्ठेण वा कलिंचेण वा आमुसमाणे वा आलिहमाणे वा विलिहमाणे वा अन्नयरेण वा तिक्खेणं सत्थजाएणं आच्छिंदमाणे वा विच्छिंदमाणे वा अगणिकाएण वा समोडहमाणे तेसिं जीवप्पएसाणं आवाहं वा वावाहं वा करेइ, छविच्छेयं वा उप्पाएइ, णो इणट्ठे समट्ठे " त्ति । व्याख्या चाऽस्य प्राग्वत् । ' जन्नं देवाणं तणं वा कट्ठं वे ' त्यादि । इह यद्देवानां तृणाद्यपि प्रहरणी भवति तदचिन्त्यपुण्यसंभारत्वात् सुभूमचक्रवर्त्तिनः स्थालमिव । असुराणां तु यन्नित्यविकुर्वितानि तानि भवन्ति, तद्देवापेक्षया तेषां मन्दतरपुण्यत्वात्, तथाविधपुरुषाणामिवेत्यवगन्तव्यम् । इति भगवत्यष्टादशशतकसप्तमोद्देशके ८०६ प्रतौ ४९५ पत्रे ॥ १४ ॥

॥७७॥

पुनरपि केवलिशरीराज्जीवविराधना जायमाना न विरुद्धा, इत्यक्षराणि लिख्यन्ते-न च वाच्यमिमानि छद्मस्थमाश्रित्यावसेयानि, सप्तमशते संवृतोद्देशकेऽतिदिष्टत्वात् । तत्र च उपशान्तमोहक्षीणमोहसयोगिकेवलिगुणस्थानकत्रयवर्त्तिवीतरागोऽपि सक्रियत्वात्सातवेद्यं कर्म बध्नाति, इत्यादिना स्पष्टमेव केवलिनो गृहीतत्वात् । तच्च सर्वमत्रापि ग्राह्यमेव अतिदिष्टत्वात्, गुणस्थानकविशेषाकथनेन ऐर्यापथिकक्रियावतः केवलिनोऽप्यत्र सुखेनायातत्वाच्च, न च जानन्नपि केवली कथं तानाक्रामतीत्यादिमुग्धजनप्रतारकवचोभिश्चातुरी विडंबनीया, अवश्यं भाविभावस्य केवलिभिरशक्यप्रतीकारत्वमित्याद्युक्तत्वादेव, स्वयमपि केवलीनो नद्युत्तरणादेः स्वीकृतत्वाच्च । सूतमनेन कदाग्रहेण तान्यक्षराणि चेमानि-

॥७८॥

" रायगिहे जाव एवं वयासी-अणगारस्स णं भंते ! भावियप्पणो पुरतो दुहओ जुगमायाए पेहाए रीयं रीयमाणस्स पायस्स अहे कुक्कडपोए वा वट्टापोए वा कुलिंगच्छाए वा परियावज्जेज्जा तस्स णं भंते ! किं इरियावहिया किरिया कज्जइ संपराइया किरिया कज्जइ ? गोयमा ! अणगारस्स णं भावियप्पणो जाव तस्स णं इरियावहिया किरिया कज्जइ नो संपराइया किरिया कज्जइ । से केणट्ठेणं भंते ! एवं वुच्चइ जहा सत्तमसते संवुडुद्देसए जाव अट्ठो निक्खित्तो । सेवं भंते २ जाव विहरइ " इति । वृत्तिर्यथा-सप्तमोद्देशकान्ते कर्मक्षपणोक्ता, अष्टमे तु तद्ग्रन्थो निरूप्यते-इत्येवं संबन्धस्यास्येदमादिसूत्रम्- ' रायगिहे ' इत्यादि ' पुरओ ' त्ति अग्रतः । ' दुहओ ' त्ति द्विधाऽन्तरा, पार्श्वतः पृष्ठतश्चेत्यर्थः । ' जुगमायाए ' त्ति यूपमात्रया दृष्ट्या ' पेहाए ' त्ति प्रेक्ष्य २ ' रीयं ' ति गतं-गमनं ' रीयमाणस्स ' त्ति कुर्वत इत्यर्थः । ' कुक्कुडपोए ' त्ति कुक्कुटडिम्भः । ' वट्टापोए ' त्ति इह वर्त्तकः-पक्षिविशेषः ' कुलिंगच्छाए व ' त्ति पिपीलिकादिसदृशः ' परियावज्जेज्ज ' त्ति पर्यापद्येत-म्रियेत । ' एवं जहा सत्तमसए ' इत्यादि अनेन च यत्सूचितं तस्यार्थलेश एवं-अथ केनार्थेन भदन्तैवमुच्यते-गौतम ! यस्य क्रोधादयो व्यवच्छिन्ना भवन्ति, तस्येर्यापथिक्येव क्रिया भवतीत्यादि । ' जाव अट्ठो निक्खित्तो ' त्ति । ' से केणट्ठेणं भंते ! ' इत्यादिवाक्यस्य निगमनं यावदित्यर्थः । तच्च-' से तेणट्ठेणं गोयमा ! ' इत्यादि । इति भगवत्यष्टादशशतकाष्टमोद्देशके ८०६ प्रतौ ४९६ पत्रे ॥ १५ ॥

अन्यत्र तु आर्द्रामलकप्रमाणं पृथ्वीकायपिण्डश्चक्रिचन्दनपेषिकापिष्टोऽचित्तो न भवतीति श्रूयते । अत्र तु जतुगोलकप्रमाण इति

भेदान्तरजिज्ञासया पृथिव्याक्रमणे तज्जीवानां कीदृशी वेदना भवतीत्यर्थजीज्ञासया च सूत्रद्वयं लिख्यते-

" पुढवीकाइयस्स णं भंते ! के महालिया सरीरोगाहणा पण्णत्ता ? गोयमा ! से जहा नामए रण्णा चाउरंतचक्कवट्टिस्स वन्नगपेसिया तरुणी बलवं जुगवं जुवाणी अप्पायंका वन्नओ जाव निउणसिप्पोवगया नवरं चम्मेट्ठदुहणमुट्ठियसमाहयणिचियगत्तकाया न भन्नइ सेसं तं चेव जाव निउणसिप्पोवगया तिक्खाए वइरामईए सण्हकरणीए तिक्खेणं वइरामएण वट्टावरएणं एगं महं पुढविकाइयं जतुगोलगसमाणं गहाय पडिसाहरिय पडिसाहरिय पडिसंखिविय पडिसंखिविय जाव इणामेव त्ति कट्टु तिसत्तखुत्तो उप्पीसेज्जा, तत्थ णं गोयमा ! अत्थेगइया पुढवीकाइया आलिद्धा अत्थेगइया नो आलिद्धा, अत्थेगइया संघट्टिया अत्थेगइया नो संघट्टिया, अत्थेगइया परियाविया अत्थेगइया नो परियाविया, अत्थेगइया उद्दविया अत्थेगइया नो उद्दविया, अत्थेगइया पिट्ठा अत्थेगइया नो पिट्ठा, पुढविकाइयस्स णं गोयमा ! ए महालिया सरीरेगाहणा पण्णत्ता । पुढविकाइयस्स णं भंते ! अक्कंते समाणे केरिसयं वेदणं पच्चणुब्भवमाणे विहरइ ? गोयमा ! से जहानामए केइ पुरिसे तरुणे बलवं जाव निउणसिप्पोवगए एगं पुरिसे जुण्णं जराजज्जरियदेहं जावदुब्बलं किलंतं जमलपाणिणा मुद्धाणंसि अभिहणेज्जा से णं गोयमा ! पुरिसे तेणं पुरिसेणं जमलपाणिणा मुद्धाणंसि अभिहए समाणे केरिसयं वेदणं पच्चणुब्भवमाणे विहरइ ? अणिट्ठं समणाउसो तस्स णं गोयमा ! पुरिसस्स वेदणाहिंतो पुढविकाइए अक्कंते समाणे एत्तो अणिट्ठतरियं चेव अकंततरियं चेव जाव अमणामतरियं चेव वेदणं पच्चणुब्भवमाणे विहरइ " त्ति । वृत्तिर्यथा- ' पुढवी ' त्यादि ' वण्णगपेसिय ' त्ति चन्दनपेषिका ' तरुणी ' त्ति प्रवर्द्धमानवया ' बलवं ' ति सामर्थ्यवती ' जुगवं ' ति सुषमदुष्षमादिविशिष्टकालवती ' जुवाणि ' त्ति वयःप्राप्ता ' अप्पायंक ' त्ति नीरोगा ' वण्णओ ' त्ति अनेनेदं सूचितम्-' थिरग्गहत्था दढपाणिपायपिट्ठंतरोरुपरिणया ' इत्यादि । इह वर्णके ' चम्मेट्ठदुहण ' इत्याद्यप्यधीतं तदिह न वाच्यम्, एतस्य विशेषणस्य स्त्रिया असंभवात् । अत एवाह-' चम्मेट्ठदुहणमुट्ठियसमाहयनिचित-गत्तकाया न भण्णइ ' त्ति । तत्र चर्मेष्टकादीनिव्यायामक्रियायामुपकरणानि तैः समाहतानि व्यायामप्रवृत्तौ, अत एव निचितानि च-घनीभूतानि गात्राणि-अङ्गानि यत्र सः, तथाविधः कायो यस्याः सा तथा इति । ' तिक्खाए ' त्ति परुषायां ' वइरामइए ' त्ति वज्रमय्याम् सा च नीरन्ध्रा कठिना च भवति, ' सण्हकरणीए ' त्ति श्लक्ष्णानि-चूर्णरूपाणि द्रव्याणि क्रियन्ते यस्यां सा श्लक्ष्णकरणी-पेषणशिला

तस्यां, ' वट्टावरएणं ' ति वर्त्तकवरेण-लोष्टकप्रधानेन ' पुढविकाइयं ' ति पृथिवीकायिकसमुदयं ' जतुगोलगसमाणं ' ति डिंभरूपक्रीडनकजतुगोलकप्रमाणं नातिमहान्तमित्यर्थः । ' पडिसाहारए ' इत्यादि । इह प्रतिसंहरणं शिलायाः शिलापुत्रकाच्च संहृत्य पिण्डीकरणं प्रतिसंक्षेपणं तु-शिलायाः पततः संरक्षणम् । ' अत्थेगइय ' त्ति सन्त्येके केचन ' आलिद्ध ' त्ति आदिग्धाः शिलायां शिलापुत्रके च लग्नाः ' संघट्टिय ' त्ति संङ्घर्षिताः ' परिताविय ' त्ति पीडिताः ' उद्दविय ' त्ति मारिताः कथं यतः ' पिट्ठ ' त्ति पिष्टाः । ' ए महालिय ' त्ति एवं महती इति महतीवातिसूक्ष्मेति भावः । यतो विशिष्टायामपि पेषणसामग्र्यां केचिन्नपिष्टा-नैव छुप्ता अपीति । ' अत्थेगइया संघट्टिय ' त्ति प्रागुक्तम् । संघट्टश्चाक्रमणभेदः अत आक्रान्तानां पृथिव्यादीनां याद्दशी वेदना भवति, तत्प्ररूपणायाह-' पुढवी ' त्यादि ' अक्कंते समाणे ' त्ति आक्रमणे सति ' जमलपाणिण ' त्ति मुष्टिनेति भावः । ' अणिट्ठं समणाउसो ' त्ति गौतमवचनं ' एतो ' त्ति उक्तलक्षणायाः वेदनायाः सकाशात् । इति भगवत्येकोनविंशतिशते तृतीयोद्देशके ८०६ प्रतौ ५०३ पत्रे ॥ १६ ॥

ननु मध्ये कियन्तं कालं यावत्साधवो नाभूवन् साध्वाभासाश्च केचन स्वमतिकल्पितजिनालयजिनप्रतिमोपढौकितधान्याद्युपजीविनोऽभूवन् ? वर्षसहस्रद्वयातिक्रमे च वयं जिनशासनोद्धाराय सुविहिताः साधवः समुद्भूताः; इत्यादि यज्जिनप्रतिमारिपवः प्रलपन्ति, तच्च तेषां भूतग्रस्तगालीप्रदानप्रायम् । यतः सिद्धान्ते एवविंशतिवर्षसहस्रं यावत्, श्रीमद्वर्द्धमानस्वामिनस्तीर्थस्य साधुसाध्वीश्रावकश्राविकारूपस्याव्यवच्छिन्नत्वेनोक्तत्वात् । तथा हि -

" एएसि णं भंते ! चउवीसाए तित्थगराणं कइ जिणंतरा पण्णत्ता ? गोयमा ! तेवीसं जिणंतरा पणत्ता । एएसि णं भंते ! तेवीसाए जिणंतरेसु कस्स कहिं कालियसुअस्स वोच्छेदे पण्णत्ते ? गोयमा ! एएसु णं तेवीसाए जिणंतरेसु पुरिमपच्छिमएसु अट्ठसु अट्ठसु जिणंतरेसु एत्थ णं कालिअसुअस्स अव्वोच्छेदे पण्णत्ते, मज्झिमएसु सत्तसु जिणंतरेसु एत्थ णं कालियसुअस्स वोच्छेदे पण्णत्ते, सव्वत्थवि णं वोच्छिन्ने दिट्ठिवादे । जंबुद्दीवे णं भंते ! दीवे भारहे वासे इमीसे ओसप्पिणीए देवाणुप्पियाणं केवइयं कालं पुव्वगए अणुसज्जिस्सइ ? गोयमा ! जंबुद्दीवे णं दीवे भारहे वासे इमीसे ओसप्पिणीए ममं एगं वाससहस्सं पुव्वगए अणुसज्जिस्सइ । जहा णं भंते ! जंबुद्दीवे दीवे भारहे वासे इमीसे ओसप्पिणीए देवाणुप्पियाणं एगं वाससहस्सं पुव्वगए अणुसज्जिस्सइ, तहा णं भंते ! जंबुद्दीवे

दीवे भारहे वासे इमीसे ओसप्पिणीए अवसेसाणं तित्थगराणं केवइयं कालं पुव्वगए अणुसज्जित्था ? गोयमा ! अत्थेगइया णं संखेज्जं कालं अत्थेगइयाणं असंखेज्जं कालं । जंबुद्दीव णं भंते ! दीवे भारहे वासे इमीसे ओसप्पिणीए देवाणुप्पियाणं केवतियं कालं तित्थे अणुसज्जिसइ ? गोयमा ! जंबुद्दीवे दीवे भारहे वासे ममं इमीसे ओसप्पिणीए एक्कवीसं वाससहस्साइं तित्थे अणुसज्जिस्सइ । जहा णं भंते ! जंबुद्दीवे दीवे भारहे वासे इमीसे ओसप्पिणीए देवाणुप्पियाणं एक्कवीसं वाससहस्साइं तित्थे अणुसज्जिस्सइ, तहा णं जंबुद्दीवे णं दीवे भारहे वासे आगमेस्साणं चरमतित्थगरस्स केवइयं कालं तित्थे अणुसज्जिस्सइ ? गोयमा ! जावइएणं उसभस्स अरहओ कोसलियस्स जिणपरियाए एवइयाइं संखेज्जाइं आगमेस्साणं चरम तित्थगरस्स तित्थे अणुसज्जिस्सइ " इति । वृत्तिर्यथा-' कइ ण ' मित्यादि ' कस्स कहिं कालियसुअस्स वोच्छेए पणत्ते ' त्ति कस्य जिनस्य संबन्धिनः कस्मिन् जिनान्तरे कयोर्जिनयोरन्तरे कालिकश्रुतस्यैकादशाङ्गीरूपस्य व्यवच्छेदः प्रज्ञप्तः ? इति प्रश्नः, उत्तरं तु ' एएसि ण ' मित्यादि इह च कालिकस्य व्यवच्छेदे पृष्टे यदपृष्टस्याव्यवच्छेदस्याभिधानं तद्विपक्षज्ञापने सति विवक्षितार्थबोधनं सुकरं भवतीति कृत्वा कृतमिति । ' मज्झिमएसु सत्तसु ' त्ति अनेन ' कस्स कहिं ' इत्यस्योत्तरं अवसेयम्, तथा हि-मध्यमेषु सप्तस्वित्युक्ते सुविधिजिनतीर्थस्य सुविधिशीतलजिनयोरन्तरे व्यवच्छेदो बभूव, तद्व्यवच्छेदकालश्च पल्योपमचतुर्भागः, एवमन्येऽपि षड् जिनाः षट् च जिनान्तराणि वाच्यानि । केवलं व्यवच्छेदकालः सप्तस्वप्येवमवसेयः । " चउभागो१ चउभागो२, तिणि य चउभाग३ पलियमेगं च४ । तिण्णेव य चउभागा५, चउत्थभागो६ य चउभागो७ ॥ १ ॥" इति । ' एत्थ णं ' ति एतेषु प्रज्ञापकेनोपदर्श्यमानेषु जिनान्तरेषु, कालिकश्रुतव्यवच्छेदः प्रज्ञप्तः । दृष्टिवादापेक्षया त्वाह-' सव्वत्थ वि णं वोच्छिण्णे दिट्ठिवाए ' त्ति सर्वेष्वपि जिनान्तरेषु न केवलं सप्तस्वेव क्वचित् कियन्तमपि कालं व्यवच्छिन्नो दृष्टिवाद इति । व्यवच्छेदाधिकारादेवेदमाह-' जंबुद्दीवे ण ' मित्यादि । 'देवाणुप्पियाणं ' ति युष्माकं संबन्धि ' अत्थेगइयाणं संखेज्जं कालं ' ति पश्चानुपूर्व्या पार्श्वनाथादीनां संख्यातं कालम् । ' अत्थेगतियाणं असंखेज्जं कालं ' ति ऋषभादीनां ' आगमेस्साणं ' ति आगमिष्यतां-भविष्यतां महापद्मादीनां जिनानां ' कोसलियस्स ' त्ति कोशलदेश-जातस्य ' जिणपरियाए ' त्ति केवलिपर्यायः स च वर्षसहस्रन्यूनं पूर्वलक्षमिति । इति श्रीभगवतीविंशतितमशतकाष्टमोद्देशके ८०६ प्रतौ ५१४ पत्रे ॥ १७ ॥

प्रतिमारिपवः प्रसह्य जिनप्रतिमास्वीकारिता अपि ताः साश्वत्य एव तथा कल्पतया च देवैरेव नमस्करणीया इति प्रलपन्ति, तच्चोभयमप्येतस्मिन् सूत्रे चारणर्षिर्भिनमस्कृतत्वेन ' इहं चेइयाइं वंदइ ' इत्यनेन च निरस्तं द्रष्टव्यम् । तथा हि-

" कइविहा णं भंते ! चारणा पण्णत्ता ? गोयमा ! दुविहा चारणा पण्णत्ता तं जहा-विज्जाचारणा य जंघाचारणा य । से केणट्ठेणं भंते ! एवं वुच्चइ विज्जाचारणा विज्जाचारणा ? गोयमा तस्स णं छट्ठंछट्ठेणं अणिक्खित्तेणं तवोकम्मेणं विज्जाए उत्तरगुणलद्धिं खममाणस्स्स विज्जाचारणलद्धी नामं लद्धी समुप्पज्जइ, से तेणट्ठेणं जाव विज्जाचारणा । विज्जाचारणस्स णं भंते ! कहं सीहा गई ? कहं सीहे गइविसए पण्णत्ते ? गोयमा ! अयण्णं जंबुद्दीवे दीवे जाव किंचि विसेसाहिए परिक्खेवेणं देवे णं महिड्ढीए जाव महेसक्खे जाव इणामेव त्ति कटु केवलकप्पं जंबुद्दीवं दीवं तिहिं अच्छराणिवाएहिं तिक्खुत्तो अणुपरियट्टित्ताणं हव्वमागच्छेज्जा, विज्जाचारणस्स णं तहा सीहागई तहा सीहे गतिविसए पण्णत्ते । विज्जाचारणस्स णं भंते ! तिरियं केवइए गतिविसए पण्णत्ते ? गोयमा ! से णं इओ एगेणं उप्पाएण माणुसुत्तरे पव्वए समोसरणं करेइ, माणु० २ तहिं चेइयाइं वंदइ तहिं २ बित्तिएणं नंदीसरवरदीवे समोसरण करेइ, नंदी० करित्ता तहिं चेइयाइं वंदइ तहिं० वंदित्ता ततो पडिनियत्तइ । पडिनियत्तइत्ता इहमागच्छइ इहमागच्छित्ता इहं चेइयाइं वंदइ, विज्जाचारणस्स णं गोयमा ! तिरियं एवइए गतिविसए पण्णत्ते । विज्जाचारणस्स णं भंते ! उड्ढं केवइए गतिविसए पण्णत्ते ? गोयमा ! से णं इओ एगेणं उप्पाएणं नंदणवणे समोसरणं करेइ नंदण० करित्ता तहिं चेइयाइं वंदइ तहिं० वंदित्ता बितिएणं उप्पएणं पंडगवणे समोसरणं करेइ पंडग० करित्ता तहिं चेइयाइं वंदइ तहिं० वंदित्ता तओ पडिनियत्तेइ, नियत्तेइत्ता इहमागच्छइ, इहमागच्छित्ता इहं चेइयाइं वंदइ, विज्जाचारस्स णं गोयमा ! उड्ढं एवतिए गतिविसए पण्णत्ते । से णं तस्स ठाणस्स अणालोइयपडिक्कंते कालं करेइ नत्थि तस्स आराहणा । से णं तस्स ठाणस्स आलोइयपडिक्कंते कालं करेइ अत्थि तस्य आराहणा । से केणट्ठेणं भंते ! एवं वुच्चइ जंघाचारणा जं २ ? गोयमा ! तस्स णं अट्ठमंअट्ठमेणं अणिक्खित्तेणं तवोकम्मेणं अप्पाणं भावेमाणस्स जंघाचारणलद्धी नामं लद्धी समुप्पज्जइ, से तेणट्ठेणं जंघाचारणा जं २ । जंघाचारणस्स णं भंते ! कहं सीहा गती कहं सीहे गतिविसए पण्णत्ते ? अयणं जंबुद्दीवे दीवे एवं जहेव विज्जाचारणस्स नवरं तिसत्तक्खुत्तो अणुपरियट्टित्ताणं हव्वमागच्छेज्जा जंघाचारणस्स गोयमा ! तहा सीहा गती तहा सीहे गतिविसए

पण्णत्ते, सेसं तं चेव । जंघाचारणस्स णं भंते ! तिरियं केवइए गतिविसए पण्णत्ते ? गोयमा ! से णं इओ एगेणं उप्पाएणं रुचगवरे दीवे समोसरणं करेइ रुयग० करित्ता तहिं चेइयाइं वंदइ तहिं० वंदित्ता तओ पडिनियत्तमाणे बितिएणं उप्पाएणं नदीसरवरे दीवे समोसरणं करेइ नंदी० करित्ता तहिं चेइयाइं वंदइ तहिं चेइयाइं वंदित्ता इहमागच्छइ इहमागच्छित्ता इहं चेइयाइं वंदइ, जंघाचारणस्स णं गोयमा ! तिरियं एवइए गइविसए पण्णत्ते । जंघाचारणस्स णं भंते ! उड्ढं केवइए गतिविसए पण्णत्ते ? गोयमा ! से णं इओ एगेणं उप्पाएणं पंडगवणे समोसरणं करेइ २ त्ता तहिं चेइयाइं वंदइ तहिं० वंदित्ता तओ पडिनियत्तेइ तओ पडिनियत्तमाणे बितिएणं उप्पाएणं नंदणवणे समोसरणं करेइ नंदण० करित्ता तहिं चेइआइं वंदइ तहिं चे० वंदित्ता इहमागच्छइ इहमागच्छित्ता इहं चेइआइं वंदइ, जंघाचारणस्स णं गोयमा ! उड्ढं एवइए गतिविसए पण्णत्ते । से णं तस्स ठाणस्स अणालोइयपडिक्कंते कालं करेइ, नत्थि तस्स आराहणा । से णं तस्स ठाणस्स आलोइयपडिक्कंते कालं करेइ, अत्थि तस्स आराहणा । सेवं भंते ! २ त्ति जाव विहरइ " त्ति । वृत्तिर्यथा-अष्टमोद्देशकस्यान्ते देवा उक्ताः, ते चाकाशचारिणः, इत्याकाशचारिद्रव्यदेवा नवमे प्ररूप्यन्ते, इत्येवं संबन्धस्यास्येदमादिसूत्रम्- ' कइविहा ण ' मित्यादि । तत्र चरणं-गमनमतिशयवदाकाशे एषामस्तीति चारणा । ' विज्जाचारणा ' त्ति विद्या-श्रुतं तच्च पूर्वगतं तत्कृतोपकाराश्चारणा-विद्याचारणाः । ' जंघाचारणा ' त्ति जङ्घाव्यापारकृतोपकाराश्चारणा-जङ्घाचारणाः । इहार्थे गाथाः-" अइसयचरणसमत्था, जंघाविज्जाहिं चारणा मुणओ । जंघहिं जाइ पढमो, निस्सं काउं रविकरे वि ॥ १ ॥ एगुप्पाएण इओ, रुयगवरंमि उ तओ पडिनियत्तो । बीएणं नंदीसरमिहं, तओ एइ तइएणं ॥ २ ॥ पढमेण पंडगवणं, बिउप्पाएण णंदणं एइ । तइउप्पाएण तओ, इह जंघाचारणो एइ ॥ ३ ॥ पढमेण माणुसुत्तरनगं स नंदिस्सरं च बिइएणं । एइ तओ तइएणं कयचेइयवंदणो इहयं ॥ ४ ॥ पढमेणं नंदणवणं, बिइउप्पाएण पंडगवणंमि । एइ इहं तइएणं, जो विज्जाचारणो होइ ॥ ५ ॥ " ' तस्स णं ति यो विद्याचारणो भविष्यति, तस्य षष्ठंषष्ठेन तपःकर्मणा विद्यया-पूर्वगतश्रुतविशेषरूपया करणभूतया ' उत्तरगुणलद्धि ' ति उत्तरगुणाः पिण्डविशुद्ध्यादयः तेषु चेह प्रक्रमात्तपो गृह्यते ततश्चोत्तरगुणलब्धि-तपोलब्धि क्षममाणस्य-अधिसहमानस्य, तपःकुर्वत इत्यर्थः । ' कहं सीहा गइ ' त्ति कीदशी शीघ्रा गतिः-गमनक्रिया ? ' कहं सीहे गतिविसए ' त्ति कीदशः शीघ्रो गतिविषयः गतेः शीघ्रत्वेन तद्विषयोऽप्युपचाराच्छीघ्र उक्तः । गतिविषयो-गतिगोचरः गमनाभावेऽपि

शीघ्रगतिगोचरभूतं क्षेत्रमित्यर्थः । ' अयण्ण ' मित्यादि अयं जंबूद्वीप एवं भूतो भवति । ततश्च ' देवे ण ' मित्यादि । ' हव्वमागच्छेज्जा ' इत्यत्र यथा शीघ्राऽस्य देवस्य गतिरित्ययं वाक्यशेषो द्रष्टव्यः । ' से णं तस्स ठाणस्से ' त्यादि अयमत्र भावार्थो लब्ध्युपजीवनं किल प्रमादः । तत्र चासेविते अनालोचिते न भवति चारित्रस्याराधना, तद्विराधकश्च न लभते चारित्राराधनाफलमिति । यच्चेहोक्तं विद्याचारणस्य गमनमुत्पादद्वयेन आगमनं चैकेन । जङ्घाचारणस्य तु गमनमेकेन, आगमनं च द्वयेनेति, तल्लब्धिस्वभावात् । अन्ये त्वाहुः-विद्याचारणस्यागमनकाले विद्याऽभ्यस्ततरा भवतीत्येकेनागमनं, गमने तु न तथेति द्वाभ्याम् । जङ्घाचारणस्य तु लब्धिरुपजीव्यमानाऽल्पसामर्थ्या भवतीत्यागमनं द्वाभ्यां, गमनं चैकेनैवेति ॥ भगवतीविंशतितमशतके नवमोद्देशके ८०६ प्रतौ ५१५ पत्रे ॥ १८० ॥

आलोचनाग्राहकालोचनाचार्यस्वरूपदशविधसामाचारीस्वरूपदशविधप्रायश्चित्तस्वरूपजिज्ञासया सूत्राणि लिख्यन्ते-

" दसहिं ठाणेहिं संपन्ने अणगारे अरिहति अत्तदोसं आलोइत्तए तं जहा-जातिसंपन्ने १ कुलसंपन्ने २ विणयसंपन्ने ३ णाणसंपन्ने ४ दंसणसपंन्ने ५ चरित्तसंपन्ने ६ खंते ७ दंते ८ अमाई ९ अपच्छाणुतावी १० । अट्ठहिं ठाणेहिं संपन्ने अणगाहे अरिहति आलोयणं पच्छित्तए तं जहा-आयारवं १ आहारवं २ ववहारवं ३ उव्वीलए ४ पकुव्वए ५ अपरिस्सावी ६ निज्जवए ७ अवायदंसी ८ । दसविहा सामायारी पण्णत्ता तं जहा-इच्छा १ मिच्छा २ तहक्कारे ३, आवसिया ४ य निसीहिया ५ । आपुच्छणा ६ य पडिपुच्छा ७, छंदणा ८ य निमंतणा ९ ॥ १ ॥ उवसंपया १० य काले सामायारी भवे दसहा । दसविहे पायच्छिते पण्णत्ते तं जहा-आलोयणारिहे १ पडिक्कमणारिहे २ तदुभयारिहे विवेगारिहे ४ विउस्सग्गारिहे ५ तवारिहे ६ छेदारिहे ७ मूलारिहे ८ अणवट्ठप्पारिहे ९ पारंचियारिहे १० " त्ति । वृत्तिर्यथा-' जाइसंपण्णे ' इत्यादि नन्वेतावान् गुणसमुदाय आलोचकस्य कस्मादन्विष्यते ? इत्युच्यते-जातिसंपन्नः प्रायोऽकृत्यं न करोति, अथ कृतं च सम्यगालोचयति १ । कुलसंपन्नोऽङ्गीकृतप्रायश्चित्तस्य वोढा भवति २ । विनयसंपन्नो वन्दनादिकाया आलोचनासमा-चार्याः प्रयोक्ता भवति ३ । ज्ञानसंपन्नः कृत्याकृत्यविभागं जानाति ४ । दर्शनसंपन्नः प्रायश्चित्ताच्छुद्धिं श्रद्धत्ते ५ । चारित्रसंपन्नः प्रायश्चित्तमङ्गीकरोति ६ । क्षान्तो गुरुभिरुपालम्भितो न कुप्यति ७, दान्तो दान्तेन्द्रियतया शुद्धिं सम्यग् वहति ८ । अमायी अगोपयन्नपराधमा-लोचयति ९ । अपश्चात्तापी आलोचितेऽपराधे पश्चात्तापमकुर्वन्निर्जराभागी भवतीति १० । ' आयारव ' मित्यादि ।

तत्राचारवान्-ज्ञानादिपञ्चप्रकाराचारयुक्तः १ । ' आहारवं ' त्ति आलोचितापराधानामवधारणावान् २ । ' ववहारवं ' त्ति आगमश्रुतादिपञ्चप्रकारव्यवहाराणा-मन्यतरयुक्तः ३ । ' उव्वीलए ' त्ति अपव्रीडकः लज्जयातिचारान् गोपायन्तं विचित्रवचनैर्विलज्जीकृत्य सम्यगालोचनाकारयितेत्यर्थः ४ । ' पकुव्वए ' त्ति आलोचितेष्वपराधेषु प्रायश्चित्तदानतो विशुद्धिं कारयितुं समर्थः ५ । ' अपरिस्सावि ' त्ति आलोचके नालोचितानपराधान-न्यस्मै न कथयतीत्यसावपरिश्रावी ६ । ' निज्जवए ' त्ति निर्यापक असमर्थस्य प्रायश्चित्तिनः प्रायश्चित्तस्य खण्डशः करणेन निर्वाहकः ७ । ' अवायदंसि ' त्ति आलोचनाया अदाने पारलौकिकापायदर्शनशीलः ८ । इति । अनन्तरमालोनाचार्य उक्तः, स च सामाचार्याः प्रवर्त्तको भवतीति तां प्रदर्शयन्नाह-' दसविहा सामायारी 'त्यादि । प्रतीता चेयम् । नवरम्-आपृच्छा-कार्येप्रश्न इति, प्रतिपृच्छा तु-पूर्वनिषिद्धे कार्ये एव । छन्दना-पूर्वगृहीतेन भक्तादिना । निमन्त्रणात्वगृहीतेन । उपसंपच्चज्ञानादिनिमित्तमाचार्यान्तराश्रयणमिति । अथ सामाचारीविशेषत्वात्प्रायश्चित्तस्य तदभिधातुमाह-' दसविहे ' त्यादि इह प्रायश्चित्तशब्दोऽपराधे तच्छुद्धौ च दृश्यते, तदिहापराधे दृश्यः, तत्र ' आलोअणारिहे ' त्ति आलोचना-निवेदना तल्लक्षणां शुद्धिं यदर्हत्यतिचारजातं तदालोचनार्हम्, एवमन्यान्यपि केवलं प्रतिक्रमणं मिथ्यादुष्कृतं, तदुभयं आलोचनामिथ्यादुष्कृते, विवेको-ऽशुद्धभक्तादित्यागो, व्युत्सर्गः-कायोत्सर्गः, तपो निर्विकृतिकादि, च्छेदः-प्रव्रज्यापर्याय-ह्रस्वीकरणं, मूलं-महाव्रतारोपणम्, अनवस्थाप्यं-कृततपसो व्रतारोपणं, पाराञ्चिकं-लिङ्गादिभेदमिति । श्रीभगवतीपञ्चविंशतितमशतकसप्तमोद्देशके ८०६ प्रतौ ५६० पत्रे ॥ १९ ॥

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरीशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे विशेषसमुच्चयापरनाम्नि श्रीभगवतीविचारनामा पञ्चमस्तरङ्गः ॥ ५ ॥

इह स्थितैरप्यवलोक्यते यत्प्रभावतो विष्वगियं त्रिलोकी । सदा प्रकाशं तदनन्तसारं, जैनेश्वरं वाङ्मयमानमामि ॥ १ ॥

अथावसरायाताः षष्ठाङ्गविचारा लिख्यन्ते-

केचिच्च मिथ्यात्विकृतं सर्वं वृथैव प्रत्युत कर्मबन्धकारणं न तु किमपि सत्फलनिदानं, तच्चाज्ञानविलसितम्, मिथ्यात्विकृतस्यापि मार्गानुसारिसदनुष्ठानस्य लाभहेतुत्वेन श्रुयमाणत्वात् । तथैव च मिथ्यात्विनाऽपि मेघकुमारजीवेन गजेन शशकानुकंपया संसारः स्वल्पीकृतो

मनुजायुश्च निबद्धमिति श्रूयते सिद्धान्ते । स चायं लिख्यते-

ततेणं तुमं मेहा ! पाएणं गत्तं कंडुइस्सामि त्तिकट्टु पाए उक्खित्ते तंसि च णं अंतरंसि अन्नेहिं बलवंतेहिं सत्तेहिं पणोलिज्जमाणे पणोलिज्जमाणे ससए अणुपविट्ठे । तते णं तुमं मेहा ! गायं कंडुइत्ता पुणरवि पायं निक्खिविस्सामि त्तिकट्टु तं ससयं अणुपविट्ठं पाससि पासित्ता पाणाणुकंपयाए भूयाणुकंपयाए जावाणुकंपयाए सत्ताणुकंपयाए से पाए अंतरा चेव संधारिए नो चेव णं निक्खित्ते । तते णं तुमं मेहा ! ताए पाणाणुकंपयाए जाव सत्ताणुकंपयाए संसारे परित्तीकते माणुस्साउए निबद्धे । तते णं से वणदवे अड्ढातिज्जातिं रातिंदियाइं तं वणं झामेइ२ निट्ठिए उवरए उवसंते विज्झाए यावि होत्था ॥ तते णं ते बहवे सीहाय जाव चिल्लला य तं वणदवं निट्ठियं जाव विज्झायं पासंति पासित्ता अग्गिभयविप्पमुक्का तन्हाए छुहाए य परब्भाहया समाणा मंडलाओ पडिनिक्खमंति पडिनिक्खमित्ता सव्वतो समंता विप्पसरित्था (तते णं बहवे हत्थी जाव छुहाए य परब्भाहया समाणा तओ मंडलाओ पडिनिक्खमंति पडिनिक्खमित्ता दिसोदिसिं विप्पसरित्था) तएणं तुमं मेहा ! जुन्ने जराजज्जरियदेहे सिढिलवलित्तयापिणद्धगत्ते दुब्बले किलंते जुजिए पिवासिते अत्थामे अबले अपरक्कमे वा ठाणुक्खंडे वेगेण विप्पसरिस्सामि त्तिकट्टु पाए पसारेमाणे विज्जुहते विव रयतगिरिपब्भारे धरणितलंसि सव्वंगेहिं सन्निवइए । तते णं तव मेहा ! सरीरगंसि वेयणा पाउब्भूता उज्जला जाव दाहवक्कंतिए यावि विहरसि । तते णं तुमं मेहा ! तं उज्जलं जाव दुरहियासं तिन्नि रातिंदियाइं वेयणं वेएमाणे विहरित्ता एगं वाससतं परमाउयं पालित्ता इहेव जंबुद्दीवे दीवे भारहे वासे रायगिहे नगरे सेणियस्स रन्नो धारिणीए देवीए कुच्छिंसि कुमारत्ताए पच्चायाए । तते णं तुमं मेहा ! आणुपुव्वेणं गब्भवासाओ निक्खंते समाणे उम्मुक्कबालभावे जोव्वणगमणुपत्ते ममं अंतिए मुंडे भवित्ता आगाराओ अणगारियं पव्वइए, तं जति ताव तुमे मेहा ! तिरक्खजोणियभावमुवगएणं अप्पडिलद्धसम्मत्तरयणलंभेणं से पाए पाणाणुकंपाए जाव अंतरा चेव संधारित्ते नो चेव णं निक्खित्ते किमंग पुण तुमं मेहा ! इयाणिं विपुलकुलसमुब्भवे णं निरुवहयसरीरदंतलद्धपंचिंदिए णं एवं उट्ठाणबलवीरियपुरिसक्कारपरक्कमसंजुत्ते णं ममं अंतिए मुंडे भवित्ता आगारातो अणगारियं पव्वइए समाणे समणाणं निग्गंथाणं राओ पुव्वरत्तावरत्तकालसमयंसि वायणाए जाव धम्माणुओगचिंताए उच्चारस्स वा पासवणस्स वा अतिगच्छमाणाण य निग्गच्छमाणाण य हत्थसंघट्टणाणि य पायसंघट्टणाणि य जाव रयरेणुगुंडणाणि य

नो सम्मं सहसि खमसि तितिक्खसि अहियासेसि ? इति । वृत्तिर्यथा-ततस्त्वया हे मेघ ! गात्रेण गात्रं कण्डूयिष्ये इति कृत्वा,-इति हेतोः पाद उत्क्षिप्तः- उत्पाटितः । ' तंसि च णं अंतरंसि ' त्ति तस्मिंश्चान्तरे, पादाक्रान्तपूर्वे-अन्तराले इत्यर्थः । ' पादं निक्खिविस्सामि त्तिकट्टु ' इह भुवं निरूपयन्नितिशेषः । ' प्राणानुकंपये ' त्यादिपदचतुष्टयमेकार्थं दयाप्रकर्षप्रतिपादनार्थम् । ' निट्ठिए ' त्ति निष्ठां गतः-कृतस्वकार्यो जात इत्यर्थः । उपरतो-ऽनालिङ्गितेन्धनाद्ध्यावृत्तः, उपशान्तो-ज्वालापगमात्, विध्यातो-अङ्गारमुर्मुराद्यभावात्, चापीति-समुच्चये जीर्ण इत्यादि शिथिला वलिप्रधाना या त्वक् तया पिनद्धं गात्रं-शरीरं यस्य स तथा, अस्थामा-शरीरबलविकलत्वात्, अबलः-अवष्टंभवर्जितत्वात्, अपराक्रमो-निष्पादितस्वफलाभिमानविशेषरहितत्वात् अचङ्क्रमणतो वा ' ठाणुक्खंडे ' त्ति ऊर्द्धस्थानेन स्तंभितगात्र इत्यर्थः, ' रययगिरिपब्भारे ' त्ति इह प्राग्भार-इषदवनतं खण्डं, उपमा चानेनास्य महत्तयैव न वर्णतो रक्तत्वात् तस्य, वाचनान्तरे तु सित एवासाविति । ' अपडिलद्धसम्मत्तरयणलंभेणं ' त्ति अप्रतिलब्धो-ऽसञ्जातः ' विपुलकुलसमुब्भवेणं ' इत्यादौ णंकारा वाक्यालङ्कारे, निरुपहतं शरीरं यस्य स तथा, दान्तानि-उपशमं नीतानि प्राक्काले लब्धानि सन्ति पञ्चेन्द्रियाणि येन स तथा, ततः कर्मधारयः, पाठान्तरे निरुपहतशरीरप्राप्तश्चासौ लब्धपञ्चेन्द्रियश्चेति समासः, एवमित्युपलभ्यमानरूपपैरुत्थानादिभिः संयुक्तो यः सः तथा, तत्रोत्थानं-चेष्टाविशेषः बलं-शारीरं वीर्यं-जीवप्रभवम् पुरुषकारः-अभिमानविशेषः पराक्रमः-स एव साधितफल इति । नो सम्यक् सहसे भयाभावेन, क्षमसे क्रोधाभावेन, तितिक्षसे दैन्यानवलंबनेन, अध्यासषसि अविचलितकायतया, एकार्थिकानि चैतानि पदानि । इति ज्ञाताधर्मकथाङ्गे प्रथमश्रुतस्कन्धे प्रथमाध्ययने ९८ प्रतौ ४४ पत्रे ॥ १ ॥

' कार्यं वितारेन्दुबलेऽपि पुष्ये, दीक्षां विवाहं च विना विदध्यात् । ' इत्यादिपुष्यमाहात्म्यं न केवलं ज्योतिःशास्त्रप्रसिद्धमेव, किं तु सिद्धान्तविदितमपि तथा हि-

गहिएसु रायवरसासणेसु महया उक्किट्ठसीहणाय जाव रवेणं पक्खुभितमहासमुद्दरवभूतं पिव मेइणिं करेमाणा एगदिसिं जाव वाणियगा पोयणेसु दुरूढा, ततो पुस्समाणवो वक्कमुदाहु हं भो ! सव्वेसिमवि अत्थसिद्धी उवट्ठिताइं कल्लाणाइं पडिहयाइं सव्वपावाइं जुत्तो पूसो विजओ मुहुत्तो अयं देसकालो इति । वृत्तिर्यथा-गृहीतेषु राजवरशासनेषु-आज्ञासु पट्टकेषु वा प्रक्षुभितमहासमुद्ररवभूतमिव

तदात्मकमिव तं प्रदेशमिति गम्यते । ' तओ पुस्समाणवो वक्कमुदाहु त्ति ' ततोऽनन्तरं मागधो मङ्गलवचनं ब्रवीति स्मेत्यर्थः, तदेवाह-सर्वेषामेव भो ! भवतामर्थसिद्धिर्भवतु, उपस्थितानि कल्याणानि, प्रतिहतानि सर्वपापानि-सर्वविघ्नाः ' जुत्तो ' त्ति युक्तः पुष्यो नक्षत्रविशेषश्चन्द्रमसा इहावसरे इति गम्यते, पुष्यनक्षत्रं हि यात्रायां सिद्धिकरम् । यदाह-" अपि द्वादशमे चन्द्रे, पुष्यः सर्वार्थसाधकः । " इति मागधेन तदुपन्यस्तं विजयो ॥ मुहूर्त्तस्त्रिंशतो मुहूर्त्तानां मध्यात् । अयं देशकालः-एष प्रस्तावो गमनस्येति गम्यते । इति श्रीज्ञाताष्टमाध्ययने ९८ प्रतौ ६८ पत्रे ॥ २ ॥

तीर्थङ्करजन्मानन्तरं तीर्थङ्करमाताऽपत्यं न प्रसूते, इति प्रसिद्धिः सा तु अशास्त्रीयैव संभाव्यते । यतो मल्लिजिनस्यानुजो भ्राता श्रूयते । तथा हि-

तते ण सा चित्तगरसेणी चित्तसभं जाव हावभावे चित्तेति । जेणेव मल्लदिन्ने कुमारे तेणेव जाव एयमाणत्तियं पच्चप्पिणंति । तए णं मल्लदिन्ने चित्तगरसेणिंसक्कारेति२ विपुलं जीवियारिहं पीइदाणं दलइ दलित्ता पडिविसज्जेति । तए णं मल्लदिन्ने अन्नया न्हाए अंतेउरपरियालसंपरिउडे अम्मधाइए सद्धिं जेणेव चित्तसभा तेणेव उवागच्छइ२ चित्तसभं अणुपविसइ अणुपविसित्ता हावभावविलासबिब्बोअकलियाइं रूवाइं पासमाणे२ जेणेव मल्लीए विदेहरायवरकन्नाए तयाणुरूवे निव्वत्तिए तेणेव पहारेत्थ गमणाए, तए णं से मल्लदिन्ने कुमारे मल्लीए विदेहरायवरकन्नाए तयाणुरूवं निव्वत्तियं पासइ पासित्ता इमेयारूवे अब्भत्थिए जाव समुपज्जित्था एस णं मल्ली विदेहरायवरकन्न त्तिकट्टु लज्जिए वीडिए विड्डे सणियं२ पच्चोसक्कइ । तते णं मल्लदिन्नं अम्मधाई सणियं२ पच्चोसक्कंतं पासित्ता एवं वदासी-किन्नं तुमं पुत्ता ! लज्जिए वीडिए विड्डे सणियं सणियं पच्चोसक्कइ ? तते णं से मल्लदिन्ने अम्मधातिं एवं वदासी-जुत्तं णं अम्मो ! मम जेट्ठाए भगिणीए गुरुदेवयभूयाए लज्जणिज्जाए मम चित्तगरणिव्वत्तियं सभं अणुपविसित्तए ? तए णं अम्मधाई मल्लदिन्नं कुमारं एवं वयासी-नो खलु पुत्ता ! एसा मल्ली, एस णं मल्लीए विदेहरायवरकन्नाए चित्तगरएणं तयाणुरूवे णिव्वत्तिते । तते णं मल्लदिन्ने अम्मधाईए एयमट्ठं सोच्चा आसुरुत्ते एवं वदासी-केस णं भो ! चित्तयरए अपत्थियपत्थिए जाव परिवज्जिए जेणं मम जेट्ठाए भगिणीए गुरुदेवयभूयाए जाव निव्वत्तिए त्तिकट्टु तं चित्तगरं वज्झं आणवेइ " इति । वृत्तिर्यथा-' अंतेउरपरियाल ' त्ति अन्तःपुरं च परिवारश्च अन्तःपुरलक्षणो वा परिवारो यः स तथा ताभ्यां तेन वा संपरिवृतो लज्जितो व्रीडितो व्यर्द इति, एते त्रयोऽपि पर्यायशब्दाः

लज्जाप्रकर्षाभिधानायोक्ताः । ' लज्जणिज्जाए ' त्ति लज्ज्यते यस्साः सा लज्जनीया । इति ज्ञाताऽष्टमाध्ययने ९८ प्रतौ ७२ पत्रे ॥ ३ ॥

ननु एतावत्यपि महति सिद्धान्ते केनापि श्रावकेण श्राविकया वा श्रीजिनप्रतिमा पूजिता इति न श्रूयते, ततो नास्त्येवायं विधिरित्यादि-भिरन्यैश्च दांभिकयोग्यैर्वचोभिर्मुग्धजनान् प्रतारयन्ति प्रतिमाद्विषः । ततः सहृदयहृदयाववोधाय यथा द्रौपद्या सविस्तरं प्रतिमा पूजिता, तथा लिख्यते-नच वाच्यं नायं धर्मार्थविधिः विवाहावसरे कृतत्वात् सांसारिक एवायं विधिरिति पूजनानन्तरं ' तिन्नाणं तारयाणं बुद्धाणं बोहयाणं मुत्ताणं मोयगाणं ' इत्यादेरेव प्रार्थनात्, समीचीनवरदो भव पुत्रदो भव, इत्यादेरप्रार्थनाच्चधार्मिक एवायं विधिः सांसारिक-कार्यमध्ये धर्मकार्यानुष्ठानं च विदिततत्वानामविरुद्धम् । यदाहुः- " संसारकार्यव्यग्रेण धर्मः, कार्योऽन्तरान्तरा । मेढीबद्धोऽपि हि भ्राम्यन, घासग्रासं करोति गौः ॥ १ ॥ " न च वाच्यं ' रायवरकन्ना ' इत्यभिहितेयमिति, किमिदं दूषणं ? मल्लिरपि ' विदेहरायवरकन्ना ' इत्यभिहिता, इत्यलमसंबद्धालापेन । सूत्रं श्रूयताम्-

ततेणं सा दोवई रायवरकन्ना कल्लं पाउब्भूयाए जेणेव मज्जणघरे तेणेव उवागच्छइ, उवागच्छित्ता मज्जणघरमणुपविसइ, अणुपविसित्ता न्हाया कयबलिकम्मा कयकोउयमंगलपायच्छित्ता सुद्धप्पावेसाइ मंगल्लाइं वत्थाइं पवरपरिहिया मज्जणघराउ पडिनिक्खमइ पडिनिक्खमित्ता जेणेव जिणघरे तेणेव उवागच्छइ उवागच्छित्ता जिणघरं अणुपविसइ अणुपविसित्ता जिणपडिमाणं आलोए पणामं करेइ करित्ता लोमहत्थयं परामुसइ परामुसित्ता जिणपडिमाओ पमज्जइ पमज्जित्ता सुरहिणा गंधोदएण न्हाएइ सुरभीए गंधकासाईए गत्ताइं लूहेइ लूहित्ता सरणेणं गोसीसचंदणेणं अंगाइं अणुलिंपइ अणुलिंपित्ता सरसेहिं गंधेहि य मल्लेहि य अच्चेइ एवं जहा रायपसेणिए सुरियाभे । जिणपडिमाओ अच्चेइ अच्चेइत्ता तहेवजाणियव्वं जाव धूवं डहइ डहित्ता वामं जाणुं अंचेइ अंचेइत्ता दाहिणं जाणुं धरणितलंसि निहट्टु तिक्खुत्तो मुद्धाणं धरणितलंसि निवेसिति२ तिक्खुत्तो मुद्धाणं इसिं पच्चुन्नमइ पच्चुन्नमित्ता करयल जाव कट्टु एवं वयासी-नमोत्थुणं अरहंताणं भगवंताणं जाव संपताणं वंदइ नमंसइ२ जिणघराओ पडिनिक्खमइ पडिनिक्खमित्ता जेणेव अंतउरे तेणेव उवागच्छइ इति । वृत्तिर्यथा-' जिणपडिमाणं अच्चणं करेइ ' त्ति एकस्यां वाचनायामेतावदेव दृश्यते । वाचनान्तरे तु-" न्हाया जाव सव्वालङ्कारविभूसिया मज्जणघराओ पडिनिक्खमइ२ जेणामेव जिणघरे तेणामेव उवागच्छइ उवागच्छित्ता जिणघरं अणुपविसइ अणुपविसित्ता जिणपडिमाणं

आलोए पणामं करेइ लोम हत्थयं परामुसइ परामुसित्ता, एवं जहा सूरियाभो जिणपडिमाओ अच्चेइ, तहेव भाणियव्वं जाव धूवं डहइ " त्ति इह यावत्करणादर्थत इदं दृश्यम्-लोमहस्तकेन जिनप्रतिमाः प्रमार्ष्टि सुरभिणा गन्धोदकेन स्नपयति, गोशीर्षचन्दनेनानुलिम्पति वस्त्राणि निवासयति, ततः पुष्पाणां माल्यानां ग्रथितानामित्यर्थः, गन्धानां चूर्णानां वस्त्राणां आभर्णानां चारोपणं करोति स्म, मालाकलापावलंबनं पुष्पप्रकरं तन्दुलैर्दर्पणाद्यष्टमङ्गलकालेखनं च करोति, ' वामं जाणुं अञ्चेइ ' त्ति उत्क्षिपतीत्यर्थः, ' दाहिणं जाणुं धरणितलंसि निहट्टु ' निहत्य स्थापयित्वेत्यर्थः, ' तिक्खुत्तो मुद्धाणं धरणितलंसि निवेसेइ ' निवेशयतीत्यर्थः । ' इसिं पच्चुन्नमइ करतलपरिग्गहियं अंजलिं मत्थए कट्टु एवं वयासी-नमोत्थु णं अरिहंताणं जाव संपत्ताणं वंदति नमंसति२ जिणघराउ पडिनिक्खमइ ' त्ति तत्र वंदते चैत्यवन्दनविधिना प्रसिद्धेन नमस्यति पश्चात्प्रणिधानादियोगेनेति वृद्धाः । न च द्रौपद्याः प्रणिपातदण्डकमात्रं चैत्यवन्दनमभिहितं सूत्रे इति सूत्रमात्रप्रामाण्यादन्यस्यापि श्रावकादेस्तावदेव तदिति मन्तव्यम्, चरितानुवादरूपत्वादस्य, न च चरितानुवादवचनानि विधिनिषेधसाधकानि भवन्ति, अन्यथा सूर्याभादिदेववक्तव्यतायां बहूनां शस्त्रादिवस्तूनामर्चनं श्रूयते तदपि विधेयं स्यात् । किञ्चाविरतानां प्रणिपातदण्डकमात्रमपि चैत्यवन्दनं संभाव्यते, यतो वन्दते नमस्यतीति पदद्वयस्य वृद्धान्तरव्याख्यानमेवमुपदर्शितम्, जीवाभिगमवृत्तिकृता विरतिमतामेव प्रसिद्धचैत्यवन्दन-विधिर्भवति, अन्येषां तथाभ्युपगमपुरस्सरकायोत्सर्गासिद्धेः । ततो वन्दते सामान्येन, नमस्यति आशयवृद्धेः प्रीत्युत्थानरूपनमस्कारेणेति । इति श्रीज्ञाताषोडशाध्ययने ९८ प्रतौ ८९ पत्रे ॥ ४ ॥

केचिच्च प्रतिमापूजकत्वेर्ष्ययैव द्रौपदीमश्राविकां वदन्ति, सा च गेहे नर्दितैव । यतः सा द्रौपदी परमश्राविका प्रतीयते, येन नारदमसंयतमविरतमिति कृत्वाऽभ्युत्थानादि न कृतवती । तथा हि-

तते णं से पंडुराया कच्छुल्लणारयं एज्जमाणं पासति पासित्ता पंचहिं पंडवेहिं कुंतीए देवीए य सद्धिं आसणातो अब्भुट्ठेति अब्भुट्ठित्ता कच्छुल्लणारयं सत्तट्ठपयाइं पच्चुग्गच्छइ पच्चुग्गच्छित्ता तिक्खुत्तो आयाहिणपयाहिणं करेति करेत्ता वंदति नमंसति महारिहेणं आसणेणं उवणिमंतेति । तत्ते णं से कच्छुल्लणारए उदगपरिफासियाए दब्भुवरिपच्चुत्थुयाए निसियाए णिसीयति णिसीयित्ता पंडुरायं रज्जे य जाव अंतेउरे य कुसलोदंतं पुच्छइ । तते णं से पंडुराया कोंतीदेवी पंच य पंडवा कच्छुल्लणारयं आढायंति जाव पज्जुवासंति ।

ततते णं सा दोवती देवी कच्छुल्लणारयं अस्संजयअविरयअप्पडियपच्चक्खायपावकम्मं तिकट्टु नो आढाति नो परियाणति नो अब्भुट्ठेति नो पज़्जुवासति । इति वृत्तिर्यथा-' अस्संजजयअविरयअप्पडियपच्चक्खायपावकम्मे त्तिकट्टु ' असंयतः संयमरहितत्वात् अविरतो विशेषतस्तपस्यरतत्वात् न प्रतिहतानि न प्रतिषेधितानि अतीतकालकृतानि निन्दनतः न प्रत्याख्यातानि च भविष्यत्कालभावीनि पापकर्माणि-प्राणातिपातादिक्रिया येन अथवा न प्रतिहतानि सागरोपमकोटाकोट्यन्तःप्रवेशनेन सम्यक्त्वलाभतः न च प्रत्याख्यातानि सागरोपमकोटाकोट्याः सङ्ख्यातसागरैर्न्यूनताकरणेन सर्वविरतिलाभतः पापकर्माणि-ज्ञानावरणादीनि येन स तथा पदत्रयस्य कर्मधारयः, इति श्रीज्ञाताषोडशाध्ययने १७२ प्रतौ १४७ पत्रे ॥ ५ ॥

॥९१॥

अपरं च यदि द्रौपदिश्राविका न स्यात्तदा पद्म नाभेन स्वभवने आहता सती आचाम्लपरिगृहीतं षष्ठं षष्ठेन तपः कथं कृतवती ? तच्चोक्तम् -

ततेणं सा दोवती देवी पउमणाभं एवं वयासी-एवं खलु देवा० जंबुद्दीवे दीवे भारहे वासे बारवतीए णयरीए कन्हे णामं वासुदेवे मम पियभाउए परिवसति, तं जति णं से छन्हं मासाणं मम कूवं नो हव्वमागच्छइ ततेणं अहं देवा० जं तुमं वदसी तस्स आणाओवयणणिद्देसे चिट्ठिस्सामि । ततेणं से पउमे दोवतीए एयमट्ठं पडिसुणेत्ता दोवतिं देविं कन्नंतेउरे ठवेति । ततेणं सा दोवति देवी छट्ठं छट्ठेणं अणिक्खित्तेणं आयंबिलपरिग्गहिएणं तवोकम्मेणं अप्पाणं भावेमाणी विहरइ । इति वृत्तिस्तु सुगमत्वादस्य नास्ति । इति ज्ञाताषोडशाध्ययने १७२ प्रतौ १४८ प्रते ॥ ६ ॥

केचिच्चोत्सूत्रभाषी यदि तस्मिन्नेव भवे आलोचयति तदा तत्प्रतिकारः स्यात्, अन्यथा तस्मिन् भवे आलोचनाभावे च नियमादनन्त एव संसार इति प्रलपन्ति, तच्चायुक्तमेव यतः कालीदेव्या यथाछन्दाया उत्सूत्रभाषिण्या अपि तद्भवेऽगृहीतालोचनाया अपि नानन्तसंसारित्वं श्रूयते, किं तु इतस्तृतीयभवे मुक्तिरुक्ता । ननु यदीयं यथाछन्दोक्ता तदोत्सूत्रभाषिणीति कथमुच्यते ? इति चेन्मैवम्, यथाच्छन्दोत्सूत्रभाषिणोरैक्ये-नैवोक्तत्वात् । तथा हि-" उस्सुत्तमायरंतो, उस्सुत्तं चेव पन्नवे माणो । एसो त्ति अहाछंदो, इच्छाछंदो त्ति एगट्ठा ॥ १ ॥ " सूत्रं चेदम्-

॥९१॥

ततते णं सा काली अज्जा जाया ईरियासमिया जाव गुत्तबंभयारिणी । ततेणं सा काली अज्जा पुप्फचूला अज्जाए अंतिए

समाइयमाइयातिं एक्कारसअंगाइं अहिज्जइ बहूहिं चउत्थ जाव विहरति । तते णं सा काली अज्जा अन्नया कयातिं सरीरपाओसिया जाया यावि होत्था, अभिक्खणमभिक्खणं हत्थे धोवेति पाए धोवेति सीसं धोवेइ मुहं धोवेइ थणंतराइं धोवेति कक्खंतराणि धोवेइ गुज्झंतराइं धोवेति जत्थ जत्थ वियणं ठाणं वा सेज्जं वा णिसीहियं वा चेतेइ तं पुव्वामेव अब्भुक्खेत्ता ततो पच्छा आसयति वा सयति वा । तते णं सा पुप्फचूला अज्जा कालिं अज्जं एवं वयासी-नो खलु कप्पति देवा० समणीणं निग्गंथीणं सरीरपाउसियाणं होत्तए तुमं च णं देवाणुप्पिया ! सरीरपाउसिया जाया अभिक्खणं२ हत्थे धोवेसि जाव आसयाहि वा सयाहि वा, तं तुमं देवाणुप्पिया ! एयस्स ठाणस्स आलोएहि जाव पायच्छित्तं पडिवज्जाहि । तते णं सा काली अज्जा पुप्फचूलाए अज्जाए एयमट्ठं नो आढाति जाव तुसिणीया संचिट्ठति । तते णं तातो पुप्फचूलाओ अज्जाओ कालिं अज्जं अभिक्खणमभिक्खणं हीलेंति णिंदंति खिसंति गरिहंति अवमन्नंति अभिक्खणं२ एयमट्ठं निवारेंति । तते णं तीसे कालीए अज्जाए समणीहिं णिग्गंथीहिं अभिक्खणं२ हीलिज्जमाणीए जाव वारिज्जमाणीए इमेयारूवे अब्भत्थिए जाव समुप्पज्जित्था, जया णं अहं आगारवासमज्झे वसित्था तया णं अहं सयंवसा जप्पभिइं च णं अहं मुंडे भवित्ता आगारातो अणगारियं पव्वतिता तप्पभिइं च णं परवसा जाया, तं सेयं खलु ममं कल्लं पाउप्पभायाए रयणीए जाव जलंते पाडिक्कयं उवस्सयं उवसंपज्जित्ता णं विहरित्तए त्तिकट्टु एवं संपेहेति२ जाव जलंते पाडिक्कयं उवस्सयं गेण्हति, तत्थ णं अणिवारिया अणोहट्टिया सच्छंदमती अभिक्खणमभिक्खणं हत्थे धोवेति जाव आसयइ वा सयइ वा । तते णं सा काली अज्जा पासत्था पासत्थविहारी ओसन्ना ओसन्नविहारी कुसीला२ अहाछंदा२ संसत्ता२ बहूणि वासाणि सामन्नपरियागं पाउणति पाउणित्ता (अद्ध) मासियाए संलेहणाए अत्ताणं झूसेति२ सट्ठिं (तिसं) भत्ताइं अणसणाए छेदेति२ तस्स ठाणस्स अणालोइयअपडिक्कंता कालमासे कालं किच्चा चमरचंचाए रायहाणीए कालीवडिंसए भुवणे उववायसभाए देवसयणिज्जंसि देवदूसंतरिया अंगुलस्स असंखेज्जभागमेत्ताए ओगाहणाए कालीदेवित्ताए उववन्ना । तते णं सा काली देवी अहुणोववन्ना समाणी पंचविहाए पज्जत्तीए जहा सूरियाभो जाव भासामणपज्जत्तीए । तते णं सा कालीदेवी चउन्हं सामाणियसाहस्सीणं जाव अन्नेसिं च बहूणं कालीवडेंसगभवणवासीणं असुरकुमाराणं देवाण य देवीण य आहेवच्चं जाव विहरति । एवं खलु गोयमा ! कालीए देवीए सा दिव्वा देविड्ढी लद्धा पत्ता अभिसमण्णागया कालीए णं भंते ! देवीए केवतियं कालं ठिती पन्नत्ता ?

गोयमा ! अड्ढाइज्जाइं पलिओवमाइं ठिती पन्नत्ता । काली णं भंते ! देवी ताओ देवलोगाओ अणंतरं उवट्टित्ता कहिं गच्छिहिति ? गोयमा ! महाविदेहे वासे सिज्झिहिति । एवं खलु जंबू ! समणेणं जाव संपत्तेणं पढमस्स वग्गस्स पढमज्झयणस्स अयमट्ठे पन्नत्ते । वृत्तिस्तु सुगमत्वादस्य नास्ति । इति श्रीज्ञाताद्वितीयश्रुतस्कन्धप्रथमाध्ययनप्रान्ते १७२ प्रतौ १७० पत्रे ॥ ७ ॥

॥ इति श्रीमद्कब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलश्रीजगद्गुरुभट्टारक-श्रीहीरविजयसूरीशिष्योपाध्यायश्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे विशेषसमुच्चयापरनाम्नि श्रीज्ञाताधर्मकथाङ्गविचारनामाषष्ठस्तरङ्गः ॥ ६ ॥

काष्ठोपमानि परमतहृदयान्यपि युक्तिसमीरलहरीभिः । सुरभयति य इह तस्मै, जैनागमचन्दनाय नमः ॥ १ ॥

अथ परिपाट्यायाताः श्रीउपासकदशाङ्गविचारा लिख्यन्ते-

ननु नास्त्येव प्रतिमावन्दनविधिः यदि स्यात्तदा भगवतः श्रीवीरस्येयन्तः श्रावका अभूवन् तेषु केन प्रतिमा नमस्कृतेति सिद्धान्ते दर्शनीयं इति प्रतिमाद्विषो वदन्ति, तच्च जडजनानां हृदयङ्गमं न विदुषाम् । यत आनन्देन सुश्रावकेन सम्यक्त्वोच्चारसमये अन्यतीर्थिकपरिगृहीतार्हच्चैत्यवन्दननिषेधनद्वारेणान्यार्हच्चैत्यवन्दनस्य सुतरां स्वीकृतत्वात् । ननु निषेधसूत्रेऽर्हच्चैत्यवन्दनं यथा प्रतिपादितं तथा विधिसूत्रे कुतो नोक्तम् ? किं च यदि अन्यतीर्थिकपरिगृहीतार्हच्चैत्यवन्दनं निषिद्धं तर्हि अन्यतीर्थिकापरिगृहीतार्हच्चैत्यवन्दनमनुक्तमपि कथमापतितम् ? इति चेत् ? अरे अदृष्टन्यायमार्ग ! मैवं वादी शृणु तावत् विशेषविधिनिषेधौ हि शेषनिषेधाभ्यनुज्ञाफलौ यथा-ब्राह्मणेभ्यो दधि देयं, तक्रं कौडिन्याय । अत्र कौडिन्यगोत्राय ब्राह्मणाय तक्रं देयम्, अयं हि विशेषविधिः, तेन च शेषाणां ब्राह्मणानां तक्रनिषेधः स्पष्टमेव प्रतीयते । तथा ब्राह्मणा भोजनीयाः कौण्डिन्याय च तक्रं न देयम्, इत्यत्र विशेषनिषेधे शेषाणां ब्राह्मणानां तक्रं देयम्, इत्यभ्यनुज्ञा प्रतीयत एव । तथा चात्रापि अन्यतीर्थिकपरिगृहीतार्हच्चैत्यवन्दननिषेधलक्षणेन विशेषनिषेधेन शेषार्हच्चैत्यवन्दनानुज्ञा सुप्रतीतैव । किञ्च मूलतो निषिद्धे देशतो निषेधोऽप्ययौक्तिक एव प्राणातिपातादिवत् । अर्हच्चैत्यशब्देन यत्साधुवृक्षनगाद्यर्थान्तरकल्पनं तत्तु शाब्दिकैस्तार्किकैः सहृदयैः श्रोतुमप्यशक्यमित्यपकर्णनीयम् । तत्सूत्रञ्चेदम्-

समणं भगवं महावीरं वंदइ नमंसइ वंदित्ता नमंसित्ता एवं वयावी-नो खलु मे भंते ! कप्पइ अज्जप्पभिइं अन्नउत्थिए वा

अन्नउत्थियदेवयाणि वा अन्नउत्थियपरिग्गहियाइं अरिहंतचेइयाइं वा वंदित्तए वा नमंसित्तए वा पुव्विं अणालत्तेणं आलवित्तए वा संलवित्तए वा (कल्लाणं मंगलं देवयं चेइयं पज्जुवासित्तए वा) तेसिं असणं वा पाणं वा खाइमं वा साइमं वा दाउं वा अणुप्पयाउं वा नन्नत्थ रायाभि-ओगेणं गणाभिओगेणं बलाभिओगेणं देवयाभिओगेणं गुरुनिग्गहेणं वित्तिकंतारेणं, कप्पइ मे समणे निग्गंथे फासुएणं एसणिज्जेणं असणपाणखाइमसाइमेणं वत्थपडिग्गहकंबलपायपुंछणेणं पीढफलगसिज्जासंथारएणं ओसहभेसज्जेण य पडिलाभेमाणस्स विहरित्तए त्तिकट्टु इमं एयारूवं अभिग्गहं अभिगिन्हइ अभिगिन्हित्ता पसिणाइं पुच्छइ पुच्छित्ता अट्ठाइं आदियति २त्ता समणं भगवं महावीरं तिक्खुत्तो वंदइ । इति । वृत्तिर्यथा-' नो खलु ' इत्यादि, नो खलु मम भदन्त ! भगवन् ! कल्पते-युज्यते अद्य प्रभृति-इतः सम्यक्त्वप्रतिपत्तिदिनादारभ्य निरतिचारसम्यक्त्वपरिपालनार्थं तद्यतनामाश्रित्य ' अन्नउत्थिए व ' त्ति जैन यूथाद्यदन्यत् यूथं सङ्घान्तरं तीर्थान्तरमित्यर्थः तदस्ति येषां तेऽन्ययूथिकाश्चरकादिकुतीर्थिकाः तान्, अन्ययूथिकदैवतानि वा हरिहरादीनि, अन्ययूथिकपरिगृहीतानि वार्हच्चैत्यानिअर्हत्प्रतिमालक्षणानि, यथा भौतपरिगृहीतानि वीरभद्रमहाकालादीनि वन्दितुं वा-अभिवादनं कर्त्तुं, नमस्कर्तुं प्रणामपूर्वकं प्रशस्तध्वनिभिर्गुणोत्कीर्त्तनं कर्तुं, तद्भक्तानां मिथ्यात्वस्थिरीकरणादिदोषप्रसङ्गादित्यभिप्रायः, तथा पूर्वं-प्रथममनालप्तने सता अन्यतीर्थिकैस्तानेवालपितुं वा-सकृत्सम्भाषितुं संलपितुं वा-पुनः पुनः संलापं कर्तुं यतस्ते तप्ततरायोगोलककल्पाः खल्वासनादिक्रियायां नियुक्ता भवन्ति, तत्प्रत्ययश्च कर्मबन्धः स्यात् । तथाऽऽलापादेः सकाशात्परिचयेन तस्यैव तस्य परिजनस्य वा मिथ्यात्वप्राप्तिरिति, प्रथमालप्तेन त्वसम्भ्रमलोकापवादभयात्कीदृशस्त्वमित्यादि वाच्यमिति । तथा तेभ्योऽन्ययूथिकेभ्योऽशनादि दातुं वा सकृत्, अनुप्रदातुं वा पुनः पुनरित्यर्थः । अयञ्च निषेधो धर्मबुद्ध्यैव करुणया तु दद्यादपि, किं सर्वथा न कल्पते ? इत्याह-' नन्नत्थ रायाभिओगेणं ' ति न इति-न कल्पते योऽयं निषेधः सोऽन्यत्र राजाभियोगात् तृतीयायाः पञ्चम्यर्थत्वात्, राजाभियोगं वर्जयित्वेत्यर्थः । राजाभियोगस्तु-राजपरतन्त्रता, गणः-समुदायास्तदभियोगः-पारवश्यता गणाभियोगस्तस्माद्, बलाभियोगो नाम-राजगणव्यतिरिक्तस्य बलवतः पारतन्त्र्यं, देवताभियोगो-देवपरतन्त्रता, गुरुनिग्रहो-मातापितृपारवश्यं, गुरूणां वा-चैत्यसाधूनां निग्रहः-प्रत्यनीककृतोपद्रवो गुरुनिग्रहस्तत्रोपस्थिते तद्रक्षार्थं अन्ययूथिकादिभ्यो दददपि नातिक्रामति सम्यक्त्वमिति, ' वित्तिकंतारेणं ' ति वृत्तिः-जीविका तस्याः कान्तारं-अरण्यं तदिव कान्तारं क्षेत्रं कालो वा वृत्तिकान्तारं निर्वाहाभाव

॥९४॥

इत्यर्थः तस्मादन्यत्र निषेधो दानप्रदानादेरिति प्रकृतमिति ' पडिग्गहं ' ति पात्रम् । ' पीढं ' ति पीठं-पट्टादिकम् । ' फलगं ' ति अवष्टंभादिकं फलकम् । ' भेसज्जं ' ति पथ्यम् । ' अट्ठाइं ' ति उत्तरभूतानर्थानाददाति । इति उपासकप्रथमाध्ययनसावचूरिक २७ प्रतौ ७ पत्रे ॥ १ ॥

श्रावकाणां प्रतिमा अनुष्ठेया इति जिज्ञापयिषया प्रतिमास्वरूपजिज्ञापयिषया च लिख्यते-

समणस्स भगवओ महावीरस्स अंतियं धम्मपन्नत्तिं उवसंपज्जित्ता णं विहरित्तए । तं सेयं खलु ममं कल्लं जाव जलंते विउलं असणं पाणं खाइमं साइमं जहा पूरणो जाव जेट्ठपुत्तं कुडुंबे ठवेत्ता तं मित्तजाव जेट्ठपुत्तं च आपुच्छित्ता कोल्लागे सन्निवेसे णायकुलंसि पोसहसालं पडिलेहित्ता समणस्स भगवओ महावीरस्स अंतियं धम्मपण्णत्तिं उवसंपज्जित्ता णं विहरित्तए एवं संपेहेइ संपेहित्ता कल्लं विउलं तहेव जिमियभुत्तुत्तरागए तं मित्त जाव विउलेणं पुप्फजाव सक्कारेइ सम्माणेइ २त्ता तस्सेव मित्तजावपुरओ जेट्ठपुत्तं सद्दावेइ सद्दावेत्ता एवं वयासी-एवं खलु पुत्ता ! अहं वाणियग्गामे बहूणं राईसर जहा चिंतितं जाव विहरित्तए । तं सेयं खलु मम इदाणिं तुमं सयस्स कुडुंबस्स आलंबणं ठवेत्ता जाव विहरित्तए । तए णं जेट्ठपुत्ते आणंदस्स समणोवासगस्स तहत्ति एयमट्ठं विणएणं पडिसुणेइ । तए णं से आणंदे समणोवासए तस्सेव मित्तजाव पुरतो जेट्ठपुत्तं कुडुंबे ठवेइ ठवेत्ता एवं वयासी-मा णं देवाणुप्पिया ! तुम्हे अज्जाप्पभिइं केइ ममं बहूसु कज्जेसु जाव आपुच्छउ वा पडिपुच्छउ वा मम अट्ठाए असणं पाणं खाइमं साइमं वा उवक्खडेउ वा उवकरेउ वा । तए णं से आणंदे समणोवासए जेट्ठपुत्तं मित्तणाइं आपुच्छइ आपुच्छिता सयाणो गेहाओ पडिनिक्खमइ, पडिनिक्खमित्ता वाणियग्गामं नगरं मज्झंमज्झेणं निग्गच्छइ निग्गच्छित्ता जेणेव कोल्लाए सन्निवेसे जेणेव नायकुले जेणेव पोसहसाला तेणेव उवागच्छइ उवागच्छिता पोसहसालं पमज्जइ २त्ता उच्चारपासवणभूमीं पडिलेहइ पडिलेहित्ता दब्भसंथारयं संथरइ, दब्भसंथारयं दुरूहइ २त्ता पोसहसालाए पोसहिए दब्भसंथारोवगए समणस्स भगवतो महावीरस्स अंतियं धम्मपन्नत्तिं उवसंपज्जित्ता णं विहरइ । तए णं से आणंदे समणोवासए पढमं उवासगपडिमं उवसंपज्जित्ता णं विहरइ । पढमं उवासगपडिमं अहासुत्तं ४ सम्मं काएणं फासेइ जाव आराहेइ । तए णं से आणंदे समणोवासए दोच्चं उवासगपडिमं, एवं तच्चं, चउत्थं, पंचमं, छट्ठं, सत्तमं, अट्ठमं, नवमं, दसमं, एकारसमं जाव आराहेइ । तए णं

॥९५॥

से आणंदे समणोवासए इमेणं एयारूवेणं ओरालेणं विउलेणं पयत्तेणं पग्गहिएणं तवोकम्मेणं सुक्के जाव किसे धमणिसंतए जाव । इति । वृत्तिर्यथा-' महावीरस्स अंतियं ' ति अन्ते भवा आन्तिकी महावीरसमीपाभ्युपगतेत्यर्थः तां ' धम्मपन्नत्तिं ' ति धर्मप्रज्ञप्तिमुपसंपद्य-अङ्गीकृत्यानुष्ठानद्वारतः ' जहा पूरणो ' ति भगवत्यभिहितो बालतपस्वी स यथा स्वस्थाने पुत्रादिस्थापनमकरोत्तथाऽयं कृतवानित्यर्थः । एवं चासौ कृतवान् ' विउलं असणपाणखाइमसाइमं उवक्खडावित्ता, मित्तनाइनियगसंबंधिपरिजणं आमंतेत्ता, तं मित्तनाइनियगसंबंधिपरिजणं विउलेणं असणपाणखाइमसाइमेणं वत्थगंधमल्लालंकारेण य सक्कारेत्ता संमाणेत्ता, तस्सेव मित्तनाइनियगसंबंधिपरियणस्स पुरतो जेट्ठपुत्तं कुडुंबे ठावित्ता ' ' नायकुलंसि ' त्ति स्वजनगृहे ' उवक्खडेउ ' त्ति उपस्करोतु-राध्यतु ' उवकरेउ ' ति उपकरोतु-सिद्धं सत् द्रव्यान्तरैः कृतोपकारमाहितगुणान्तरं विदधातु ' पढमं ' ति एकादशानामाद्यामुपासकप्रतिमां-श्रावकोचिताभिग्रहविशेषरूपामुपसंपद्य विहरति । तस्याश्चेदं स्वरूपम्-" संकादिसल्लविरहिय-सम्मद्दंसणजुओ उ जो जंतू सेसगुणविप्पमुक्को, एसा खलु होइ पढमाओ ॥ १ ॥ " सम्यग्दर्शनप्रतिपत्तिश्च तस्य पूर्वमप्यासीत्, केवलमिह शङ्कादिदोषराजाभियोगाद्यपवादवर्जितत्वेन तथाविधसम्यग्दर्शनाचारविशेषपालनाभ्युपगमेन च प्रतिमात्वं सम्भाव्यते कथमन्यथाऽसावेकमासं प्रथमायाः प्रतिमायाः पालनेन, द्वौ मासौ द्वितीयायाः पालनेन, एवं यावदेकादश मासानेकादश्याः पालनेन, पञ्चसार्द्धानि वर्षाणि पूरितवानित्यर्थतो वक्ष्यतीति, न चायमर्थो दशाश्रुतस्कन्धादावुपलभ्यते, श्रद्धामात्ररूपाया-स्तत्र तस्याः प्रतिपादनात् । ' अहासुत्तं ' ति सूत्रानतिक्रमेण, यथा कल्पं-प्रतिमाचारानतिक्रमेण, यथामार्गं-क्षायोपशमिकभावानतिक्रमेण, ' अहातच्चं ' ति यथातत्त्वं दर्शनप्रतिमेति शब्दस्यान्वर्थानतिक्रमेण, ' फासेइ ' त्ति स्पृशति प्रतिपत्तिकाले विधिना प्रतिपत्तेः ' पालेइ ' त्ति सततोपयोगप्रतिजागरणेन रक्षति । ' सोहइ ' त्ति शोभयति गुरुपूजापुरस्सरपारणककरणेन शोधयति वा निरतिचारतया ' तीरेइ ' त्ति पूर्णेपि कालावधावनुबन्धात्यागात्, कीर्त्तयति तत्समाप्तावदङ्गेहादिमध्यावसानेषु कर्त्तव्यं तच्च मया कृतमिति कीर्त्तनात्, आराधयति एभिरेव प्रकारैः संपूर्णैर्निष्ठां नयतीति । ' दोच्चं ' ति द्वितीयां व्रतप्रतिमाम्, इदञ्चास्याः स्वरूपम्- " दंसणपडिमाजुत्तो, पालंतोणुव्वए निरइयारे । अणुकंपाइगुणजुओ, जीवो इह होइ वयपडिमा ॥ २ ॥ " ' तच्चं ' ति तृतीयां सामायिकप्रतिमाम् तत्स्वरूपमिदम्- " वरदंसणवयजुत्तो, सामाइयं कुणइ जो उ संझासु । उक्कोसेण तिमासं, एसा सामाइयप्पडिमा ॥ ३ ॥ " ' चउत्थं ' ति चतुर्थीं पौषध-

प्रतिमामेवंस्वरूपाम्-" पुव्वोदियपडिमजुओ, जो कुणइ पोसहं तु संपुन्नं । अट्ठमिचउद्दसाइसु, चउरो मासा चउत्थीं सा ॥ ४ ॥ " ' पंचमं ' ति पञ्चमीं प्रतिमाप्रतिमां कायोत्सर्गप्रतिमामित्यर्थः, स्वरूपञ्चास्याः-" सम्ममणुव्वयगुणवयसिक्खावयवं थिरो य नाणी य । अट्ठमिचउद्दसीसु, पडिमं ठाएगराईयं ॥ ५ ॥ असिणाणवियडभोई, मउलिकडो दिवसबंभयारी य । राइं परिमाणकडो, पडिमावज्जेसु दियहेसु ॥ ६ ॥ " ' असिणाणवियडभोई ' अस्नानोऽरात्रिभोजी चेत्यर्थः । ' मउडिकडो ' त्ति मुत्कलकच्छ इत्यर्थः । " झायइ पडिमाइठिओ, तिलोयपुज्जे जिणे जियकसाए नियदोसपच्चणीयं, अन्नं वा पंच जा मासा ॥ ७ ॥ " ' छट्ठं ' ति षष्ठीं अब्रह्मवर्जनप्रतिमाम्, एतत्स्वरूपञ्चैवम्-" पुव्वोदियगुणजूत्तो, विसेसओ मोहणिज्जवज्जो य । वज्जइ अबंभमेगंतओ य राइंपि थिरचित्तो ॥ ८ ॥ सिंगारकहाविरओ, इत्थीए सम रहम्मि नो ठाइ । चयइ अ अइप्पसंगं, तहा विभूसं च उक्कोसं ॥ ९ ॥ एवं जा छम्मासा, एसोऽहिगओ उ इयरहा दिट्ठं । जावज्जीवंपि इमं, वज्जइ एयंमि लोगंमि ॥ १० ॥ " ' सत्तमं ' ति सप्तमीं सचित्ताहारवर्जनप्रतिमामित्यर्थः, इयञ्चैवम्-" सचित्तं आहारं; वज्जइ असणाइयं निरवसेसं । सेसवयसमाउत्तो, जा मासा सत्त विहिपुव्वं ॥ ११ ॥ " ' अट्ठमिं ' ति अष्टमीं स्वयमारम्भवर्जनप्रतिमाम्, तद्रूपमिदम्-" वज्जइ सयमारंभ, सावज्जं कारवेति पेसेहिं । वित्तिनिमित्तं पुव्वय-गुणजुत्तो अट्ठ जा मासा " ॥ १२ ॥ ' नवमं ' ति नवमीं भृतकप्रेष्यारम्भवर्जनप्रतिमाम्, सा चेयम्-" पेसेहिं आरंभं, सावज्जं कारवेइ णो गुरुयं । पुव्वोइयगुमजुत्तो,णव मासा जाव विहिणाओ ॥ १३ ॥ " ' दसमं ' ति दशमीं उद्दिष्टभक्तवर्जनप्रतिमाम्, सा चैवम्- " उद्दिट्ठकडं भत्तंपि, वज्जए किमुय सेसमारंभं । सो होइ य खुरमुंडो, सिहलिं वा धारए कोइ ॥ १४ ॥ " दव्वं पुट्ठो जाणं, जाणेइ वयइ नो य नेवेति । पुव्वोदियगुणजुत्तो, दस मासा कालमाणेणं ॥ १५ ॥ " ' एकारसमं ' ति एकादशीं श्रमणभूतप्रतिमाम्, तत्स्वरूपञ्चैतत्-" खुरमुंडो लोएण व, रयहरणं उग्गहं च घेत्तूणं । समणब्भूओ विहरइ, धम्मं काएण फासंतो ॥ १६ ॥ एवं उक्कोसेणं एक्कारस मास जाव विहरति । " इति उपासक प्रथमाध्ययनसावचूरिक २७ प्रतौ ८ पत्रे ॥ २ ॥

॥ इति श्रीमद्कब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलश्रीजगद्गुरुभट्टारकश्रीहीरविजयसूरिशिष्योपाध्यायश्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे विशेषसमुच्चयापरनाम्नि श्रीउपासकविचारनामा सप्तमस्तरङ्गः ॥ ७ ॥

सर्वविद्वज्जगत्सर्वं, छद्मस्थोऽप्यवलोकते । यत्प्रभावाद्भृशं भक्त्या, भजे तज्जिनभाषितम् ॥ १ ॥

अथ क्रमायातादष्टमाङ्गात्किञ्चित् रत्नावलीतपःस्वरूपजिज्ञासया लिख्यते-

तेणं कालेणं तेणं समएणं चंपाणामं णयरी होत्था, पुण्णभद्दे चेतिए, तत्थ णं चंपाए नयरीए कोणिए राया होत्था, वण्णओ, तत्थ णं चंपाए णंयरीए सेणियस्स रण्णो भज्जा कोणियस्स रण्णो चुल्लमाउया काली नामं देवी होत्था, वण्णओ जहा णंदा जाव सामाइयमाइयातिं एक्कारसअंगाइं अहिज्जति, बहूहिं चउत्थ जाव अप्पाणं भावेमाणी विहरति । तते णं सा काली अज्जा अण्णया कयाइ जेणेव अज्जचंदणा अज्जा तेणेव उवागता २ एवं वयासी-इच्छामि णं अज्जाओ ! तुब्भेहिं अब्भणुणाता समाणा रयणावलिं तवं उवसंपज्जित्ता णं विहरित्तए ? अहासुहं देवाणुप्पिया ! मा पडिबंधं करेहि । तते णं सा काली अज्जा अज्जचंदणाए अब्भणुण्णाया समाणा रयणावलिं उवसपज्जित्ता णं विहरति । तं जहा- चउत्थं करेइ चउत्थं करेत्ता सव्वकामगुणियं पारेति, सव्वकामगुणियं पारेत्ता छट्ठं करेति छट्ठं करेत्ता सव्वकामगुणियं पारेति, पारेत्ता अट्ठमं करेति करेत्ता सव्वकामगुणियं पारेति, पारेत्ता अट्ठछट्ठाइं करेइ करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता चउत्थं करेइ करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता छट्ठं करेइ करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता अट्ठमं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता दसमं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता दुवालसमं करेइ करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता चोद्दसमं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता सोलसमं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता अट्ठारसमं करेइ करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता वीसइमं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता बावीसइमं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता चउवीसइमं करेइ करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता छवीसइमं करेइ करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता अट्ठावीसइमं करेइ करेत्ता सव्वकामगुणियं पाारेइ, पारेत्ता तीसइमं करेइ करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता बत्तीसं करेइ करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता चउत्तीसं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता चउत्तीसं छट्ठाइं करेइ करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता चउत्तीसं करेइ करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता बत्तीसं करेइ करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता तीसं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता अट्ठावीसं करेइ, करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता छवीसं करेति करेत्ता सव्वकामगुणियं

पारेति, पारेत्ता चउवीसइमं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता बावीसइमं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता वीसं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता अट्ठारसमं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता सोलसमं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता चोद्दसमं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता बारसमं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता दसमं करेइ करेत्ता सव्वकामगुणिंय पारेइ, पारेत्ता अट्ठमं करेति करेत्ता सव्वकामगुणियं पारेति, पारेत्ता छट्ठं करेइ करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता चउत्थं करेइ करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता अट्ठछट्ठाइं करेति करेत्ता सव्वकामगुणियं पारेति, पारेत्ता अट्ठमं करेइ करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता छट्ठं करेति करेत्ता सव्वकामगुणियं पारेइ, पारेत्ता चउत्थं करेति करेत्ता सव्वकामगुणियं पारेइ । एवं खलु एसा रयणावलीए तवोकम्मस्स पढमा परिवाडी एगेणं संवच्छरेणं तिहिं मासेहिं बावीसाए य अहोरत्तेहिं अहासुत्तं जाव आराहिया भवति । तयाणंतरं च णं दोच्चाए परिवाडीए चउत्थं करेति विगइवज्जं पारेति, पारेत्ता छट्ठं करेइ विगइवज्जं पारेइ, एवं जहा पढमाए परिवाडीए तहा बीयाए, नवरं-सव्वत्थ पारणए विगइवज्जं पारेति जाव आराहिया भवति । तयाणंतरं च णं तच्चाए परिवाडीए चउत्थं करेति करेत्ता अलेवाडं पारेति सेसं तहेव णवरं-अलेवाडं पारेति । एवं चउत्थावि परिवाडी णवरं-सव्वपारणए आयंबिलं पारेति, सेसं तं चेव । पढमंमि सव्वकामं, पारणयं बितियए बिगतिवज्जं । तइयंमि अलेवाडं, आयंबिलमो चउत्थंमि ॥ १ ॥ तते णं सा काली अज्जा रयणावलितवोकम्मं पंचहिं संवच्छरेहिं दोहि य मासेहिं अट्ठावीसाए य दिवसेहिं अहासुत्तं जाव आराहेत्ता जेणेव अज्जचंदणा अज्जा तेणेव उवागच्छति, उवागच्छित्ता अज्जचंदणं अज्जं वंदति नमंसति बहूहिं चउत्थं जाव अप्पाणं भावेमाणी विहरइ । इति । वृत्तिर्यथा-' रयणावलि ' त्ति रत्नावली-आभरणविशेषः । रत्नावलीव रत्नावली, यथाहि-रत्नावली उभयत आदिसूक्ष्मस्थूलस्थूलतरविभागकाहलिकाख्यसौवर्णावयवद्वययुक्ता भवति पुनर्मध्यदेशे स्थूलविशिष्टमण्यलङ्कृता च भवति, एवं यत्तपः पट्टादावुपदर्शमानमिममाकारं धारयति तद्रत्नावलीत्युच्यते, तत्र चतुर्थमेकेनोपवासेन षष्ठं द्वाभ्यामष्टमं त्रिभिः, ततोऽष्टौ षष्ठानि, तानि च स्थापनायां चत्वारि चत्वारि कृत्वा पङ्क्तिद्वयेन स्थाप्यन्ते, अथवा पङ्क्तित्रयेण नव कोष्टकान् कृत्त्वा मध्यकोष्ठे शून्यं विधाय शेषेष्वष्टासु अष्ट षष्ठानि रचनीयानि, ततश्चतुर्थादिचतुस्त्रिंशत्तमपर्यन्तं, चतुस्त्रिंशत्तमं च षोडशभिरुपवासैः, ततो रत्नावलीमध्यभागकल्पनया चतुस्त्रिंशत् षष्ठानि, एतेषां स्थूलमणितया कल्पितत्वात्, एतानि

चोत्तराधर्येण द्वे त्रीणि चत्वारि पञ्च षट् पञ्च चत्वारि त्रीणि द्वे च स्थापनीयानि, अथवा अष्टाभिः षड्भिश्च रेखाभिः पञ्चत्रिंशत्कोष्ठकान् विधाय मध्ये शून्यं कृत्वा शेषेषु चतुस्त्रिंशत्षष्ठानि स्थापनीयानि, एवं चतुस्त्रिंशत्तमादीनि चतुर्थान्तानि, पुनरप्यष्ट षष्ठानि, स्थापना त्वेषां पूर्ववत्, पुनरप्यष्टमषष्ठचतुर्थानीति । प्रथमायां परिपाट्यां सर्वकामगुणितं पारयति, तत्र सर्वे कामगुणा-अभिलषणीया रसादिगुणाः सञ्जाता यस्मिंस्तत्तथा सर्वरसोपेतमित्यर्थः, भोजनमिति गम्यते । पारणकसङ्ग्र-हगाथा-" पढमंमि सव्वकामं, पारणयं बीयते विगइवज्जं । तइयंमि अलेवाडं, आयंबिलमो चउत्थंमि ॥ १ ॥ " पारणक इति गम्यते, वाचनान्तरे-" पढमंमि सव्वगुणिए पारणकं " इति दृश्यते ।

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलश्रीजगद्गुरुभट्टारकश्रीहीरविजयसूरिशिष्योपाध्यायश्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे विशेषसमुच्चयापरनाम्नि अन्तगडविचारनामाऽष्टमस्तरङ्गः ॥ ८ ॥

अतीतानागता भावा, वर्त्तमान इव स्फुटम् । यत्प्रभावात्प्रतीयन्ते, तां जिनेशगिरं स्तुमः ॥ १ ॥

अथानुत्तरोपपातिकाङ्गे चतुर्दशसहस्रप्रमितेषु साधुषु महादुष्करकारितया महानिर्जरतया भगवता श्रीवीरेण स्वयं व्यावर्णितस्यात एव चमत्कारिचरित्रस्य धन्यकस्य स्वरूपं किञ्चिल्लिख्यते-

" तेणं कालेणं तेणं समएणं रायगिहे णगरे गुणसिलए चेतिए सेणिए राया, तेणं कालेणं तेणं समएणं समणे भगवं महावीरे समोसढे परिसा णिग्गया, सेणिए णिग्गते, धम्मकहा सोच्चा परिसा पडिगता । तते णं से सेणिए राया समणस्स० अंतिए धम्मं सोच्चा णिसम्म समणं भगवं महावीरं वंदति णमंसति २ एवं वदासी-इमासि णं भंते ! इंद्दभूतिपामोक्खाणं चोद्दसन्हं समणसाहस्सीणं कतरे अणगारे महादुक्करतराए चेव महानिज्जरतराए चेव ? एवं खलु सेणिया ! इमासिं इंदभूतिपामोक्खाणं चोद्दसन्हं समणसाहस्सीणं धण्णे अणगारे महादुक्करकारए चेव माहाणिज्जरतराए चेव । से केणट्ठेणं भंते ! एवं वुच्चति इमासिं जाव साहस्सीणं धण्णे अणगारे महादुक्करकारए महाणिज्जरतराए ? एवं खलु सेणिया ! तेणं कालेणं तेणं समएणं काकंदीणामं णयरी होत्था उप्पिं पासायवडिंसए विहरति । तते णं अहं अण्णदा कदाइ पुव्वाणुपुव्वीए चरमाणे गामाणुगामं दूइज्जमाणे जेणेव काकंदी नगरी जेणेव सहसंबवणे उज्जाणे तेणेव उवागए अहापडिरूवं उग्गहं उ० २ संजमेणं जाव विहरामि, परिसा णिग्गता तहेव जाव पव्वइते जाव बिलमिव जाव आहारेति,

॥900॥

धण्णस्स अणगारस्स पादाणं सरीरवण्णओ सव्वो जाव उवसोभेमाणे २ चिट्ठति, से तेणट्ठेणं सेणिया ! एवं वुच्चति-इमासिं चोद्दसन्हं समणसाहस्सीणं धण्णे अणगारे महादुक्करकारए महाणिज्जरतराए चेव । तते णं से सेणिए राया समणस्स भगवओ महावीरस्स अंतिए एयमट्ठं सोच्चा णिसम्म हट्ठतुट्ठ० समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेति २ वंदति नमंसति २ जेणेव धण्णे अणगारे तेणेव उवागच्छति २ धण्णं अणगारं तिक्खुत्तो आयाहिणपयाहिणं करेति करेत्ता वंदति नमंसति २ एवं वयासी-धण्णेऽसि णं तुमं देवाणु० सुपुण्णेऽसि० सुकयत्थे सुकयलक्खणे सुलद्धे णं देवाणुप्पिया ! तव माणुस्सए जम्मजीवितफलेत्तिकट्टु वंदति णमंसति २ जेणेव समणे भगवं० तेणेव उवागच्छति उवागच्छित्ता समणं भगवं० तिक्खुत्तो वंदति णमंसति २ जामेव दिसिं पाउब्भूए तामेव दिसिं पडिगते । तते णं तस्स धण्णस्स अणगारस्स अण्णया कयाति पुव्वरत्तावरत्तकाले धम्मजागरियं० इमे एतारूवे अज्झत्थिए एवं खलु अहं इमेणं ओरालेणं जहा खंदओ तहेव चिंता आपुच्छणं थेरेहिं सद्धिं विउलं दूरुहति मासियाए संलेहणाए णवमासपरियातो जाव कालमासे कालं किच्चा उड्ढं चंदिमजाव णव य गेविज्जविमाणपत्थडे उड्ढं दूरं वीतिवइत्ता सव्वट्ठसिद्धे विमाणे देवत्ताए उववण्णे, थेरा तहेव उत्तरंति जाव इमे से आयारभंडए, भंतेत्ति भगवं गोतमे तहेव पुच्छति जहा खंदयस्स भगवं वागरेति जाव सव्वट्ठसिद्धे विमाणे उववन्ने । धण्णस्स णं भंते ! देवस्स केवतियं कालं ठिती पन्नत्ता ? गोयमा ! तेत्तीसं सागरोवमाइं ठिती पण्णत्ता । से णं भंते ! ततो देवलोगातो कहिं गमिहिति ? कहिं उववज्जिहिति ? गोयमा ! महाविदेहे वासे सिज्झिहिति । इति । वृत्तिस्तु सुगमत्वादस्य नास्ति । एतेन च धन्यकेन नवमासपर्यायेण किं योगोद्वहनं कृतं ? एकादशाङ्गी स च श्रूयते एव, तस्मादनागमिकं योगोद्वहनमिति यत्केचित्प्रलपन्ति तच्चाकर्णयितुमनर्हम्, यत आगमव्यवहारिव्यवहारस्यान्यैरनुगन्तुमशक्यत्वात् । सङ्क्षेपेण तदुद्वहनस्य सम्भाव्यमानत्वादन्यत्र सिद्धान्ते विस्तरतो योगोद्वहनविधेऽभिहितत्वाच्चेति ।

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलश्रीजगद्गुरुभट्टारकश्रीहीरविजयसूरिशिष्योपाध्यायश्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे विशेषसमुच्चयापरनाम्नि अनुत्तरोपपातिकविचारनामा नवमस्तरङ्गः ॥ ९ ॥

रागद्वेषविनिर्मुक्तैर्जिनैर्जनहिताय यः । उपदिष्टः स इष्टानि, वितनोतु जिनागमः ॥ १ ॥

अथ प्रश्नव्याकरणविचारा लिख्यन्ते-

ननु आत्मनि प्रमाणाभावः, प्रत्यक्षादिप्रमाणचतुष्ठयाविषयत्वात् । न च घटमहं जानामीत्याद्यहंप्रत्ययनिर्णितोऽयमिति अस्याऽतात्विकत्वात्, इतरथा गौरोऽहं स्थूलोऽहमित्यादिप्रत्ययस्य तात्विकत्वापत्त्यात्मनि स्थूलत्वाद्यापत्तेः हसनजल्पनादिचेष्टाश्चेमाः कायाकारपरिणभूतपञ्चकोत्था खदिरताम्बूलचूर्णक्रमुकसंयोगोत्पन्नरागवदित्यादिनास्तिकमतनिराचिकीर्षया परमिथ्यात्विमतनिराचिकीर्षया चामगो लिख्यते-

अवरे णत्थिकवादिणो वामलोकवादी भणंति-सुण्णंति णत्थि जीवो, ण जाइ इह परे वा लोए, न य किंचिवि फुसइ पुण्णपावं, नत्थि फलं सुकयदुक्कयाणं, पंचमहाभूतियं सरीरं भासंति, हे वातजोगजूत्तं, पंच य खंधे भणंति केई, मणं च मणजीविया वदंति, वाउ जीवो त्ति एवमाहंसु, सरीरं सादीयं सणिधणं इह भवे एगे भवे तस्स विप्पणासंमि सव्वणासो त्ति एवं जंपंति मुसावादी, तम्हा दाणवयपोसहाणं तवसंजमबंभचेरकल्लाणमादियाणं णत्थि फलं, णवि य पाणिवहं अलिअवयणें, न चेव चोरिक्ककरणं परदासेवणं वा, सपरिग्गहपावकम्मकरणंपि णत्थि किंचि, ण णेरइयतिरियमणुयाण जोणी, ण देवलोको वा अत्थि, ण य अत्थि सिद्धिगमणं, अमापियरोवि अत्थि, णवि अत्थि पुरिसकारो, पच्चक्खाणमवि णत्थि, णवि अत्थि कालमच्चू, अरहंता वा चक्कवट्टी बलदेवा वासुदेवा नत्थि, णेवत्थि केवि रिसओ धम्माधम्मफलं वा णेव अत्थि किंचि बहूअं व थोवकं वा, तम्हा एवं विजाणिऊण जहा सुबहुइंदियाणुकूलेसु सव्वविसएसु वट्टह, णत्थि कावि किरिआ वा अकिरिआ वा एवं भणंति, णत्थिकवादिणो वामलोगवादी । इमंपि बितियं कुदंसणं असब्भाववादिणो पण्णवेंति मूढा-संभूओ अंडकाओ लोको, संयभूणा सयं च निम्मिओ, एवं एतं आलियं पयावइणा इसरेण य कयंति केई, एवं विण्हुमयं कसिणमेव य जगंति केई, एवमेके वदंति मोसं एको आया अकारको वेदको य सुकयस्स दुक्कयस्स, करणाणि कारणाणि य सव्वहा सव्वहिं च णिच्चो य णिक्किओ निग्गुणो य, अणुवलेवओ (अन्नो य लेवओ) त्तिवि य एवमाहंसु असब्भावं । जंपि इहं किंचि जीवलोगे दीसइ सुकयं वा दुक्कयं वा । एयं जइच्छाए वा सभावेण वावि दइवतप्पभावओ वावि भवति । णत्थित्थ किंचि कयकं तत्तं लक्खणविधाणं णियतीयकारिका, एवं केइ जंपंति इड्ढिरससातगारवपरा । वृत्तिर्यथा-तथा अपरे-उक्तेभ्योऽन्ये नास्तिकवादिनो-लोकायतिकाः वामं-प्रतीपं लोकं वदन्ति ये सतां लोकवस्तूनामसत्त्वस्य प्रतिपादनात्ते वामलोकवादिनो भणन्ति-प्ररूपयन्ति, किं ?

शून्यमिति जगदिति गम्यते कथं ? आत्माद्यभावात्, तदेवाह-नास्ति जीवः तत्प्रसाधकप्रमाणाभावात्, स हि न प्रत्यक्षग्राह्योऽतीन्द्रियत्वेन तस्याभ्युपगतत्वात्, नाप्यनुमानग्राह्यः प्रत्यक्षाप्रवृत्तावनुमानस्याप्यप्रवृत्तेः, आगमानां च परस्परतो विरुद्धत्वेनाप्रमाणत्वादिति, असत्त्वादेवासौ न याति-न गच्छति ' इहे ' ति मनुष्यापेक्षया मनुष्यलोके, परे वा परस्मिन् तदपेक्षयैव देवादिलोके, न च किञ्चिदपि स्पृशति बध्नाति पुण्यपापं-शुभाशुभं कर्म, नास्ति फलं सुकृतदुष्कृतानां पुण्यपापकर्मणां जीवासत्वेन तयोरप्यसत्वात्, तथा पञ्चमहाभौतिकं शरीरं भाषन्ते ' हे ' इति निपातो वाक्यालङ्कारे वातयोगयुक्तं-प्राणवायुना सर्वक्रियासु प्रवर्त्तितमित्यर्थः । तत्र पञ्चमहाभौतिकमिति महान्ति च तानि लोकयव्यापकत्वाद्भूतानि च सद्भूतवस्तूनि महाभूतानि, तानि चामूनि-पृथिवी कठिनारूपा आपो द्रवलक्षणाः तेज उष्णरूपम् वायुश्चलनलक्षणः आकाशं शुषिरलक्षणमिति, एतन्मयमेव शरीरं नापरः शरीरवर्त्ती तन्निष्पादकोऽस्ति जीवः इति विवक्षा । तथाहि-भूतान्येव सन्ति प्रत्यक्षेण तेषामेव प्रतीयमानत्वात् तदितरस्य तु सर्वथाऽप्रतीयमानत्वात्, यत्तु चैतन्यं भूतेषूपलभ्यते तद्भूतेष्वेव कायाकारपरिणतेष्वभिव्यज्यते मद्याङ्गेषु समुदितेषु मदशक्तिवत्, तथा न भूतेभ्योऽतिरिक्तं चैतन्यं कार्यत्वान्मृदो घटवदिति, ततो भूतानामेव चैतन्याभिव्यक्तिर्जलस्य बुद्बुदाभिव्यक्तिवदिति, अलीकवादिता चैषामात्मनः सत्त्वात्, सत्त्वं च प्रमाणोपपत्तेः प्रमाणं च सर्वजनप्रतीतं जातिस्मरणाद्यन्यथाऽनुपपत्तिलक्षणमनेकधा शास्त्रान्तरप्रसिद्धमिति । न च भूतधर्मश्चैतन्यं तद्भावेऽपि तस्याभावाद्विवक्षितभूताभावेऽपिं प्रेताद्यवस्थायां चैतन्यसद्भावाच्चेति । ' पंच य खंधे भणंति केई ' त्ति पंच च स्कंधान् रूपवेदनाविज्ञानसंज्ञासंस्काराख्यान् भणन्ति केचिदिति-बौद्धाः, तत्र रूपस्कन्धः-पृथिवीधा-त्वादयो रूपादयश्च वेदनास्कन्धः पुनः-सुखा दुःखा सुखदुःखेति त्रिविधवेदनास्वभावः, विज्ञानस्कन्धस्तु-रूपादिविज्ञानलक्षणः, संज्ञास्कन्धश्च-संज्ञानिमित्तोद्ग्राहणात्मकः प्रत्ययः, संस्कारस्कन्धः पुनः-पुण्यापुण्यादि धर्मसमुदाय इति, न चैतेभ्यो व्यतिरिक्तः कश्चिदात्माख्यपदार्थोऽध्य-क्षादिभिरवसीयते इति । तथा ' मणं च मणजीविया वदंति ' त्ति न केवलं पञ्चैव स्कन्धान् मनश्च-मनस्कारो रूपादिज्ञानलक्षणानामुपा-दानकारणभूतो यमाश्रित्य परलोकोऽभ्युपगम्यते बौद्धैः, मन एव जीवो येषां मते ते मनोजीवाः त एव मनोजीविकाः, अलीकवादिता चैषां सर्वथाऽननुगामिनि मनोमात्ररूपे जीवे कल्पिते परलोकासिद्धेः, तदसिद्धिश्चावस्थितस्यैकस्यात्मनोऽसत्त्वान्मनोमात्रात्मनः क्षणान्तरस्यैवोत्पादात् अकृताभ्यागमादिदोषप्रसङ्गात्, कथञ्चिदनुगामिनि तु मनसि जीवत्वाभ्युपगमः सम्यक् एवेति । तथा-" वाउजीवोत्ति

एवमाहंसु " त्ति वातः-उच्छ्वासादिलक्षणो जीव इत्याहुरेके, सद्भावाभावयोर्जीवनमरणव्यपदेशात् नान्यः परलोकयाय्यात्माऽस्तीति, अलीकवादिता चैषां वायोर्जडत्वेन चैतन्यरूपजीवत्वायोगात्, तथा शरीरं सादि उत्पन्नत्वात् सनिधनं क्षयदर्शनात् ' इह भवे एगे भवे ' त्ति इह भव एव प्रत्यक्षजन्मैव एको भवः-एकं जन्म नान्यः परलोकोऽस्ति प्रमाणविषयत्वात्, तस्य-शरीरस्य विविधैः प्रकारैः प्रकृष्टो नाशो विप्रणाशस्तस्मिन् सति सर्वनाश इति नात्मा शुभाशुभरूपं वा कर्म विशिष्टमवशिष्यते इति, एतत्-एकमुक्तप्रकारं ' जंपंति ' जल्पन्ति, के ? मृषावादिनः, मृषावादिता चैषां जातिस्मरणादिना जीवपरलोकसिद्धेः । तथा किमन्यद्वदन्ति ? इत्याह-यस्मात् शरीरं सादिकमित्यादि तस्माद्दान व्रतपौषधानां-वितरणनियमपर्वोपवासानाम् तथा तपो-अनशनादि संयमः-पृथिव्यादिरक्षा ब्रह्मचर्यं प्रतीतं एतान्येव कल्याणं कल्यामहेतुत्वात् तदादिर्येषां ज्ञानश्रद्धादीनां तानि तथा तेषां नास्ति फलं-कर्मक्षयसुगतिगमनादिकम्, नापि चास्ति प्राणिवधालीकवचनम-शुभफलसाधनतयेति गम्यम्, न चैव-नैव चौर्यकरणं परदारसेवनं वाऽस्त्यशुभफलसाधनतयैव, सह परिग्रहेण यद्वर्त्तते तत्सपरिग्रहं तच्च तत्पापकर्मकरणं च-पातकक्रियासेवनं तदपि नास्ति किञ्चित्क्रोधमानाद्यासेवनरूपम्,नरकादिका च जगतो विचित्रता स्वभावादेव न कर्मजनिता, तदुक्तम्- " कण्टकस्य च तीक्ष्णत्वं, मयूरस्य विचित्रता । वर्णाश्च ताम्रचूडानां, स्वभावेन भवन्ति हि ॥ १ ॥ " इति । मृषावादिता चैवमेतेषाम्-स्वभावो हि जीवाद्यर्थान्तरभूतस्तदा प्राणातिपातादिजनितं कर्मैवासौ, अथानर्थान्तरभूतस्ततो जीव एवासौ, तदव्यतिरेकात्तत्स्वरूपवत्, ततो निर्हेतुका नारकादिविचित्रता स्यात्, न च निर्हेतुकं किमपि भवति अतिप्रसङ्गादिति । तथा न नैरयिकतिर्यग्मनुजानां योनिः-उत्पत्तिस्थानं, पुण्यपापकर्मफलभूताऽस्तीति प्रकृतम्, न देवलोको वाऽस्तीति पुण्यकर्मफलभूतः नैवाऽस्ति सिद्धिगमनं सिद्धेः सिद्धस्य चाभावात्, अंबापितरावपि न स्तः उत्पत्तिमात्रनिबन्धनत्वात् मातापितृत्वस्य, न चोत्पत्तिमात्रनिबन्धनस्य मातापितृतया विशेषो युक्तः, युतः कुतोऽपि किञ्चिदुत्पद्यते एव, यथा-सचेतनात्सचेतनं यूकामत्कुणादि अचेतनं च मूत्रपुरीषादि, अचेतनाच्च सचेतनं यथा काष्ठाद् घुणकीटकादि अचेतनं च चूर्णादि, तस्माज्जन्यजनकभावमात्रमर्थानामस्ति नान्यो मातापितृपुत्रादिर्विशेष इति, तदभावात्तद्भोगविनाशापमाननादिषु न दोष इति भावः, मृषावादिता चैषां वस्त्वन्तरस्य पित्रोश्च जनकत्वे समानेऽपि तयोरत्यन्तहिततया विशेषवत्त्वेन सत्त्वात्, हितत्वं च तयोः प्रतीतमेव, आह च-" दुःप्रतिकारौ " इत्यादि, नाप्यस्ति पुरुषकारः, तं विनैव नियतितः सर्वप्रयोजनानां सिद्धेः, उच्यते च-" प्राप्तव्यो

नियतिबलाश्रयेण योऽर्थः, सोऽवश्यं भवति नृणां शुभोऽशुभो वा । भूतानां महति कृतेऽपि हि प्रयत्ने, नाभाव्यं भवति न भाविनोऽस्ति नाशः ॥ १ ॥ " मृषावादिता चैषां सकललोकप्रतीतपुरुषकारापलापेन प्रमाणातीतनियतिमताभ्युपगमादिति । तथा प्रत्याख्यानमपि नास्ति धर्मसाधनतया धर्मस्यैवाभावादिति, अस्य च सर्वज्ञवचनप्रामाण्येनास्तित्वात्तद्वादिनामसत्यता । तथा नैवास्ति कालमृत्युः तत्र कालो नास्ति अनुपलम्भात्, यच्च वनस्पतिकुसुमादिकाललक्षणमाचक्षते तत्तेषां स्वरूपमिति मन्तव्यम्, असत्यता चैषामपि स्वरूपस्य वस्तुनोऽनतिरेकात् कुसुमादिकरणमकारणं तरूणां स्यात् । तथा मृत्युः-परलोकप्रयाणलक्षणोऽसावपि नास्ति, जीवाभावेन परलोकगमनाभावात्, अथवा कालक्रमेणविवक्षितायुष्ककर्मणः सामस्त्यनिर्जरावसरे मृत्युः कालमृत्युः, तदभावश्चायुष एवाभावात्, तथा अर्हदादयो ' नत्थि ' त्ति न सन्ति प्रमाणाविषयत्वात् । ' नेवत्थि केवि रिसओ ' त्ति नैव सन्ति केचिदपि ऋषयो-गौतमादिमुनयः प्रमाणाविषयत्वादेव, वर्त्तमानकाले वा ऋषित्वस्य साध्वनुष्ठानस्यासत्त्वात्, सतोऽपि वा निष्फलत्वादिति अत्र शिष्यादिप्रवाहानुमेयत्वादर्हदादिसत्त्वस्यानन्तरोक्तत्वात् वादिनाम-सत्यता । ऋषित्वस्यापि सर्वज्ञवचनप्रामाण्येन सर्वदा भावादित्याज्ञाग्राह्यार्थापलापिनां सर्वत्रासत्यवादिता भावनीयेति, तथा धर्माधर्मफलमपि नास्ति किञ्चिद् बहुकं वा स्तोकं वा, धर्माधर्मयोरदृष्टत्वेन नास्तित्वात् ' नत्थि फलं सुकय ' इत्यादि, यदुक्तम्-प्राक्तत्सामान्यजीवापेक्षया यच्च ' धम्माधम्म ' इत्यादि तद्दृश्यापेक्षयेति न पुनरुक्ततेति । ' तम्ह ' त्ति यस्मादेवं तस्मादेवं-उक्तप्रकारं वस्तु विज्ञाय ' जहा सुबहुइंदियाणुकूलेसु ' त्ति यथा-यत्प्रकाराः सुबहु-अत्यर्थमिन्द्रियानुकूला ये ते तथा तेषु सर्वेषु विषयेषु वर्त्तितव्यम्, नास्ति काचित् क्रिया वा-अनिन्द्यक्रिया अक्रिया वा-पापक्रिया पापेतरक्रिययोरास्तिककल्पितत्वेनापरमार्थिकत्वात्, भणंति च " पिब खाद च चारुलोचने ! यदतीतं वरगात्रि ! तन्न ते । न हि भिरु ! गतं निवर्त्तते, समुदयमात्रमिदं कलेवरम् ॥ १ ॥ " एवमित्यादि निगमनम् । तथा इदमपि द्वितीयं नास्तिकदर्शनापेक्षया कुदर्शनं कुमतमसद्भाववादिनः प्रज्ञापयन्ति मूढाः-व्यामोहवन्तः, कुदर्शनता च वक्ष्यमाणस्यार्थस्याप्रमाणत्वात्तद्वादिप्रोक्त-प्रमाणस्य च प्रमाणाभासत्वाद्भावनीया, किम्भूतं दर्शनं ? इत्याह-सम्भूतो-जातोऽण्डकात्-जन्तुयोनिविशेषात् लोकः-क्षितिजलानलानिलवननर-नरकनाकितिर्यग्रूपः, तथा स्वयम्भूवा-ब्रह्मणा स्वयं च-आत्मना निर्मितो-विहितः तत्राण्डकप्रसूतभुवनवादिनां मतमित्थमाचक्षते-" पुव्वं आसि जगमिणं, पंचमहब्भूयवज्जियगभीरं । एगण्णवं जलेणं, महप्पमाणं तहिं अंडं ॥ १ ॥ वीईपरेण घोलंत, अच्छिउं सुइरकालओ

फुट्टं । फुट्टुं दुभागजायं, अब्भं भूमी य संवुत्तं ॥ २ ॥ तत्थ सुरासुरनारगसमणुय सचउप्पयं जगं सव्वं । उप्पण्णं भणियमिणं, बंभंडपुराणसत्थंमि ॥ ३ ॥ " तथा स्वयम्भूनिर्मितजगद्वादिनो भणन्ति-" आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् । अवितर्क्यमविज्ञेयं, प्रसुप्तमिव सर्वतः ॥ १ ॥ तस्मिन्नेकार्णवीभूते, नष्टस्थावरजङ्गमे । नष्टामरनरे चैव, प्रणष्टोरगराक्षसे ॥ २ ॥ केवलं गह्वरीभूते, महाभूतविवर्जिते । अचिन्त्यात्मा विभुस्तत्र, शयानस्तप्यते तपः ॥ ३ ॥ तत्र तस्य शयानस्य, नाभेः पद्मं विनिर्गतम् । तरुणरविमण्डलनिभं, हृद्यं काञ्चनकर्णिकम् ॥ ४ ॥ तस्मिन् पद्मे भगवान्, दण्डी यज्ञोपवीतसंयुक्तः । ब्रह्मा तत्रोत्पन्नस्तेन जगन्मातरः सृष्टाः ॥ ५ ॥ अदितिः सुरसङ्घानां, दितिरसुराणां मनुर्मनुष्याणाम् । विनता विहङ्गमानां, माता विश्वप्रकाराणाम् ॥ ६ ॥ कद्रुः सरीसृपाणां, सुलसा माता च नागजातीनाम् । सुरभिश्चतुष्पदानामिला पुनः सर्वबीजानाम् ॥ ७ ॥ " इति । एवमुक्तक्रमेणैतदनन्तरोदितं वस्तु अलीकं भ्रान्तज्ञानिभिः प्ररूपितत्वात्, तथा प्रजापतिना-लोकप्रभुणा ईश्वरेण च-महेश्वरेण च कृतं-विहितमिति केचिद्वादिनो भणन्तीति प्रकृतं, भणन्ति चेश्वरवादिनः-बुद्धिमत्कारणपूर्वकं जगत् संस्थानविशेषयुक्तत्वात् घटादिवदिति, कुदर्शनता चास्य वल्मीकबुद्बुदादिभिर्हेतोरनैकान्तिकत्वात्, कुलालादितुल्यस्य बुद्धिमत्कारणस्य साधनेन चेष्टविघातकारित्वादिति, तथा एवं यथा ईश्वरकृतं तथा विष्णुमयं-विष्ण्वात्मकं कृत्स्नमेव जगदिति केचिद्वदन्तीति प्रकृतं, भणन्ति च एतन्मतावलंबिनः-" जले विष्णुः स्थले विष्णुर्विष्णुः पर्वतमस्तके । ज्वालामालाकुले विष्णुः, सर्वं विष्णुमयं जगत् ॥ १ ॥ " तथा-" अहं च पृथिवी पार्थ ! वाप्वग्निजलमप्यहम् । वनस्पतिगतश्चाहं, सर्वभूतगतोऽप्यहम् ॥ २ ॥ " तथा " सो किल जलयसमुत्थेणुदएणेगन्नवंमि लोगंमि । वीतीपरंपरेणं घोलंतो उदयमज्झंमि ॥ ३ ॥ " स किल मार्कण्डर्षिः " पेच्छइ सो तसथावरपणट्ठसुरनरतिरिक्खजोणीयं । एगन्नवं जगमिणं महाभूयविवज्जियं गुहिरं ॥ ४ ॥ एवंविहे जगंमी, पेच्छइ निग्गोहपायवं सहसा । मंदरगिरिं व तुंगं महासमुद्दव विच्छिन्नं ॥ ५ ॥ खंधंमि तस्स सयणं, अच्छइ तहिं बालओ मणभिरामो । (विष्णुरित्यर्थः) संविद्धो सुद्धहियओ मिउकोमलकुंचियसुकेसो ॥ ६ ॥ हत्थो पसारिओ से, महरिसिणा एहि तत्थ भणिओ य । खंधे ममं विलग्गसु, मा मरिहिसि उदगवुड्ढीए ॥ ७ ॥ तेण य घेत्तुं हत्थे, उ मीलिओ सो रिसि तओ तस्स पिच्छइ उदरंमि जयं ससेलवणकाणणं सव्वं ॥ ८ ॥ " ति, पुनः सृष्टिकाले विष्णुना सृष्टम् कुदर्शनता चास्य प्रतीतिबाधितत्वात्, तथा एवं वक्ष्यमाणेन न्यायेन एके-केचनात्माऽद्वैतवाद्यादयो वदन्ति

॥१०६॥

मृषा-अलीकं यदुत एक आत्मा, तदुक्तम्-" एक एव हि भूतात्मा, भूते भूते व्यवस्थितः । एकधा बहुधा चैव, दृश्यते जलचंद्रवत् ॥ १ ॥ " तथा " पुरुष एवेदं ग्निं सर्वं यद्भूतं यच्च भाव्यम् " इत्यादि, कुदर्शनता चास्य सकललोकविलोक्यमानभेदनिबन्धनव्यवहारोच्छेदप्रसङ्गात्, तथा अकारकः-सुखदुःखहेतूनां पुण्यपापकर्मणामकर्त्तात्मेत्यन्ये वदन्ति, अमूर्त्तत्वनित्यत्वाभ्यां कर्तृत्वानुपपत्तेरिति, कुदर्शनता चास्य संसार्यात्मनो मूर्त्तत्वेन परिणामित्त्वेन च कर्तृत्वोपपत्तेः, अकर्तृत्वे च अकृताभ्यागमप्रसङ्गात्, तथा वेदकश्च-प्रकृतिजनितस्य सुकृतस्य दुष्कृतस्य च प्रतिबिंबोदयन्यायेन भोक्ता, अमूर्त्तत्वे हि कदाचिदपि वेदकता न युक्ताऽऽकाशस्येवेति कुदर्शनाताऽस्य तथा सुकृतदुष्कृतस्य, च कर्मणः करणानि-इन्द्रियाणि कारणानि-हेतवः सर्वथा-सर्वप्रकारैः सर्वत्र देशे काले च न वस्त्वन्तरं कारणमिति भावः, करणान्येकादशः, तत्र वाक्पाणिपादपायूपस्थलक्षणानि पञ्च कर्मेन्द्रियाणि स्पर्शनादीनि तु पञ्च बुद्धीन्द्रियाणि एकादशं च मनः इति, एषां चाचेतनावस्थायामकारकत्त्वात्पुरुषस्यैव कारकत्वेन कुदर्शनत्वमस्य, तथा नित्यश्चासौ, यदाह-" नैनं छिन्दन्ति शस्त्राणि, नैनं दहति पावकः । न चैनं क्लेदयन्त्यापो, न शोषयति (नैनं वहति) मारुतः ॥ १ ॥ अच्छेद्योऽयमभेद्योऽयममूर्त्तोऽयं सनातनः " इति, असच्चैतदेकान्तनित्यत्वे हि सुखदुःखबन्धमोक्षाद्यभावप्रसङ्गात्, तथा निष्क्रियः सर्वव्यापित्वेनावकाशाभावाद्गमनागमनादि क्रियावर्जितः, असच्चैतद्देहमात्रोपलभ्यमानतद्गुणत्वेन तन्नियतत्वात्, तथा निर्गुणश्च सत्वरजस्तमोलक्षणगुणत्रयव्यतिरिक्तत्वात् प्रकृतेरेव ह्येते गुणा इति, यदाह-" अकर्त्ता निर्गुणो भोक्ता, आत्मा कपिलदर्शने । " इति, प्रसिद्धं चास्य सर्वथा निर्गुणत्वं ' चैतन्यं पुरुषस्य स्वरूपं ' इति अभ्युपगमात्, तथा ' अणुवलेवउ ' त्ति अनुपलेपकः कर्मबन्धनरहितः, आह च- अस्मान्न बध्यते नापि, मुच्यते नापि संसरति कश्चित् । संसरति बध्यते मुच्यते च, नानाश्रया प्रकृतिः ॥ १ ॥ " इति, असच्चैतन्मुक्तामुक्तयोरेवमविशेषप्रसङ्गात्, पाठान्तरम्-' अन्नो य लेवउ ' त्ति तत्रान्यश्चापरो लेपतः कर्मबन्धनादिति, एतदप्यसत् कथञ्चिदिति शब्दानुपादानात्, इत्यपि च, इति-उपदर्शने अपि च-अलीकवादान्तरसमुच्चयार्थः, तथा एवं वक्ष्यमाणप्रकारेण ' आहंसु ' त्ति ब्रुवते स्म असद्भावं-सन्तमर्थं यदुत यदपि-यदेव सामान्यतः सर्वमित्यर्थः, इह-अस्मिन् किञ्चिद्-अविवक्षितविशेषं जीवलोके-मर्त्यलोके, दृश्यते, सुकृतं वा आस्तिकमतेन सुकृतफलं सुखमित्यर्थः, दुष्कृतं वा दुष्कृतफलं दुःखमित्यर्थः, एतत् ' जइच्छाए व ' त्ति यदृच्छया वा स्वभावेन चापि दैवतप्रभावतो वाऽपि-विधिसामर्थ्यतो वाऽपि भवति, न पुरुषकारः कर्म वा

हिताहितनिमित्तमिति भावः, तत्र अनभिसन्धिपूर्विकार्थप्राप्तिर्यदृच्छा, पठ्यते च-" अतर्कितोपस्थितमेव सर्वं, चित्रं जनानां सुखदुःखजातम् । काकस्य तालेन यथाऽभिघातो, न बुद्धिपूर्वोऽत्र वृथाऽभिमानः ॥ १ ॥ " तथा -" सत्यं पिशाचाः स्म वने वसामो, भेरीं कराग्रैरपि न स्पृशामः । यदृच्छया सिध्यति लोकयात्रा, भेरीं पिशाचाः परिताडयन्ति ॥ २ ॥ " इति, स्वभावः पुनर्वस्तुतः स्वत एव तथा परिणति भावः, उक्तं च-" कः कण्टकानां प्रकरोति तैक्ष्ण्यं, विचित्रभावं मृगपक्षिणां च । स्वभावतः सर्वमिदं प्रवृत्तं, न कामचारोऽस्ति कुतः प्रयत्नः ? ॥ ३ ॥ " इति । दैवं-विधिरिति लौकिकी भाषा, तत्रोक्तम्-" प्राप्तव्यमर्थं लभते मनुष्यः, किं कारणं दैवमलङ्घनीयम् । तस्मान्न शोचामि न विस्मयो मे, यदस्मदीयं न हि तत्परेषाम् ॥ ४ ॥ द्वीपादन्यस्मादपि, मध्यादपि जलनिधेर्दिशोऽप्यन्तात् । आनीय झटिति घटयति, विधिरभिमतमभिमुखीभूतः ॥ ५ ॥ " इति, असद्भूतता चात्र प्रत्येकमेषां, जिनमतप्रतिकुष्टत्वात्, तथाहि- " कालो सहाव नियई, पुव्वकयं पुरिसकारणेगंता । मिच्छत्तं ते चेव उ, समासओ होंति सम्मत्तं ॥ १ ॥ " इति । तथा नास्ति- न विद्यतेऽत्र लोके किञ्चिच्छुभमशुभं वा कृतकं-पुरुषकारनिष्पन्नं, कृतं-च कार्यं प्रयोजनमित्यर्थः, पाठान्तरेण-' नत्थि किंचि कयकं तत्तं ' तत्र तत्त्वं वस्तुस्वरूपमिति, तथा लक्षणानि-वस्तुरूपाणि विधाश्च-भेदा लक्षणविधाः तासां लक्षणविधानाम् नियतिश्च-स्वभावविशेषश्च कारिका-कर्त्री, सा च पदार्थानामवश्यन्तया यद्यथा भवने प्रयोजयित्री भवितव्यतेत्यर्थः । अन्ये त्वाहुः-यद् मुद्गादीनां राद्धिस्वभावत्वमितरद्वा स स्वभावः यच्च राद्धावपि नियतरसत्वं न शाल्यादिरसता सा नियतिरिति, तत्र चोक्तम्-" न हि भवति यन्नभाव्यं, भवति च भाव्यं विनाऽपि यत्नेन । करतलगतमपि नश्यति, यस्य तु भवितव्यता नास्ति ॥ १ ॥ " असत्यता चास्य पूर्ववद्वाच्या, एवमित्युक्तप्रकारेण केचिन्नास्तिकादयो जल्पन्ति-ऋद्धिरससातगौरवपरा ऋद्ध्यादिषु गौरवं-आदरस्तत्प्रधाना इत्यर्थः । इति श्रीप्रश्नव्याकरणद्वितीयाश्रवद्वारवृत्तौ ८६ प्रतौ १६-१७-१८-१९ । पत्रे ॥ १ ॥

ननु सांसारिककार्यनिमित्तं द्रौपद्यादिभिः पूजितत्वात् संसारनिमित्तमेव प्रतिमा दृश्यन्ते, न तु मुक्तिनिमित्तम्, यदि च मुक्तिनिमित्तं स्यात्तदा मुनीनामपि कुत्रापि निरवद्यं प्रतिमावन्दनमप्युक्तं स्यात्, अत्रोच्यते-अरे कुमतग्रस्त ! मुनीनामपि अत्यन्तबालादीनां चैत्यान्तानां यथोचितं वैयावृत्त्यं कर्त्तव्यमुक्तम्, तत्र चैत्यस्य तु अन्नादिसंपादनादिकं शरीरविश्रामणादिकं चायौक्तिकमिति वन्दनस्तवनादिकमेव तद्वैयावृत्त्यं, ततो मुनीनामपि चैत्यवन्दनस्तवनमुक्तमेव द्रष्टव्यम्, वैयावृत्त्यसूत्रं चेदम्

अह केरिसए पुणाइं आराहइ वयमिणं ? जे से उवहिभत्तपाणसंगहणादाणकुसले अच्चंतबाल १ दुब्बल २ गिलाण ३ वुड्ढ ४ खवगे ५ पवत्ति ६ आयरिय ७ उवज्झाए ८ सेहे ९ साहम्मिए १० तवस्सी ११ कुल १२ गण १३ संघ १४ चेइयट्ठे १५ निज्जरट्ठी वेयावच्चं अणिस्सियं दसविहं बहुविहं करेइ ॥ इति । वृत्तिर्यथा-अथ-परिप्रश्नार्थे कीदृशः पुनः ' आइं ' ति अलङ्कारे, आराधयति व्रतमिदम् ? इह प्रश्ने उत्तरमाह-' जे से ' इत्यादि, योऽसावुपधिभक्तपानानां दानं सङ्ग्रहणं च तयोः कुशलो-विधिज्ञो यः सः तथा, तथा बालश्च दुर्बलश्चेत्यादिसमाहारद्वन्द्वस्ततोऽत्यन्तं यद्बालदुर्बलग्लानवृद्धक्षपकं तत्तथा तत्र विषये वैयावृत्त्यं करोतीति योगः, प्रवृत्त्याचार्योपाध्याये इह द्वन्द्वैकत्वात्प्रवृत्त्यादिषु, तत्र प्रवृत्तिलक्षणं त्विदम्-" तवसंजमजोगेसुं, जो जोगो तत्थ तं पवत्तेइ । असुहं च नियत्तेई, गणतत्तिल्लो पवित्तीओ ॥ १ ॥ " इतरौ प्रतीतौ तथा ' सेहे ' त्ति शैक्षे-अभिनवप्रव्रजिते साधर्मिके-समानधर्मिके लिङ्गप्रवचनाभ्यां तपस्विनि-चतुर्थभक्तादिकारिणि, तथा कुलं-गच्छसमुदायरूपं चन्द्रादिकं, गणः-कुलसमुदायरूपः कोटिकादिकः सङ्घः-तत्समुदायरूपः, चैत्यानि-जिनप्रतिमाः एतासां योऽर्थः-प्रयोजनं स तथा, तत्र निर्जरार्थी-कर्मक्षयकामः वैयावृत्त्यं-व्यावृत्तकर्मरूपमुपष्टम्भमित्यर्थः, अनिश्रितं-कीर्त्यादिनिरपेक्षं दशविधं-दशप्रकारम्, आह च-" वेयावच्चं वावडभावो इह धम्मसाहणनिमित्तं । अन्नाइयाण विहिणा, संपायणमेस भावत्थो ॥ १ ॥ आयरिय १ उवज्झाए २ थेर ३ तवस्सी ४ गिलाण ५ सेहाणं ६ । साहम्मिय ७ कुल ८ गण ९ संघ १० संगयं तमिह कायव्वं ॥ २ ॥" बहुविधं-भक्तपानादिदानभेदेनानेकप्रकारं करोति । इति प्रश्नव्याकरणाङ्गद्वितीयश्रुतस्कन्धतृतीयाध्ययने ८६ प्रतौ ६४ पत्रे ॥ २ ॥

एतेन चतुर्दशोपकरणातिरिक्तमुपकरणं वस्त्रादिकं मुनिभिर्न रक्षणीयमित्याद्येकान्तेन यदभिधानं तदयौक्तिकं, उपध्यादिसङ्ग्रहं विना तद्दानस्यानुपपत्तेः, तथा एतेनैव च यद्गीतार्थैरपि भुक्तसंसार एव दीक्षणीयो नाष्टादिवार्षिकः, इत्याद्येकान्तेन यदभिधानं तदप्ययौक्तिकमेव, अन्यथाऽत्यन्तबालासम्भवे तद्वैयावृत्त्यस्याप्यसम्भवादिति ।

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरिशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे विशेषसमुच्चयापरनाम्नि प्रश्नव्याकरणविचारनामा दशमस्तरङ्गः ॥ १० ॥

कर्कशकुतर्कसङ्करदुर्धरतिमिरौघदिनकराकारम् । विश्वाधारं जिनमतमभिमतदं नौमि गुरुभक्त्या ॥ १ ॥

अथ विपाकाङ्गविचारा लिख्यन्ते-

केचिन्मिथ्यात्विकृतं सर्वं व्यर्थमेव मन्वते, तच्चायौक्तिकम्, मिथ्यात्विनाऽपि सुबाहुकुमारेण प्राग्भवे मुनिदानप्रभावात्संसारः परिध्वस्तो मनुजायुश्च निबद्धमिति श्रूयते । तथा हि-

ततेणं से सुमुहे गाहावती सुदत्तं अणगारं एज्जमाणं पासति २त्ता हट्ठतुट्ठे आसणातो अब्भुट्ठेति २त्ता पायपीठातो पच्चोरुहति २त्ता पाउयाओ अ ओमुयइ २त्ता एगसाडियं उत्तरासंगं करेइ २त्ता सुदत्तं अणगारं सत्तट्ठपयाइं अणुगच्छति २त्ता तिक्खुत्तो आयाहिणपयाहिणं करेति २ त्ता वंदति णमंसति २त्ता जेणेव भत्तघरे तेणेव उवागच्छति २त्ता सयहत्थेणं विउलेणं असणपाणखाइमसाइमेणं पडिलाभेस्सामि त्तिकट्टु हट्ठतुट्ठे । तते णं तस्स सुमुहस्स गाहावइस्स तेणं दव्वसुद्धेणं ३ तिविहेणं तिकरणसुद्धेणं सुदत्ते अणगारे पडिलाभिते समाणे संसारे परित्तीकते मणुस्साउए निबद्धे ॥ इति । वृत्तिस्तु सुगमत्वादस्य नास्ति । इति , श्रीविपाकद्वितीयश्रुतस्कन्धप्रथमाध्ययने ४६ प्रतौ ४४ पत्रे ॥ १ ॥

केचिच्च पौर्णमासीममावास्यां (च) विहाय त्रयोदशीचतुर्दश्योः पौषधं कुर्वन्ति, अपरे च पर्वतिथावेव पौषधोऽनुष्ठेयो, नान्यदेति वदन्ति । ते चोभयेऽपि मिथ्यावादिनो द्रष्टव्याः । ' चाउद्दसट्ठमुद्दिट्ठपुण्णिमासिणीसु ' इत्यत्र चतुर्थशीपौर्णमास्योः, चतुर्दश्यमावास्ययोरेव(वा)आराध्यत्वेनोक्तत्वात्, सुबाहुकुमारेण पौषधत्रयस्य कृतत्वाच्च । तत्सूत्रं चेदम्-

" ततेणं से सुबाहुकुमारे समणोवासए जाए, अहिगयजीवाजीवे जाव पडिलाभेमाणे विहरइ । ततेणं से सुबाहुकुमारे अण्णदा कदाइ चाउद्दसट्ठमुद्दिट्ठपुण्णिमासिणीसु जेणेव पोसहसाला तेणेव उवागच्छति, २ त्ता पोसहसालं पमज्जति २ त्ता उच्चारपासवणभूमिं पडिलेहेइ २ त्ता दब्भसंथारं संथरेइ २ त्ता दब्भसंथारं दुरूहइ २त्ता अट्ठमभतं पगिन्हति, पगिन्हेत्ता पोसहसालाए पोसहिए अट्ठमभत्तिए पोसहं पडिजागरमाणे विहरति । " इति विपाकद्वितीयश्रुतस्कन्धप्रथमाध्ययने ४६ प्रतौ ४४ पत्रे ॥ २ ॥

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलज़गद्गुरुभट्टारकश्रीहीरविजयसूरिशिष्योपाध्यायश्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे विशेषसमुच्चयापरनाम्नि श्रीविपाकविचारनामा एकादशस्तरङ्गः ॥ ११ ॥

समाप्तं चेदं विचाररत्नाकरे प्राच्यं तटम् ॥

॥१९०॥

अनेकसिद्धान्तविचाररत्नारम्ये गुरूपासनमार्गलभ्ये । विचाररत्नाकरनामशास्त्रे, प्राच्यं तटं प्राप्तमिदं समाप्तिम् ॥ १ ॥
पदैस्त्रिभिर्येन समस्तमेतत् त्रैलोक्यमाक्रान्तमहो महीयः । सनातनं तं नरकान्तकं च, सिद्धान्तगोविन्दमहं श्रयामि ॥ २ ॥

अथानुक्रमायाता उपाङ्गविचाराः प्रस्तूयन्ते । तत्र प्रथममौपपातिकविचारा यथा-

केचिच्चाविदितसूत्रतात्पर्याः ' जीवेणं भंते ! असंजय ' इत्यादिसूत्रं दर्शयन्तोऽकामनिर्जरालब्धदेवभवा जन्मान्तराराधका न भवन्त्येवेति निश्चयं वदन्ति तच्चासङ्गतं, टीकायां भाज्या, इति व्याख्यातत्वात् । सटीकं सूत्रं चेदम् -

" जीवे णं भंते ! असंजए अविरए अपडिहयपच्चक्खायपावकम्मे इतो चुए पेच्चा देवे सिया ? गोयमा ! अत्थेगतिया देवे सिया अत्थेगतिया णो देवे सिया । से केणट्ठेणं भंते ! एवं वुच्चति-अत्थेगतिया देवे सिया अत्थेगतिया णो देवे सिया ? गोयमा ! जे इमे जीवा गामागरनगरनिगमरायहाणिखेडकब्बडमडंबदोणमुहपट्टणासमसंबाहसन्निवेसेसु अक्कामतन्हाए अकामच्छुहाए अकामबंभचेरवासेणं अकामअन्हाणकसीयातवदंसमसगसेयजल्लमल्लपंकपरितावेणं अप्पतरो वा भुज्जतरो वा कालं अप्पाणं परिकिलेस्संति अप्पतरो भुज्जतरो वा कालं अप्पाणं परिकिलेसित्ता कालमासे कालं किच्चा अन्नतरेसु वाणमंतरेसु देवलोएसु देवत्ताए उववत्तारो भवंति, तहिं तेसिं गती तहिं तेसिं ठिती तहिं तेसिं उववाए पण्णते । तेसि णं भंते ! देवाणं केवतियं कालं ठिती पण्णत्ता ? गोयमा ! दसवाससहस्साइं ठिती पण्णत्ता । अत्थि णं भंते ! तेसिं देवाणं इड्ढी इ वा जुती इ वा जसे ति वा बले ति वा वीरिए ति वा पुरिसक्कारपरक्कमे ति वा ? हंता अत्थि । तेणं भंते ! देवा परलोगस्साराहगा ? णो इणेट्ठे समट्ठे " इति । वृत्तिर्यथा-' जे इमे जीवा ' इति य इमे प्रत्यक्षासन्ना जीवाः- पञ्चेन्द्रिय-तिर्यङ्मनुष्यलक्षणाः, ग्रामाकरादयः प्राग्वत्, ' अकामतन्हाए ' त्ति अकामानां-निर्जराद्यनभिलाषिणां सतां तृष्णा-तृट् अकामतृष्णा तया, एवमन्यत्पदद्वयम्, ' अकामअन्हाणगसीयातवदंसमसगसेयजल्लमल्लपंकपरितावेणं ' इह स्वेदः-प्रस्वेदो, याति-लगति चेति ' जल्लो ' रजोमात्रं, मलः-कठिनीभूतः, पङ्कः-स एव स्वेदेनाद्रीभूतः, अस्नानकादयस्तु प्रतीताः, अस्नानकादिभिर्यः परितापः स तथा तेन 'अप्पतरो वा भुज्जतरो वा कालं ' ति प्राकृतत्वेन विभक्तिपरिणामादल्पतरं वा भूयस्तरं वा कालं यावत् ' अन्नतरेसु ' त्ति बहुनां मध्ये एकतरेषु ' वाणमंतरेसु ' त्ति व्यन्तरेषु देवलोकेषु-देवजनेषु मध्ये, ' तहिं तेसिं गइ ' त्ति तस्मिन् वानमन्तरे देवलोके तेषामसंयतादिविशेषणजीवानां

।।999।।

गतिः-गमनं, ' ठिइ ' त्ति अवस्थानं, ' उववाओ ' त्ति देवतया भवनं, ' इड्ढी इ व ' त्ति ऋद्धिः परिवारादिसंपत् । ' जुती इ व ' त्ति द्युतिः-शरीराभरणादिर्दीप्तिः, इशब्दो निपातो वाक्यालङ्कारार्थः, इतिशब्दो वाऽयं कृतसन्धिप्रयोगउपदर्शनार्थः । ' जसे इ व ' त्ति यशःख्यातिः । वा शब्दो विकल्पार्थः, क्वचित्पठ्यते-' उट्ठाणे इ वा कम्मे इ व ' त्ति । तत्रोत्थानं-उर्द्धीभवनं, कर्म-उत्क्षेपणादिका क्रिया, ' बले इ व ' त्ति बलं-शारीरः प्राणः, ' वीरिए इ व ' त्ति वीर्यं-जीवप्रभवः प्राण एव ' पुरिसक्कारपरक्कमे इ व ' त्ति पुरुषकारः पुरुषत्वाभिमानः स एव निष्पादितफलः पराक्रमः, हंते ति' एवमेवार्थः, ' तेणं देवा परमलोगस्स आराहग ' त्ति ते अकामनिर्जरालब्धदेवभवा व्यन्तराः परलोकस्य-जन्मान्तरस्य निर्वाणसाधनानुकूलस्याराधकाः-निष्पादकाः इति प्रश्नः, नो इणट्ठे' त्ति नायमर्थः ' समट्ठे ' त्ति समर्थः-सङ्गतः इत्युत्तरम्, अयमभिप्रायः- ये हि सम्यग्दर्शनज्ञानपूर्वकानुष्ठानतो देवाः स्युः त एव अवश्यंतया आनन्तर्येण पारम्पर्येण वा निर्वाणानुकूलं भवान्तरमावर्जयन्ति, तदन्ये तु भाज्याः । इत्यौपपातिकसूत्रवृत्तौ ७० प्रतौ ६२ पत्रे ॥ १ ॥

पुनरपि जिनप्रतिमारिपुप्रतिबोधाय अम्मडेन यथा अन्यतीर्थिकदेवान्यतार्थिकपरिगृहीतार्हत्प्रतिमानिषेधपूर्वकमर्हत्प्रतिमावन्दनाद्यङ्गीकृतं, तथा लिख्यते-

" अम्मडस्स णो कप्पइ अन्नउत्थिया वा अन्नउत्थियदेवयाणि वा अन्नउत्थियपरिग्गहियाणि अरिहंतचेइयाणि वा वंदित्तए वा नमंसित्तए वा जाव पज्जुवासित्तए वा णन्नत्थ अरिहंते वा अरिहंतचेइयाणि वा " इति । वृत्तिर्यथा-' अन्नउत्थिए व ' त्ति अन्ययूथिका-आर्हतसङ्घापेक्षयाऽन्ये शाक्यादयः ' चेइयाइं ' त्ति अर्हच्चैत्यानि-जिनप्रतिमा इत्यर्थः । ' णन्नत्थ अरिहंतेहिं व ' त्ति न कल्पते इह योऽयं नेति निषेधः सोऽन्यत्रार्हद्भ्यः अर्हतो वर्जयित्वेत्यर्थः । इत्यौपपातिकसूत्रवृत्तौ ८३ प्रतौ ६७ पत्रे ॥ २ ॥

॥ इकि श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरिशिष्योपाध्याय श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे मध्यभागे औपपातिकविचारनामा प्रथमस्तरङ्गः ॥ १ ॥

यस्मात्प्रादुर्भवद्रत्नैरयत्नैर्भूष्यते सताम् । कण्ठपीठं नमस्तस्मै, श्रुतरोहणभूभृते ॥ १ ॥

अथ राजप्रश्नीयविचारा यथा-

॥१९२॥

श्रोत्रस्य द्वादशयोजनपरिमिते विषये सत्यपि दिव्यानुभावतोऽधिकविषयताऽपि श्रूयते । तथा हि-

तए णं से पाइत्ताणियाहिवई देवे सूरियाभेणं देवेणं एवं वुत्ते समाणे हट्ठ जाव हियए एवं देवो तहत्ति आणाए विणएणं वयणं पडिसुणेति २ त्ता जेणेव सूरियाभे विमाणे जेणेव सभा सुहम्मा जेणेव मेघोघरसियगंभीरमहुरसद्दा जोयणपरिमंडला सुस्सरा घंटा तेणेव उवागच्छति तेणेव उवागच्छिता तं मेघोघरसियं गंभीरमहुरसद्दं जोयणपरिमंडलं सुस्सरं घंटं तिक्खुत्तो उल्लालेइ । तते णं तीसे मेघोघरसियगंभीरमहुरसद्दाए जोयणपरिमंडलाए सुस्सराए घंटाए तिक्खुत्तो उल्लालियाए समाणीए से सूरियाभे विमाणे पासायविमाणा निक्खुडावडियसद्दघंटापडिसुयसयसहस्ससंकुला जाया यावि होत्थत्ति । वृत्तिर्यथा-' तए णं से ' इत्यादि, ' जाव पडिसुणेत्ता ' इति, अत्र यावच्छब्दकरणात् ' करयलपरिग्गहियं दसनहं सिरसावत्तं मत्थए अंजलिकट्टु (एवं देवो तहत्ति आणाए विणएणं वयणं पडिसुणेति) ' इति द्रष्टव्यम् । ' तिक्खुत्तो उल्लालेइ ' त्ति त्रिःकृत्वः-त्रीन् वारान् उल्लालयति-ताडयति । ततो ' ण ' मिति वाक्यालङ्कारे तस्यां-मेघौघरसितगम्भीरमधुरशब्दायां योजनपरिमण्डलायां सुस्वराभिधानायां घण्टायां त्रिःकृत्वस्ताडितायां सत्यां यत्सूर्याभविमानं तत्प्रासादनिष्कुटेषु च ये आपतिताः शब्दाः-शब्दवर्गणापुद्गलास्तेभ्यः समुच्छलितानि यानि घण्टाप्रतिश्रुतशतसहस्राणि घण्टाप्रतिशब्दलक्षाणि तैः सङ्कुलमपि जातमभूत् किमुक्तं भवति ? घण्टायां महता प्रयत्नेन ताडितायां ये विनिर्गताः शब्दपुद्गलास्तत्प्रतिघातवशतः सर्वासु दिक्षु विदिक्षु च दिव्यानुभावतः समुच्छलितैः प्रतिशब्दैः सकलमपि विमानमनेकयोजनलक्षमानमपि बधिरितमुपजायते इति । एतेन द्वादशभ्यो योजनेभ्यः समागतः शब्दः श्रोत्रग्राह्यो भवति न परतः, ततः कथमेकत्र ताडितायां घण्टायां सर्वत्र तत्छब्द श्रुतिरुपजायत इति यच्चोच्यते तदपाकृतमवसेयम्, सर्वत्र दिव्यानुभावतस्तथारूपप्रतिशब्दोच्छलने यथोक्तदोषासंभवात् । इति श्री राजप्रश्नीयोपाङ्गवृत्ति ८६ प्रतौ २२ पत्रे ॥ ३ ॥

अथ जिनप्रतिमासत्ताक्षराणि लिख्यन्ते-

तीसे णं मणिपेढियाए उवरिं इत्थ णं महेगे देवच्छंदए पण्णत्ते सोलसजोयणाइं आयामविक्खंभेणं साइरेगाइं सोलसजोयणाइं उड्ढं उच्चत्तेणं सव्वरयणामए जाव पडिरूवे एत्थ णं अट्ठसयं जिणपडिमाणं जिणुस्सेहप्पमाणमेत्ताणं सन्निक्खित्तं संचिट्ठइ ' इति । वृत्तिर्यथा-' तीसे णं ' इत्यादि तस्याश्च मणिपीठिकाया उपरि, अत्र महानेको देवच्छन्दकः प्रज्ञप्तः । स च षोडशयोजनान्यायामविष्कम्भाभ्यां

॥१९३॥

सातिरेकाणि षोडशयोजनानि ऊर्द्धमुच्चैस्त्वेन ' सव्वरयणामए ' इत्यादि प्राग्वत्, तत्र च देवच्छन्दके अष्टशतं अष्टाधिकं शतं जिनप्रतिमानां जिनोत्सेधप्रमाणमात्राणां पञ्चधनुःशतप्रमाणानामिति भावः । इति श्रीराजप्रश्नीयोपाङ्गवृत्ति ११० प्रतौ ६४ पत्रे ॥ २ ॥

ननु भवन्तु ताः शाश्वत्यो जिनप्रतिमा विमानाभरणादिवत्, किमेतावता ? अत्रोच्यते-अरे वावदूक ! यथा शाश्वतान्यपि विमानानि अवस्थानाय, आभरणानि परिधानाय भवन्ति, तथा प्रतिमाः कस्मै कृत्याय भवन्ति ? वन्दनायैवेति चेदागतं वन्द्यत्वं, तथा चागमः-

तए णं तस्स सूरियाभस्स देवस्स सामाणियपरिसोववण्णगा देवा सूरियाभस्स देवस्स इमेयारूवमज्झत्थियं जाव समुप्पन्नं समभिजाणित्ता जेणेव सूरियाभे देवे तेणेव उवागच्छति २त्ता सूरियाभं देवं करयलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेंति २त्ता एवं वयासी-एवं खलु देवाणुप्पियाणं सूरियाभे विमाणे सिद्धाययणंसि जिणपडिमाणं जिणुस्सेहप्पमाणमेत्ताणं अट्ठसयं सन्निक्खित्तं चिट्ठति, सभाए णं सुहम्माए माणवए चेइए खंभे वतिरामएसु गोलवट्टसमुग्गएसु बहुउ जिणसकहाउ सन्निक्खित्ताओ चिट्ठंति, ताओ णं देवाणुप्पियाणं अन्नेसिं च बहूणं वेमाणियाणं देवाण य देवीण य अच्चणिज्जाओ जाव पज्जुवासणिज्जाओ, तं एयं णं देवाणुप्पियाणं पुव्वि करणिज्जं, तं एयं णं देवाणुप्पियाणं पच्छाकरणिज्जं, तं एयं णं देवाणुप्पियाणं पुव्वि सेयं, तं एयं णं देवाणुप्पियाणं पच्छा सेयं, तं एयं णं देवाणुप्पियाणं पुव्विंपि पच्छावि हियाए सुहाए खमाए निस्सेसाए आणुगामियत्ताए भविस्सइ । " इति वृत्तिस्तु सुगमत्वादस्य नास्ति । इति श्रीराजप्रश्नीयोपाङ्गसूत्रवृत्तौ ११० प्रतौ ६६ पत्रे ॥ ३ ॥

एतेन यत्कैश्चिदुच्यते स्थितिरेवेयं देवानां न तु धार्मिकोऽयं विधिरिति, तदपि परास्तं द्रष्टव्यम् । ' हियाए सुहाए खमाए निस्सेसाए आणुगामियत्ताए भविस्सइ ' इत्यादिना परंपरानुबन्धिपुण्यहेतुत्वेनोक्तत्वात्

अधुना यैः कारणैर्जीवा जिनधर्मं लभन्ते, यैश्च न लभन्ते, तानि लिख्यन्ते-

तए णं केसीकुमारसमणे चित्तं सारहिं एवं वयासी-एवं खलु चउहिं ठाणेहिं चित्ता ! जीवा केवलिपन्नत्तं धम्मं नो लभेज्ञा सवणयाए तं आरामगयं वा उज्जाणगयं वा समणं वा माहणं वा नो अभिगच्छति नो वंदति नो नमंसति नो सक्कारेति नो सम्माणेति नो कल्लाणं मंगलं देवयं चेइयं पज्जुवासति नो अट्ठातिं हेउइं पसिणाइं वागरणाइं पुच्छति, एएणं ठाणेणं चित्ता ! केवलिपन्नत्तं धम्मं नो

लभति सवणताए १, उवस्सयगयं समणं वा तं चेव जाव एतेणवि ठाणेण चित्ता ! जीवा केवलिपन्नत्तं धम्मं नो लभति सवणताए २, गोअरगयं समणं वा माहणं वा जाव नो पज्जुवासइ नो विउलेणं असणपाणखाइमसाइमेणं पडिलाभेइ णो अट्ठाइं जाव पुच्छइ एएणं ठाणेणं चित्ता ! केवलिपन्नत्तं धम्मं नो लभति सवणताए ३ जत्थवियणं समणेणं माहणेणं वा सद्धिं अभिसमागच्छइ तत्थवि य णं हत्थेण वा वत्थेण वा छत्तेणवा अप्पाणं आवरित्ता चिट्ठइ नो अट्ठाइं पुच्छइ एएणं ठाणेणं केवलिपन्नत्तं धम्मं नो लभति सवणयाए ४ ॥ इति । वृत्तिर्यथा- ' चउहिं ठाणेहिं ' इति आरामादिगतं श्रमणादिकं नाभिगच्छतीत्यादिकं प्रथमं कारणम् १, उपाश्रयगतं नाभिगच्छतीत्यादिद्वितीयम् २, ([1]प्रातिहारिकैः पीठफलकादिकं (कैः) न निमन्त्रयतीत्यादितृतीयम् ३, गोचरगतं नाशनादिना प्रतिलाभयतीत्यादिचतुर्थम् ४, एभिरेव चतुर्भिः स्थानकैः केवलिप्रज्ञप्तं धर्मं लभते श्रवणतया श्रवणेनेति भावः । ' जत्थवियणं ' इत्यादि, यत्रापि श्रमणः-साधुर्माहनः-परमगीतार्थः श्रावकोऽभ्यागच्छति तत्रापि हस्तेन वस्त्राञ्चलेन छत्रेण चात्मानमावृत्त्य तिष्ठति इदं प्रथम कारणम्, एवं शेषाण्यपि कारणानि प्रत्येकमेवं भावनीयानि) इति राजप्रश्नीयोपाङ्गवृत्ति ८६ प्रतौ ८२ पत्रे ॥ ४ ॥

तथा ये परेषामनुकम्पादानमपि निषेधयन्ति, तन्निरासाय लिख्यते-

तते णं केसीकुमारसमणे पएसिं रायं एवं वयासी-मा णं तुमं देवाणुप्पिया ! पुव्विं रमणिज्जे भवित्ता पच्छा अरमणिज्जे भवेज्जासि जहा से वणसंडेइ वा णट्टसालाइ वा इक्खुवाडेइ वा खलवाडेइ वा, कहण्णं भंते ! वणसंडे पुव्विं रमणिज्जे भवित्ता पच्छा अरमणिज्जे भवति ? पएसी ! जयाणं वणसंडे पत्तिए पुप्फिए फलिए हरियगरे रिज्जमाणसिरीए अतीव उवसोभेमाणे २ चिट्ठइ तया णं वणसंडे रमणिज्जे भवति, जया णं वणसंडे जुन्ने परिजुन्नडोडे परिसडियपंडुपत्ते सुक्करुक्खे इव मिलायमाणे चिट्ठइ तया णं णो रमणिज्जे भवति । जया णं णट्टसालाइ गिज्जइ वाइज्जइ नच्चिज्जइ भणिज्जइ हसिज्जइ रमिज्जइ तया णं णट्टसाला रमणिज्जा भवइ,

१ ' प्रातिहारिकैः ' इत्यादितः ' भावनीयानि ' इत्यन्तपाठस्थाने ' गोचरगतं नाशनादिना प्रतिलाभयतीति तृतीयम् ३, यत्रापि श्रमणादिकोऽभ्यागच्छति तत्रापि हस्तेन वस्त्राञ्चलेन छत्रेण वाऽऽत्मानमावृत्य तिष्ठतीति चतुर्थम् ४, एभिरेव चतुर्भिः स्थानकैः वीपरीततया केवलिप्रज्ञप्तं धर्मं लभते श्रवणतया, यथा-आरामादिगतं श्रमणादिकमभिगच्छतीति प्रथमम् १, एवं शेषाण्यपि कारणानि भावनियानि ' इति पाठः स्यात्तदा सम्यक् ।

जया णं णट्टसालाइ णो गिज्जइ जाव णो रमिज्जइ तया णं णट्टसाला अरमणिज्जा भवइ । जया णं इक्खुवाडे छिज्जइ भिज्जइ खज्जइ पिज्जई दिज्जइ तया णं इक्खुवाडे रमणिज्जे भवइ, जया णं इक्खुवाडे णो छिज्जइ जाव तया णं इक्खुवाडे अरमणिज्जे भवति, जया णं खलवाडे उच्छुभइ उडइज्जइ मंडलइज्जइ पुण्णिज्जइ खज्जइ दिज्जइ विज्जइ तया णं खलवाडे रमणिज्जे भवइ, जया णं खलवाडे नो उच्छुभइ तया णं अरमणिज्जे भवइ । से तेणट्ठेणं पएसी ! एवं वुच्चइ माणं तुमं पएसी पुव्विं रमणिज्जे भवित्ता पच्छा अरमणिज्जे भविज्जासि, जहा वणसंडेइ वा जाव खलवाडेइ वा । तते णं पएसीराया केसिं कुमारसमणं एवं वदासी-णो खलु भंते ! अहं पुव्विं रमणिज्जे भवित्ता पच्छा अरमणिज्जे भविस्सामि । अहण्णं सेयवियानयरीपामोक्खाइं सत्तगामसहस्साइं चत्तारिभागे करिस्सामि । एगं भागं बलवाहणस्स दलइस्सामि । एगं भागं कुट्ठारे वुज्झिस्सामि एगं भागं अंतेउरे दलइस्सामि एगे णं भागेणं महतिमहालियमहाणसियं कूडागारसालं करिस्सामि, तत्थ णं बहुहिं पुरिसेहिं दिण्णभइभत्तवेयणेहिं विउलेहिं असणपाणखाइमसाइमेहिं उवक्खडावेत्ता बहूणं समणमाहणभिक्खुयाणं पहियाणं परिभाएत्ता बहूहिं सीलव्वयपच्चक्खाणपोसहोववासस्स जाव विहरिस्सामित्ति कट्टु, जामेव दिसिं पाउब्भूए तामेव दिसिं पडिगए । तए णं से पएसी राया कल्लं जाव जलंते सेयबियापामोक्खाइं सत्तगामसहस्साइं चत्तारिभाए करेइ एगं भागं बलवाहणस्स दलइ जाव कूडागारसालं करेइ, तत्थ णं बहूहिं पुरिसेहिं जाव उवक्खडेत्ता बहूणं समणं जाव परिभाएमाणे विहरइ इति राजप्रश्नीयोपाङ्गवृत्तौ ८६ प्रतौ ८४ पत्रे ॥ ४ ॥

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरिशिष्योपाध्याय-श्रीकीर्त्तिविजयसमुच्चिते श्रीविचाररत्नाकरे मध्यभागे श्रीराजप्रश्नीयविचारनामा द्वितीयस्तरङ्गः ॥ २ ॥

सुमनःसन्ततिसेव्या, रसरुचिरा प्रोच्चगोत्रसंभूता । विमलीकृतजननिवहा, जिनवाणी जयति गङ्गेव ॥ १ ॥

अथ क्रमायाताः श्री जीवाभिगमविचारा यथा-

देवभवाच्च्युत्वा पुनरपि यावता कालेन देवः स्यात्तल्लिख्यते-

देवपुरिसस्स णं भंते ! कालओ केवच्चिरं होइ ? गोयमा ! जहण्णेणं अंतोमुहुत्तं उक्कोसेणं वणस्सइकालो, भवणवासिदेवपुरिसाणं

ताव जाव सहस्सारो जहण्णेणं अंतोमुहुत्तं उक्कोसेणं वणस्सतिकालो । आणतदेवपुरिसस्स णं भंते ! केवतिअं कालं अंतरं होइ ? गोयमा ! जहन्नेणं वासपुहुत्तं उक्कोसेणं वणस्सतिकालो, एवं जावगेवेज्जदेवपुरिसस्सवि, अणुत्तरोववातियदेवपुरिसस्स जहन्नेणं वासपुहुत्तं उक्कोसेणं संखेज्जाइं सागरोवमाइं साइरेगाइं इति । वृत्तिर्यथा-' देवपुरिसस्स णं भंते ! ' इत्यादि, देवपुरुषस्य भदन्त ! कालतः कियच्चिरं अन्तरं भवति ? भगवानाह-गौतम ! जघन्येनान्तर्मुहूर्त्तं देवभवाच्च्युत्वा गर्भव्युत्क्रान्तिकमनुष्येषूत्पद्य पर्याप्तिसमाप्त्यनन्तरं तथाविधाध्यवसायमरणेन भूयोऽपि कस्यापि देवत्वेनोत्पादसंभवात्, उत्कर्षतो वनस्पतिकालः । एवमसुरकुमारादारभ्य निरन्तरं तावद्वक्तव्यं यावत्सहस्रारकल्पदेवपुरुषस्यान्तरम्, आनतकल्पदेवस्यान्तरं जघन्येन वर्षपृथक्त्वं कस्मादेतावदिहान्तरमिति चेदुच्यते-इह यो गर्भस्थः सर्वाभिः पर्याप्तिभिः पर्याप्तः शुभाध्यवसायोपेतो मृतः सन् आनतकल्पादारतो ये देवास्तेषूत्पद्यते, नानतादिषु तस्य तावन्मात्रकालस्य तद्योग्याध्यवसायविशुद्ध्यभावात्, ततो य आनतादिभिश्च्युतः सन् भूयोऽप्यानतादिषूत्पत्स्यते सनियमाच्चारित्रमवाप्य, चारित्रं चाष्टमे वर्षे, तत उक्तं जघन्यतो वर्षपृथक्त्वं, उत्कर्षतो वनस्पतिकालः । एवं प्राणतारणाच्युतकल्पग्रैवेयकदेवपुरुषाणामपि प्रत्येकमन्तरं जघन्यत उत्कर्षतश्च वक्तणं णट्टसाला रमणिज्जा भवइ, जया णं णट्टसालाइ णो गिज्जइ जाव णो रमिज्जइ तया णं णट्टसाला अरमणिज्जा भवइ । जया णं इक्खुवाडे छिज्जइ भिज्जइ खज्जइ पिज्जई दिज्जइ तया णं इक्खुवाडे रमणिज्जे भवइ, जयां णं इक्खुवाडे णो छिज्जइ जाव तया णं इक्खुवाडे अरमणिज्जे भवति, जया णं खलवाडे उच्छुभइ उडइज्जइ मंडलइज्जइ पुण्णिज्जइ खज्जइ दिज्जइ विज्जइ तया णं खलवाडे रमणिज्जे भवइ, जया णं खलवाडे नो उच्छुभइ तया णं अरमणिज्जे भवइ । से तेणट्ठेणं पएसी ! एवं वुच्चइ माणं तुमं पएसी पुव्विं रमणिज्जे भवित्ता पच्छा रमणिज्जे भविज्जासि, जहा वणसंडेइ वा जाव खलवाडेइ वा । तते णं पएसीराया केसिं कुमारसमणं एवं वदासी-णो खलु भंते ! अहं पुव्विं रमणिज्जे भवित्ता पच्छा अरमणिज्जे भविस्सामि । अहण्णं सेयवियानयरीपामोक्खाइं सत्तगामसहस्साइं चत्तारिभागे करिस्सामि । एगं भागं बलवाहणस्स दलइस्सामि । एगं भागं कुट्ठारे वुज्झिस्सामि एगं भागं अंतेउ दलइस्सामि एगे णं भागेणं महतिमहालियमहाणसियं कूडागारसालं करिस्सामि, तत्थ णं बहुहिं पुरिसेहिं दिण्णभइभत्तवेयणेहिं विउलेहिं असणपाणखाइमसाइमेहिं उवक्खडावेत्ता बहूणं समणमाहणभिक्खुयाणं पहियाणं परिभाएत्ता बहूहिं सीलव्वयपच्चक्खाणपोसहोववासस्स

॥१९७॥

जाव विहरिस्सामित्ति कट्टु, जामेव दिसिं पाउब्भूए तामेव दिसिं पडिगए । तए णं से पएसी राया कल्लं जाव जलंते सेयबियापामोक्खाइं सत्तगामसहस्साइं चत्तारिभाए करेइ एगं भागं बलवाहणस्स दलइ जाव कूडागारसालं करेइ, तत्थ णं बहूहिं पुरिसेहिं जाव उवक्खडेत्ता बहूणं समणं जाव परिभाएमाणे विहरइ इति राजप्रश्नीयोपाङ्गवृत्तौ ८६ प्रतौ ८४ पत्रे ॥ ५ ॥

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकेश्रीहीरविजयसूरिशिष्योपाध्याय-श्रीकीर्त्तिविजयसमुच्चिते श्रीविचाररत्नाकरे मध्यभागे श्रीराजप्रश्नीयविचारनामा द्वितीयस्तरङ्गः ॥ २ ॥

सुमनःसन्ततिसेव्या, रसरुचिरा प्रोच्चगोत्रसंभूता । विमलीकृतजननिवहा, जिनवाणी जयति गङ्गेव ॥ १ ॥

अथ क्रमायाताः श्री जीवाभिगमविचारा यथा-

देवभवाच्च्युत्वा पुनरपि यावता कालेन देवः स्यात्तल्लिख्यते-

देवपुरिस्स णं भंते ! कालओ केवच्चिरं होइ ? गोयमा ! जहण्णेणं अंतोमुहुत्तं उक्कोसेणं वणस्सइकालो, भवणवासिदेवपुरिसाणं ताव जाव सहस्सारो जहण्णेणं अंतोमुहुत्तं उक्कोसेणं वणस्सतिकालो । आणतदेवपुरिसस्स णं भंते ! केवतिअं कालं अंतरं होइ ? गोयमा ! जहन्नेणं वासपुहुत्तं उक्कोसेणं वणस्सतिकालो, एवं जावगेवेज्जदेवपुरिसस्सवि, अणुत्तरोववातियदेवपुरिसस्स जहन्नेणं वासपुहुत्तं उक्कोसेणं संखेज्जाइं सागरोवमाइं साइरेगाइं इति । वृत्तिर्यथा-' देवपुरिसस्स णं भंते ! ' इत्यादि, देवपुरुषस्य भदन्त ! कालतः कियच्चिरं अन्तरं भवति ? भगवानाह-गौतम ! जघन्येनान्तर्मुहूर्त्तं देवभवाच्च्युत्वा गर्भव्युत्क्रान्तिकमनुष्येषूत्पद्य पर्याप्तिसमाप्त्यनन्तरं तथाविधाध्यवसायमरणेन भूपोऽपि कस्यापि देवत्वेनोत्पादसंभवात्, उत्कर्षतो वनस्पतिकालः । एवमसुरकुमारादारभ्य निरन्तरं तावद्वक्तव्यं यावत्सहस्रारकल्पदेवपुरुषस्यान्तरम्, आनतकल्पदेवस्यान्तरं जघन्येन वर्षपृथक्त्वं कस्मादेतावदिहान्तरमिति चेदुच्यते-इह यो गर्भस्थः सर्वाभिः पर्याप्तिभिः पर्याप्तः शुभाध्यवसायोपेतो मृतः सन् आनतकल्पादारतो ये देवास्तेषूत्पद्यते, नानतादिषु तस्य तावन्मात्रकालस्य तद्योग्याध्यवसायविशुद्ध्यभावात्, ततो य आनतादिभिश्च्युतः सन् भूयोऽप्यानतादिषूत्पत्स्यते सनियमाच्चारित्रमवाप्य, चारित्रं चाष्टमे वर्षे, तत उक्तं जघन्यतो वर्षपृथक्त्वं, उत्कर्षतो वनस्पतिकालः । एवं प्राणतारणाच्युतकल्पग्रैवेयकदेवपुरुषाणामपि प्रत्येकमन्तरं जघन्यत

उत्कर्षतश्च वक्तव्यम् । अनुत्तरोपपातिककल्पातीतदेवपुरुषस्य जघन्यतोऽन्तरं वर्षपृथक्त्वम्, उत्कर्षतः सङ्ख्येयानि सागरोपमाणि सातिरेकाणि, तत्र सङ्ख्येयानि सागरोपमाणि तदन्यवैमानिकेषु सङ्ख्येयवारोत्पत्त्या सातिरेकाणि मनुष्यभवैः । तत्र सामान्याभिधानेऽप्यतदपराजितान्तमवगन्तव्यम्, सर्वार्थसिद्धेः सकृदेवोत्पादतस्तत्रान्तरासम्भवात् । अन्ये त्वभिदधति-भवनवासिन आरभ्य आईशानादमरस्य जघन्यतोऽन्तर्मुहूर्त्तम् । सनत्कुमारादारभ्याच्युतकल्पं यावन्नवमासाः । नवसु ग्रैवेयकेषु सर्वार्थसिद्धमहाविमानवर्जेष्वनुत्तर-विमानेषु च नववर्षाणि । ग्रैवेयकान् यावत् सर्वत्रापि उत्कर्षतो वनस्पतिकालः । विजयादिषु चतुर्षु महाविमानेषु द्वे सागरोपमे । उक्तं च-" आईसाणादमरस्स, अंतरं हीणयं मुहुत्तंतो । आसहसारे अच्चुयणुत्तरदिणमासवासनव ॥ १ ॥ थावरकालुक्कोसो, सव्वट्ठे बीयओ न उववाओ, दोअयरा विजयाइसु " । इति श्रीजीवाभिगमसूत्रवृत्तौ द्वितीयप्रतिपत्तौ २६४ प्रतौ ४३ पत्रे ॥ १ ॥

अथ यैः कारणैर्नारकाणां सातोदयो भवति तानि लिख्यन्ते-

उववाएण व सायं, नेरइओ देवकम्मुणा वावि । अज्झवसाणनिमित्तं, अहवा कम्माणुभावेणं ॥ १ ॥ इति । वृत्तिर्यथा-' उववाएण ' इत्यत्र सप्तम्यर्थे तृतीया, उपपातकाले सातं-सातवेदनीयकर्मोदयं कश्चिद्वेदयते यः प्राग्भवे दाघच्छेदादिव्यतिरेकेण मरणमुपगतोऽनतिसंक्लिष्टाध्यवसायी समुत्पद्यते, तदानीं हि न तस्य प्राग्भवानुबद्धं आधिरूपं दुःखं नापि क्षेत्रस्वभावजं नापि परमाधार्मिककृतं, नापि परस्परोदीरितम्, तत एवंविधदुःखाभावादसौ सातं वेदयते, इत्युच्यते ॥ १ ॥ ' देवकम्मुणावावि ' इति देवकर्णणा पूर्वसाङ्गतिकदेवप्रयुक्तया क्रियया, तथाहि-गंच्छति पूर्वसाङ्गतिको देवः पूर्वपरिचितस्य नैरयिकस्य वेदनोपशमनार्थं यथा बलदेवः कृष्णवासुदेवस्य, स च वेदनोपशमो देवकृतो मनाक्कालमात्र एव भवति तत उर्द्धं नियमात् क्षेत्रस्वभावजा अन्या वा वेदनाः प्रवर्त्तन्ते, तथास्वाभाव्यात् ॥ २ ॥ ' अज्झवसाणनिमित्तं 'इति अध्यवसायनिमित्तं सम्यक्त्वोत्पादकाले, तत उर्द्धं कदाचित्तथाविधविशिष्टशुभाध्यवसायप्रत्ययं कश्चिन्नैरयिको बाह्यक्षेत्रस्वभावजवेदनासद्भावेऽपि सातोदयमेवानुभवति, सम्यक्त्वोत्पादकाले हि जात्यन्धस्य चक्षुर्लाभ इव महान् प्रमोद उपजायते, तदुत्तरकालमपि कदाचित्तीर्थकरगुणानुमोदनाद्यनुगतां विशिष्टां भावनां भावयतः, ततो बाह्यक्षेत्रस्वभावजवेदनासद्भावेऽप्यन्तः सातोदयो विजृम्भमाणो न विरुध्यते ३ । ' अहवा कम्माणुभावेणं ' इति, अथवा कर्मानुभावेन बाह्यतीर्थकरजन्मदीक्षाज्ञानापवर्गकल्याणसम्भूति-

लक्षणबाह्यनिमित्तमधिकृत्य तथाविधस्य च सातवेदनीयस्य कर्मणोऽनुभावेन विपाकोदयेन कश्चित्सातं वेदयते, न चैतद्व्याख्यानमनार्षं यत उक्तं वसुदेवचरिते । इति श्रीजीवाभिगमसूत्रवृत्तौ२ तृतीयप्रतिपत्तिनारकाधिकारतृतीयोद्देशके ॥ २ ॥

इह जीवयोनिलक्षणां चतुरशीतिर्या प्रसिद्धा श्रूयते सा उपलक्षणं, ततोऽधिकानामपि श्रूयमाणत्वात् । तथा हि-

तेसि णं भंते ! जीवाणं कति जातिकुलकोडीजोणीपमुहसयसहस्सा पण्णत्ता ? गोयमा ! बारस जातिकुलकोडीजोणीपमुहसयसहस्सा । भुयगपरिसप्पथलयरपंचिंदियतिरिक्खजोणियाणं भंते ! कतिविधे जोणीसंगहे पण्णत्ते ? गोयमा ! तिविहे जोणीसंगहे पण्णत्ते, तं जहा- अंडया पोयया संमुच्छिमा, एवं जहा खहयराणं तहेव, णाणत्तं जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडी, उव्वट्टित्ता दोच्चं पुढविं गच्छंति । णव जातिकुलकोडीजोणीपमुहसतसहस्सा भवंतीति मक्खायं सेसं तहेव । उरगपरिप्पथलयरपंचिंदियतिरिक्खजोणियाणं भंते ! पुच्छा जहेव भुयगपरिसप्पाणं तहेव णवरं-ठिती जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं पुव्वकोडी, उव्वट्टित्ता जाव पंचमिं पुढवीं गच्छंति, दसजातिकुलकोडी । चउप्पदथलयरपंचिंदियतिरिक्खजोणियाणं पुच्छा गोयमा ! दुविहे पण्णत्ते तं जहा-पोयया य सम्मुच्छिमा य, (से किं तं) पोयया२ तिविहा पण्णत्ता, तं जहा-इत्थी पुरिसा णपुंसगा, तत्थ णं जे ते संमुच्छिमा ते सव्वे णपुंसगा, तेसि णं भंते ! जीवाणं कति लेसाओ पण्णत्ताओ ? सेसं जहा पक्खीणं णाणत्तं ठिती जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं तिन्नि पलिओवमाइं, उव्वट्टित्ता चउत्थिं पुढविं गच्छंति, दस जातिकुलकोडी । जलयरपंचिंदियतिरिक्खजोणियाणं पुच्छा जधा भुयगपरिसप्पाणं, नवरं उव्वट्टित्ता जाव अहे सत्तमिं पुढविं अद्धतेरस जातिकुलकोडीजोणीपमुह० जाव प० । चउरिंदियाणं भंते ! कति जातिकुलकोडीजोणीपमुहसतसहस्सा पण्णत्ता ? गोयमा ! नव जाइकुलकोडीजोणीपमुहसतसहस्सा जाव समक्खाया । तेइंदियाणं पुच्छा गोयमा ! अट्ठ जातिकुल जाव समक्खाया । बेइंदियाणं भंते ! कइ जाइ पुच्छा गोयमा ! सत्त जाइकुलकोडीजोणीपमुह० । कइ णं भंते ! गंधा पण्णत्ता ? कइ णं भंते ! गंधसया पण्णत्ता ? गोयमा !सत्त गंधा सत्त गंधसया पण्णत्ता । कइ णं भंते ! पुप्फजाइकुलकोडीजोणीपमुहसयसहस्सा पण्णत्ता ? गोयमा ! सोलसपुप्फजातिकुल-कोडीजोणीपमुहसयसहस्सा पण्णत्ता, तं जहा- चत्तारि जलजाणं, चत्तारि थलयाणं, चत्तारि महारुक्खियाणं, चत्तारि महागुम्मियाणं । कति णं भंते ! वल्लीओ कति वल्लीसता पण्णत्ता ? गोयमा ! चत्तारि वल्लीओ चत्तारि वल्लीसया पण्णत्ता । कति णं भंते ! लताओ

कति लतासया पण्णत्ता गोया ! अट्ठ लयाओ अट्ठ लयासया पण्णत्ता । कति णं भंते ! हरियकाया हरियकायसया पण्णत्ता ? गोयमा ! तओ हरियकाया हरियकायसता पण्णत्ता । फलसहस्सं च बिंटबद्धाणं, फुलसहस्सं च णालबद्धाणं, एते सव्वे वि हरितकायमेव समोयरंति, ते एवं समणुगम्ममाणा२ एवं समणुगाहिज्जमाणा२ एवं समणुपेहिज्जमाणा२ एवं समणुचिंतिज्जमाणा२ एएसु चेव दोसु काएसु समोयरंति । तं जहा-तसकाए चेव, थावरकाए चेव, एवामेव सपुव्वावरेणं आजीवियदिट्ठंतेणं चउरासीति जातिकुलकोडीजोणीप-मुहसतसहस्सा भवंतीति मक्खाया ॥ इति । वृत्तिर्यथा-' तेसि णं ' इत्यादि, तेषां भदंत ! जीवानां कति किं प्रमाणानि जातिकुलकोटीनां योनिप्रमुखाणि-योनीप्रवाहाणि शतसहस्राणि योनिप्रमुखशतसहस्राणि जातिकुलकोटियोनिप्रमुखशतसहस्राणि भवन्ति ? भगवानाह-द्वादश जातिकुलकोटियोनिप्रमुखशतसहस्राणि प्रज्ञप्तानि, तत्र जातिकुलयोनीनामिदं परिस्थूरमुदाहरणं पूर्वाचार्यैरुपदर्शितम्-जातिरिति किल तिर्यग्जातिः तस्याः कुलानि-कृमिकीटवृश्चिकादीनि, इमानि च कुलानि योनिप्रमुखाणि, तथा हि-एकस्यामेव योनौ अनेकानि कुलानि भवन्ति, तथा हि-छगणयोनौ कृमिकुलं, कीटकुलं, वृश्चिककुलमित्यादि, अथवा जातिकुलमित्येकं पदम्, जातिकुलयोन्योश्च परस्परं विशेषः एकस्यामेव योनावनेकजातिकुलसम्भवात्, तद्यथा-एकस्यामेव छगणयोनौ कृमिजातिकुलं कीटजातिकुलं वृश्चिकजातिकुलमित्यादि, एवमेकस्यामेव योनाववान्तरजातिभेदभावादनेकानि योनिप्रवाहाणि जातिकुलानि सम्भवन्तीति उत्पद्यन्ते खचरपञ्चेन्द्रियतिर्यग्योनिजानां द्वादश जातिकुलकोटिशतसहस्राणि, अत्र सङ्ग्रहणीगाथा-" जोणीसंगहलेस्सा, दिट्ठी नाणे य जोग उवओगे । उववाय ठिई समुग्घाय चवण जाई कुलविहीओ " ॥ अस्या अक्षरगमनिका-प्रथमं योनिसङ्ग्रहद्वारं, ततो लेश्याद्वारं, ततो दृष्टिद्वारमित्यादि । ' भुयगाणं भंते ! ' इत्यादि, भुजगानां भदंत ! कतिविधो योनिसङ्ग्रहः प्रज्ञप्तः ? इत्यादि पक्षिवत्सर्वं-निरवशेषं वक्तव्यम्, नवरं स्थितिच्यवनकुलकोटिषु नानात्वं, तद्यथा-स्थितिर्जघन्येनान्तर्मुहूर्त्तं, उत्कर्षतः पूर्वकोटी, च्यवनं-उद्वर्त्तना, तत्र नरकगतिचिन्तायामधो यावद्दवतीया पृथिवी, उपरि यावत्सहस्रारकल्पस्ता-वदुत्पद्यते, नव तेषां जातिकुलकोटियोनिप्रमुखशतसहस्राणि प्रज्ञप्तानि, एवमुरःपरिसर्पाणामपि वक्तव्यम्, नवरं तत्र च्यवनद्वारेऽधश्चि-न्तायां यावत्पञ्चमीं पृथिवीति वक्तव्यम्, कुलकोटिचिन्तायां दश जातिकुलकोटियोनिप्रमुखशतसहस्राणि प्रज्ञप्तानि । ' चउप्पयाणं 'इत्यादि, चतुष्पदानां भदंत ! कतिविधो योनिसङ्ग्रहः प्रज्ञप्तः ? भगवानाह-गौतम ! द्विविधो योनिसङ्ग्रहः प्रज्ञप्तः,

॥१२१॥

तद्यथा-पोतजाः सम्मूर्च्छिमाश्च, इह ये अण्डजव्यतिरिक्ता गर्भव्युत्क्रान्ताः, ते सर्वे जरायुजाः अजरायुजा वा पोतजा इति विवक्षितमतोऽत्र द्विविधो यथोक्तस्वरूपो योनिसङ्ग्रह उक्तः, अन्यथा गवादीनां जरायुजत्वात्तृतीयोऽपि जरायुजलक्षणो योनिसङ्ग्रहो वक्तव्यः स्यादिति, तत्र ये पोतजास्ते त्रिविधाः प्रज्ञप्ताः, तद्यथा-स्त्रियः पुरुषा नपुंसकाश्च, तत्र ये ते सम्मूर्छिमास्ते सर्वे नपुंसकाः, शेषद्वारकलापः पूर्ववत्, नवरं स्थितिर्जघन्येनान्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि, च्यवनद्वारेऽधश्चिन्तायां यावच्चतुर्थी पृथिवी, ऊर्द्ध्वं यावत्सहस्रारः, जातिकुलकोटियोनिप्रमुखशतसहस्राणि अत्रापि दश। ' जलचराणां ' इत्यादि, जलचराणां भदन्त ! कतिविधो योनिसङ्ग्रहः प्रज्ञप्तः ?- भगवानाह-गौतम ! त्रिविधो योनिसङ्ग्रहः प्रज्ञप्तः, तद्यथा-अण्डजाः पोतजाः सम्मूर्च्छिमाश्च, अण्डजास्त्रिविधाः प्रज्ञप्ताः, तद्यथा-स्त्रियः पुरुषा नपुंसकाश्च, पोतजास्त्रिविधा प्रज्ञप्ताः, तद्यथा-स्त्रियः पुरुषा नपुंसकाश्च, तत्र ये ते सम्मूर्च्छिमास्ते सर्वे नपुंसकाः। शेषद्वारकलापचिन्ता प्राग्वत्, नवरं स्थितिच्यवनजातिकुलकोटिषु नानात्वम्, स्थितिर्जघन्येनान्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी, च्यवनद्वारेऽधश्चिन्तायां यावत्सप्तमी ऊर्द्ध्वं यावत्सहस्रारः, कुलकोटियोनिप्रमुखशतसहस्राणि अर्द्धत्रयोदशःसार्द्धानि द्वादशेत्यर्थः। ' चउरिंदियाणं ' इत्यादि, चतुरिन्द्रियाणां भदन्त ! कति जातिकुलकोटियोनिप्रमुखशतसहस्राणि प्रज्ञप्तानि ? भगवानाह-गौतम ! नव जातिकुलकोटियोनिप्रमुखशतसहस्राणि प्रज्ञप्तानि, एवं त्रीन्द्रियाणामष्टौ जातिकुलकोटियोनिप्रमुखशतसहस्राणि, द्वीन्द्रियाणां सप्त जातिकुलकोटियोनिप्रमुखशतसहस्राणि प्रज्ञप्तानि। इह जातिकुलकोट्यो योनिजातीयास्ततो भिन्नजातीयाभिधानप्रसङ्गतो गन्धाङ्गानि भिन्नजातीयत्वात् प्ररूपयति-' कइ णं ' इत्यादि, कति भदन्त ! गन्धाङ्गानि क्वचिद्ग्रन्था इति पाठः तत्र पदैकदेशे पदसमुदायोपचारात् गन्धा इति गन्धाङ्गानीति द्रष्टव्यानि प्रज्ञप्तानि ? तथा गन्धाङ्गशतानि प्रज्ञप्तानि ? भगवानाह-गौतम ! सप्त गन्धाङ्गानि सप्त गन्धाङ्गशतानि प्रज्ञप्तानि, इह सप्त गन्धाङ्गानि परिस्थूरजातिभेदादमूनि, तद्यथा-मूलं१ त्वक्२ काष्ठं३ निर्यासः४ पत्रं५ पुष्पं६ फलं७ च। तत्र मूलं मुस्ताबालकोशीदादि१, त्वक् सुवर्णच्छल्लीत्वचाप्रभृति२, काष्ठं चन्दनागुरुप्रभृति३, निर्यासः कर्पूरादि४, पत्रं जातिपत्रतमालादि५, पुष्पं प्रियङ्गुनागरपुष्पादि६, फलं जातिफलकर्कोलकैलालव-ङ्गप्रभृति७, एते च वर्णमधिकृत्य प्रत्येकं कृष्णादिभेदात्पञ्चपञ्चभेदा इति वर्णपञ्चकेन गुण्यन्ते जाताः पञ्चत्रिंशत्, गन्धचिन्तायामेते सुरभिगन्धय एवेत्येकेन गुणिताः पञ्चत्रिंशज्ज्ञाताः पञ्चत्रिंशदेव ' एकेन गुणितं तदेव भवती ' ति न्यायात्, तत्राप्येकैकस्मिन्, वर्णभेदे रसपञ्चकं

द्रव्यभेदेन विविक्तं प्राप्तते इति सा पञ्चत्रिंशत् रसपञ्चकेन गुण्यते जातं पञ्चसप्ततिशतम्, स्पर्शाश्च यद्यप्यष्टौ भवन्ति तथाऽपि गन्धाङ्गेषु यथोक्तरूपेषु प्रशस्या व्यवहारतश्चत्वार एव मृदुलघुशीतोष्णरूपाः, ततः पञ्चसप्ततिशतं स्पर्शचतुष्टयेन गुण्यते, जातानि सप्तशतानि । उक्तं च -" मूलतयकट्टनिज्जास, पत्तपुप्फफलमेयं गंधंगा । वण्णादुत्तरभेया, गंधंगसया मुणेयव्वा ॥ १ ॥ " अस्या व्याख्यानरूपं गाथाद्वयम्-" मुत्था[१] सुवण्णच्छल्ली[२], अगुरू[३] वाला[४] तमालपत्तं[५] च । तह य पियंगू[६] जाईफलं[७] च जाईए गंधंगा ॥ १ ॥ गुणणाए सत्तसया, पंचहि वणंहि सुरभिगंधेणं । रसपणगेणं तह फासेहि य चउहिं पसत्थेहिं ॥ २ ॥ " अत्र ' जाईए गंधंगा ' इति जात्या-जातिभेदेनामूनि गन्धाङ्गानि, शेषं भावितम् । 'कइ णं ' इत्यादि, कति भदन्त ! पुष्पजातिकुलकोटिशतसहस्राणि प्रज्ञप्तानि ?, भगवानाह-गौतम् ! षोडश पुष्पजातिकुलकोटिशतसहस्राणि पज्ञप्तानि, तद्यथा-चत्वारि जलजानां पद्मानां जातिभेदेन, चत्वारि स्थलजानां कोरण्टकादीनां जातिभेदेन, चत्वारि महागुल्मिकादीनां जात्यादीनाम्, चत्वारि महावृक्षाणां मधूकादीनामिति । ' कइ णं ' इत्यादि, कति भदन्त ! वल्लयः ? कति वल्लिशतानि प्रज्ञप्तानि ?, भगवानाह-गौतम ! चतस्रो वल्लयः स्रग्पुष्पादिमूलभेदेन, ताश्च मूलटीकाकृता वैविक्त्येन न व्याख्याता इति संप्रदायादवसेयाः, चत्वारि वल्लिशतान्येवान्तरजातिभेदेन । ' कइ णं ' इत्यादि, कति भदन्त ! लताः कति लताशतानि प्रज्ञप्तानि ?, भगवानाह-गौतम ! अष्टौ लता नागलताद्या या मूलभेदेन ता अपि संप्रदायादवगन्तव्याः मूलटीकाकारेणाव्याख्यानात्, अष्टौ लताशतानि प्रज्ञप्तानि अवान्तरजातिभेदेन । ' कइ णं ' इत्यादि, कति भदन्त ! हरितकायाः कति हरितकायशतानि प्रज्ञप्तानि ? भगवानाह-गौतम ! त्रयो हरितकायाः प्रज्ञप्ताः-जलजाः स्थलजाः उभयजाः, एकैकस्मिन् शतमवान्तरभेदानामिति, त्रीणि हरितकायशतानि । 'फलसहस्सं च ' इत्यादि, फलसहस्रं च वृन्तबद्धानां वृन्ताकप्रभृतीनां, फुलसहस्रं च नालबद्धानाम्, ' ते वि सव्वे ' इत्यादि, तेऽपि सर्वे भेदाः, अपिशब्दादन्येऽपि तथाविधा हरितकायमेव समवतरन्ति, हरितकायेऽन्तर्भवन्ति, हरितकायोऽपि वनस्पतौ, वनस्पतिरपि स्थावरेषु, स्थावरा अपि जीवेषु । तत एवं समनुगम्यमानाः समनुगम्यमानाः तथा जात्यन्तर्भावेन स्वत एव सूत्रतः, तथा समनुग्राह्यमानाः२ परेण सूत्रत एव, तथा समनुप्रेक्ष्यमाणाः२ अनुप्रेक्षया-अर्थालोचनरूपया, तथा समनुचिन्त्यमानाः२ तथा तथा तन्त्रयुक्तिभिरेतयोरेव द्वयोः कायोः समवतरन्ति, तद्यथा-त्रसकाये च स्थावरकाये च, ' एवामेव ' इत्यादि, एवमेव उक्तेनैव प्रकारेण ' सपुव्वावरेणं ' ति, पूर्वं

॥१२३॥

चापरं च पूर्वापरं सह पूर्वापरं येन स सपूर्वापर उक्तप्रकारस्तेन उक्तविषयपूर्वापरपर्यालोचनयेति भावार्थः । ' आजीवगदिट्ठंतेणं ' ति, आ-सकलजगदभिव्याप्त्या जीवानां यो दृष्टान्तः-परिच्छेदः स आजीवदृष्टान्तस्तेन सकलजीवनिदर्शनेनेत्यर्थः, आह च मूलटीकाकारः-आजीवकदृष्टान्तेन सकलजीवनिदर्शनेने ' त्ति चतुरशीतिजातिकुलकोटियोनिप्रमुखशतसहस्राणि भवन्तीत्याख्यातं मया अन्यैश्च ऋषभादिभिरिति । अत्र चतुरशीतिसङ्ख्योपादानमुपलक्षणं, तेनान्यान्यपि जातिकुलकोटियोनिप्रमुखशतसहस्राणि वेदितव्यानि, तथा हि-पक्षिणां द्वादशजातिकुलकोटियोनिप्रमुखशतसहस्राणि, भुजगपरिसर्पाणां नव, उरगपरिसर्पाणां दश, चतुष्पदानां दश, जलचराणामर्द्धत्रयोदशानि, चतुरिन्द्रियाणां नव, त्रीन्द्रियाणामष्टौ, द्वीन्द्रियाणां सप्त, पुष्पजातीनां षोडश । एतेषां चैकत्र मीलने त्रिनवतिर्जातिकुलकोटियोनिप्रमुखशतसहस्राणि सार्द्धानि भवन्ति, ततश्चतुरशीतिसङ्ख्योपादानमुपलक्षणमवसेयं, न चैतद्व्याख्यानं स्वमनीषिकाविजृंभितम्, यत उक्तं चूर्णौ 'आजीवगदिट्ठंतेणं 'ति, अशेषजीवनिदर्शनेन चउरासीजातिकुलकोटियोनिप्रमुखशतसहस्रा एतत्प्रमुखा अन्येऽपि विद्यन्ते । इति श्रीजीवाभिगमसूत्रवृत्तितृतीयप्रतिपत्तौ तिर्यगधिकारे प्रथमोद्देशके २६४ प्रतौ ८० पत्रे ॥ ३ ॥

केचिच्च मिथ्यात्विकृतानि सर्वसत्त्वमैत्रीसत्यभाषणपरद्रव्यानपहारसुशीलादिरूपाणि मार्गानुसारिधर्मकर्त्तव्यान्यपि निष्फलान्येव इत्याहुः तच्चाज्ञानविलसितं वेदितव्यम्, यतो व्यन्तरदेवाः प्राग्जन्मकृतानां सुचीर्णानां सुचरितानां शुभफलानां सकलसत्त्वमैत्रीसत्यभाषणपरद्रव्यानपहारसुशीलादिकर्मणां फलमनुभवन्तीति सिद्धान्तेऽभिहितम्, ते च प्राग्जन्मनि मिथ्यादृश एव, सम्यग्दृशां विमानवर्जायुर्बन्धाभावात्, सिद्धान्तश्चायम्-

तत्थ णं बहवे वाणमंतरा देवा देवीओ य आसयंति सयंति चिट्ठंति णिसीदन्ति तुयट्टंति रमंति ललंति कीलंति मोहंति पुरापोराणाणं सुचिण्णाणं सुपरिक्कंताणं सुभाणं कल्लाणाणं कडाणं कम्माणं फलवित्तिविसेसं पच्चणुब्भवमाणा विहरंति ॥ इति । वृत्तिर्यथा- ' तत्थ ' इति तत्र तेषु उत्पादपर्वतादिगतहंसासनादिषु यावन्नानारूपसंस्थानसंस्थितपृथिवीशिलापटकेषु ' णं ' इति पूर्ववत् बहवो वानमन्तरा देवा देव्यश्च यथासुखमासते शेरते-दीर्घकायप्रसारणेन वर्त्तन्ते न तु निद्रां कुर्वन्ति तेषु देवयोनिकतया निद्राऽभावात्, तिष्ठन्ति-ऊर्द्ध्वस्थानेन वर्त्तन्ते, निषीदन्ति-उपविशन्ति,' तुयट्टंति ' इति त्वग्वर्त्तनं कुर्वन्ति वामपार्श्वतः परावृत्य दक्षिणपार्श्वेन तिष्ठन्ति दक्षिणापार्श्वतो वा परावृत्य

॥१२४॥

वामपार्श्वेनावतिष्ठन्ते, रमन्ते-रतिमाबध्नन्ति, ललन्ति मनईप्सितं यथा भवति तथा वर्त्तन्ते इति भावः, क्रीडन्ति-यथासुखमितस्ततो गमनविनोदेन गीतनृत्यादिविनोदेन वा तिष्ठन्ति, मोहन्ति-मैथुनसेवां कुर्वन्ति इत्येवम्, ' पुरा पोराणाणं ' इत्यादि, पुरा-पूर्वं प्राग्भवे इति भावः । कृतानां कर्मणामिति योगः । अत एव पौराणानां सुचीर्णानां-सुचरितानामिह सुचरितजनितं कर्मापि कार्ये कारणोपचारात्सुचरितमिति विवक्षितम्, ततोऽयं भावार्थः-विशिष्टतथाविधधर्मानुष्ठानविषयाप्रमादकरणक्षान्त्यादिषु सुचरितानामिति, तथा सुपराक्रान्तानामत्रापि कारणे कार्योपचारात्सुपराक्रान्तजनितानि कर्माण्येव सुपराक्रान्तानि, इत्युक्तं भवति, सकलसत्त्वमैत्रीसत्यभाषणपरद्रव्यानपहारसुशीलादिरूपसुपराक्रमजनितानामिति, अत एव शुभानां शुभफलानां, इह किञ्चिदशुभफलमपि इन्द्रियमतिविपर्यासात् शुभफलमाभाति ततस्तात्विकशुभत्वप्रतिपत्त्यर्थमस्यैव पर्यायशब्दमाह-कल्याणानां-तत्त्ववृत्त्या तथाविधविशिष्टफलदायिनां, अथवा कल्याणानां-अनर्थोपशमकारिणा कल्याणरूपं फलविपाकं ' पच्चणुभवमाणा ' प्रत्येकमनुभवन्तो विहरन्ति-आसते । इति श्रीजीवाभिगमसूत्रवृत्तौ तृतीयप्रतिपत्तिमन्दरोद्देशके ॥ ४ ॥

॥१२५॥

प्रतिमार्चनव्यामोहनिराकरणाय हिताय सुखाय क्षमाय निःश्रेयसाय आनुगामिकतायै भविष्यतीति कृत्वा यथा विजयदेवेन सविस्तरं प्रतिमापूजिता तथा लिख्यते-

तते णं से विजए देवे चउहिं सामाणियसाहस्सीहिं जाव अण्णेहि य बहूहिं वाणमंतरेहिं देवेहि य देवीहि य सद्धिं संपरिवुडे सव्विड्ढीए सव्वज्जुत्तीए जाव णिग्घोसणाइयरवेणं जेणेव सिद्धाययणे तेणेव उवागच्छति उवागच्छित्ता सिद्धाययणं अणुप्पयाहिणाकरेमाणे २ पुरत्थिमिल्लेणं दारेणं अणुपविसति अणुपविसित्ता जेणेव देवच्छंदए तेणेव उवागच्छति उवागच्छित्ता आलोए जिणपडिमाणं पणामं करेति २ त्ता लोमहत्थगं गेण्हति लोमहत्थगं गेण्हित्ता जिणपडिमाओ लोमहत्थएणं पमज्जति२ त्ता सुरभिणा गंधोदएणं न्हाणेति, सुरभिगंधोदएणं न्हाणेत्ता दिव्वाए सुरभीए गंधकासाईए गाताइं लूहेति, गाताइं लूहेत्ता सरसेणं गोसीसचंदणेणं गाताइं अणुलिंपइ अणुलिंपेत्ता जिणपडिमाणं अहयाइं सेताइं दिव्वाइं देवदूसजुयलाइं णियंसेति नियंसेत्ता अग्गेहिं वरेहि य गंधेहि य मल्लेहि य अच्चेति अच्चेत्ता पुप्फारुहणं गंधारुहणं मल्लारुहणं वण्णारुहणं चुण्णारुहणं आभरणारुहणं करेति करेत्ता आसत्तो सत्तविउलवट्टवग्धारितमल्लदामकलावं करेति करेत्ता अच्छेहिं सण्हेहिं सेएहिं रययामएहिं अच्छरसातन्दुलेहिं जिणपडिमाणं पुरओ अट्ठट्ठमंगलए आलिहति सोत्थियसिरिवच्छ

॥१२५॥

जाव दप्पणे अट्ठट्ठमंगले आलिहति आलिहित्ता कयग्गाहग्गहितकरतलपब्भट्ठविप्पमुक्केणं दसद्धवन्नेणं कुसुमेणं मुक्कपुप्फपुंजोवयारकलितं करेति करेत्ता चंदप्पभवइरवेरुलियविमलदंडं कंचनमणिरयणभत्तिचित्तं कालागुरुपवरकुंदुरुक्कतुरुक्कधूवगंधुत्तमाणुविद्धं धूमवट्टिं विणिमुयंतं वेरुलियामयं कडुच्छयं पग्गाहित्तु पयत्तेणं धूवं दाऊण जिणवराणं अट्ठसयविसुद्धगंथजुत्तेहिं महावित्तेहिं अत्थजुत्तेहिं अपुणरुत्तेहिं संथुणइ संथुणित्ता सत्तट्ठपयाइं ओसरति सत्तट्ठपयाइं ओसरित्ता वामं जाणुं अंचेइ अंचेत्ता दाहिणं जाणुं धरणितलंसि निवाडेइ तिक्खुत्तो मुद्धाणं धरणितलंसि णमेइ नमित्ता ईसिं पच्चुन्नमइ पच्चुन्नमित्ता कडयतुडियथंभियाओ भुयाओ पडिसाहरति पडिसाहरित्ता करतलपरिग्गहियं दसनहं सिरसावत्तं मत्थए अंजलिं कट्टु एवं वयासी-नमोत्थु णं । इति । वृत्तिर्यथा-ततः स विजयो देवश्चतुर्भिः सामानिकसहस्रैश्चतसृभिः सपरिवाराभिरग्रमहिषीभिः तिसृभिः पर्षद्भिः सप्तभिरनीकैः सप्तभिरनीकाधिपतिभिः षोडशभिरात्मरक्षकदेवसहस्रैः अन्यैश्च बहुभिर्विजयराजधानीवास्तव्यैर्वानमन्तरैर्देवैर्देवीभिश्च सार्द्धं संपरिवृतः सर्वर्द्ध्या, ' जाव निग्घोसनादितरवेणं ' ति यावत्करणादेवं परिपूर्णः पाठो द्रष्टव्यः-" सव्वजुईए, सव्वबलेणं सव्वसमुदएणं सव्वविभूईए सव्वसंभमेणं, सव्वपुप्फगंधमल्लालंकारेणं सव्वतुडियसद्दनिन्नाएमं महया इड्ढीए महया जुईए महया बलेणं महया समुदएणं महया वरतुडियजमगसमगपडुप्पवाइयरवेणं संखपणवपडहभेरिझल्लरिखरमुहिहुडुक्कदुन्दुभिनिग्घोसनादितरवेणं " । अस्य व्याख्या प्राग्वत् । यत्रैव सिद्धायतनं तत्रैवोपगच्छति उपागत्य सिद्धायतनमनुप्रदक्षिणीकुर्वन् पूर्वद्वारेण प्रविशति प्रविश्यालोके जिनप्रतिमानां प्रणामं करोति, कृत्वा यत्रैव मणिपीठिका यत्रैव देवच्छन्दको यत्रैव जिनप्रतिमास्तत्रैवोपागच्छति उपागत्य लोमहस्तकं परामृशति परामृश्य च जिनप्रतिमाः प्रमार्जयति प्रमार्ज्य दिव्ययोदकधारया स्नपयति स्नपयित्वा सरसेनार्द्रेण गोशीर्षचन्दनेन गात्राण्यनुलिम्पति अनुलिप्य अहतानि अपरिमलितानि दिव्यानि देवदूष्ययुगलानि ' नियंसेइ ' इति परिधापयति, परिधाप्याग्रैरभुक्तैर्वरैः प्रधानैर्गन्धैर्माल्यैश्चार्चयति । एतदेव सविस्तरमुपदर्शयति-पुष्पारोपणं माल्यारोपणं वर्णकारोपणं चूर्णारोपणं गन्धारोपणं आभरणारोपणं (च) करोति, कृत्वा तासां जिनप्रतिमानां पुरतोऽच्छैः-स्वच्छैः श्लक्ष्णैः-मसृणै रजतमयैः, अच्छो रसो येषां ते अच्छरसाः प्रत्यासन्नवस्तुप्रतिबिम्बाधारभूता इवातिनिर्मला इति भावः, ते च ते तन्दुलाश्च अच्छरसतन्दुलाः पूर्वपदस्य दीर्घान्तता प्राकृतत्वात् । यथा ' वइरामया नेमा ' इत्यादौ, देवाः तैरष्टावष्टौ स्वस्तिकादीनि मङ्गल्यकान्यालिखति, आलिख्य ' कयग्गाहग्गहीयं ' इत्यादि, मैथुनप्रथमसंरम्भे

मुखचुम्बनाद्यर्थं युवत्याः पञ्चाङ्गुलिभिः केशुषु ग्रहणं कचग्राहस्तेन कचग्राहेण गृहीतं करतलाद्विमुक्तं सत् प्रभ्रष्टं करतलप्रभ्रष्टविमुक्तम्, प्राकृतत्वात्पदव्यत्ययः, तेन दशार्द्धवर्णेन-पञ्चवर्णेन कुसुमेन कुसुमसमूहेन पुष्पपुञ्जोपचारकलितं, पुष्पपुञ्ज एव उपकारः पुष्पपुञ्जोपचारः तेन कलितं-युक्तं करोति कृत्वा च ' चंदप्पभवइरवेरुलियविमलदंडं ' चन्द्रप्रभवज्रवैडूर्यमयो विमलो दण्डो यस्स सः तथा तं काञ्चनमणिरत्नभक्तिचित्रं कालागुरुप्रवरकुन्दुरुकतुरुष्कधूपेन गन्धोत्तमेनानुविद्धा कालागुरुप्रवरकुन्दुरुकतुरुष्कधूपगन्धोत्तमानुविद्धा, प्राकृतत्वात्पदव्यत्ययः, तां धूपवर्ति विनिर्मुञ्चन्तं वैडूर्यमयं धूपकडुच्छुकं प्रगृह्य प्रयतो धूपघटीतो धूपं दत्त्वा जिनवरेभ्यः, सूत्रे षष्ठी प्राकृतत्वात्, सप्ताष्टानि पदानि पश्चादपसृत्य दशाङ्गुलिमञ्जलिं मस्तके कृत्वा प्रयतः ' अट्ठसयविसुद्धगंथजुत्तेहिं ' ति । विशुद्धो-निर्मलो लक्षणदोषरहित इति भावः, यो ग्रन्थः-शब्दसन्दर्भस्तेन युक्तानि विशुद्धग्रन्थयुक्तानि अष्टशतं च तानि विशुद्धग्रन्थयुक्तानि च तैरर्थयुक्तैरर्थसारैरपुनरुक्तैर्महावृत्तैस्तथाविध-देवलब्धेः प्रभावः एषः, संस्तौति संस्तुत्य वामं जानुमञ्चति-उत्पाटयति दक्षिणं जानुं धरणितले ' निवाडेइ ' इति निपातयति लगयतीत्यर्थः, त्रिकृत्वः-त्रीन् वारान् मूर्द्धानं धरणितले नमयति नमयित्वा च ईषत्प्रत्युन्नमयति, ईषत्प्रत्युन्नम्य कनकत्रुटितस्तंभितौ भुजौ ' संहरति ' सङ्कोचयति, संहृत्य करतलपरिगृहीतं शिरस्यावर्त्तं मस्तकेऽञ्जलिं कृत्वैवमवादीत्-' नमोत्थु णं ' इत्यादि । इति श्रीजीवाभिगमसूत्रवृत्तितृतीयप्रतिपत्तिमन्दरोद्देशके ३१३ प्रतौ १७२ पत्रे ॥ ५ ॥

केचिच्चाज्ञानिनो विद्याचारणादिलब्धिमतः श्रमणान् लब्ध्युपजीविनः प्रमादिनो न किञ्चिदेते इत्यादिभिर्वचनैः प्रतिमावन्दनवैरेण निन्दन्ति, तच्च तेषामनन्तसंसारकारणम्, यतस्ते हि महानुभागाः सुतरां नमस्याः यदेतेषां प्रभावेण लवणसमुद्रो जंबूद्वीपं नावपीडयति । तथा च सिद्धान्तः-

कम्हा णं भंते ! लवणसमुद्दे जंबुद्दीवं दीवं नो उवीलेइ ? नो उप्पीलेइ ? नो चेव णं एक्कोदगं करेइ ? गोयमा ! जंबुद्दीवेणं दीवे भरहेरवएसु वासेसु अरिहंतचक्कवट्टिबलदेवा वासुदेवा चारणा विज्जाहरा समणा समणीओ सावया साावियाओ मणुया पगइभद्दया पगइविणीया पगइउवसंता पगइपयणुकोहमाणमायालोभा मिउमद्दवसंपण्णा अल्लीणा भद्दगा विणीया, तेसि णं पणिहाते लवणसमुद्दे जंबुद्दीवं दीवं नो उव्वीलेइ नो चेव णं एक्कोदगं करेइ इति । वृत्तिर्यथा-' कम्हा णं ' इत्यादि, कस्माद् भदन्त ! लवणसमुद्रो जंबूद्वीपं

॥१२७॥

द्वीपं नावपीडयति-जलेन न प्लावयत्ति ? नोत्पीडयत्ति-प्राबल्येन न बाधते ?, ' णं ' इति वाक्यालंकृतौ, एकोदकं-सर्वात्मना उदकप्लावितं न करोति ?, भगवानाह-गौतम ! जंबूद्वीपे-भरतैरावतयोः क्षेत्रयोरर्हन्तश्चक्रवर्त्तिनो बलदेवा वासुदेवाः चारणा-जङ्घाचारणामुनयो विद्याधराः श्रमणाः-साधवः श्रमण्यः-संयत्यः श्रावकाः श्राविकाः एतत्सुषमदुष्षमाधारकत्रयवर्त्तिनमपेक्ष्योक्तं वेदतव्यम्, तत्रैवार्हदादीनां यथायोगं सम्भवात् सुषमसुषमादिकमधिकृत्याह-मनुष्याः प्रकृतिभद्रकाः प्रकृतिप्रतनुक्रोधमानमायालोभाः मृदुमार्दवसम्पन्नाः आलीना भद्रका विनीताः, एतेषां व्याख्यानं प्राग्वत्, तेषां प्रणिधया प्रणिधानं प्रणिधा ' उपसर्गादात ' इत्यङ्प्रत्ययः तान् प्रणिधाय-अपेक्ष्य तेषां प्रभावत इत्यर्थः । लवणसमुद्रो जंबूद्वीपं द्वीपं नावपीडयतीत्यादि, दुष्षमदुष्षमादावपि नावपीडयति, भरतैरावतवैताढ्याधिपतिदेवता प्रभावात्, तथा क्षुल्लहिमवच्छिखरिणोर्वर्षधरपर्वतयोर्देवता महर्द्धिका, यावत्करणान्महाद्युतिका इत्यादिपरिग्रहः परिवसन्ति तेषां प्रणिधया-प्रभावेन लवणसमुद्रो जंबूद्वीपं द्वीपं नावपीडीयतीत्यादी तथा हैमवतैरण्यवतोर्वर्षयोर्मनुजाः प्रकृतिभद्रका यावद्विनीतास्तेषां प्रणिधयेत्यादि पूर्ववत्, तथा तयोरेव वर्षयोर्यथाक्रमं शब्दापातिविकटापाती वृत्तवैताढ्यौ पर्वतौ तयोर्देवौ महर्द्धिकौ यावत्पल्योपमस्थितिकौ परिवसतस्तेषां प्रणिधयेत्यादि पूर्ववत्, तथा महाहिमवद्रुक्मिवर्षधरपर्वतयोर्देवता महर्द्धिका इत्यादि तथैव, तथा हरिवर्षरम्यकवर्षयोर्मनुजाः प्रकृतिभद्रका इत्यादि सर्वं हैमवतवत्, तथा तयोः क्षेत्रयोर्यथाक्रमं गन्धापातिमाल्यवत्पर्यायौ यौ वृत्तवैताढ्यपर्वतौ तयोर्देवौ महर्द्धिकावित्यादि पूर्ववत्, तथा पूर्वविदेहापरविदेहवर्षयोरर्हन्तश्चक्रवर्त्तिनो यावन्मनुजाः प्रकृतिभद्रका यावद्विनीतास्तेषां प्रणिधयेत्यादि पूर्ववत्, तथा देवकुरूत्तरकुरुषु मनुजाः प्रकृतिभद्रका यावद्विनीतास्तेषां प्रणिधयेत्यादि पूर्ववत्, तथा उत्तरकुरुषु जम्ब्वां सुदर्शनायामनाद्दतो नामदेवो जंबूद्वीपाधिपतिः परिवसति तस्य प्रणिधया-प्रभावेनेत्यादि । इति श्रीजीवाभिगमतृतीयप्रतिपत्तिमन्दरोद्देशके २६४ प्रतौ १८५ पत्रे ॥ ६ ॥

चातुर्मासिकसांव्वत्सरिकपर्वदिनानि देवानामपि सुतरां मान्यानीत्यभिप्रायो लिख्यते-

सेसं तहेव जाव सिद्धायतणा सव्वा ते चिय वण्णणा णायव्वा । तत्थ णं बहवे भवणवइवाणमंतरजोइसियवेमाणिया देवा चाउम्मासियपडिवएसु संवच्छरेसु य अण्णेसु बहूसु जिणजम्मणनिक्खमणणाणुप्पायपरिणिच्चाणमादिएसु य देवकज्जेसु य देवसमुदएसु य देवसमितीसु य देवसमवाएसु य देवपओयणेसु य एगंतओ सहिया समुवागया समाणा पमुइयपक्कीलिया अट्ठाहियारूवाओ

महामहिमाओ करेमाणा पालेमाणे सुहंसुहेणं विहरन्ति ॥ इति वृत्तिर्यथा-' तत्थ णं ' इत्यादि, तत्र तेषु सिद्धायतनेषु ' णं ' इति पूर्ववत्, बहवो भवनपतिव्यन्तरज्योतिष्कवैमानिका देवाश्चातुर्मासिकेषु पर्युषणायामन्येषु च बहुषु जिनजन्मनिष्क्रमणज्ञानोत्पादपरिनिर्वाणादिषु देवकार्येषु देवसमितिषु, एतदेव पर्यायद्वयेन व्याचष्टे-देवसमवायेषु-देवसमुदायेषु आजताः प्रमुदितप्रक्रीडिता अष्टाहिकारूपा महामहिमाः कुर्वन्तः सुखंसुखेन विहरन्ति-आसते । इति श्रीजीवाभिगमतृतीयप्रतिपत्तिज्योतिष्कोद्देशके २६४ प्रतौ २०७ पत्रे ॥ ७ ॥

॥१२९॥

अत्र मनुष्यलोके मनुष्याणां यथा गृहाद्बहिर्गमनाय समीचीनः सालङ्कारो वेषो भवति गृहे तु सामान्य एव, तथा देवानामपि यानि केनचित्प्रयोजनेन विकुर्वितानि शरीराणि तानि सालङ्काराणि साभरणानि, यानि तु भवधारणीयानि (तानि) तु विभूषया प्रकृतिस्थानीत्यभिप्रायो लिख्यते-

सोहम्मीसाणा देवा केरिसया विभूसाए पण्णत्ता ? गोयमा ! दुविहा पण्णत्ता, तं जहा-' वेउव्वियसरीरा य अवेउव्वियसरीरा य, तत्थ णं जे ते वेउव्वियसरीरा ते हारविराइयवच्छा जाव दसदिसाओ उज्जोवेमाणा पभासेमाणा जाव पडिरूवा, तत्थ णं जे ते अवेउव्वियसरीरा ते आभरणवसणरहिया पगतित्था विभूसाए पण्णत्ता ॥ इति । वृत्तिर्यथा-' सोहम्मीसाणा ' इत्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोर्देवानां शरीरकाणि कीदृशानि विभूषया प्रज्ञप्तानि ? भगवानाह-गौतम ! द्विविधानि शरीरकाणि प्रज्ञप्तानि, तद्यथा-भवधारणीयानि उत्तरवैक्रियाणि च, तत्र यानि तानि भवधारणीयानि शरीराणि तानी आभरणवसनरहितानि प्रकृतिस्थानि विभूषया प्रज्ञप्तानि, स्वाभाविक्येव तेषां विभूषा नौपाधिकीति भावः । तत्र यानि तानि उत्तरवैक्रियाणि शरीराणि तानि ' हारविराइयवच्छा ' इत्यादि, पूर्वोक्तं तावद्वक्तव्यं यावत् ' दसदिसाओ उज्जोवेमाणा पभासेमाणा पासाईया दरिसणिज्जा अभिरूवा पडिरूवा विभूसाए पण्णत्ता ' अस्य व्याख्या प्राग्वत् । इति श्रीजीवाभिगमचतुर्थप्रतिपत्तौ ज्योतिष्कोद्देशके ॥ ७ ॥

✠ ✠ ✠ ✠ ✠

॥ इति श्रीमद्कब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरिशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे मध्यभागे जीवाभिगमविचारनामा तृतीयस्तरङ्गः ॥ ३ ॥

अनन्यसामान्यसुवर्णपूर्णं, सतां मनःकामितदं च तूर्णम् । भूयिष्ठरत्नं किल सप्रयत्नं, श्रीजैनसिद्धान्तनिधिं श्रयध्यम् ।। १ ।।

अथ प्रज्ञापनाविचारा लिख्यन्ते तत्र निंबाम्रादिवृक्षाणां मूलपत्रादीनि यथा यावत्प्राणिप्रतिबद्धानि तथा लिख्यन्ते

णिबंबजंबुकोसंब-सालअंकोल्ल पीलु सेलू य । सल्लइमोयइमालुय, बउल पलासे करंजे य ।। १ ।। पुत्तंजीवयऽरिट्ठे, बिहेलए हरिडए य भिल्लाए । उंबेभरिया खीरिणि, बोधव्वे धायइ पियाले ।। २ ।। पूइयनिंबकरंजे, सण्हा तह सीसवा य असणे य । पुन्नागनागरुक्खे, सीवन्नि तहा असोए य ।। ३ ।। जे यावन्ने तहप्पगारा, एएसि णं मूलावि असंखेज्जजीविया कंदावि खंदावि तयावि सालावि पवालावि पत्ता पत्तेयजीविया पुप्फा अणेगजीविया फला एगट्ठिया से तं एगट्ठिया ।। इति । वृत्तिर्यथा- ' निंब ' इत्यादिगाथात्रयम् । तत्र निंबाम्रजंबूकोशाम्बाः-प्रतीताः, शालः-सर्जः, 'अंकोल्ल ' ति अङ्कोठः, प्राकृतत्वाच्च सूत्रे ठकारस्य लादेशः, ' अंकोठे ल्लः ' (८-१-२००) इति वचनात्, पीलुः-प्रतीत शेल्लु-श्लेष्मातकः सल्लकी-गजप्रिया मोचकीमालुकौ च देशविशेषप्रतीतौ बकुलः-केसरः पलासः-किंशुकः करञ्जो-नक्तमालः ।। १ ।। पुत्रजीवको-गोपगिरौ प्रसिद्धः अरिष्टः-पिचुमन्दः बिभीतकः-अक्षः हरीतकः-कोङ्कणदेशप्रसिद्धः कषायबहुलः भल्लातको-भल्लातकाभिधानानि फलानि लोकप्रसिद्धानि उम्बेभरिकाक्षीरणीघातकीप्रियालपूति (निम्ब) करञ्जश्लक्ष्णा-शिंशपाशनपुन्नाग-नागश्रीपर्ण्यशोका लोकप्रतीताः । ' जे यावन्ने तहप्पगारा ' इति येऽपि चान्ये तथाप्रकाराः-एवंप्रकारास्तत्तद्देशविशषभाविनः ते सर्वेऽपि एकास्थिका वेदितव्याः, एतेषां-एकास्थिकानां मूलान्यप्यसङ्ख्येयजीवकानि-असङ्ख्येयप्रत्येकशरीरजीवात्मकानि, एवं कन्दा अपि स्कन्धा अपि त्वचोऽपि शाखा अपि प्रवाला अपि प्रत्येकमसङ्ख्येयप्रत्येकशरीरजीवकाः, तत्र मूलानि-यानि कन्दस्याऽधस्ताद्भूमेरन्तः प्रसरन्ति, तेषामुपरि कन्दाः ते च लोकप्रतीताः, स्कन्धाः-स्थुडाः त्वचः-छल्लयः शालाः-शाखाः प्रवालाः-पल्लवाङ्कुराः, 'पत्ता पत्तेययजीविय 'त्ति पत्राणि प्रत्येकजीवकानि-एकैकं पत्रमेकैकेन जीवेनाधिष्ठितमिति भावः, ' पुप्फा अणेगजीविय ' त्ति पुष्पाण्यनेकजीवानि प्रायः प्रतिपुष्पपत्रं जीवभावात्, फलान्येकास्थिकानि । उपसंहारमाह-' से तं एगट्ठिया ' सुगमम् । इति श्रीप्रज्ञापनाप्रथमपदसूत्रवृत्तौ ४०० प्रतौ २७ पत्रे ।। १ ।।

केचिच्च जातिप्रभृतिपुष्पाणां सङ्ख्यातजीवत्वेऽपि प्रतिमापूजनभयोत्पादनाय सामान्यतः पुष्पाणानन्तजीवत्वं वदन्तो जनान् विप्रतारयन्ति

।।१३०।।

ते तु दुर्लभबोधिनो वेदितव्याः, पुष्पेषु सङ्ख्यासङ्ख्यानन्तजन्तुकृतो विवेकश्चायं सिद्धान्तोक्तः-

पुप्फा जलया थलया य, बिंटबद्धा य णालबद्धा य । संखिज्जसंखिज्जा, बोधव्वाणंतजीवा य ॥ ८२ ॥ जे केइ णालियाबद्धा, पुप्फा संखेज्जजीविया भणिया । णिहूया अणंतजीवा, जे यावन्ने तहाविहा ॥ ८३ ॥ वृत्तिर्यथा-' पुप्फा जलया ' इत्यादि, पुष्पाणि चतुर्विधानि, तद्यथा-जलजानि-सहस्रपत्रादीनि स्थलजानि-कोरण्टकादीनि, एतान्यपि च प्रत्येकं द्विधा, तद्यथा-कानिचिद्वृन्तबद्धानि अतिमुक्तक-प्रभृतीनि कानिचिन्नालबद्धानि जातिपुष्पप्रभृतीनि, अत्र एतेषां मध्ये कानिचित्पत्रादिगतजीवापेक्षया सङ्ख्येयजीवानि कानिचिदसङ्ख्येयजीवानि

कानिचिदनन्तजीवानि, यथागमं बोद्धव्यानि ॥ ८२ ॥ अत्रैव कञ्चिद्विशेषमाह-' जे केइ णालियाबद्धा ' इत्यादि, यानि कानिचिन्नालिकाबद्धानि पुष्पाणि जात्यादिगतानि तानि सर्वाण्यपि सङ्ख्येयजीवकानि भणितानि तीर्थंकरगणधरैः, स्निहूपुष्पं पुनरनन्तजीवम्, यान्यपि चान्यानि स्निहूपुष्पकल्पानि तान्यपि तथाविधानि-अनन्तजीवात्मकानि ज्ञातव्यानि ॥ ८३ ॥ इति श्रीप्रज्ञापनाप्रथमपदसूत्रवृत्तौ ४०० पत्रौ २८ पत्रे ॥ २ ॥

अथ पुष्पफलकालिङ्गफलादीनां वृन्तादीनि यावज्जीवात्मकानि भवन्ति तल्लिख्यते-

पुप्फफलं कालिंगं, तुंबं तउसेलवालुवालुकं । घोसाडयं पडोलं, तिंडूयं चेव तेंडूसं ॥ ९० ॥ बिंटं मंसकडाहं, एयाइं हुंति एगजीवस्स । पत्तेयं पत्ताइं, सकेसरमकेसरं मिंजा ॥ ९१ ॥ वृत्तिर्यथा-पुष्पफलमेवं कालिङ्गं तुम्बं त्रपुषं ' एलवालु ' त्ति चिर्भटविशेषरूपं वालुकं-चिर्भटम् । तथा घोषातकं पटोलं तेन्दुकं तिन्दूसं च यत्फलम्, एतेषु प्रत्येकं ' बिण्टं ' वृन्तं ' मंसकडाहं ' इति मांसं-गिरं तथा कटाहं, एतानि त्रीणि एकस्य जीवस्य भवन्ति एक जीवात्मकान्येतानि त्रीणि भवन्तीत्यर्थः । तथा एतेषामेव पुष्पफलादीनां तिन्दुक(स) पर्यन्तानां पत्राणि पृथक् ' प्रत्येकं ' इति प्रत्येकशरीराधिष्ठितानि-एकैकजीवाधिष्ठितानीत्यर्थः । तथा सकेसरा अकेसरा वा मिञ्जा-बीजानि प्रत्येकमेकैकजीवाधिष्ठितानि ॥ ९०-९१ ॥ इति श्रीप्रज्ञापनाप्रथमपदसुत्रवृत्तौ ४०० प्रतौ २९ पत्रे ॥ ३ ॥

अथ निगोदजीवा यथाऽऽहारान्नपानादिकं गृहणन्ति, यथा चैकस्मिन् शरीरेऽनन्तास्तिष्ठन्तो मृदुधियां प्रतीतिपथमवतरन्ति, यथा च तेषामानन्त्यं सुखेन प्रतीयते तथा लिख्यते-

समयं वक्कंताणं, समयं तेसिं सरीरनिव्वत्ती । समयं आणुग्गहणं, समयं ऊसासणीसासो ॥ १ ॥ एक्कस्स उ जं गहणं, बहूणं साहारणाण तं चेव । जं बहुयाणं गहणं, समासओ तंपि एगस्स ॥ २ ॥ साहारणमाहारो, साहारणआणुपाणगहणं च । साहारणजीवाणं, साहारणलक्खणं एयं ॥ ३ ॥ जह अयगोलो धंतो, जाओ तत्ततविणज्जसंकासो । सव्वो अगणिपरिणओ णिगोयजीवे तहा जाण ॥ ४ ॥ एक्कस्स दोन्ह तिन्ह व, संखिज्जाण व ण पासिउं सक्का । दीसंति सरीराइं, णिगोयजीवाणणंताणं ॥ ५ ॥ लोगागासपएसे, णिगोयजीवं ठवेहि इक्किक्कं । एवं मविज्जमाणा, हवंति लोगा अणंता उ ॥ ६ ॥ एतद्वृत्तिर्यथा-' समयं ' इत्यादि, ' समयं ' युगपद्व्युत्क्रान्तानां-उत्पन्नानां सतां तेषां-साधारणजीवानां ' समयं '-एककालं शरीरनिवृत्तिर्भवति, समकं च प्राणापानग्रहणं-प्राणापानयोग्य-पुद्गलोपादानम्, ततः समकम्-एककालं तदुत्तरकालभाविनावुच्छ्वासनिश्वासौ ॥ १ ॥ तथा एकस्य यदाहारादिपुद्गलानां ग्रहणं तदेव बहूनामपि साधारणजीवानामवसेयम्, किमुक्तं भवति ? यदाहारादिकमेको गृह्णाति शेषा अपि तच्छरीराश्रिता बहवोऽपि तदेव गृह्णन्तीति, तथा च यद् बहूनां ग्रहणं तत्सङ्क्षेपादेकत्र शरीरे समावेशादेकस्यापि ग्रहणम् ॥ २ ॥ सम्प्रत्युक्तार्थोपसंहारमाह-' साहारण ' इत्यादि, सर्वेषामप्येकशरीराश्रितानां जीवानामुक्तप्रकारेण यत्साधारणं-साधारणः, सूत्रे नपुंसकतानिर्देशः आर्षत्वात्, आहारः-आहारयोग्यपुद्गलोपादानम्, यच्च साधारणं प्राणापानयोग्यपुद्गलोपादानमुपलक्षणमेतत् यौ साधारणावुच्छ्वासनिःश्वासौ च साधारणा शरीरनिवृत्तिः एतत्साधारणजीवानां लक्षणम् ॥ ३ ॥ सम्प्रति यथैकस्मिन्निगोदशरीरेऽनन्ता जीवाः परिणताः प्रतीतिपथमवतरन्ति तथा प्रतिपादयन्नाह-' जह अयगोलो ' इत्यादि, यथा अयोगोलो ध्मातः सन् तप्ततपनीयसङ्काशः सर्वोऽग्निपरिणतो भवति तथा निगोदजीवान् जानीहि, निगोदरूपेऽप्येकैकस्मिन् शरीरे तच्छरीरात्मकतयाऽनन्तान् जीवान् परिणतान् जानीहि ॥ ४ ॥ एवं च सति-' एगस्स ' इत्यादि, एकस्य द्वयोस्त्रयाणां यावत्सङ्ख्येयानां, वा शब्दादसङ्ख्येयानां वा निगोदजीवानां शरीराणि द्रष्टुं न शक्यानि, कुतः इति चेत् ? उच्यते-अभावात्, न ह्येकादिजीवगृहीतानि अनन्तवनस्पतिशरीराणि सन्ति, अनन्तजीवपिण्डात्मकत्वात्तेषाम्, कथं तर्ह्युपलभ्यानि ? इत्यत आह-' दीसंति ' इत्यादि, दृश्यन्ते शरीराणि निगोदजीवानां-बादरनिगोदजीवानामनन्तानां न तु सूक्ष्मनिगोदजीवानाम्, तेषां शरीराणामनन्तजीवसङ्घाता-त्मकत्वेऽप्यनुपलभ्यस्वभावत्वात्, तथा सूक्ष्मपरिणामपरिणतत्वात्, अथ कथमेतदवसीयते निगोदरूपशरीरं नियमादनन्तजीवपरिणामावि-र्भावितं भवतीति ? उच्यते-

।।१३२।।

जिनवचनात् तच्चेदम्-" गोला य असंखिज्जा, असंखनिगोअओ हवइ गोलो । एक्केक्कंमि निगोए, अणंतजीवा मुणेयव्वा ॥ १ ॥ " ॥ ५ ॥ सम्प्रत्येतेषामेव निगोदजीवानां प्रणाणमभिधित्सुराह-' लोगागास ' इत्यादि, एकैकस्मिन, लोकाकाशप्रदेशे एकैकं निगोदजीवं स्थापय, एवमेकैकस्मिन् आकाशप्रदेशे एकैकजीवरचनया मीयमाना अनन्तालोका-अनन्तलोकाकाश-प्रदेशप्रमाणा निगोदजीवा भवन्ति ॥ ६ ॥ इति प्रज्ञापनाप्रथमपदवृत्तौ ४०० प्रतौ ३१ पत्रे ॥ ४ ॥

अत्र सूत्ररुचिबीजरुच्यधिगमरुचीनां स्वरूपं लिख्यते-

॥१३३॥

जो सुत्तमहिज्झंतो, सुएण ओगाहई उ सम्मत्तं । अंगेण बाहिरेण व, सो सुत्तरुइ त्ति नायव्वो ॥ १ ॥ एगपएणेगाइं, पयाइ जो पसरई उ सम्मत्तं । उदएव्व तिल्लबिंदू, सो बीयरुइ त्ति नायव्वो ॥ २ ॥ सो होइ अभिगमरुई, सुयणाणं जस्स अत्थओ दिट्ठं । एक्कारस अंगाइं, पइन्नगं दिट्ठिवाओ य ॥ ३ । एतासां वृत्तिर्यथा-' जो सुत्त ' इत्यादि, यः सूत्रम्-अङ्गप्रविष्टमङ्गबाह्यं वाऽधीयानस्तेन श्रुतेनाङ्गप्रविष्टेनाङ्गबाह्येन वा सम्यक्त्वमवगाहते स सूत्ररुचिरिति ज्ञातव्यः । बीजरुचिमाह-' एगपएणेगाइं ' इत्यादि, एकेन पदेन प्रक्रमाज्जीवादीनामनेकानि पदानि प्राकृतत्वेन विभक्तिव्यत्यथादनेकेषु जीवादिषु पदेषु यः सम्यक्त्वमिति धर्मधर्मिणोरभेदोपचारात्सम्यक्त्ववानात्मा प्रसरति तुशब्दोऽवधारणार्थः प्रसरत्येव, कथं ? इत्याह-उदक इव तैलबिन्दुः, किमुक्तं भवति ? यथा-उदकैकदेशगतोऽपि तैलबिन्दुः समस्तमुदकमाक्रामति तथैकदेशोत्पन्नरुचिरप्यात्मा तथाविधक्षयोपशमभावादशेषेषु तत्त्वेषु रुचिमान् भवति स एवंविधो बीजरुचिरिति ज्ञातत्यः । अधिगमरुचिमाह-' सो होइ अहिगमरुई ' इत्यादि, यस्य श्रुतज्ञानमर्थतो दृष्टमेकादशाङ्गानि, प्रकीर्णकमित्यत्र जातावेकवचनम्, ततोऽयमर्थः-प्रकीर्णकानि-उत्तराध्ययनादीनि दृष्टिवादः, चशब्दादुपाङ्गानि च, स भवत्यधिगमरुचिरित्यादि । इति प्रज्ञापनाप्रथमपदसूत्रवृत्तौ ४०० प्रतौ ४५ पत्रे ॥ ५ ॥

अथ गर्भजमनुष्यसङ्ख्या लिख्यते -

मणुस्साणं भंते ! केवइया ओरालियसरीरगा पन्नत्ता ? गोयमा ! दुविहा पन्नत्ता तंजहा-बद्धेल्लगा य मुक्केल्लगा य, तत्थ णं जे ते बद्धेल्लगा ते णं सिय संखेज्जा सिय असंखेज्जा, जहन्नपदे संखेज्जा संखेज्जाओ कोडाकोडीओ तिजमलपयस्स उवरिं चउजमलपयस्स हिट्ठा, अहव णं छट्ठो वग्गो पंचमवग्गपडुप्पणो, अहव णं छउन्नइच्छेयणगदाई रासी । उक्कोसपए असंखेज्जा, असंखेज्जाहिं उस्सप्पिणिओ-

सप्पिणीहिं अवहीरंति कालतो, खेत्ततो रूवपक्खित्तेहिं मणुस्सेहिं सेढी अवहीरति, तीसे सेढीए आगासखेत्तेहिं अवहारो मग्गिज्जइ असंखेज्जा असंखेज्जाहिं उस्सप्पिणिओसप्पिणिहिं कालतो, खेत्ततो अंगुलपढमवग्गमूलं तइयवग्गमूलपडुप्पणं ॥ इति । वृत्तिर्यथा-मनुष्याणां बद्धान्यौदारिकशरीराणि स्यात्-कदाचित्सङ्ख्येयानि कदाचिदसङ्ख्येयानि, कोऽत्राभिप्रायः इति चेत् ? उच्यते-इह द्वये मनुष्या-गर्भव्युत्क्रान्तिकाः सम्मूर्च्छिमाश्च, तत्र गर्भव्युत्क्रान्तिकाः सदाऽवस्थायिनो, न स कश्चित्कालोऽस्ति यो गर्भव्युत्क्रान्तिकमनुष्यविरहितो भवति, सम्मूर्च्छिमाश्च कदाचिद्विद्यन्ते कदाचित् सर्वथा तेषामभावो भवति, तेषामुत्कर्षतोऽन्तर्मुहूर्त्तायुष्कत्वात्, उत्पत्त्यन्तरस्य चोत्कर्षतश्चतुर्वि-शतिमुहूर्त्तप्रमाणत्वात्, ततो यदा सर्वथा सम्मूर्च्छिमा मनुष्या न विद्यन्ते किन्तु केवला गर्भव्युत्क्रान्तिका एव तिष्ठन्ति तदा स्यात्सङ्ख्येयाः, सङ्ख्येयानामेव गर्भव्युत्क्रान्तिकानां भावात्, महाशरीरत्वे प्रत्येकशरीरत्वे च सति परिमितक्षेत्रवर्त्तित्वात्, यदा तु सम्मूर्च्छिमास्तदाऽसङ्ख्येयाः सम्मूर्च्छिमानामुत्कर्षतः श्रेण्यसङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात्, तथा चाह-' जहन्नपदे संखेज्जा ' इत्यादि, जघन्यपदं नाम यत्र सर्वस्तोका मनुष्याः प्राप्यन्ते, आह-किमत्र सम्मूर्च्छिमानां ग्रहणमुत गर्भव्युत्क्रान्तिकानाम् ? उच्यते-गर्भव्युत्क्रान्तिकानां तेषामेव सदाऽवस्थायि-तया सम्मूर्च्छिमविरहे सर्वस्तोकतया प्राप्यमाणत्वात्, उत्कृष्टपदे तूभयेषामपि ग्रहणम्, यदाह मूलटीकाकारः-" सेतराणां ग्रहणमुत्कृष्टपदे जघन्यपदे गर्भव्युत्क्रान्तिकानामेव केवलानां ग्रहण " मिति, अस्मिन् जघन्यपदे सङ्ख्येया मनुष्याः, तत्र सङ्ख्येयकं सङ्ख्येयभेदभिन्नमिति न ज्ञायते कियन्तस्ते ? इति विशेषं निर्द्धारयति-सङ्ख्येयाः कोटीकोट्यः, अथवा इदमन्यत् विशेषतरं परिमाणम् ' तिजमलपयस्सुवरिं चउजमलपयस्स हेट्ठा ' इति, इह मनुष्यसङ्ख्याप्रतिपादकान्यकोनत्रिंशदङ्कस्थानानि वक्ष्यमाणानि, तत्र समयपरिभाषयाऽष्टानामष्टानामङ्कस्थानानां यमलपदमिति संज्ञा, चतुर्विंशत्या चाङ्कस्थानैस्त्रीणि यमलपदानि लब्धानि, उपरि पञ्चाङ्कस्थानानि तिष्ठन्ति, अथवा यमलपदमष्टभिरङ्क-स्थानैस्ततश्चतुर्थं यमलपदं न प्राप्यते तत उक्तं त्रयाणां यमलपदानामुपरि पञ्चभिरङ्कस्थानैर्वर्द्धमानत्वात्, चतुर्थस्य च यमलपदस्याधस्ताअि-भिरङ्कस्थानैर्हीनत्वात् । अथवा द्वौ द्वौ वर्गौ समुदितौ एकं यमलपदम्, चत्वारो वर्गाः समुदिताः द्वे यमलपदे, षट् वर्गाः समुदितास्त्रीणि यमलपदानि, अष्टौ वर्गाः समुदिताश्चत्वारि यमलपदानि, तत्र यस्मात्षण्णां वर्गाणामुपरि वर्तन्ते सप्तमस्य च वर्गस्याधस्तात् तत उक्तं त्रियमलपदस्योपरि चतुर्यमलपदस्याधस्तादिति, त्रियमलपदस्येति-तृतीयानां यमलपदानां समाहारस्त्रियमलपदं तस्य, तथा चतुर्णां यमलपदानां

।।१३४।।

समाहारश्चतुर्यमलपदं, तस्य । सम्प्रति स्पष्टतरं सङ्ख्यानमुपदर्शयति-' अहव णं छट्ठो वग्गो पंचमवग्गपडुप्पणो ' इति, अथवेति-प्रकारान्तरे '.ण ' मिति वाक्यालङ्कारे षष्ठो वर्गः पञ्चमवर्गेण प्रत्युत्पन्नो-गुणितः सन् यावान् भवति तावत्प्रमाणा जघन्यपदे मनुष्याः, तत्रैकस्य वर्ग एक एव स च वृद्धिं न गत इति वर्गो न गण्यते, द्वयोर्वर्गश्चत्वार एष प्रथमो वर्गः ४, चतुर्णा वर्गः षोडश एष द्वितीयो वर्गः १६, षोडशानां वर्गे द्वे शते षट्पञ्चाशदधिके एष तृतीयो वर्गः २५६, द्वयोः शतयोः षट्पञ्चाशदधिकयोर्वर्गः पञ्चषष्टिः सहस्राणि पञ्चशतानि षट्त्रिंशदधिकानि एष चतुर्थो वर्गः ६५५३६, एतस्य वर्गश्चत्वारि कोटिशतानि एकोनत्रिंशत्कोटयः एकोनपञ्चाशल्लक्षाः सप्तषष्टिः सहस्राणि द्वे शते षण्णवत्यधिके एष पञ्चमो वर्गः ४२९४९६७२९६, उक्तञ्च " चत्तारि य कोडिसया, अउणत्तीसं च होंति कोडीओ । अउणावण्णं लक्खा, सत्तट्ठी चेव य सहस्सा ॥ १ ॥ दो य सया छण्णउया, पंचमवग्गो समासओ होइ । एयस्स कतो वग्गो, छट्ठो जो होइ तं वोच्छं ॥ २ ॥ " एतस्य पञ्चमस्य वर्गस्य यो वर्गः स षष्ठो वर्गस्तस्य परिमाणम्-एकं कोटीकोटीशतसहस्रं चतुरशीतिः कोटीकोटीसहस्राणि चत्वारि सप्तषष्ठ्यधिकानि कोटीकोटीशतानि चतुश्चत्वारिंशत्कोटिलक्षाणि सप्तकोटीसहस्राणि त्रीणि सप्तत्यधिकानि कोटिशतानि पञ्चनवतिर्लक्षाः एकपञ्चाशत्सहस्राणि षट्शतानि षोडशोत्तराणि १८४४६७४४०७३७०९५५१६१६, एष षष्ठो वर्गः । उक्तं च-" लक्खं कोडाकोडी, चउरासीई भवे सहस्साइं । चत्तारि य सत्तट्ठा, होंति सया कोडिकोडीणं ॥ १ ॥ चोयालं लक्खाइं, कोडीणं सत्त चेव य सहस्सा । तिण्णिसया सत्तयरी, कोडीणं होंति नायव्वा ॥ २ ॥ पंचाणउई लक्खा, एक्कावण्णं भवे सहस्साइं । छस्सोलसुत्तरसया, एसो छट्ठो हवइ वग्गो ॥ ३ ॥ इति । एष षष्ठो वर्गः । पंचमवर्गेण गुण्यते गुणिते च सति यावान् राशिर्भवति तावत्प्रमाणा जघन्यपदे मनुष्याः, ते चैतावन्तो भवन्ति-७९२२८१६२५१४२६४३३७५३५४३९५०३३६, एतान्येकोनत्रिंशदङ्कस्थानानि । एतानि च कोटाकोट्यादिद्वारेण कथमप्यभिधातुं न शक्यन्ते ततः पर्यन्तवर्त्तिनोऽङ्कस्थानादारभ्याङ्कस्थानसङ्ग्रहमात्रं पूर्वपुरुषप्रणीतेन गाथाद्वयेना-भिधीयते-छ त्तिण्णि तिण्णि सुण्णं, पंचेव य नव य तिण्णि चत्तारि । पंचेव तिण्णि नव पंच सत्त तिण्णेव तिण्णेव ॥ १ ॥ चउ छ द्दो चउ एक्को, पण दो छक्किक्कगो य अट्ठेव । दो दो णव सत्तेव य, ठाणाइं उवरि हुंताइं ॥ २ ॥ " अथवाऽयमङ्कस्थानप्रथमाक्षरसङ्ग्रहः " छ त्ति ति सु पं ण ति च पं, ति ण पं स ति ति च छ दो च ए । पं दो छ ए अ दो दु ण् स,

पढमक्खरंसन्नियट्ठाणा ॥ १ ॥" एतेषामेव एकोनत्रिंशदङ्कस्थानानां पूर्वपुरुषैः पूर्वाङ्गैः परिसङ्ख्यानं कृतं तदुपदर्श्यते-तत्र चतुरशीतिर्लक्षाणि पूर्वाङ्गं, चतुरशीतिर्लक्षाश्चतुर-शीतिलक्षैर्गुण्यन्ते ततः पूर्वं भवति, तस्य परिमाणम्-सप्ततिः कोटिलक्षाणि षट्पंचाशत्कोटिसहस्राणि ७०५६०००००००००, एतेन भागो ह्रियते तत इदमागतम्-एकादशपूर्वकोटीकोट्यो द्वाविंशतिः पूर्वकोटीलक्षाणि चतुरशीतिः पूर्वकोटीसहस्राणि अष्टादशोत्तराणि पूर्वकोटिशतानि, एकाशीतिः पूर्वलक्षाणि पञ्चनवतिः पूर्वसहस्राणि त्रीणि षट्पञ्चाशदधिकानि पूर्वशतानि, अत ऊर्ध्वं पूर्वैर्भागो न लभ्यते ततः पूर्वाङ्गैर्भागहरणं, तत्रेदमागतम्-एकविंशतिः पूर्वाङ्गलक्षाणि सप्ततिः पूर्वाङ्गसहस्राणि षट् एकोनषष्ट्यधिकानि पूर्वाङ्गशतानि, तत ऊर्द्धं चेदमन्यदुद्धरितमवतिष्ठते-त्र्यशीतिर्लक्षाणि पञ्चाशत्सहस्राणि त्रीणि शतानि षट्त्रिंशदधिकानि मनुष्याणामिति ११२२८४११८८१९५३५६ । २१७०६५९ । ८३५०३३६ । तथा च पूर्वाचार्यप्रणीता अत्र गाथा : -" मणुयाण जहण्णपदे, एक्कारसपुव्वकोडिकोडीओ । बावीसकोडिलक्खा, कोडीसहस्साइ चुलसीई ॥ १ ॥ अट्ठेव य कोडिसया, पुव्वाण दसुत्तरा तओ होंति । एक्कासीई लक्खा, पंचाणउई सहस्साइं ॥ २ ॥ छप्पन्ना तिन्निसया, पुव्वाणं पुव्ववण्णिया अण्णे । एत्तो पुव्वंगाइं, इमाइ अहियाइ अण्णाइं ॥ ३ ॥ लक्खाइ एगवीसं, पुव्वंगाण सयरी सहस्साइं । छच्चेवेगूणट्ठा, पुव्वंगाणं सया होंति ॥ ४ ॥ तेसीइ सयसहस्सा, पण्णासं खलु भवे सहस्साइं । तिन्नि सया छत्तीसा, एवइया अविगला मणुया ॥ ५ ॥ इति । इमामेव सङ्ख्यां विशेषोपलम्भनिमित्तं प्रकारान्तरेणाह-' अहव णं छन्नउइ च्छेयणगदाई रासी ' इति, ' अहव णं ' ति प्राग्वत् षण्णवतिच्छेदनकानि यो राशिर्ददाति स षण्णवतिच्छेदनकदायी राशिः, किमुक्तं भवति ? यो राशिरर्द्धेनार्द्धेन छिद्यमानः षण्णवति वारान् छेदं सहते पर्यन्ते च सकलमेकं रूपं पर्यवसितं भवति स षण्णवतिच्छेदनकदायी राशिरिति, कः पुनरेवंविध इति चेत् ? उच्यते-एष एव षष्ठो वर्गः पञ्चमवर्गगुणितः, कोऽत्र प्रत्यय इति चेत् ? उच्यते-इह प्रथमवर्गश्छिद्यमानो द्वे छेदनके ददाति, तद्यथा-प्रथमच्छेदनकं द्वौ द्वितीयमेकमिति, द्वितीयो वर्गश्चत्वारि च्छेदनकानि, तत्र प्रथममष्टौ, द्वितीयं चत्वारः तृतीयं द्वौ चतुर्थमेक इति । एवं तृतीयो वर्गोऽष्टौ छेदनकानि प्रयच्छति, चतुर्थः षोडश, पञ्चमो द्वात्रिंशतं षष्ठश्चतुःषष्ठिं, स चैवं पञ्चमवर्गेण गुणितः षण्णवतिः कथमेतदवसेयमिति चेत् ? उच्यते-इह यो यो वर्गो येन येन वर्गेण गुण्यते तत्र तत्र तयोर्द्वयोरपि छेदनकानि प्राप्यन्ते, यथा-प्रथमवर्गेण गुणिते द्वितीयवर्गे षट्, तथाहि-द्वितीयो वर्गः

षोडशलक्षणः प्रथमवर्गेण चतुष्करूपेण गुण्यते जाता चतुःषष्टिः, तस्याः प्रथमं छेदनकं द्वात्रिंशत्, द्वितीयं षोडश, तृतीयमष्टौ, चतुर्थं चत्वारः, पञ्चमं द्वौ, षष्ठमेक इति, एवमन्यत्रापि भावनीयम् । तत्र पञ्चमवर्गे द्वात्रिंशच्छेदनकानि, षष्ठे चतुःषष्टिः, ततः पञ्चमवर्गेण षष्ठे वर्गे गुणिते पण्णवति छेदनकानि प्राप्यन्ते । अथवा एकं रूपं स्थापयित्वा ततः षण्णवतिवारान् द्विगुणद्विगुणीक्रियते कृतं च सद्यदि तावत्प्रमाणो राशिर्भवति ततोऽवसातव्यमेष षण्णवतिच्छेदनकदायी राशिरिति । तदेवं जघन्यपदमभिहितं, इदानीमुत्कृष्टपदमाह-' उक्कोसपए असंखेज्जा ' इत्यादि, उत्कृष्टपदे ये मनुष्या भवन्ति तेऽसङ्ख्येयाः, तत्रापि कालतः परिमाणचिन्तायां प्रति समयमेकैकमनुष्यापहारे सामस्त्येनासङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियन्ते, क्षेत्रतो रूपे प्रक्षिप्ते मनुष्यैरेका श्रेणिः परिपूर्णाऽपह्रियते, किमुक्तं भवति ?- उत्कृष्टपदे ये मनुष्यास्तुषु मध्ये एकस्मिन्नसत्कल्पनया रूपे प्रक्षिप्ते सकलाऽपि श्रेणिरेकाऽपह्रियते, तस्याश्च श्रेणेः क्षेत्रकालाभ्यामपहारमार्गणा कालतस्तावदसङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिः क्षेत्रतोऽङ्गुलप्रथमवर्गमूलं तृतीयवर्गमूलप्रत्युत्पन्नम्, किमुक्तं भवति ?- अङ्गुलमात्रक्षेत्रप्रदेशराशिरसत्कल्पनया षट्पञ्चाशदधिकषोडशलक्षणं ततस्तृतीयवर्गमुलेनासकल्पनया द्विकलक्षणेन गुण्यते, गुणिते च सति यावान् प्रदेशराशिर्भवति असत्कल्पनया द्वात्रिंशदेतावत्प्रमाणैः खण्डैरपह्रियमाणा यावत् श्रेणिर्निष्ठामियर्त्ति तावन्मनुष्या अपि निष्ठामुपयान्ति, आह-कथमेकस्याः श्रेणेर्यथोक्तप्रमाणैः खण्डैरपह्रियमाणाया असङ्ख्येया उत्सर्पिण्यव-सर्पिण्यो लगन्ति ? उच्यते-क्षेत्रस्यासूक्ष्मत्वात्, उक्तं च सूत्रेऽपि " सुहुमो य होइ कालो, तत्तो सुहुमयरं हवइ खेत्तं । अंगुलसेठीमेत्ते, उसप्पिणिओ असंखिज्जा ॥ १ ॥ " इति प्रज्ञापनाद्वादशपदसूत्रवृत्तौ ४४० प्रतौ २१५ पत्रे ॥ ६ ॥

अथादर्शादौ स्वच्छे वस्तुनि यत्प्रतिबिम्बं दृश्यते तत्किमात्मकं ? इति निर्णयो लिख्यते-

अद्दायं पेहमाणे मणुसे किं अद्दायं पेहति अत्ताणं पेहइ पलिभागं पेहइ ? गोयमा ! अद्दायं पेहति नो अप्पाणं पेहति पलिभागं पेहति, एवं एतेणं अभिलावेणं असिं मणिं दुद्धं पाणिं तेल्लं फाणियं वसं ॥ इति ॥ वृत्तिर्यथा-' अद्दायं पेहमाणे ' इत्यादि, ' अद्दायं ' इति आदर्शं ' पेहमाणे ' इति प्रेक्ष्यमाणो मनुष्यः किमादर्शं प्रेक्ष्यते आहोस्विदात्मानम् ? अत्रात्मशब्देन शरीरमभिगृह्यते, उत ' पलिभागं ' इति प्रतिभागं-प्रतिबिम्बम् ? भगवानाह-आदर्शं तावत्प्रेक्षत एव, तस्य स्फूटरूपस्य यथावस्थिततया तेनोपलम्भात्, आत्मानं-आत्मशरीरं पुनर्न

पश्यति, तस्य तत्राभावात्, स्वशरीरं हि स्वात्मनि व्यवस्थितं नादर्शे, ततः कथमात्मशरीरं च तत्र पश्येदिति ? प्रतिभागं-स्वशरीरस्य प्रतिबिम्बं पश्यति । अथ किमात्मकं प्रतिबिम्बम् ? उच्यते-छायापुद्गलात्मकम्, तथा हि-सर्वमैन्द्रियकं वस्तु स्थूलं चयापचयधर्मकं रश्मिवच्च, रश्मय इति छायापुद्गला व्यवह्रियन्ते, ते च छायापुद्गलाः प्रत्यक्षत एव सिद्धाः, सर्वस्यापि स्थूलवस्तुनश्छाया अध्यक्षतः प्रतिप्राणिप्रतीतेः । अन्यच्च यदि स्थूलवस्तु व्यवहिततया दूरस्थिततया वा नादर्शादिष्ववगाढरश्मिर्भवति, ततो न तत्र तत् दृश्यते तस्मादवसीयते सन्ति छायाः पुद्गला इति, ते च छायापुद्गलास्तत्तत्सामग्रीवशाद्विचित्रपरिणमनस्वभावाः, तथा हि-ते च छायापुद्गला दिवा वस्तुन्यभास्वरे प्रतिगताः सन्तः स्वसम्बन्धिद्रव्याकारमाबिभ्राणाः श्यामरूपतया परिणमन्ते निशि कृष्णाभाः, एतच्च प्रसरति दिवसे सूर्यकरनिकरे निशि तु चन्द्रोद्योते प्रत्यक्षत एव सिद्धम् । त एव छायापरमाणव आदर्शादिभास्वरद्रव्यप्रतिगताः सन्तः स्वसम्बन्धिद्रव्याकारमादधाना यादृग्वर्णाः स्वसम्बन्धिनि द्रव्ये कृष्णो नीलः सितः पीतो वा तदाभाः परिणमन्ते, एतदप्यादर्शादिष्वध्यक्षतः सिद्धम्, ततोऽधिकृतसूत्रेऽपि ये मनुष्यस्य छायापरमाणव आदर्शमुपसङ्क्रम्य स्वदेहवर्णतया स्वदेहाकारतया च परिणमन्ते, तेषां तत्रोपलब्धिर्न शरीरस्य, ते च प्रतिबिम्बशब्दवाच्याः, अत उक्तं-न शरीरं पश्यति किं तु प्रतिभागमिति, न चैतत्स्वमनीषिकाविजृम्भितम्, यत उक्तमागमे-" सामा उ दिया छाया, अभासुरगता निसिं तु कालाभा । सा चेव भासुरगया, सदेहवण्णा मुणेयव्वा ॥ १ ॥ जे आदरिसस्सन्तो, देहावयवा हवंति संकंता । तेसिं तत्थुवलद्धी, पगासजोगा न इयरेसिं ॥ २ ॥ " मूलटीकाकारोऽप्याह-" यस्मात्सर्वमेव हि ऐन्द्रियकं स्थूलं द्रव्यं चयापचयधर्मकं रश्मिवच्च भवति, यत्तादर्शादिषु छाया स्थूलस्य दृश्यतेऽवगाढरश्मिनः न चानवगाढरश्मिनः, ततः स्थूलद्रव्यस्य कस्यचिद्दर्शनं भवति न चान्तरितं दृश्यते किञ्चित् अतिदूरस्थं वा, अतः ' पलिभागं ' प्रतिभागं ' पेहति ' पश्यतीति । एवमसिमण्यादिविषयाण्यपि षट् (सप्त) सूत्राणि भावनीयानि । सूत्रपाठोऽप्येवम् " असिं पेहमाणे मणूसे किं असिं पेहइ अत्ताणं पेहइ पलिभागं पेहइ ? गोयमा ! नो असिं पेहइ नो अप्पाणं पेहइ पलिभागं पेहइ । " इत्यादि । इति श्रीप्रज्ञापनापञ्चदशपदसूत्रवृत्तौ प्रथमोद्देशके ४०० प्रतौ ॥ ७ ॥

अथ यस्माद्दण्डकात्समागतस्तीर्थकरादित्वं लभते तल्लिख्यते-

रयणप्पभापुढवीनेरइए णं भंते ! रयणप्पभापुढवीनेरइएहिंतो अणंतरं उवट्टित्ता तित्थगरत्तं लभेज्जा ? गोयमा ! अत्थेगइए लभेज्जा

अत्थेगइए नो लभेज्जा, से केणट्ठेणं भंते ! एवं वुच्चति अत्थेगइए लभेज्जा अत्थेगइए णो लभेज्जा ? गोयमा ! जस्स णं रयणप्पभापुढवीनेरइयस्स तित्थगरनामगोयाइं कम्माइं बद्धाइं पुट्ठाइं निधत्ताइं कडाइं पट्ठवियाइं निविट्ठाइं अभिनिविट्ठाइं अभिसमण्णागयाइं उदिण्णाइं णो उवसंताइं भवंति, से णं रयणप्पभापुढवीनेरइए रयणप्पभापुढवीनेरइएहिंतो अणंतरं उव्वट्टित्ता तित्थगरत्तं लभेज्जा, जस्स णं रयणप्पभापुढवीनेरइयस्स तित्थगरणामगोयइं णो बद्धाइं जाव णो उदिण्णाइं उवसंताइं भवंति से णं रयणप्पभापुठरवीनेरइए रयणप्पभापुढवीनेरइएहिंतो अणंतरं उव्वट्टित्ता तित्थगरत्तं णो लभेज्जा, से तेणट्ठेणं गोयमा ! एवं वुच्चइ अत्थेगइए लभेज्जा, अत्थेगइए णो लभेज्जा । एवं सक्करप्पभा जाव वालुयप्पभापुढवीनेरइएहिंतो तित्थगरत्तं लभेज्जा । पंकप्पभापुढवीनेरइए णं भंते ! पंकप्पभापुढवीहिंतो अणंतरं उव्वट्टित्ता तित्थगरत्तं लभेज्जा ? गोयमा ! णो इणट्ठे, अंतकिरियं पुण करेज्जा । धूमप्पभापुढवीनेरइए णं पुच्छा, गोयमा ! णो इणट्ठे समट्ठे सव्वविरतिं पुण लभेज्जा । तमप्पभापुठवीपुच्छा, गोयमा ! णो इणट्ठे समट्ठे विरयाविरइं पुण लभेज्जा । अहे सत्तमाए पुच्छा, गोयमा ! णो इणट्ठे समट्ठे सम्मत्तं पुण लभेज्जा । असुरकुमारस्स पुच्छा, गोयमा ! णो इणट्ठे समट्ठे अंतकिरियं पुण करेज्जा । एवं निरंतरं जाव आउकाइए । तेउक्काइए णं भंते ! तेउक्काइएहिंतो अणंतरं उव्वट्टित्ता उवज्जेज्जा ? गोयमा ! णो तिणट्ठे समट्ठे केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए, एवं वाउकाइए वि । वणस्सतिकाइए णं पुच्छा, गोयमा ! णो तिणट्ठे समट्ठे अंतकिरियं पुण करेज्जा, बेइंदिय-तेइंदियचउरिंदिए णं पुच्छा, गोयमा ! णो तिणट्ठे समट्ठे मणपज्जवणाणं पुण उप्पाडेज्जा, पंचिंदियतिरिक्खजोणियमणुस्स-वाणमंतरजोइसिए णं पुच्छा, गोयमा ! णो तिणट्ठे समट्ठे अंतकिरियं पुण करेज्जा, सोहम्मगदेवे णं भंते ! अणंतरं चयं चइत्ता तित्थगरत्तं लभेज्जा ? गोयमा ! अत्थेगइए लभेज्जा अत्थेगइए णो लभेज्जा, एवं जहा रयणप्पभापुढवीनेरइए एवं जाव सव्वट्ठसिद्धदेवे ॥ इति । वृत्तिर्यथा–' रयणप्पभापुढवीनेरइए णं भंते ! ' इत्यादि सुगमम् । नवरं बद्धानि-सूचीकलाप इव सूत्रेण प्रथमतो बद्धमात्राणि तदनन्तरं अग्निसंपर्कानन्तरं सकृत घनकुट्टितसूचीकलापवत्स्पृष्टानि, निधत्तानि-उद्वर्त्तनापवर्त्तनावर्जशेषकरणायोग्यत्वेन व्यवस्थापितानीति भावार्थः, कृतानि-निकाचितानि सकलकरणायोग्यत्वेन व्यवस्थापितानीत्यर्थः, प्रस्थापितानि-मनुष्यगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेय-यशःकीर्त्तिनामसहोदयत्वेन व्यवस्थापितानीति भावः, निविष्टानि-तीव्रानुभावजनकतया स्थितानि, अभिनिविष्टानि-विशिष्टविशिष्टतराध्यवसाय-भावतोऽतितीव्रतमानुभावजनकतया

॥१३९॥

व्यवस्थितानि, अभिसमन्वागतानि-उदयाभिमुखीभूतानि, उदीर्णानि विपाकोदयमागतानि, नोपशान्तानि-न सर्वथाऽभावमापन्नानि निकाचिताद्यवस्थोद्रेकरहितानि वा न भवन्ति, शेषं समस्तमपि कंठ्यम् । एवं शर्कराप्रभावालुकाप्रभाविषये अपि सूत्रे वक्तव्ये । पङ्कप्रभापृथिवीनैरयिकः ततोऽनन्तरमुध्धृतः तीर्थकरत्वं न लभते अन्तक्रियां पुनः कुर्यात्, धूमप्रभापृथिवीनैरयिकोऽन्तक्रिया-मपि न करोति सर्वविरतिं पुनर्लभते । तमःप्रभापृथिवीनैरयिकः सर्वविरतिमपि न लभते विरताविरतिं-देशविरतिं पुनर्लभते । अधः-सप्तमपृथिवीनैरयिकस्तामपि देशविरतिं न लभते यदि परं सम्यक्त्वमात्रं लभते । असुरादयो यावद्वनस्पतिकाया अनन्तरमुध्धृतास्तीर्थकरत्वं न लभन्ते, अंन्तक्रियां पुनः कुर्युः, वसुदेवचरिते पुनर्नागकुमारेभ्योऽप्युध्धृतोऽनन्तरमैरावतक्षेत्रेऽस्यामेवावसर्पिण्यां चतुर्विंशतितमस्तीर्थकर उपदर्शितः, तदत्र तत्त्वं केवलिनो विदन्ति । तेजोवायवोऽनन्तरमुध्धृता अन्तक्रियामपि न कुर्वन्ति मनुष्येषु तेषामानन्तर्येणोत्पादाभावात्, अपि च त तिर्यक्षूत्पन्नाः केवलिप्रज्ञप्तं धर्मं श्रवणतया लभेरन्, न तु बोधत इत्युक्तं प्राक् । वनस्पतिकायिका अनन्तरमुध्धृतास्तीर्थकरत्वं न लभन्ते, अन्तक्रियां पुनः कुर्युः । द्वित्रिचतुरिन्द्रिया अनन्तरमुध्धृतास्तामपि न कुर्वन्ति, मनःपर्यवज्ञानं पुनरुत्पादयेयुः । तिर्यक्पञ्चेन्द्रियमनुष्यव्यन्तर-ज्योतिष्का अनन्तरमुध्धृतास्तीर्थकरत्वं न लभन्ते, अन्तक्रियां पुनः कुर्युः । सौधर्मादयः सर्वार्थसिद्धिपर्यवसाना (रत्नप्रभा) नैरयिकवद्व-क्तव्याः । इति प्रज्ञापनायां विंशतितमपदसूत्रवृत्तौ ५३२ प्रतौ ३८० पत्रे ॥ ८ ॥

अथानतदेवस्य तैजसशरीरावगाहना यथाऽङ्गुलासङ्ख्येयभागप्रमाणमात्रा भवति, तथा लिख्यते-

आणयदेवस्स णं भंते ! मारणंतियसमुग्घाएणं समोहयस्स तेयासरीरस्स के महालिया सरीरोगाहणा पन्नत्ता ? गोयमा ! सरीरप्पमाणमेत्ता विक्खंभबाहल्लेणं आयामेणं जहन्नेण अंगुलस्स असंखेज्जइभागं उक्कोसेणं जाव अहोलोइयगामा तिरियं जाव मणुस्सखेत्ते उड्ढं जाव अच्चुओ कप्पो । एवं आरणदेवस्स अच्चुयदेवस्स वि एवं चेव, णवरं उड्ढं जाव सयाइं विमाणाइं ॥ इति ॥ वृत्तिर्यथा-आनतदेवस्यापि जघन्यतोऽङ्गुलासङ्ख्येयभागप्रमाणा तैजसशरीरावगाहना, नन्वानतादयो देवा मनुष्येष्वेतोत्पद्यन्ते मनुष्याश्च मनुष्यक्षेत्र एवेति कथमङ्गुलासङ्ख्येयभागप्रमाणा ? उच्यते-इह पूर्व भव सम्बन्धिनीं मनुष्यस्त्रियमन्येन मनुष्येणोपभुक्तामानतदेवः कश्चनाप्यवधिज्ञानत उपलभ्यासन्नमृत्युतया विपरीतभावत्वात् सत्त्वचरितवैचित्र्यात् कर्मगतेरचिन्त्यत्वात् कामवृत्तेर्मलिनत्वाच्च, उक्तं च-" सत्त्वानां चरितं

चित्रं, विचित्रा कर्मणां गतिः । मलिनत्वं च कामानां, वृत्तिः पर्यन्तदारुणा ।। १ ।। " इति गाढानुरागादिहागत्य नकुलोपगूढां तां परिष्वज्य तदवाच्यप्रदेशे स्वावाच्यप्रदेशं प्रक्षिप्यातीव मूर्छितः स्वायुःक्षयात्कालं कृत्वा यदा तस्या एव गर्भे मनुष्यबीजे मनुष्यत्वेनोत्पद्यते, मनुष्यबीजं च जघन्यतोऽन्तर्मुहूर्त्तं उत्कृष्टतो द्वादश मुहूर्त्तान् यावदवतिष्ठते, उक्तं च-" मणुस्सबीए णं भंते ! कालतो केवच्चिरं होइ ? गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं बारस मुहुत्ता " इति । ततो द्वादशमुहूर्त्ताभ्यन्तरे उपभुक्तां परिष्वज्य मृतस्य तत्रैवोत्पत्तिर्मनुष्यत्वेन द्रष्टव्या, उत्कर्षतोऽधो यावदधोलौकिका ग्रामाः, तिर्यग् यावन्मनुष्यक्षेत्रं, ऊर्द्धं यावदच्युतकल्पस्तावदवसैया, कथं इति चेत् ? उच्यते-इह यदाऽऽनतदेवः कस्याप्यन्यस्य देवस्य निश्रया अयुतकल्पं गतो भवति, स च तत्र गतः सन् कालं कृत्वाऽधोलौकिकग्रामेषु यदि वा मनुष्यक्षेत्रपर्यन्ते मनुष्यत्वेनोत्पद्यते तदा लभ्यते । इति । श्रीप्रज्ञापनैकविंशतितमपदसूत्रवृत्तौ ५३२ प्रतौ ४०१ पत्रे ।। ९ ।।

अथ यः केवलिशरीराज्जीवविराधनामवश्यंभाविनीमपि सर्वथा न स्वीकुरुते तं प्रत्युच्यते-अरे भद्रक ! त्वया तावदुच्यते केवलि हि श्वासोच्छ्वासनिमेषोन्मेषादिकमपि तत्रैव कुरुते यत्राचित्ता वायुकायादयः स्युः, यद्ययमेवं नियमः स्यात्तदा मार्गेऽपि निर्जीवे एव गच्छत्ययमपि नियमः स्यात् तथा च न दृश्यते, यतः केवली मार्गे गच्छंस्त्रसाकुलां भूमिमवलोक्य जन्तुरक्षानिमित्तमुल्लङ्घनप्रलङ्घनादिकमपि करोतीति शास्त्रेऽभिहितम्, ततोऽवसीयतेऽचित्तवायुकायादावेव श्वासोच्छ्वासादिकं कुर्यादयमपि नियमो नास्ति, निर्जीवे एव अचित्तजल एव मार्गे गच्छत्ययमपि नियमोऽनैकान्तिक एवासैद्धान्तिकश्च, केवलं काययोगव्यापारपाल्यजीवरक्षायै उल्लङ्घनप्रलङ्घनादिकं कायव्यापारं करोति । अशक्यरक्षांस्तु तान् जानन्नपि चलोपकरणतया किं करोतु ? किञ्च-त्रसाकुलां भूमिमवलोक्य उल्लङ्घनप्रलङ्घनादिकं कायव्यापारं कुर्यादित्यत्रैवं त्रसरक्षैव कृता भवति, नतु जलाद्याकुले मार्गे स्थावराणामिति त्रसग्रहणमित्यलं प्रसङ्गेन वृद्धवाक्यमेव प्रमाणम् । केवलिनामुल्लङ्घनप्रलङ्घनापिव्यापारविषये सूत्रवृत्ती यथा-

से णं भंते ! तहा समुग्घायगए सिज्झति बुज्झइ मुच्चति परिनिव्वाति सव्वदुक्खाणमंतं करोति ? गोयमा ! नो इणट्ठे समट्ठे, से णं ततो पडिनियत्तति पडिनियतित्ता ततो पच्छा मणजोगंपि जुंजति वयजोगंपि जुंजति कायजोगंपि जुंजति ।। इति । वृत्तिर्यथा-' से णं भंते ! ' इत्यादि, स भदन्त ! केवली तथा दण्डकपाटादिक्रमेण समुद्घातं गतः सन् सिद्ध्यति-निष्ठितार्थो भवति, स च वर्त्तमानसामीप्ये

वर्त्तमानवद्वा (३-३-१२१ पाणिनौ) इत वचनात् सेत्स्यन्नपि व्यवहारत उच्यते । तत आह-बुद्ध्यते-अवगच्छति केवलज्ञानेन यथाऽहं निश्चयतो निष्ठितार्थो भविष्यामि निःशेषकर्मांशापगमतः तत आह-मुच्यतेऽशेषकर्मांशैः इति गम्यते, मुच्यमानश्च कर्माणुवेदनापरितापरहितो भवति, तत आह-परिनिर्वाति-सामस्त्येन शीतीभवति । समस्तमेतदेकेन पर्यायेण स्पष्टयति सर्वदुःखानामन्तं करोतीति, भगवानाह-गौतम ! नायमर्थः समर्थः-नायमर्थः सङ्गत्तो यत्समुद्घातं गतः सन् सर्वदुःखानामन्तं करोतीति, योगनिरोधस्याद्याप्यकृतत्वात्, सयोगस्य च वक्ष्यमाणयुक्त्या सिद्ध्यभावादिति भावः, ततः किं करोति ? अत आह-' से णं ' इत्यादि, सोऽधिकृतसमुद्घातगतः णमिति वाक्यालङ्कारे, ततः समुद्घातात्प्रतिनिवर्त्तते, प्रतिनिवर्त्त्य च ततः प्रतिनिवर्त्तनात्पश्चादनन्तरं मनोयोगमपि वाग्योगमपि काययोगमपि युनक्ति-व्यापारयति, यतः स भगवान्, भवधारणीयकर्मसु नामगोत्रवेदनीयेषु अचिन्त्यमाहात्म्यसमुद्घातवशतः प्रभूतेष्वायुषा सह समीकृतेष्वपि अन्तर्मुहूर्त्तभाविपरमपदत्वतस्तस्मिन् काले यद्यनुत्तरोपपातिकादिना देवेन मनसा पृच्छ्यते तर्हि प्रश्नव्याकरणाय मनःपुद्गलान् गृहीत्वा मनोयोगं युनक्ति, तमपि सत्यं असत्यामृषारूपं वा, मनुष्यादिना च पृष्टोऽपृष्टो वा कार्यवशतो वाग्पुद्गलान् गृहीत्वा वाग्योगं युनक्ति, तमपि सत्यं असत्यामृषा वा न शेषान् वाङ्मनसोर्योगान्, क्षीणरागादित्वात् । आगमनादौ चौदारिककाययोगम्, तथा हि-भगवान् कार्यवशतः कुतश्चित्स्थानाद्विवक्षिते स्थाने आगच्छेत् यदिवा क्वापि गच्छेत् अथवा तिष्ठत् ऊर्द्धस्थानेन वाऽवतिष्ठेत् निषीदेत् वा तथाविधश्रमापनयनाय त्वग्वर्त्तनं वा कुर्यात्, अथवा विवक्षिते स्थाने तथाविधसम्पातिमसत्त्वाकुलां भूमिमवलोक्य तत्परिहाराय जन्तुरक्षानिमित्तमुल्लङ्घनं प्रलङ्घनं वा कुर्यात्, तत्र सहजात्पादविक्षेपान्मनागधिकतरः पादविक्षेपः उल्लङ्घनं, स एवाधिकतरः प्रलङ्घनं, यदिवा प्रातिहारिकपीठफलकशय्यासंस्तारकं प्रत्यर्पयेत्-यस्मादानीतं तस्मै समर्पयेत् । इह भगवताऽऽर्यश्यामेन प्रातिहारिकपीठफलकादीनां प्रत्यर्पणमेवोक्तं ततोऽवसीयते नियमादन्तर्मुहूर्त्तावशेषायुष्क एवावर्जीकरणादिकमारभते न प्रभूतविशेषायुष्कः, अन्यथा ग्रहणस्यापि सम्भावात्तदप्युपादीयेत एतेन, यदाहुरेके-जघन्यतोऽन्तर्मुहूर्त्तावशेषे समुद्घातमारभते उत्कर्षतः षट्सु मासेसु शेषेष्विति तदपास्तं द्रष्टव्यम्, षट्सु मासेषु कदाचिदपान्तराले वर्षाकालसम्भवात्तन्निमित्तं पीठफलकादीनामादानमप्युपपद्येत न च तत्सूत्रसम्मत्तमिति तत्प्ररूपणमुत्सूत्रमवसेयम् । इति प्रज्ञापनाषट्त्रिंशत्तमपदसूत्रवृत्तौ ४०० प्रतौ ३९३ पत्रे ॥ १० ॥

अपरं च यदि सयोगिकेवलिनः केवलयोगप्रत्ययं विराधनामात्रमपि न स्यात्तर्हि तत्र निश्चयतः सर्वसंवररूपं सर्वोत्तमं चारित्रं न भवतीति को हेतुः ? तच्च शैलेश्यवस्थायां योगनिरोधे सत्येव सर्वसंवररूपं सर्वोत्तमं चारित्रमुक्तम् । तथा हि-

ईसिं हस्सपंचक्खरुच्चारणद्धाए असंखेज्जसमइयं अंतोमुहुत्तियं सेलेसिं पडिवज्जइ ॥ इति । वृत्तिर्यथा-' ईसिं ' ति स्तोककालं शैलेशीं प्रतिपद्यते इति सम्बन्धः, कियता कालेन विशिष्टां इत्यत आह-ह्रस्वपञ्जारणाद्धया, किमुक्तं भवति ? नातिद्रुतं नातिविलंबितं किंतु मध्यमेन प्रकारेण यावता कालेन ङञणनम इत्येवंरूपाणि पञ्जाक्षराण्युच्चार्यन्ते तावता कालेन विशिष्टामिति, एतावान् कालः किं समयप्रमाणः ? इति निरूपणार्थमाह-असङ्ख्येयसामयिकां-असङ्ख्येयसमयप्रमाणाम्, यच्चासङ्ख्येयसमयप्रमाणं तच्च जघन्यतोऽप्यन्तर्मुहूर्त्त-प्रमाणं तत एषाऽप्यन्तर्मुहूर्त्तप्रमाणेति ख्यापनायाह-आन्तर्मौहूर्त्तिकीं शैलेशीमिति, शीलं-चारित्रं तच्चेह निश्चयतः सर्वसंवररूपं तद्ग्राह्यं तस्यैव सर्वोत्तमत्वात्, तस्येशः शीलेशः, तस्य याऽवस्था सा शैलेशी, तां प्रतिपद्यते, तदानीं च ध्यानं ध्यायति व्यवच्छिन्नक्रियमप्रतिपाति, उक्तं च-" सीलं व समाहाणं, निच्छयओ सव्वसंवरो सो य । तस्सेसो सीलेसो, सेलेसी होइ तदवत्था ॥ १ ॥ ह्रस्सक्खराइं मज्झेण, जेण कालेण पंच भण्णंति । अच्छइ सेलेसिगओ, तत्तियमित्तं तओ कालं ॥ २ ॥ तणुरोहारंभाओ, झायइ सुहुमकिरियानियट्टिं सो । वोच्छिन्नकिरियमप्पडिवाई सेलेसिकालंमि ॥ ३ ॥ " इती श्री प्रज्ञापनाषट्त्रिंशत्तमपदसूत्रवृत्तौ ५३२ प्रतौ ५३० पत्रे ॥ ११ ॥

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरीशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे मध्यभागे श्रीप्रज्ञापनाविचारनामा चतुर्थस्तरङ्गः ॥

यस्यानुभावेन जगत् समस्तं, शस्तप्रशस्तं वरिवर्त्ति नित्यम् । तं जैनधर्मं सततं श्रयामो, व्यामोहवल्लीगजराजशावम् ॥ १ ॥

अथ क्रमायाताः श्रीजम्बूद्वीपप्रज्ञप्तिविचारा लिख्यन्ते-तत्र यावद्वर्षपर्यायस्य साधोर्यदाचारादिश्रुतमध्याप्यं तल्लिख्यते-

योगो-अवसरस्ततः प्रस्तुतोपाङ्गस्य दाने कोऽवसरः ? इति, उच्यते-उपाङ्गस्याङ्गार्थानुवादकतयाऽङ्गसामीप्येन वर्त्तमानाद्य एवैतदीया-ङ्गस्यावसरः स एवास्यापीति, तत्रावसरसूचिका इमा गाथाः-" तिवरिसपरियायस्स उ, आयारपकप्पनाममज्झयणं । चउवरिसस्स य सम्मं, सूअगडं नाम अंगं ति ॥ १ ॥ दसकप्पव्ववहारा, संवच्छरपणगदिक्खियस्सेव । ठाणं समवाओ वि य, अंगे ते अट्ठवासस्स ॥

२ ।। दसवासस्स विवाहो, एगारसवासगस्स य इमे उ । खुड्डिअविमाणमाई, अज्झयणा पंच नायव्वा ।। ।। ३ ।। बारसबारस्स तहा, अरुणोवायाइ पंच अज्झयणा । तेरसवासस्स तहा, उट्ठामसुआइया चउरो ।। ४ ।। चउदसवासस्स तहा, आसीविसभावणं जिणा बिंति । पन्नरसवासगस्स य, दिट्ठीविसभावणं तह य ।। ५ ।। सोलसवासाइसु य, एगुत्तरवुड्ढिएसु जहसंखं । चारणभावणमहसुविण-भावणा तेअगिणिसग्गा ।। ६ ।। एगूणवीसगस्स उ, दिट्ठिवाओ दुवालसं अंगं । संपुण्णवीसवरिसो, अणुवाई सव्वसुत्तस्स ।। ७ ।।" इति । अत्र पञ्चवस्तुकसूत्रे दशवर्षपर्यायस्य साधोर्भगवत्यङ्गप्रदानेऽवसरस्य प्रतिपादनात् षष्ठाङ्गत्तया ज्ञाताधर्मकथाङ्गस्य प्रदाने तदनन्तरमवसरः, कारणविशेषे गुर्वाज्ञावशादर्वागपि, ततस्तदुपाङ्गत्त्वादस्य तदनन्तरमवसरः इति सम्भाव्यते । योगविधानसामाचार्यामपि अङ्गयोगोद्वहनानन्तरमेवोपाङ्गयोगोद्वहनस्य विधिप्राप्तत्वात् । इति जंबूद्वीपप्रज्ञप्तिसूत्रवृत्तौ ३८७ प्रतौ प्रथमवक्षस्कारके ३ पत्रे ।। १ ।।

केचिच्च क्वचिन्मतान्तरादि दृष्ट्वा अहो इयं स्वकपोलकल्पना, अन्यथा सर्वज्ञप्रणीतेऽर्थे कुतो मतान्तरता ? इत्याद्यसद्वाक्यैर्विप्रतारयन्ति लोकान् परं तदपकर्णनीयं कारणविशेषवशात्सिद्धान्तेऽपि मतान्तरदर्शनात् । स सिद्धान्तः कारणविशेषश्च लिख्येते-

कहि णं भंते ! जंबूद्दीवे दीवे उत्तरड्ढभरहे वासे उसभकूडे नामं पव्वए पन्नत्ते ? गोयमा ! गङ्गाकुंडस्स पच्चत्थिमेणं सिंधुकुंडस पुरच्छिमेणं चुल्लहिमवंतस्स वासहरपव्वयस्स दाहिणिल्ले णितंबे, एत्थ णं जंबुद्दीवे दीवे उत्तरड्ढभरहे वासे उसभकूडे णामं पव्वए पन्नत्ते, अट्ठ जोयणाइं उड्ढं उच्चत्तेणं, दो जोयणाइं उव्वेहेणं, मूले अट्ठ जोअणाइं विक्खंभेणं, मज्झे छ जोअणाइं विक्खंभेणं, उवरिं चत्तारि जोयणाइं विक्खंभेणं, मूले साइरेगाइं पणवीसं जोयणाइं परिक्खेवेणं, मज्झे साइरेगाइं अट्ठारस जोयणाइं परिक्खेवेणं, उवरिं साइरेगाइं दुवालस जोयणाइं परिक्खेवेणं । पाठान्तरं-मूले बारस जोअणाइं विक्खंभेणं, मज्झे अट्ठ जोयणाइं विक्खंभेणं, उप्पिं चत्तारि जोयणाइं विक्खंभेणं, मूले साइरेगाइं सत्ततीसं जोयणाइं परिक्खेवेणं, मज्झे साइरेगाइं पणवीसं जोयणाइं परिक्खेवेणं, उप्पिं साइरेगाइं बारस जोयणाइं परिक्खेवेणं, मूले विच्छिन्ने मज्झे संखित्ते उप्पिं तणुए गोपुच्छसंठाणसंठिए, सव्वजंबूणयमए अच्छे सण्हे जाव पडिरूवे ।। इति ।। वृत्तिर्यथा ' कहि णं ' इत्यादि, क्व भदन्त ! जम्बूद्वीपे द्वीपे उत्तरार्द्धभरते वर्षे ऋषभकूटो नाम्ना पर्वतः प्रज्ञप्तः ? भगवानाह-गौतम् ! गङ्गाकुण्डस्य यत्र हिमवतो गङ्गा निपतति तद्गङ्गाकुण्डं, तस्य पश्चिमायाम्, यत्र तु सिंधुर्निपतति तत्सिन्धुकुण्डं तस्य

पूर्वस्यां, क्षुल्लहिमवतो वर्षधरस्य दाक्षिण्यात्ये नितम्बे, सामीप्यकसप्तम्या नितम्बासन्ने इत्यर्थः, अत्र प्रदेशे जम्बूद्वीपे द्वीपे उत्तरार्द्धभरते वर्षे ऋषभकूटो नाम्ना पर्वतः प्रज्ञप्तः, अष्टौ योजनान्यूर्द्ध्वोच्चत्वेन, द्वे योजने उद्वेधेन-भूमिप्रवेशेन, उच्चत्वचतुर्थांशस्य भूम्यवगाढत्वात्, अष्टानां च चतुर्थांशे द्वयोरेव लाभात्, मूलमध्यान्तेषु क्रमादष्टषट्चत्वारि योजनानि विष्कम्भेन-विस्तरेण उपलक्षणत्वादायामेनापि समवृत्तस्यायामविष्कम्भयोस्तुल्यत्वादिति, तथा मूलमध्यान्तेषु पञ्चविंशतिरष्टादश द्वादश च योजनानि सातिरेकाणि परिक्षेपेण-परिधिना, अथास्य पाठान्तरं वाचनाभेदस्तद्गतपरिमाणान्तरमाह-मूले द्वादश योजनानि विष्कम्भेन मध्येऽष्टयोजनानि विष्कम्भेन, उपरि चत्वारि योजनानि विष्कम्भेन, अत्रापि विष्कम्भायामतः साधिकत्रिगुणं मूलमध्यान्तरपरिधिमानं सूत्रोक्तं सुबोधम्। अत्राह परः- एकस्य वस्तुनो विष्कम्भादि परिमाणे द्वैरूप्यासम्भवेन प्रस्तुतग्रन्थस्य च सातिशयस्थविरप्रणीतत्वेन कथं नान्यतरनिर्णयः ? यदेकस्यापि ऋषभकूटपर्वतस्य मूलादावष्टादियोजनविस्तृतत्वादि पुनस्तत्रैवास्य द्वादशयोजनविस्तृतत्वादीति, सत्यं, जिनभट्टारकाणां सर्वेषां क्षायिकज्ञानवतामेकमेव मतं मूलतः, पश्चात्तु कालान्तरेण विस्मृत्यादिनाऽयं वाचनाभेदः, यदुक्तं श्रीमलयगिरिसूरिभिर्ज्योतिष्करण्डकवृत्तौ-" इह स्कन्दिलाचार्यप्रवृत्तौ दुःषमानुभावतो दुर्भिक्षप्रवृत्त्या साधूनां पठनगुणनादिकं सर्वमप्यनशत्। ततो दुर्भिक्षातिक्रमे, सुभिक्षप्रवृत्तौ, द्वयोः सङ्घमेलापकोऽभवत्, तद्यथा-एको वल्लभ्यामेको मथुरायाम्, तत्र सूत्रार्थसङ्घट्टने परस्परं वाचनाभेदो जातः, विस्मृतयोर्हि सूत्रार्थयोः स्मृत्वा स्मृत्वा सङ्घट्टने भवत्यवश्यं वाचनाभेदः " इत्यादि। ततोऽत्रापि दुष्करोऽन्यतरनिर्णयः, द्वयोः पक्षयोरुपस्थितयोरनतिशायिज्ञानिभिरनभिनिविष्टमतिभिः प्रवचनाशातनाभीरुभिः पुण्यपुरुषैरिति न काचिदनुपपत्तिः। इति जम्बूद्वीपप्रज्ञप्तिसूत्रवृत्तौ प्रथमवक्षस्कारे ३८७ प्रतौ ६६ पत्रे ॥ २ ॥

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसंलातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरीश्वरशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरेऽपरतटे जंबूद्वीपप्रज्ञप्तिविचारनामा पञ्चमस्तरङ्गः ॥ ५ ॥

सर्वज्ञभाषितार्थाय, समर्थाय तमोव्यये। अव्ययाय नमो नित्यं, सिद्धान्ताय जिनेशितुः ॥ १ ॥

अथ परिपाट्यायाताः श्रीचन्द्रप्रज्ञप्तिविचारा यथा-तत्र चन्द्रविमानसंस्थानादिजिज्ञासया लिख्यते-

ता चंदविमाणेणं किं संठिए पण्णत्ते ? ता अद्धकविट्ठगसंठाणसंठिए सव्वफलियामए अब्भुग्गयमूसियपहसिए। विविहमणिरयणभत्तिचित्ते

वाऊद्धुविजयवेजयंतीपडागाछत्ताइच्छत्तकलिए तुंगे गगणतलमणुलिहंतसिहरे जालंतररयण पंजरुम्मिलियव्व मणिकणगथूभियागे वियसियसयवत्तपुंडरीयतिलगरयणड्ढचंदचित्ते अंतो बहिं च सण्हे तवणिज्जवालुगापत्थडे सुहफासे सस्सिरीयरूवे पासाइए दरसणिज्जे अभिरूवे पडिरूवे ।। इति । वृत्तिर्यथा-' ता चंदविमाणे णं ' इत्यादि, संस्थानविषयं प्रश्नसूत्रं सुगमम्, भगवानाह-' ता अद्धकविट्ठ ' इत्यादि, उत्तानीकृतमर्द्धमात्रं कपित्थं तस्येव यत्संस्थानं तेन संस्थितं अर्द्धकपित्थसंस्थानसंस्थितम्, आह-यदि चन्द्रविमानमुत्तानीकृतार्द्धमात्र-कपित्थफलसंस्थानसंस्थितं तत उदयकालेऽस्तमनकाले वा यदिवा तिर्यग्परिभ्रमत्पौर्णमास्यां कस्मात्तदर्द्धकपित्थफलाकारं नोपलभ्यते कामं शिरस उपरि वर्त्तमानं वर्त्तुलमुपलभ्यते ? अर्द्धकपित्थस्य शिरस उपरि दूरमवस्थापितस्य परभागादर्शनतो वर्त्तुलतया दृश्यमानत्वादुच्यते इहार्द्धकपित्थफलाकारं चन्द्रविमानं न सामस्त्येन प्रतिपत्तव्यं किं तु तस्य चन्द्रविमानस्य पीठं, तस्य च पीठस्योपरि चन्द्रदेवस्य ज्योतिश्चक्रराजस्य-प्रासादस्तथा कथञ्चनापि व्यवस्थितो यथा पीठेन सह भूयान् वर्त्तुल आकारो भवति, स च दूरभावादेकान्ततः समवृत्ततया जनानां प्रतिभासते ततो न कश्चिद्दोषः, न चैतत्स्वमनीषिकायां विजृम्भितं, यतः एतदेव श्रीजिनभद्रगणिक्षमाश्रमणेन विशेषणवत्यामाक्षेपपुरस्सरमुक्तम्- " अद्धकविट्ठागारा, उदयत्थमणंमि कह न दीसंति । ससिसूराण विमाणा, तिरियक्खेत्तट्ठियाणं च ।। १ ।। आउत्ताणद्धकविट्ठागारं पीठं तदुवरिं च पासाओ । वट्टालेखेण तओ, समवट्टं दूरभावाओ ।। २ ।। " तथा सर्वं निरवशेषं स्फटिकमयं-स्फटिकविशेमणिमयम्, तथा अभ्युद्गता आभिमुख्येन सर्वतो विनिर्गता उत्सृता-प्रबलतया सर्वासु दिक्षु प्रसृता या प्रभा-दीप्तिः तया सितं-शुक्लं अभ्युद्गतोत्सितप्रभासितम्, तथा विविधा-अनेकप्रकारा मणयः चन्द्रकान्तादयो रत्नानि-कर्केतनादीनि तेषां भक्तयो-विच्छित्तिविशेषास्ताभिश्चित्रं-अनेकरूपवत् आश्चर्यवद्वा विविधमणिरत्नचित्रम्, वातोद्धुता-वातकंपिता विजयो-अभ्युदयस्तत्सूचिका वैजयन्त्यभिधाना या पताका अथवा विजया इति वैजयन्तीनां पार्श्वकर्णिका उच्यन्ते तत्प्रधाना वैजयन्त्यो विजयवैजयन्त्यः पताकाः-ता एव विजयवर्जिता वैजयन्त्यः छत्रातिच्छत्राणि च-उपर्युपरि स्थितातपत्राणि तैः कलितं ततो वातोद्धुतविजयवैजयन्तीपताकाछत्रातिच्छत्रकलितं तुङ्गं-उच्चमत एव 'गगणतलमणुलिहंतसिहरे ' त्ति गगनतलं-अम्बरतलमनुलिखत्-अभिलङ्घयच्छिखरं यस्य तद् गगनतलानुलिखच्छिखरम्, तथा जालानि-जालकानि तानि च भवनभित्तिषु लोके प्रतीतानि तदन्तरेषु विशिष्टशोभानिमित्तं रत्नानि यत्र तज्जालान्तररत्नम् सूत्रे चात्र

प्रथमैकवचनलोपो द्रष्टव्यः, तथा पज्जरादुन्मीलितमिव बहिष्कृतमिव पज्जरोन्मीलितम्, यथा हि किल किमपि वस्तु पज्जरात्-वंशादिमयप्रच्छादनविशेषाद्बहिष्कृतमत्यन्तमविनष्टच्छायत्वाच्छोभते एवं तदपि विमानमिति भावः, तथा मणिकनकानां सम्बन्धिनी स्तूपिकाशिखरं यस्य तन्मणिकनकस्तूपिकाकम्, तथा विकसितानि यानि शतपत्राणि पुण्डरीकाणि च द्वारादौ प्रतिकृतित्वेन स्थितानि तिलकाश्च भित्त्यादिषु पुण्ड्राणि रत्नमयाश्चार्द्धचन्द्रा द्वारादिषु तैश्चित्रं विकसितशत-पत्रपुण्डरीकतिलकार्द्धचन्द्रचित्रम्, तथाऽन्तर्बहिश्च श्लक्ष्णं-मसृणमित्यर्थः, तथा तपनीयं-सुवर्णविशेषस्तन्मय्या वालुकायाः प्रस्तटः-प्रतरो यत्र तत्तपनीयवालुकाप्रस्तटम्, तथा सुखस्पर्शं शुभस्पर्शं वा, तथा सश्रीकाणि-सशोभानि रूपाणि नरयुग्मादीनि यत्र तत्सश्रीकरूपम्, तथा प्रासादीयं-मनःप्रसादहेतुः, अत एव दर्शनीयं-द्रष्टुं योग्यम्, तद्दर्शनेन तृप्तेरसम्भवात्, तथा प्रतिविशिष्टं-असाधारणरूपं यस्य तत्तथा । इति श्रीचन्द्रप्रज्ञप्त्यष्टादशप्राभृतसूत्रवृत्तौ ४८ पत्रे ॥ १ ॥

केचिदज्ञानिन एवं प्रलपन्ति-यत्तीर्थङ्करा हि भगवन्तोऽर्हन्तोऽनुत्तरज्ञानदर्शनचारित्राधारत्वात्पूज्याः, तत्प्रतिमास्तु ज्ञानादिशून्यास्तत्किमर्थमर्चनीयाः, न हि नृपमूर्त्तिरन्यायिदण्डसुजनपालनादिनृपव्यापारसमर्था भवति चैतन्यशून्यत्वादिति, परं तत्तेषामनन्तसंसारकारणम्, यतो ज्ञानादिशून्यानामपि भगवत्सक्थ्नां सुरैर्भगवद्वदनुमतत्वात्, भगवत्सम्बन्धित्वादिति चेत्तुल्यं प्रतिमायामपि । तच्चेदम्-

पभू णं भंत्ते ! चंदे जोइसिंदे जोइसराया चंदवहिंसए विमाणे सभाए सुहम्माए चंदंसि सिंहासणंसि तुडिएणं सद्धिं दिव्वाइं भोगभोगाइं भुंजमाणे विहरित्तए ? गोयमा ! नो इणट्ठे समट्ठे, ता कहं ते नो पभू चंदे जोइसिंदे जाव विहरित्तए ? गोयमा ! ता चंदस्स णं जोइसिंदस्स जोइसरन्नो चंदवडिंसए विमाणे सभाए सुहम्माए माणवए चेइयखंभे वइरामएसु गोलवट्टसमुग्गएसु बहुओ जिणसकहाओ सन्निखित्ताओ चिट्ठंति ताओ णं चंदस्स जाव रन्नो अन्नेसिं च बहूणं जोइसियाणं देवाण य देवीण य अच्चणिज्जाओ वंदणिज्जाओ पूयणिज्जाओ सक्कारणिज्जाओ सम्माणणिज्जाओ कल्लाणं मंगलं देवयं चेइयं पज्जुवासणिज्जाओ एवं खलु नो पभू चंदे जोइसिंदे जोइसराया चंदवडिंसए विमाणे सभाए सुहम्माए तुडिएण सद्धिं दिव्वाइं भोगभोगाइ भुंजमाणे विहरित्तए ॥ इति । वृत्तिर्यथा-' पभू णं भंते ! चंदे ' इत्यादि, प्रश्नसूत्रं सुगमम्, भगवानाह-' नो इणट्ठे समट्ठे ' इत्यादि नायमर्थः समर्थः-उपपन्नो न युक्तोऽयमर्थ इत्यर्थः, यथा चन्द्रावतंसकविमाने या सुधर्मा सभा तस्यामन्तःपुरेण सार्द्धं, दिव्यान् भोगभोगान् भुञ्जानो विहरतीति, ' ता कहं ते नो पभू ' इत्यादि

प्रश्नसूत्रं सुगमम्, भगवानाह ' ता चंदस्स णं ' इत्यादि, चन्द्रावतंसके विमाने सुधर्मायां सभायां माणवको नाम चैत्यस्तंभोऽस्ति, तस्मिंश्च माणवके स्तम्भे वज्रमयेषु सिक्ककेषु वज्रमया गोलाकारावृत्ताः समुद्गकास्तेषु बहूनि जिनसक्थीनि निक्षिप्तानि तिष्ठन्ति, ' ताओ णं ' इत्यादि तानि जिनसक्थीनि, इह सूत्रे स्त्रीत्वनिर्देशः प्राकृतत्वात्, चन्द्रस्य ज्योतिषेन्द्रस्य ज्योतिषराजस्यान्येषां च बहूनां ज्योतिष्काणां देवानां देवीनां च अर्चनीयानि-पुष्पादिभिः वन्दनीयानि स्तोतव्यानि-विशिष्टैः स्तौत्रैः पूजनीयानि-वस्त्रादिभिः सत्कारणीयानि-आदरप्रतिपत्या सम्माननीयानि-जिनोचितप्रतिपत्या कल्याणं-कल्याणहेतुः, मङ्गलं-दुरितोपशमहेतुः दैवतं-परमदेवता चैत्यं-इष्टदेवताप्रतिमेत्येवं पर्युपासनीयानि तत एवं-अनेन प्रकारेण खलु-निश्चितं न प्रभुरित्यादि सुगमम् । इति श्रीचन्द्रप्रज्ञप्त्यष्टादशप्राभृतसूत्रवृत्तौ ४४ पत्रे ॥ २ ॥

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरीशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे मध्यभागे श्रीचन्द्रप्रज्ञप्तिविचारनामा षष्ठस्तरङ्गः ॥ ६ ॥

गुणगणभूषितमभितः, सितपटधृतममितवस्तुविस्तारम् । वहनमिव श्रीजिनपतिवचनं नयतीहितं स्थानम् ॥ १ ॥

अथ क्रमाच्छ्रीसूर्यप्रज्ञप्तिविचारा लिख्यन्ते-तत्र नक्षत्रसंस्थानजिज्ञासया लिख्यते-

ता कहं ते नक्खत्तसंठिती आहितेति वदेज्जा ? ता एएसि णं अट्ठावीसाए णक्खत्ताणं अभीई णक्खत्ते किं संठिए पण्णत्ते ? गोयमा ! गोसीसावलिसंठिए पण्णत्ते १, सवणे णक्खत्ते किं संठिते पन्नत्ते ? काहारसंठिते पण्णत्ते २, धणिट्ठाणक्खत्ते किं संठिते पन्नत्ते ? सउणिपंजरसंठिते पण्णत्ते ३, सयभिसयाणक्खत्ते किं संठिते पण्णत्ते ? पुप्फोवयारसंठिते पण्णत्ते ४, पुव्वभद्दवयाणक्खत्ते किं संठिते पण्णत्ते ? अवड्ढवावीसंठाणसंठिते पण्णत्ते ५, एवमुत्तरावि ६, रेवतीनक्खत्ते किं संठिते पण्णत्ते ? नावासंठाणसंठिते पण्णत्ते ७, अस्सिणीणक्खत्ते किं संठिते पण्णत्ते ? आसखंधसंठामसंठिते पण्णत्ते ८, भरणीणक्खत्ते किं संठिते पण्णत्ते ? भगसंठाणसंठिते पण्णत्ते ९, कत्तियाणक्खत्ते किं संठिते पण्णत्ते ? छुरघरगसंठिते पण्णत्ते १०, रोहिणीणक्खते किं संठिते पण्णत्ते सगडुद्धिसंठाणसंठितेपन्नत्ते ११, मिगसिरणक्खत्ते किं संठिए पन्नत्ते, मिगसिरावलिसंठाणसंठिते पन्नत्ते १२, अद्दाणक्खत्ते किं संठिते पन्नत्ते ? रुधिरबिंदुसंठाणसंठिते पन्नत्ते १३, पुणव्वसुणक्खत्ते किं संठिते पन्नत्ते ? तुलासंठाणसंठिते पन्नत्ते १४, पुस्सणक्खत्ते किं संठिते पन्नत्ते ? सुपइट्ठवद्धमामसंठाणसंठिते

पन्नत्ते १५, अस्सेसाणक्खत्ते किं संठिते पन्नत्ते ? पडागासंठाणसंठिते पन्नत्ते १६, मघाणक्खत्ते किं संठिते पन्नत्ते ? पागारसंठाणसंठिते पन्नत्ते १७, पुव्वफग्गुणीणक्खत्ते किं संठिते पन्नत्ते ? अद्धपलियंकसंठाणसंठिते पन्नत्ते १८, उत्तरफग्गुणीणक्खत्ते किं संठिते पन्नत्ते ? अद्धपलियंकसंठाणसंठिते पन्नत्ते १९, हत्थणक्खत्ते किं संठिते पण्णत्ते ? हत्थसंठाणसंठिते पन्नत्ते २०, चित्ताणक्खत्ते किं संठिते पन्नत्ते ? मुहमंडणसुवन्नपुप्फसंठाणसंठिते पन्नत्ते २१, साइनक्खत्ते किं संठिते पन्नत्ते ? कीलगसंठाणसंठिते पन्नत्ते २२, विसाहाणक्खत्ते किं संठिते पन्नत्ते ? दामणिसंठाणसंठिते पन्नत्ते २३, अणुराहाणक्खत्ते किं संठिए पन्नत्ते ? एगावलिसंठाणसंठिते पन्नत्ते २४, जेट्ठानक्खत्ते किं संठिते पन्नत्ते ? गजदंतसंठाणसंठिते पन्नत्ते २५, मूलनक्खत्ते किं संठिए पन्नत्ते ? विच्छुसंठाणसंठिते पन्नत्ते २६, पुव्वासाढाणक्खत्ते किं संठिते पन्नत्ते ? गयसंठाणसंठितेपन्नत्ते २७, उत्तरासाढाणंक्खत्ते किं संठिते पन्नत्ते ? सीहनिसीयणसंठाणसंठिते पन्नत्ते २८ ॥ वृत्तिर्यथा-' ता कहं ते ' इत्यादि, ता इति पूर्ववत्, कथं-केन प्रकारेण भगवन् ! नक्षत्राणां संस्थितिः-संस्थानमाख्याता इति वदेत् ? एवमुक्त्वा भूयः प्रत्येकं प्रश्नं विदधाति-' ता ' इत्यादि, ता इति पूर्ववत् । एतेषामनन्तरोदितानामष्टाविंशतिनक्षत्राणां मध्ये यदभिजिन्नक्षत्रं तत् ' किं संठितं ' ति कस्येव संस्थितं-संस्थानं यस्य तत्किं संस्थितं प्रज्ञप्तम् ? भगवानाह-' ता एएसि णं ' इत्यादि, ता इति पूर्ववत्, एतेषामनन्तरोदितानामष्टाविंशतेर्नक्षत्राणां मध्येऽभिजिन्नक्षत्रं गोशीर्षावलिसंस्थितं प्रज्ञप्तम्, गोः शीर्षं गोशीर्षं तस्यावलिस्तत्पुद्गलानां दीर्घरूपा श्रेणिस्तत्समं संस्थानं प्रज्ञप्तम्, एवं शेषाण्यपि सूत्राणि भावनीयानि, नवरं दामनी-पशुबन्धनम्, शेषं प्रायः सुगमम् । संस्थानसङ्ग्राहिका गाथाश्चेमा जंबुद्वीपप्रज्ञप्तिसत्कास्तिस्रः-" गोसीसावलि १ काहार२, सउणि३ पुप्फोवयार४ वावी य५-६ णावा७ य आसखंधग८, भग९ छुरघरए य१० सगडुद्धी ॥ ११ ॥ १ ॥ मिगसीसावलि१२ रुहिरबिंदु १३ तुल १४ वद्धमाणग१५ पडागा १६ । पागारे१७ पलिअंके१८-१९, हत्थे२० मुहफुल्लए२१ चेव ॥ २ ॥ खीलग२२ दामणि२३ एगावली२४ य गयदंत२५ विच्छुयअले२६ गयविक्कमे२७ य त्तो, सीहनिसाई य२८ संठाणा ॥ ३ ॥" इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तीदशमप्राभृतप्राभृताष्टमप्राभृतसूत्रवृत्तौ २०९ प्रत्रौ ११९ पत्रे ॥ १ ॥

अथ नक्षत्राणां तारासङ्ख्याजिज्ञासया लिख्यते-

ता कहं ते तारग्गे आहितेति वदेज्जा-ता एतेसि णं अट्ठावीसाए णक्खत्ताणं अभीईणक्खत्ते कतितारे पन्नत्ते ? तितारे पण्णत्ते १, सवणे णक्खत्ते कतितारे पण्णत्ते ? तितारे पन्नत्ते २, धनिट्ठानक्खत्ते कतितारे पण्णत्ते ? पणतारे पन्नत्ते ३, सयभिसयाणक्खत्ते कइतारे पन्नत्ते ? सततारे पन्नत्ते ४, पुव्वभद्दवया नक्खत्ते कतितारे पन्नत्ते ? दुतारे पण्णत्ते ५, एवं उत्तरावि ६, रेवतीणक्खत्ते कतितारे पण्णत्ते ? दुतीसतारे पण्णत्ते ७, अस्सिणीणक्खत्ते कतितारे पन्नत्ते ? तितारे पन्नत्ते भरणीणक्खत्ते कइतारे पन्नत्ते ? तितारे ९, कत्तियाणक्खत्ते कइतारे पन्नत्ते ? छतारे पन्नत्ते १, रोहिणीणक्खत्ते कतितारे पन्नत्ते ? पंचतारे पन्नत्ते ११, मिगसिरनक्खत्ते कइतारे पन्नत्ते ? तितारे पन्नत्ते १२, अद्दानक्खत्ते कइतारे पण्णत्ते ? एगतारे पण्णत्ते १३, पुणव्वसुनक्खत्ते कइतारेपण्णत्ते ? पंचतारे पण्णत्ते १४, पुस्सणक्खत्ते कइतारे पण्णत्ते ? तितारे पण्णत्ते १५, आस्सेसानक्खत्ते कइतारे पण्णत्ते ? छतारे पण्णत्ते १८, महानक्खत्ते कइतारे पन्नत्ते ? सत्ततारे पन्नत्ते १७, पुव्वफग्गुणीणक्खत्ते कइतारे पन्नत्ते ? दुतारे पन्नत्ते १६, उत्तरफग्गुणीनक्खत्ते कइतारे पन्नत्ते ? दुतारे पन्नत्ते १९, हत्थनक्खत्ते कतितारे पन्नत्ते ? पंचतारे पन्नत्ते २०, चित्ताणक्खत्ते कइतारे पन्नत्ते ? एगतारे पन्नत्ते २१, सातिणक्खत्ते कइतारे पण्णत्ते ? एगतारे पन्नत्ते २२, विसाहानक्खत्ते कइतारे पन्नत्ते ? पंचतारे पन्नत्ते २३, अणुराहाणक्खत्ते कइतारे पन्नत्ते ? चउतारे पन्नत्ते २४, जेट्ठानक्खत्ते कइतारे पन्नत्ते ? तितारे पन्नत्ते २५, मूलनक्खत्ते कइतारे पण्णत्ते ? एगादसतारे पन्नत्ते २६, पुव्वासाठानक्खत्ते कइतारे पन्नत्ते ? चउतारे पन्नत्ते २७, उत्तरासाढाणक्खत्ते कइतारे पन्नत्ते ? चउतारे पण्णत्ते २८ ॥ इति । वृत्तिर्यथा-तदेवमुक्तं दशमस्यस्य प्राभृतस्याष्टमं प्राभृतप्राभृतम्, सम्प्रति नवममारभ्यते, तस्य चायमर्थाधिकारः-प्रतिनक्षत्रं ताराप्रमाणं वक्तव्यमिति । ततस्तद्विषयं प्रश्नसूत्रमाह-' ता कहं ते ' इत्यादि, ता इति पूर्ववत्, कथं-केन प्रकारेण ते-त्वया भगवन् ! नक्षत्राणां ताराग्रं ताराप्रमाणमाख्यातं इति वदेत् ? एवं सामान्यतः प्रश्नं कृत्वा सम्प्रति प्रतिनक्षत्रं पृच्छति-' ता एएसि णं ' इत्यादि, ता इति पूर्ववत, एतेषामष्टाविंशतेर्नक्षत्राणामभिजिन्नक्षत्रं कतितारं प्रज्ञप्तम् ? भगवानाह-अभिजिन्नक्षत्रं त्रितारं प्रज्ञप्तम्, एवं शेषाण्यपि प्रश्ननिर्वचनसूत्राणि भावनीयानि, ताराप्रमाणसङ्ग्राहिके चेमे जंबूद्वीपप्रज्ञप्तीसक्ते गाथे-" तिग१ तिग२ पंचग३ सय४ दुग५, दुग६ बत्तीस७ तिगं८ तिगं९ चेव । छ१० प्पंचग११ तिग१२ इक्कग१३ पंचग१४ तिगं१५ छक्कगं१६ चेव ॥ १ ॥ सत्तग१७ दुग१८ दुग१९ पंचग२० इक्कि२१ क्कग२२ पंच२३ चउ२४

तिगं२५ चेव । इक्कारस य२६ चउक्कं२७ चउक्कगं२८ चेव तारग्गं ॥ २ ॥ " इति श्रीसूर्यप्रज्ञप्तीदशमप्राभृतनवमप्राभृतप्राभृतवृत्तौ मलयगिरिविरचितायां २७९ प्रतौ १२० पत्रे ॥ २ ॥

इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरिशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे मध्यभागे श्रीसूर्यप्रज्ञप्तीविचारनामा सप्तमस्तरङ्गः ॥ ७ ॥

कल्याणकरणकुशलां, दुरधिगमां भूरिभाग्यसंप्राप्याम् । रसकूपिकामिव मुदा, जिनवाणीमवहितः सेवे ॥ १ ॥

अथ क्रमायाताः श्रीनिरयावलिया कप्पवडिंसिया२ पुप्फिया३ पुप्फचूलिया४ वह्नीदशा५ त्मकोपाङ्गविचारा लिख्यन्ते-तत्र यथा चतुरशीतिसहस्राधिकैकलक्षमनुष्यक्षयकारी चेटकमहाराजकूणिकराज्ञोः सङ्ग्रामः सञ्जातस्तथा लिख्यते-

पढमस णं भंते ! अज्झयणस्स निरयावलियाणं समणेणं जावसंपतेणं के अट्ठे पन्नत्ते ? एवं खलु जंबू ! तेणं कालेणं तेणं समएणं इहेव जंबुद्दीवे दीवे भारहे वासे चंपानामं नगरी होत्था, रिद्ध० पुन्नभद्दे चेइए, तत्थ णं चंपाए नयरीए सेणीयस्स रन्नो पुत्ते चेल्लणाए देवीए अत्तए कूणिए नामं राया होत्था । महया० तस्स णं कूणियस्स रण्णो पउमावई नामं देवी होत्था, सोमाल । जाव विहरइ । तत्थ णं चंपाए नयरीए सेणियस्स रन्नो भज्जा कूणियस्स रण्णो चुल्लमाउया काली नामं देवी होत्था, सोमाला जाव पडिरूवा । तीसे णं कालीए देवीए पुत्ते काले नामं कुमारे होत्था, सोमाले जाव सुरूवे । तत णं से काले कुमारे अन्नया कयाइ तिहिं दंतीसहस्सेहिं, तिहिं रहसहस्सेहिं, तिहिं आससहस्सेहिं, तिहिं मणुयकोडीहिं, गरुलवूहे एक्कारसमेणं खंडएणं कूणिएणं रन्ना सद्धिं रहमुसलं संगामं ओयाए । तते णं तीसे कालीए देवीए अन्नया कयावि कुडुंबजागरियं जागरमाणीए अयमेयारूवे अज्झत्थिए जाव समुप्पजित्था-एवं खलु ममं पुत्ते काले कुमारे तिहिं दंतिसहस्सेहिं जाव ओयाए से मन्ने किं जतिस्सति नो जतिस्सति ? जीविस्सइ नो जीविस्सइ ? पराजिणिस्सइ णो पराजिणिस्सइ ?॥ इति वृत्तिर्यथा-' एवं खलु जंबू ? तेणं कालेणं ' इत्यादि ' इहेव ' इति इहैव देशतः प्रत्यासन्ने न पुनरसङ्ख्येयत्वाज्जंबूद्वीपानामन्यत्रेति भावः, भारते वर्षे-क्षेत्रे चंपैषा नगरी अभूत् । रिद्धेत्यनेन ' रिद्धत्थमियसमिद्ध ' इत्यादि द्दश्यम्, व्याख्या तु प्राग्वत्, तत्रोत्तरदिग्भागे पूर्णभद्रनामकं चैत्यं व्यतरायतनं, 'कूणिए नामं राय ' त्ति कूणिकनामा श्रेणिकराजपुत्रो राजा ' होत्थ '

त्ति अभवत् ' तद्वर्णको ' महयाहिमवंतमहंतमलयमंदरमहिंदसारे ' इत्यादि, पसंतडिंबडमरं रज्जं पसाहेमाणे विहरइ ' इत्येतदन्तः, तत्र महाहिमवानिव महान् शेषराजापेक्षया तथा मलयः- पर्वतविशेषो मन्दरो-मेरुः महेन्द्रः-शक्रादि देवराजः तद्वत्सारः-प्रधानो यः स तथा, तथा प्रशान्तानि डिम्बानि-विघ्नाः डमराणि-राजकुमारादिकृतविड्वरा यस्मिन् तत्तथा, (राज्यं) प्रसाधयन्-पालयन् विहरति-आस्ते स्म । कूणिकदेव्याः पद्मावतीनाम्न्या वर्णको यथा-' सूमाल । जाव विहरति ' यावत्करणादेवं द्रश्यम्-' सुकामालपाणिपाया अहीणपंचिंदियसरीरा ' अहीनानि अन्यूनानि लक्षणतः स्वरूपतो वा पञ्चापीन्द्रियाणि यस्मिंस्तत्तथाविधं शरीरं यस्याः सा तथा, ' लक्खणवंजणगुणोववेया ' लक्षणानि-स्वस्तिकचक्रादीनि व्यञ्जनानि-मषीतिलकादीनि तेषां यो गुणः-प्रशस्तता तेन उपपेता-युक्ता या सा तथा, उप अप इता शब्दत्रयस्थाने शकंध्वादिदर्शनादुपपेतेति स्या, ' माणुम्माणपमापडिपुन्नसुजायसव्वंगसुंदरंगा ' तत्र मानं-जलस्य द्रोणप्रमाणता कथं ? जलस्यातिभृते कुंडे पुरुषे निवेशिते यज्जलं निस्सरति तद्यदि द्रोणमानं भवति तदा स पुरुषो मानप्राप्त उच्यते, तथा उन्मानं-अर्द्धभारप्रमाणता कथं ? तुलारोपितः पुरुषो यद्यर्द्धभारं तुलति तदा स उन्मानप्राप्त उच्यते, प्रमाणं तु-स्वाङ्गुलेनाष्टोत्तरशतोच्छ्रायिता, ततश्च मानोन्मानप्रमाणैः प्रतिपूर्णानि-अन्यूनानि सुजातानि सर्वाणि अङ्गानि-शिरःप्रभृतीनि यस्मिंस्तत्तथाविधं सुन्दरमङ्गं-शरीरं यस्याः सा तथा, ' ससिसोमाकारकंतपियदंसणा ' शशिवत्सौम्याकारं कान्तं च-कमनीयं अत एव प्रियं द्रष्टृणां दर्शनं-रूपं यस्या सा तथा, अत एव सुरूपा स्वरूपतः सा पद्मावती देवी ' कूणिएणं सद्धिं उरालाइं भोगभोगाइं भुंजमाणी विहरइ ' भोगभोगान्- अतिशयवद्भोगान्, ' तत्थ णं ' इत्यादि, ' सोमालपाणिपाया ' इत्यादि पूर्ववद्वाच्यम्, अन्यच्च ' कोमुइरयणियरविमलपडिपुन्नसोवयणा ' कौमुदीरजनीकरवत्-कार्त्तिकीचन्द्र इव विमलं प्रतिपूर्णं सौम्यं वदनं यस्या सा तथा, ' कुंडलुल्लेहियगंडलेहा ' कुण्डलाभ्यामुल्लिखिता घृष्टा गण्डलेखाः-कपोलविरचितमृगमदादिरेखा यस्याः सा तथा, ' सिंगारागारचारुवेसा 'शृङ्गारस्य-रसविशेषस्यागारमिवागारं तथा, चारुवेषो-नेपथ्यं यस्या सा तथा ततः कर्मधारयः, ' काली नामं देवी ' श्रेणिकस्य भार्या सा कूणिकस्य राज्ञश्चुल्लजननी-लघुमाताऽभवत्, सा य कालीदेवी सेणियस्स रन्नो इट्ठा वल्लभा कान्ता काम्यत्वात् प्रिया-सदा प्रेमविषयत्वात् ' मणुन्ना ' सुन्दरत्वात्-' नामधिज्जा ' प्रशस्तनामधेयवतीत्यर्थः नाम वा धार्यं-हृदि धरणीयं यस्याः सा तथा, ' वेसासिया ' विश्वसनीयत्वात् ' सम्माया ' तत्कृतकार्यस्य संमतत्वात ' बहुमया ' बहुशो बहुभ्यो वाऽन्येभ्यः सकाशान्मता

।।१५२।।

बहुमता बहुमानपात्रं वा ' अणुमया ' विप्रियकरणस्यापि पश्चान्मता अनुमता ' भंडकरंडकसमाणा ' आभरणकरंडकसमाना उपादेयत्वात्, सुसंरक्षितत्वाच्च । ' तेल्लकेला इव सुसंगोविया ' तैलकेला सौराष्ट्रप्रसिद्धो मृन्मयस्तैलस्य भाजनविशेष- स च भङ्गभयाल्लोठनभयाच्च सुष्ठु सङ्गोप्यते, एवं साऽपि तथोच्यते ' चेलपेडा इव सुसंपरिग्गहीया ' वस्त्रमञ्जुषेवेत्यर्थः, ' सा काली देवी सेणिएणं सद्धिं विउलाइं भोगभोगाइं भुंजमाणी विहरइ ' कालनामा तत्पुत्रः, ' सोमालपाणिपाए ' इत्यादि प्रागुक्तवर्णकोपेतो वाच्यः यावत् ' पासाइए दरिसणिज्जे अभिरूवे पडिरूवे ' इति पर्यन्तः । ' सेणियस्स रज्जे दुवे रयणा अट्ठारसवंको हारो सेअणगहत्थी, तत्थ किर सेणियस्स रन्नो जावइयं रज्जस्स मुल्लं तावइयं देवदिन्नस्स हारस्स सेयणस्स य गंधहत्थिस्स य, तत्थ हारस्स उप्पत्ति पत्थावे कहिजिस्सइ, कूणियस्स एत्थेव उप्पत्ती वित्थरेण भणिस्सइ, तत्कार्येण कालादीनां मरणसम्भवादारम्भसङ्ग्रामतो नरकयोग्यकर्मोपचयविधानात्, नवरं कूणिकस्तदा कालादिदशकुमारान्वितश्चंपायां राज्यं चकार, सर्वेऽपि च ते दोगुंदगदेवा इव कामभोगपरायणास्त्रयस्त्रिंशाख्या देवाः फुट्टमाणेहिं मुइंगमत्थएहिं वरतरुणिसंपणिएहिं बत्तीसइपत्तनिबद्धेहिं नाडएहिं उवगिज्जमाणा भोगभोगाइं भुंजमाणा विहरंति, हल्लविहल्लनामाणो कूणियस्स चेल्लणादेविअंगजा दो भायरा अन्नेवि अत्थि । अहुणा हारस्स उप्पत्ती भन्नइ-एत्थ सक्को सेणियस्स भगवंतं पइ निच्चलभत्तिस्स पसंसं करेइ, तओ सेडुयस्स जीवो देवो तब्भत्तिरंजिओ सेणियस्स तुट्ठो संतो अट्ठारसवंकं हारं देइ, दोन्नि य वट्टगोलए देइ, सेणिएणं सो हारो चेल्लणाए दिण्णो पियत्ति काउं, वट्टदुगं सुनंदाए अभयमंतिजणणीए, ताए रुट्ठाए किं अहं चेडरूवंति काऊण अच्छोडिया भग्गा, तत्थ एगंमि कुंडलजुअलं एगंमि वत्थजुअलं तुट्ठाए गहियाणि, अन्नया अभओ सामिं पुच्छइ को अपच्छिमो रायरिसित्ति ? सामिणा उद्दायिणो वागरिओ अओपरं बद्धमउडा न पव्वयंति, ताए अभएणं रज्जं दिज्जमाणं न इच्छियंति । सेणिओ चिंतेइ ' कोणीयस्स दिज्जिहि ' ति हल्लस्स हत्थी दिन्नो सेयणगो वेहल्लस्स देवदिन्नो हारो अभएण वि पव्वयंतेणं सुनंदाए खोमजुअलं कुंडलजुअलं च हल्लविहल्लाणं दिन्नाणि । महया विहवेणं अभओ नियजणणीसमेओ पव्वइओ । सेणियस्स चेल्लणादेवीअंगसमुब्भूया तिन्निपुत्ता कूणिओ हल्लविहल्ला य, कूणियस्स उप्पत्ती एत्थेव भणिस्सइ, कालीमहाकालीपमुहदेवीणं अन्नासिं तणया सेणियस्स वहवे पुत्ता कालपमुहा संति । अभयंभि गहियव्वए अन्नया कोणिओ कालाइहिं दसहिं कुमारेहिं समं मंतेइ-सेणियं सेच्छाविग्घकारयं बंधित्ता

।।१५३।।

एक्कारसभाए रज्जं करेमो त्ति। तेहिं पडिसुयं, सेणिओ बद्धो पुव्वहुणे अवहुणे य कससयं दवावेइ, सेणियस्स कूणिओ पुव्वभववेरियत्तणेण चेल्लणाए कयाइ ढोयं न देइ भत्तं वारियं, पाणियं न देइ ताहे चेल्लणा कहवि कुम्मासे वालेहिं बंधिता सयारवसुरं च पवेसेइ सा किर धोव्वइ सयवारे सुरापाणियं सव्वं होइ तीए पहावेण से वेयणं न वेएइ। अन्नया तस्स पउमावईदेवीए पुत्तो एवं पिच्चो अत्थि। मायाए सो भणिओति-दुरात्मन्! तव अंगुली किमिए वमंती पिया मुहे काऊण अत्थियाओ इयरहा तुमं रोवंतो चेव चिट्ठेसु ताहे चित्तं मणागुवसतं जायं, मए पिया एवं वसणं पाविओ तस्स अधिई जाया भुंजंतओ चेव उट्ठाय परसुहत्थो गओ अन्ने भणंति लोहदंडं गहाय 'नियलाणि भंजामि' त्ति पहाविओ रक्खवालगो नेहेण भणइ-एसो सा पावो लोहदंडं परसुं वा गहाय एइ त्ति सेणिएणं चिंतिअं-न नज्जइ केण कुमरणेण मारेही, तओ तालपुडगं विसं खइयं जाव एइ ताव मओ सुट्ठुयरं अधिई जाया, ताहे मयकिच्चं काउण घरमागओ रज्जधुरामुक्कतत्तीओ तं चेव चिंतंतो अच्छइ एवं कालेण विसोगो जाओ, पुणरवि सयणआसणाईए पिइसंतिए दट्ठुण अधिई होइ, तओ रायगिहाओ निग्गंतुं चंपं रायहाणिं करेइ, एवं चंपाए कूणिओ राया रज्जं करेइ नियभायपमुहसयणसंजोगओ इह निरयावलियासुयक्खंधे कूणिकवक्तव्यतादावुल्लिप्ता, तत्साहाय्यकरणप्रवृत्तानां कालादीनां कुमाराणां दशानामपि सङ्ग्रामे रथमुशलाख्ये प्रभूतजनक्षयकरणेन नरकयोग्यकर्मोपार्जनसम्पादनान्नरकगामितया 'निरयाउ' त्ति प्रथमाध्ययनस्य कालादिकुमारवक्तव्यता प्रतिबद्धस्यैतन्नाम। अथ रथमुशलसङ्ग्रामस्योत्पत्तौ किं निबन्धनं? अत्रोच्यते-एवं किलायं सङ्ग्रामः सञ्जातः, चम्पायां कूणिको राजा राज्यं चकार। तस्यानुजौ हल्लविहल्लाभिधानौ भ्रातरौ पितृदत्तसेचनकाभिधाने गन्धहस्तिनि समारूढौ दिव्यकुण्डलदिव्यहारदिव्यवसनविभूषितौ विलसन्तौ दृष्ट्वा पद्मावत्यभिधाना कूणिकराजस्य भार्या कदाचिद्दन्तिनोऽपहाराय तं कूणिकराजं प्रेरितवती-"कर्णविषलग्नकृतेऽयमेव कुमारो राजा तत्त्वतो न त्वम् यस्येदृशा विलासाः" प्रज्ञाप्यमानाऽपि सा न कथञ्चिदस्यार्थस्योपरमति, तत्प्रेरितकूणिकराजेन तौ याचितौ, तौ च तद्भयाद्वैशाल्यां नगर्यां स्वकीयमातामहस्य चेटकाभिधानस्य राज्ञोऽन्तिके सहस्तिकौ सान्तःपुरपरिवारौ गतवन्तौ, कूणिकेन च दूतप्रेषणेन तौ याचितौ, न च तेन प्रेषितौ, कूणिकस्य तयोश्च तुल्यमातृकत्वात् ततः कूणिकेन भणितम्-यदि न प्रेषयसि तदा युद्धसज्जो भव, तेनापि भणितम्-'एष सज्जोऽस्मि, ततः कूणिकेन कालादयो दश स्वकीया भिन्नमातृका भ्रातरो राजानश्चेटकेन सह सङ्ग्रामायायाताः। तत्रैकैकस्य त्रीणि त्रीणि

हस्तिनां सहस्राणि, एवं रथानामश्वानां मनुष्याणां च प्रत्येकं तिस्रः तिस्रः कोट्यः कूणिकस्याप्येवमेव तत एकादशभागीकृतराज्यस्य कूणिकस्य कालादिभिः सह, निजेन एकादशांशेन सङ्ग्रामे काल उपागतः एतमर्थं वक्तुमाह-तए णं से काले ' इत्यादिना एनं च व्यतिकरं ज्ञात्वा चेटकेनाऽप्यष्टादश गणराजानो मेलिताः, तेषां चेटकस्य च प्रत्येकमेवमेव हस्त्यादिबलपरिमाणम्, ततो युद्धं सम्प्रलग्नम्, चेटकराजस्य तु प्रतिपन्नव्रतत्वेन दिनमध्ये एकमेव शरं मुञ्चत्यमोघबाणश्च सः, तत्र कूणिकसैन्ये गरुडव्यूहः, चेटकसैन्ये सागरव्यूहो विरचितः । ततश्च कूणिकस्य कालो दण्डनायको निजबलान्वितो युद्ध्यमानस्तावद्गतो यावच्चेटकः, ततस्तेन शरनिपातेनासौ निपातितो भग्नं च कूणिकबलम्, गते च द्वे अपि बले निजं निजमावासस्थानम् । द्वितीयेऽह्नि सुकालो नाम दण्डनायको निजबलान्वितो युद्ध्यमानस्तावद्गतो यावच्चेटकः, एवं सोऽप्येकशरेण निपातितः । एवं तृतीयेऽह्नि महाकालः सोऽप्येवम् । चतुर्थेऽह्नि कृष्णकुमारः, सोऽप्येवमेव । पञ्चमे सुकृष्णः ५ । षष्ठे महाकृष्णः ६ । सप्तमे वीरकृष्णः ७ । अष्टमे रामकृष्णः ८ । नवमे पितृसेनकृष्णः ९ । दशमे पितृमहासेनकृष्णः १० । चेटकेन एकैकशरेण निपातिताः । एवं दशसु दिनेषु चेटकेन विनाशिता दशापि कालादयः । एकादशे तु दिवसे चेटकजयार्थं देवताराधनाय कुणिकोऽष्टमभक्तं प्रजग्राह, ततः शक्रचमरावागतौ, ततः शक्रो बभाषे-चेटकः श्रावक इत्यहं न तं प्रति प्रहरामि नवरं भवन्तं संरक्षामि, ततोऽसो तद्रक्षार्थं वज्रप्रतिरूपमभेद्यकवचं कृतवान् । चमरस्तु द्वौ सङ्ग्रामौ विकुर्वितवान्, महाशिलाकण्टकः रथमुशलं चेति, तत्र महाशिलेव कण्टकजीवभेदकत्वान्महाशिलाकण्टकः, ततश्च यत्र तृणशूलादिनाऽप्यभिहतस्याश्वहस्त्यादेर्महाशिलाकण्टकेनेवास्याहतस्य वेदना जायते स सङ्ग्रामो महाशिलाकण्टक एवोच्यते । ' रथमुशले ' इति यत्र रथो मुशलेन युक्तः परिधावन् महाजनक्षयं कृतवान् असौ रथमुशलः । ' ओपाए ' इति उपपातः संप्राप्तः ' किं जइस्सइ ' इति जयश्लाघां प्राप्स्यति पराजेष्यते अभिभविष्यति परस्यैन्यं परानभिभविष्यति उत नेत्यादि । श्रीनिरयावलिसूत्रवृत्तौ ।

इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरीश्वरशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे मध्यभागे निरयावलिविचारनामाऽष्टमस्तरङ्गः ॥ ८ ॥

यस्मादयं समग्रो, व्यवहारो जृम्भते जगन्मध्ये । तदहं धृतबहुमानं, विधिना सेवे श्रुतज्ञानम् ॥ १ ॥

॥१५५॥

अथ नन्दीसूत्रविचारा लिख्यन्ते-तत्र पूर्वं श्रीजिनप्रासादसद्भावाक्षराणि लिख्यन्ते-

संवरवरजलपगलिय-उज्झरपविरायमाणहारस्स । सावगजणपउररवंत-मोरनच्चंतकुहरस्स ॥ १५ ॥ व्याख्या- ' संवर ' इत्यादि, संवरः-प्राणातिपातादिरूपपञ्चाश्रवप्रत्याख्यानरूपः तदेव कर्ममलप्रक्षालनात्सांसारिकतृडपनोदकारित्वात् परिणामसुन्दरत्वाच्च वरजलमिव संवरवरजलं तस्य प्रगलितः-सातत्येन व्यूढ उज्झरः-प्रवाहः स एव प्रविराजमानो हारो यस्य स तथा तस्य, श्रावकजना एव स्तुतिस्तोत्रस्वाध्यायाद्याराधनमुखरतया प्रचुरा रवन्तो मयूरास्तैर्नृत्यन्तीव कुहराणि जिनमण्डपादिरूपाणि यस्य स तथा तस्य इति नन्दीवृत्तौ १९२ प्रतौ ४२ पत्रे ॥ १ ॥

अथ केचनाऽज्ञानिनः स्त्रीणां मुक्तिं न मन्यन्ते, तद्युक्तियुक्तसिद्धान्तेन निराकर्तुं लिख्यते-

से किं तं अणंतरसिद्धकेवलनाणं ? अणंतरसिद्धकेवलनाणं पन्नरसविहं पन्नत्तं तंजहा-तित्थसिद्धा १ अतित्थसिद्धा २ तित्थयरसिद्धा ३ अतित्थयरसिद्धा ४ सयंबुद्धसिद्धा ५ पत्तेयबुद्धसिद्धा ६ बुद्धबोहियसिद्धा ७ इत्थिलिंगसिद्धा ८ पुरिसलिंगसिद्धा ९ नपुंसगलिंगसिद्धा १० सलिंगसिद्धा ११ अन्नलिंगसिद्धा १२ गिहिलिंगसिद्धा १३ एगसिद्धा १४ अणेगसिद्धा १५ से तं अणंतरसिद्धकेवलनाणं ॥ इति ॥ वृत्तिर्यथा-' से किं तं ' इत्यादि, अथ किं तदनन्तरसिद्धकेवलज्ञानम् ? सूरिराह-अनन्तरसिद्धकेवलज्ञानं पञ्चदशविधं प्रज्ञप्तम्, पञ्चदशविधता चास्यानन्तरपाश्चात्यभवरूपोपाधिभेदापेक्षया पञ्चदशविधत्वात्, ततोऽनन्तरभवोपाधिभेदतः पञ्चदशविधतां मुख्यत आह-तद्यथेत्युपदर्शने ' तित्थसिद्धा ' इत्यादि, तीर्यते संसारसागरोऽनेनेति तीर्थं-यथावस्थितसकलजीवाजीवादिपदार्थप्ररूपकं परमगुरुप्रणितप्रवचनम्, तच्च निराधारं न भवतीति कृत्वा सङ्घः प्रथमगणधरो वा वेदितव्यम्, उक्तं च-" तित्थं भंते ! तित्थं तित्थकरे तित्थं ? गोयमा ! अरहा ताव तित्थंकरे तित्थं पुण चाउव्वण्णो समणसंघो पढगणहरो वा " तस्मिन् उत्पन्ने ये सिद्धास्ते तीर्थसिद्धाः १, तथा तीर्थस्याऽभावोऽतीर्थः तीर्थस्याभावश्च-अनुत्पादः अपान्तराले व्यवच्छेदो वा तस्मिन् ये सिद्धास्तेऽतीर्थसिद्धाः, तत्र तीर्थानुत्पादे सिद्धा मरुदेवीप्रभृतयः, न हि मरुदेव्यादिसिद्धि-गमनकाले तीर्थमुत्पन्नमासीत्, तथा तीर्थव्यवच्छेदश्चन्द्रप्रभस्वामिसुविधिस्वाम्यपान्तराले तत्र ये जातिस्मरणादिनाऽपवर्गमवाप्य सिद्धास्ते तीर्थव्यवच्छेदे सिद्धाः२, तथा तीर्थङ्कराः सन्तो ये सिद्धास्ते तीर्थङ्करसिद्धाः३, अतीर्थकरसिद्धा-अन्ये सामान्यकेवलिनः४, तथा

स्वयम्बुद्धाः सन्तो ये सिद्धास्ते स्वयम्बुद्धसिद्धाः ५, तथा प्रत्येकबुद्धाः सन्तो ये सिद्धास्ते प्रत्येकबुद्धसिद्धाः६, अथ स्वयम्बुद्धप्रत्येकबुद्धानां कः प्रतिविशेषः ? उच्यते बोध्युपधिश्रुतलिङ्गकृतो विशेषः, तथा हि-स्वयम्बुद्धा बाह्यप्रत्ययमन्तरेणेव बुद्ध्यन्ते स्वयमेव-बाह्यप्रत्ययमन्तरेणैव निजजातिस्मरणादिना बुद्धाः स्वयम्बुद्धाः इति व्यत्पत्तेः, ते च द्विधा तीर्थकरास्तीर्थकरव्यतिरिक्ताश्च इह तीर्थकरव्यतिरिक्तैरधिकारः, आह च चूर्णिकृत् " ते दुविहा तित्थयरा तित्थयरवतिरित्ता वा इह वतिरित्तेहिं अहिगारो " इति, प्रत्येकबुद्धास्तु बाह्यप्रत्ययमपेक्ष्य बुद्ध्यन्ते प्रत्येकं-बाह्यं वृषभादिकं कारणमभिसमीक्ष्य बुद्धाःप्रत्येकबुद्धा इति व्यत्पत्तेः, तथा च श्रूयते-बाह्यवृषभादिककारणसापेक्ष्य करकण्ड्वादीनां बोहिः, बहिः प्रत्ययमपेक्ष्य च बुद्धाः सन्तो नियमतः प्रत्येकमेव विहरन्ति न गच्छवासिन इव संहिताः, आह च चूर्णिकृत्-" पत्तेयं बाह्यं वृषभादिकारणमभिसमीक्ष्य बुद्धाः प्रत्येकबुद्धाः, बहिःप्रत्ययप्रतिबुद्धानां च पत्तेयं नियमा विहारो जम्हा तम्हा य ते पत्तेयबुद्धा " इति, तथा स्वयम्बुद्धानामुपधिर्द्वादशविध एव पात्रादिकः, प्रत्येकबुद्धानां तु द्विधा- जघन्यतः उत्कर्षतश्च, तत्र जघन्यतो द्विविध- उत्कर्षतो नवविधप्रावरणवर्जः, आह च चूर्णिकृत-" पत्तेयबुद्धाणं जहन्नेणं दुविहो उक्कोसेणं नवविहो नियमा पावरणवज्जो भवइ " तथा स्वयम्बुद्धानां पूर्वाधीतं श्रुतं भवति वा न वा यदि भवति ततो लिङ्गं देवताः प्रयच्छन्ति गुरुसन्निधौ वा गत्वा लिङ्गं प्रतिपद्यते, यदि चैकाकी विहरणसमर्थ इच्छा च तस्य तथारूपा जयते तत एकाकी विहरत्यन्यथा गच्छवासेऽवतिष्ठते, अथ पूर्वाधीतं श्रुतं न भवति तर्हि नियमाद् गुरुसन्निधे गत्वा लिङ्गं प्रतिपद्यते गच्छं चावश्यं न मुञ्चति, उक्तं च चूर्णिकृता-" पुव्वाधीयं से सुयं हवइ वा न वा जइ से नत्थि तो लिंगं नियमा गुरुसन्निहे पजिवज्जइ गच्छे य विहरइ त्ति, पुव्वाधीयसुअसंभवो अत्थि तो से लिंगं देवया पयच्छइ गुरुसन्निधे वा पडिवज्जइ जइ एगविहारविहरणजोग्गो इच्छा वा से तो एक्को वि विहरइ अन्नहा गच्छे चेव विहरइ " इति, प्रत्येकबुद्धानां तु पूर्वाधीतं श्रुतं नियमतो भवति तच्च जघन्यत एकादशाङ्गानि उत्कर्षतः किञ्चिन्न्यूनानि दशपूर्वाणि तथा लिङ्गं तस्मै देवताः प्रयच्छन्ति लिङ्गरहितो वा कदाचिद्भवति, तथाऽऽह चूर्णिकृत्-" पत्तेयबुद्धाणं पुव्वाधीअं सुअं नियामा हवइ जहन्नउ इक्कारसअंगाइं उक्कोसेणं भिन्नदसपुव्वाइं लिंगं च से देवया पयच्छइ लिंगवज्जिओ वा भवइ जतो भणियं कप्पं पत्तेयबुद्धा " इति, तथा बुद्धा-आचार्यास्तैर्बोधिताः सन्तो ये सिद्धास्ते बुद्धबोधितसिद्धाः, एते च केचित्स्त्रीलिङ्गसिद्धाः, स्त्रियो लिङ्गं स्त्रीलिङ्गं स्त्रीत्वस्योपलक्षणमित्यर्थः, तच्च त्रिधा तद्यथा-वेदः

शरीरनिर्वृत्तिर्नेपथ्यं च, तत्रेह शरीरनिर्वृत्त्या प्रयोजनं न वेदनेपथ्याभ्यां वेदे सति सिद्धत्वाभावात् नेपथ्यस्यचाप्रमाणत्वात्, आह च चूर्णिकृत्-" इत्थीए लिंगं इत्थीलिंगं उवलक्खणं वुत्तंति भवति तं च तिविहं वेओ सरीरनिव्वत्ती नेवत्थं च, इह सरीरनिव्वत्तीए अहिगारो न वेद नेवत्थेहिं ति " तस्मिन् स्त्रीलिङ्गे वर्त्तमानाः सन्तो ये सिद्धास्ते स्त्रीलिङ्गसिद्धाः८, एतेन यदाहुराशाम्बरा न स्त्रीणां निर्वाणमिति तदपास्तं द्रष्टव्यम्, स्त्रीनिर्वाणस्य साक्षादनेन सूत्रेणाभिधानात्तत्प्रतिषेधस्य य युक्तनुपपन्नत्त्वात् । तथा हि-मुक्तिपथो ज्ञानदर्शनचारित्राणि " सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः " इति वचनात्सम्यग्दर्शनादीनि च पुरुषाणामिव स्त्रीणाम्प्यविकलानि, तथा हि-दृश्यन्ते स्त्रियोऽपि सकलमपि प्रवचनार्थमभि-रोचयमानाः, जानते च षडावश्यककालिकोत्कालिकादिभेदभिन्नं श्रुतम्, परिपालयन्ति च सप्तदशविधमकलङ्कं संयमम्, धारयन्ति च देवासुराणामपि दुर्द्धरं ब्रह्मचर्यम्, तप्यन्ते च तपांसि मासक्षपणादीनि, ततः कथमिव तासां न मोक्षसम्भवः ? स्यादेतदस्ति स्त्रीणां सम्यग्दर्शनं ज्ञानं च न पुनश्चारित्रं संयमाभावात्, तथा हि-स्त्रीणामवश्यं वस्त्रपरिभोगेन भवितव्यमन्यथाऽविवृताङ्गत्वस्तास्तिर्यग्स्त्रिय इव पुरुषाणामभिभवनीया भवेयुः, लोके च गर्होपजायते ततोऽवश्यं ताभिर्वस्त्रं परिभोक्तव्यम्, वस्त्रपरिभोगे च सपरिग्रहता सपरिग्रहत्वे च संयमाभाव इति, तदसमीचीनं सम्यग्सिद्धान्तापरिज्ञानात्, परिग्रहो हि परमार्थतो मूर्च्छाभिधीयते ' मुच्छा परिग्गहो वुत्तो ' इति वचनप्रामाण्यात्, तथा हि मूर्च्छारहितो भरतश्चक्रवर्ती सान्तःपुरोऽप्यादर्शकगृहेऽवतिष्ठमानो निष्परिग्रहो गीयते अन्यथा केवलोत्पादासम्भवात्, अपि च यदि मूर्च्छाया अभावेऽपि वस्त्रसंसर्गमात्रं परिग्रहो भवेत्ततो जिनकल्पप्रतिपन्नस्य कस्यचित्साधोस्तुषारकणानुषिक्ते प्रपतति शीते केनाप्यविषह्योपनिपातमद्यशीतमीति विभाव्य धर्मार्थिना शिरसि वस्त्रे प्रक्षिप्ते तस्य सपरिग्रहता भवेत्, न चैतदिष्टं, तस्मान्न संसर्गमात्रं परिग्रहः किन्तु मूर्च्छा, सा च स्त्रीणां वस्त्रादिषु न विद्यते धर्मोपकरणमात्रतया तस्योपादानात्, न खलु ता वस्त्रमन्तरेणात्मानं रक्षितुमीशते नापि शीतकालादिष्ववाग्दशायां स्वाध्यायादि कर्त्तुम् । ततो दीर्घतरसंयमपरिपालनाय यतनया वस्त्रं परिभुञ्जाना न ताः परिग्रहवत्यः । अथोच्येत सम्भवति नाम स्त्रीणामपि सम्यग्दर्शनादिकं रत्नत्रयं, परं न तत्सम्भवमात्रेण मुक्तिपदप्रापकं भवति किन्तु प्रकर्षप्राप्तम्, अन्यथा दीक्षानन्तरमेव सर्वेषामप्यविशेषेण मुक्तिपदप्राप्तिप्रसक्तेः, सम्यग्दर्शनादिरत्नत्रयप्रकर्षश्च स्त्रीणामसम्भवी ततो न निर्वाणमिति तदप्ययुक्तम्, स्त्रीषु रत्नत्रयप्रकर्षासम्भवग्राहकस्य प्रमाणस्याभावात्, न खलु सकलदेशकालव्याप्त्या स्त्रीषु रत्नत्रयप्रकर्षासम्भवग्राहकं प्रत्यक्षं अनुमानं वा

प्रमाणं विजृम्भते, देशकालविप्रकृष्टतया तत्र प्रत्यक्षस्याप्रवृत्तेः, तदप्रमाणवृत्तौ चाऽनुमानस्याप्यसम्भवात्, नापि तासु रत्नत्रयप्रकर्षासम्भव-
प्रतिपादकः कोऽप्यागमो विद्यते प्रत्युतसम्भवप्रतिपादकः स्थाने स्थानेऽस्ति, यथा-इदमेव प्रस्तुतं सूत्रं ततो न तासां रत्नत्रयप्रकर्षासम्भवः,
अथ मन्येथाः स्वभावत एवातपेनेव छाया विरुध्यते स्त्रीत्वेन रत्नत्रयप्रकर्षः ततस्तदसम्भवोऽनुमीयते तदयुक्तं युक्तिविरोधात्, तथा हि-
रत्नत्रयप्रकर्षः स उच्यते यतोऽनन्तरं मुक्तिपदप्राप्तिः स चायोग्यवस्थाचरमसमये स चास्माकमप्रत्यक्षः, ततः कथं विरोधगतिः ? न हि
अदृष्टेन सह विरोधः प्रतिपत्तुं शक्यते मा प्रापत् पुरुषेष्वातिप्रसङ्गः । ननु जगति सर्वोत्कृष्टपदप्राप्तिः सर्वोत्कृष्टेनाध्यवसायेनावाप्यते
॥१५९॥ नान्यथा, एतच्चोभयोरप्यावयोरागमप्रामाण्यबलतः सिद्धम्, सर्वोत्कृष्टे च द्वे पदे सर्वोत्कृष्टं दुःखस्थानं सर्वोत्कृष्टं सुखस्थानं च, तत्र
सर्वोत्कृष्टं दुःखस्थानं सप्तमनरकपृथ्वी अतः परमदुःखस्थानस्याभावात् सर्वोत्कृष्टं सुखस्थानं तु निःश्रेयसं ततः परमन्यस्य सुखस्थानस्यासम्भवात्
ततः स्त्रीणां सप्तमनरकपृथ्वीगमनमागमे निषिद्धं निषेधस्य च कारणं तद्गमनयोग्यतथाविधसर्वोत्कृष्टमनोवीर्यपरिणत्यभावः, ततः सप्तमपृथ्वीगमननि-
षेधादवसीयते नास्ति स्त्रीणां निर्वाणं निर्वाणहेतोस्तथारूपसर्वोत्कृष्टमनोवीर्यपरिणत्यसम्भवात्, तथा चात्र प्रयोगः-असम्भवनिर्वाणं स्त्रियः
सप्तमपृथ्वीगमनत्वाभावात् सम्मूर्च्छिमादिवत्तदेतदयुक्तम्, यतो यदि नाम स्त्रीणां सप्तमनरकपृथ्वीगमनं प्रति सर्वोत्कृष्टमनोवीर्यपरिणत्यभावः
तत एतावता कथमवसीयते निःश्रेयसं प्रत्यपि तासां सर्वोत्कृष्टमनोवीर्यपरिणत्यभावो ? न हि तो भूमिकर्षणादिकं कर्म कर्तुं न शक्नोति
स शास्त्राण्यवगाढुं न शक्नोतीति प्रत्येतुं शक्यं प्रत्यक्षविरोधात्, अथ सम्मूर्च्छिमादिषूभयं प्रत्यपि सर्वोत्कृष्टमनोवीर्यपरिणत्यभावो दृष्टः
ततोऽप्यवसीयते ननु यदि तत्र दृष्टस्तर्हि कथमत्रावसीयते ? न खलु बहिर्व्याप्तमात्रेण हेतुर्गमको भवति किं त्वन्तर्व्याप्त्या, अन्तर्व्याप्तिश्च
प्रतिबन्धबलेन सिध्यति, न चात्र प्रतिबन्धो विद्यते, न खलु सप्तमपृथ्वीगमनं निर्वाणगमनस्य कारणम्, नाप्येवमेवाविनाभावप्रतिबन्धेन
सप्तमपृथ्वीगमनाविनाभाविनिर्वाणगमनम्, सप्तमपृथ्वीगमनमन्तरेणैव चरमशरीरिणां निर्वाणगमनभावात्, न च प्रतिबन्धमन्तरेणैकस्याभावेऽन्य-
स्याभावः, मा प्रापद्यस्य कस्यचिदेकस्याभावे सर्वस्याभावप्रसङ्गः, यद्येवं तर्हि कथं सम्मूर्च्छिमादिषु निर्वाणगमनाभावः ? इति उच्यते-
तथाभवस्वाभाव्यात्, तथा हि-ते सम्मूर्च्छिमादयो भवस्यभावत एव सम्यग्दर्शनादिकं तथावत् प्रतिपत्तुं न शक्नुवन्ति ततो न तेषां
निर्वाणसम्भवः, स्त्रियस्तु प्रागुक्तप्रकारेण यथावत्सम्यग्दर्शनादिरत्नत्रयसम्पद्योग्याः ततस्तासां न निर्वाणाभावः, अपि च भुजपरिसर्पा

॥१५९॥

द्वितीयामेव पृथिवीं यावद्गच्छन्ति न परतः, परपृथ्वीगमनहेतुतथारूपमनोवीर्यपरिणत्यभावात्, तृतीयां यावात् पक्षिणः, चतुर्थीं चतुष्पदः, पञ्चमीमुरगाः, अथ च सर्वेऽप्यूर्ध्वमुत्कर्षतः सहस्रारं यावद्गच्छन्ति, तन्नाधोगतिविषयमनोवीर्यपरिणतेर्वैषम्यदर्शनादूर्ध्वगतावपि तद्वैषम्यम्, तथा च सति सिद्धं स्त्रीपुंसामधोगतिवैषम्येऽपि निर्वाणं सममिति कृतं प्रसङ्गेन । तथा पुल्लिङ्गे शरीरनिवृत्तिरूपे व्यवस्थिताः सन्तो ये सिद्धास्ते पुल्लिङ्गसिद्धाः ९, एवं नपुंसकलिङ्गसिद्धाः १०, तथा स्वलिङ्गे रजोहरणादिरूपे व्यवस्थिताः सन्तो ये सिद्धास्ते स्वलिङ्गसिद्धाः ११, तथा अन्यलिङ्गे परिव्राजकादिसम्बन्धिनि वल्कलकषायादिवस्त्रादिरूपे द्रव्यलिङ्गे व्यवस्थिताः सन्तो से सिद्धास्तेऽन्यलिङ्गसिद्धाः १२, गृहिलिङ्गे सिद्धा गृहिलिङ्गसिद्धा मरुदेवीप्रभृतयः १३, तथा एकस्मिन्नेकस्मिन् समये एकैकः सन्तो ये सिद्धास्ते एकसिद्धाः१४, अनेकसिद्धा इति एकस्मिन् समये अनेके सिद्धाः अनेकसिद्धाः१५, अनेके चैकस्मिन् समये सिध्यन्त उत्कर्षतोऽष्टोत्तरशतसङ्ख्या वेदितव्याः । आह-ननु तीर्थसिद्धातीर्थसिद्धरूपभेदद्वये एव शेषा भेदा अन्तर्भवन्ति तत्किमर्थं शेषभेदोपादानं ? उच्यते-सत्यमन्तर्भवन्ति परं न तीर्थसिद्धातीर्थसिद्धभेदद्वयोपादानमात्राच्छेषभेदपरिज्ञानं भवति, विशेषपरिज्ञानार्थं च विशेषशास्त्रप्रयासः । इति नन्दीसूत्रवृत्तौ .१९२ प्रतौ १०४ । १०५ पत्रे ॥ २ ॥

निगोदादिजीवानामपि मतिश्रुतज्ञानानन्तांशोऽप्रावृतस्तिष्ठतीत्यभिप्रायो लिख्यते-

सव्वजीवाणंपि अणं अक्खरस्स अणंतभागो निच्चुग्घाडिओ चिट्ठइ, जइ पुण सो वि आवरिज्जा तेणं जीवो अजीवत्तं पाविज्जा, सुट्ठु वि मेहसमुदए होइ पभा चंदसूराणं इति । वृत्तिर्यथा-' सव्वजीवाणंपि ' इत्यादि, सर्वजीवानामपि णमिति वाक्यालङ्कारे, अक्षरस्य-श्रुतज्ञानस्य श्रुतज्ञानं च मतिज्ञानाविनाभावि, ततो मतिज्ञानस्यापि अनन्तमो भागो नित्योद्घाटितः सर्वदैवाप्रावृत्तस्तिष्ठति, सोऽपि चानन्ततमो भागोऽनेकविधः, तत्र सर्वजघन्यश्चैतन्यमात्रं तत् पुनः सर्वोत्कृष्टश्रुतावरणस्त्यानर्द्धिनिद्रोदयभावेऽपि नाव्रियते तथा जीवस्वाभाव्यात् । तथा चाह-' जइ पुण ' इत्यादि, यदि पुनः सोऽपि अनन्तो भाग आव्रियते तेन तर्हि जीवोऽजीवत्वं प्राप्नुयात् जीवो हि नाम चैतन्यलक्षणः, ततो यदि प्रबलश्रुतावरणस्त्यानर्द्धिनिद्रोदयभावे चैतन्यमात्रमप्यावियते तर्हि जीवस्य स्वस्वभावपरित्यागादजीवतैव सम्पनीपद्यते न चैतद्दृष्टामिष्टं वा, सर्वस्य सर्वथा स्वभावातिरस्कारात् । अत्रैव दृष्टान्तमाह-' सुट्ठुवि ' इत्यादि सुष्ठ्वपि मेघसमुदये भवति प्रभा चन्द्रसूर्ययोः, इयमत्र

भावना-यथा निविडनिविडतरमेघपटलैराच्छादितयोरपि सूर्यचन्द्रमसोर्नैकान्तेन तत्प्रभानाशः सम्पद्यते, सर्वस्य सर्वथा स्वभावापनयनस्य कर्त्तुमशक्यत्वात्, एवमनन्तानन्तैरपि ज्ञानावरणपरमाणुभिरेकैकस्यात्मप्रदेशस्यावेष्टितस्यापि नैकान्तेन चैतन्यमात्रस्याप्यभावो भवति। यतो यत्सर्वजघन्यं तन्मतिश्रुतात्मकं, अतः सिद्धोऽक्षरस्यानन्तमो भागो नित्योद्घाटितः, तथा च सति मतिज्ञानस्य श्रुतज्ञानस्य चानादिभावः प्रतिपद्यमानो न विरुध्यते, इति स्थितम्। इति नन्दीसूत्रवृत्तौ १९२ प्रतौ १६१ पत्रे ॥ ३ ॥

ननु महावीरस्येयन्तः श्रावका अभूवंस्तेषु मध्ये केन जिनप्रतिमा कारिता कस्य वा जिनप्रतिमाऽभूत् इत्यादिभिः, तथा इयत्सु श्रावकेषु केनोपधानानि व्यूढानि कुत्र वा शास्त्रे उपधानान्युक्तानि इत्यादिभिश्च, स्वकपोलकल्पितदुर्विकल्पैरनल्पयन्ति संसारं जल्पाकाः, ततस्तन्मतद्वयनिराकरणाय जिनप्रतिमाक्षराणि उपधानाक्षराणि चेकैनैव सूत्रेण लिख्यन्ते-

से किं तं उवासगदसाओ ? उवासगदसासु णं समणोवासगाणं नगराइं उज्जाणइं चेइआइं वणसंडाइं समोसरणाइं रायाणो अम्मापियरो धम्मायरिया धम्मकहाओ इहलोइअपरलोइया इड्ढिविसेसा भोगपरिच्चाया पव्वज्जाओ परियागा सुअपरिग्गहा तवोवहाणाइं सीलव्वयगुणवेरमणपच्चक्खाणपोसहोववासपडिवज्जणया पडिमाओ उवसग्गा संलेहणाओ भत्तपच्चक्खाणाइं पाओवगमणाइं देवलोगगमणाइं सुकुलपच्चायाईओ पुण बोहिलाभा अंतकिरिआओ अ आघविज्जंति। उवासगदसाणं परित्ता वायणा संखिज्जा अणुओगदारा संखिज्जा वेढा संखिज्जा सिलोगा संखिज्जाओ निज्जुत्तीओ संखिज्जाओ संगहणीओ संखिज्जाओ पडिवत्तीओ, से णं अंगट्ठयाए सत्तमे अंगे एगो सुअक्खंधो दस अज्झयणा दस उद्देसणकाला दस समुद्देसणकाला संखिज्जा पयसहस्सा पयग्गेणं संखिज्जा अक्खरा अणंतागमा अणंता पज्जवा परित्ता तसा अणंता थावरा सासयकडनिबद्धनिकाइया जिणपन्नत्ता भावा आघविज्जंति पन्नविज्जंति परुविज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति से एवं आया एवं नाया एवं विन्नाया एवं चरणकरणपरूवणा आघविज्जइ से तं उवासगदसाओ ॥ इति ॥ वृत्तिर्यथा-' से किं तं ' इत्यादि, अथ कास्ता उपासकदशा उपासकाः-श्रावकास्तद्गताणुव्रतादि क्रियाकलापप्रतिबद्धदशाः दश अध्ययनानि उपासकदशाः, तथा चाह सूरिः-' उवासगदसासु णं ' इत्यादि पाठसिद्धं यावन्निगमनम्, नवरं सङ्ख्येयानि पदसहस्राणि पदाग्रेणेति एकादशलक्षाः द्विपञ्चाशच्च सहस्राणि इत्यर्थः, द्वितीयं तु व्याख्यानं प्रागिव भावनीयम्। इति नन्दीसूत्रवृत्तौ १९२ प्रतौ १८२

पत्रे ॥ ४ ॥

इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरीश्वरशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरमध्यभागे नवमस्तरङ्गः ॥ ९ ॥

यदि भूरिभवाभोगभ्रान्तिश्रान्तं भवन्मनः । भगवद्भारतीभक्तिभाजो भवत तद्भुशम् ॥ १ ॥

अथ श्रीअनुयोगद्वारसूत्रवृत्तिविचारा लिख्यन्ते-तत्र च स्थापनाऽक्षराणि लिख्यन्ते-

से किं तं ठवणावस्सयं ? ठवणावस्सयं जन्नं कट्ठकम्मे वा १ चित्तकम्मे वा २ पोत्थकम्मे वा ३ लेप्पकम्मे वा ४ गंथिमे वा ५ वेढिमे वा ६ पूरिमे वा ७ संघाइमे वा ८ अक्खे वा ९ वराडए वा १० एगो वा अणेगो वा सब्भावट्ठवणाए वा असब्भावट्ठवणाए वा आवस्सए त्ति ट्ठवणा ठविज्जइ से तं ठवणावस्सयं । नामट्ठवणाणं को पइविसेसो ? नामं आवकहिअं ठवणा इत्तरिआ वा होज्जा आवकहिआ वा ॥ इति । वृत्तिर्यथा-ईदानीं स्थापनावश्यकनिरूपणार्थमाह-' से किं तं ' इत्यादि. अथ किं तत्स्थापनावश्यकं ? इति प्रश्ने सत्याह-' ठवणावस्सयं जण्णं ' इत्यादि, तत्र स्थाप्यते-अमुकोऽयमभिप्रायेण क्रियते निर्वर्त्यत इति स्थापना-काष्ठकर्मादिगतावश्यकवत् साध्वादिरूपा सा चासौ आवश्यकतद्वतोरभेदोपचारादावश्यकं च स्थापनावश्यकम् स्थापनालक्षणं च सामान्यत इदम् " यत्तु तदर्थवियुक्तं, तदभिप्रायेण यच्च तत्करणि, लेप्यादिकर्म तत्स्थापनेति क्रियतेऽल्पकालं च ॥ १ ॥ " इति, विनेयानुग्रहार्थमत्रापि व्याख्या-तुशब्दो नामलक्षणात्स्थापनालक्षणस्य भेदसूचकः स चासावर्थश्च तदर्थो भावेन्द्रभावावश्यकादिलक्षणः तेन वियुक्तं-रहितं यद्वस्तु तदभिप्रायेण क्रियते-स्थाप्यते तत्स्थापनेति सम्बन्धः । किंविशिष्टं यदित्याह-यच्च तत्करणि तेन भावेन्द्रादिना सह करणिः-सादृश्यं यस्य तत्तत्करणि-तत्सदृशमित्यर्थः, चशब्दात्तदकरणि चाक्षादिवस्तु गृह्यते, अतत्सदृशमित्यर्थः, किं पुनस्तदेवंभूतं वस्तु इत्याह-लेप्यादिकर्मेति-लेप्यादिपुत्तलि-कादीत्यर्थः, आदिशब्दात् काष्ठपुत्तलिकादि वस्तु गृह्यते, अक्षादि वानाकारं, कियतं कालं तत्क्रियते इत्याह-अल्पः कालो यस्य तदल्प-कालं-इत्वरकालमित्यर्थः, चशब्दाद्यावत्कथिकं च शाश्वतप्रतिमादि, यत्पुनर्भावेन्द्राद्यर्थरहितं साकारमनाकारं वा तदर्थाभिप्रायेण क्रियते तत्स्थापना, इति तात्पर्यमित्यार्यार्थः ॥ १ ॥ इदानीं प्रकृतमुच्यते-' जण्णं ' इति, णमिति वाक्यालङ्कारे, यत्काष्ठकर्मणि वा चित्रकर्मणि

वा यावद्वराटके वा एको वा अनेको वा सद्भावस्थापनया वा असद्भावस्थापनया वा ' आवस्सए ' त्ति आवश्यकतद्वतोरभेदोपचारात्तद्वानिह गृह्यते, ततश्चैको वा अनेको वा, कथम्भूताः ? अत उच्यते-आवश्यकक्रियावानावश्यकाक्रियावन्तो वा ' ठवणा ठविज्जइ ' त्ति स्थापनारूपं स्थाप्यते-क्रियते तत्स्थापनावश्यकमित्यादिपदेन सम्बन्धः, इति समुदायार्थः, काष्ठकर्मादिष्वावश्यकक्रियां कुर्वन्तो यत् स्थापनारूपाः साध्वादयः स्थाप्यन्ते तत्स्थापनावश्यकमिति तात्पर्यम् । अधुनाऽवयवार्थ उच्यते-तत्र क्रियत इति कर्म काष्ठे कर्म काष्ठकर्म काष्ठनिकुट्टितं रूपकमित्यर्थः, चित्रकर्म-चित्रलिखितं रूपकम्, ' पोत्थकम्मे व ' त्ति पोत्थं-पोतं वस्त्रमित्यर्थः, तत्र कर्म-तत्पल्लवनिष्पन्नं धीउल्लिकारूपकमित्यर्थः, अथवा पोत्थं-पुस्तकं तच्चेह सम्पुटकरूपं गृह्यते, तत्र कर्म तन्मध्ये वर्तिकालिखितं रूपकमित्यर्थः, अथवा पोत्थं-ताडपत्रादि तत्र कर्म-तच्छेदननिष्पन्नं रूपकम्, लेप्यकर्म–लेप्यरूपकम्, ग्रन्थिमं-कौशलातिशयाद्ग्रन्थिसमुदायनिष्पादितरूपकम्, वेष्टिमं-पुष्पवेष्टनक्रमेण निष्पन्नमानन्दपुरादिप्रतीतरूपम्, अथवा एकं द्व्यादीनि वा वस्त्राणि वेष्टयन कश्चिद्रूपकमुत्थापयति तद्वेष्टिमम्, पूरिमं-भरिमं पित्तलादिमयप्रतिमावत्, सङ्घातिमं-बहुवस्त्रादिखण्डसङ्घातनिष्पन्नं कञ्चुकवत्, अक्षः-चन्दनको, वराटकः-कपर्दकः, अत्र वाचनान्तरेऽन्यान्यपि दन्तकर्मादिपदानि दृश्यन्ते तान्यप्युक्तानुसारतो भावनीयानि, वाशब्दाः, पक्षान्तरसूचकाः, यथासम्भवमेवमन्यत्रापि एतेषु काष्ठकर्मादिष्वावश्यकक्रियां कुर्वन्त एकादिसाध्वादयः सद्भावस्थापनयाऽसद्भावस्थापनया वा स्थाप्यमानाः स्थापनावश्यकम्, तत्र काष्ठकर्मादिष्वाकारवती सद्भावस्थापना साध्वाकारस्य तत्र सद्भावात्, अक्षादिषु त्वनाकारवती असद्भावस्थापना साध्वाद्याकारस्य तत्रासद्भावादिति, निगमयन्नाह-' सेतं ' इत्यादि, तदेतत्स्थापनावश्यकमित्यर्थः । अत्र नामस्थापनयोरभेदं पश्यन्निदमाह-' नामट्ठवणाणं को पइविसेसो ' त्ति, नामस्थापनयोः कः प्रतिविशेषो ? न कश्चिदित्यभिप्रायः, तथाह्यावश्यकादिभावार्थशून्ये गोपालदारकादौ द्रव्यमात्रे यथावश्यकादि नाम क्रियते, तत्स्थापनापि तथैव तच्छून्ये काष्ठकर्मादौ द्रव्यमात्रे क्रियते, अतो भावशून्ये द्रव्यमात्रे क्रियमाणत्वविशेषान्नानयोः कश्चिद्विशेषः, अत्रोत्तरमाह-' नामं आवकहियं ' इत्यादि, नाम यावत्कथिकं-स्वाश्रयद्रव्यस्यास्तित्वकथां यावदनुवर्त्तते, न पुनरन्तराप्युपरमते, स्थापना पुनरित्वारा-स्वल्पकालभाविनी वा स्यात् यावत्कथिका वा स्वाश्रयद्रव्येऽवतिष्ठमानेऽपि काचिदन्तराऽपि निवर्त्तते, काचित्तु तत्सत्तां यावदवतिष्ठते इति भावः, तथाहि-नाम आवश्यकादिकं मेरुजम्बूद्वीपकलिङ्गमगधसुराष्ट्रादिकं वा यावत्स्वाश्रयो गोपालदारकदेहादिः शिलासमुच्चयादिर्वा समस्ति तावदवतिष्ठते

इति तद्यावत्कथिकम्, स्थापना त्वावश्यकत्वेन योऽक्षः स्थापितः स क्षणान्तरे पुनरपि तथाविधप्रयोजनसम्भवे इन्द्रत्वेन स्थाप्यते पुनरपि च राजादित्वेनेत्यल्पकालीना, शाश्वतप्रतिमादिरूपा यावत्कथिका, तस्याश्चार्हदादिरूपेण सर्वदा तिष्ठतीति स्थापना इति व्युत्पत्तेः स्थापनात्वमवसेयम्, न तु स्थाप्यत इति स्थापना, शाश्वतत्वेन केनापि स्थाप्यमानत्वाभावादिति, तस्माद्भावशून्यद्रव्याधारसाम्येऽप्यस्त्यनयोः कालकृतो विशेषः । अत्राह-ननु यथा स्थापना काचिदल्पकालीना तथा नामापि किञ्चिदल्पकालीनमेव, गोपालदारकादौ विद्यमानेऽपि कदाचिदनेकनामपरावृत्तिदर्शनात्सत्यं, किन्तु प्रायो नाम यावत्कथिकमेव, यस्तु क्वचिदन्यथोपलम्भः सोऽल्पत्वान्नेह विवक्षित इत्यदोषः, उपलक्षणमात्रं चेदं कालभेदेनैतयोर्भेदकथनं, अपरस्यापि बहुप्रकारभेदस्य सम्भवात्, तथाहि-यथेन्द्रादिप्रतिमास्थापनायां कुण्डलाङ्गदादिभूषितः सन्निहितशचीवज्रादिराकार उपलभ्यते न तथा नामेन्द्रादौ, एवं यथा तत्स्थापनादर्शनाद्भावः समुल्लसति नैवमिन्द्रादिनामश्रवणात्, यथा तत्स्थापनायां लोकस्योपयाचितेच्छापूजाप्रवृत्तिसमीहितलाभादयो दृश्यन्ते नैवं नामेन्द्रादाविति, एवमन्यदपि वाच्यम् । इत्यनुयोगद्वारसूत्रहैमवृत्तौ १४८ प्रतौ ११ । १२ पत्रे ॥ १ ॥

केचिच्च श्रावकश्राविकाणां मुखवस्त्रिकां निषेधयन्ति, अपरे च रजोहरणं भूमिप्रमार्जनमिति कृत्वा मुखाग्रे न स्थापनीयं किन्तु भूम्यामेव स्थापनीयम्, इत्यादि स्वस्वान्तःकल्पनाकवलितशुद्धधिषणाः स्वात्मनां परेषां मुग्धबुद्धीनां चानन्तभवभ्रान्तिहेतवो भवन्ति, ततस्तदुपकाराय रजोहरममुखवस्त्रिकादीनां सत्तासूचकाक्षराणि तेषां यथोचितव्यापारणाक्षराणि च लिख्यन्ते-

से किं तं लोउत्तरियं भावावस्सयं जण्णं समणो वा समणी वा सावओ वा साविया वा तच्चित्ते तम्मणे तल्लेसे तदज्झवसिए तत्तिव्वज्झवसाए तदट्ठोवउत्ते तदप्पियकरणे तब्भावणाभाविए अन्नत्थ कत्थइ मणं अकुव्वमाणे (उव्वत्ते जिणवयणधम्माणुरागरत्तमणे) उभओ कालं आवस्सयं करेइ सेतं लोगुत्तरियं भावावस्सयं, सेतं नोआगमओ भावावस्सयं ॥ इति । वृत्तिर्यथा-' से किं तं लोउत्तरियं ' इत्यादि, अत्र निर्वचनम्-' लोउत्तरियं भावावस्सयं जण्णं ' इत्यादि, ' जण्णं ' ति णमिति वाक्यालङ्कारे, यदिदं श्रमणादयस्तच्चित्तादिविशेषणविशिष्टा उभयकालं प्रतिक्रमणाद्यावश्यकं कुर्वन्ति तल्लोकोत्तरिकं भावावश्यकमिति सण्टङ्कः, तत्र श्राम्यतीति श्रमणः-साधुः, श्रमणी-साध्वी, शृणोति साधुसमीपे जिनप्रणीतां सामाचारीमिति श्रावकः-श्रमणोपासकः, श्राविकाःश्रमणोपासिका,

वाशब्दाः समुच्चयार्था, तस्मिन्नेवावश्यके चित्तं-सामान्योपयोगरूपं यस्येति स तच्चित्तः, तस्मिन्नेव मनो-विशेषोपयोगरूपं यस्य स तन्मनाः, तत्रैव लेश्या-शुभपरिणामरूपा यस्येति त तल्लेश्यः, तथा तदध्यवसितः-इहाध्यवसायोऽध्यवसितम्, ततश्च तच्चित्तादिभावयुक्तस्य सतस्तस्मिन्नेवावश्यकेऽध्यवसितं क्रियासम्पादनविषयमस्येति तदध्यवसितः, तथा तत्तीव्राध्यवसायः-तस्मिन्नेवावश्यके तीव्रं-प्रारम्भकालादारभ्य प्रतिक्षणं प्रकर्षयायि प्रयत्नविशेषलक्षणमध्यवसानं यस्य सः तथा, तथा तदर्थोपयुक्तस्तस्य-आवश्यकस्यार्थस्तदर्थस्तस्मिन्नुपयुक्तस्तदर्थोपयुक्तः प्रशस्ततरसंवेगविशुद्ध्यमानस्तस्मिन्नेव प्रतिसूत्रं प्रतिक्रियं चार्थेषुपयुक्त इत्यर्थः, तथा तदर्पितकरणः, करणानि-तत्साधकतमानि देहरजोहरणमुखवस्त्रिकादीनि तस्मिन्-आवश्यके यथोचितव्यापारनियोगेनार्पितानि नियुक्तानि येन स तथा, सम्यक् यथास्थानन्यस्तोपकरण इत्यर्थः, तथा तद्भावनाभावितस्तस्य-आवश्यकस्य भावना-अव्यवच्छिन्न-पूर्वपूर्वतरसंस्कारस्य पुनः पुनस्तदनुष्ठानरूपा तया भावितोऽङ्गतद्भिभावेन परिणतावश्यकानुष्ठानपरिणामस्तद्भावनाभावितः, तदेवं यथोक्तप्रकारेण प्रस्तुतव्यतिरेकतोऽन्यत्र कुत्रापि मनोऽकुर्वन्नुपलक्षणत्वाद्वाचं कायं चान्यत्राकुर्वन्, एकार्थिकानि वा विशेषणान्येतानि प्रस्तुतोपयोगप्रकर्षप्रतिपादनपराणि, अमूनि च लिङ्गविपरिणामतः श्रमणीश्राविकयोरपि योज्यानि, तस्मात्तच्चित्तादिविशेषणविशिष्टाः श्रमणादय उभयकालं-उभयसन्ध्यं यदावश्यकं कुर्वन्ति तल्लोकोत्तरिकं भावमाश्रित्य भावश्चासावावश्यकं चेति वा भावावश्यकम्, अत्राप्यवश्यं करणादावश्यकत्वम्, तदुपयोगपरिणामस्य च सद्भावाद्भावत्वम्, मुखवस्त्रिकाप्रत्युपेक्षणरजोहरणव्यापारादिक्रियालक्षणदेशस्यानागमत्वान्नोआगमत्वं भावनीयम् । ' सेतं ' इत्यादि निगमनम् । तदेवं स्वरूपत उक्तं भावावश्यकम् । इत्यनुयोगद्वारसूत्रहैमवृत्तौ १४८ प्रतौ २४ पत्रे ॥ २ ॥

अथ प्रमाणाङ्गुलस्वरूपं जिज्ञासया लिख्यते -

से किं तं पमाणंगुले ? पमाणंगुले एगमेगस्स रन्नो चाउरंतचक्कवट्टिस्स अट्ठसोवन्निए कागिणिरयणे छत्तले दुवालसंसिए अट्ठकन्निए अहिगरणसंठाणसंठिए तस्स णं एगमेगा कोडी उस्सेहंगुलविक्खंभा तं समणस्स भगवओ महावीरस्स अद्धंगुलं तं सहस्सगुणियं पमाणंगुलं भवइ एएणंगुलप्पमाणेणं ॥ इति । वृत्तिर्यथा-उक्तमुत्सेधाङ्गुलम्, अथ प्रमाणाङ्गुलं विवक्षुराह ' से किं तं पमाणंगुले ' इत्यादि, सहस्रगुणितादुत्सेधाङ्गुलप्रमाणाज्जातं प्रमाणाङ्गुलम्, अथवा परमप्रकर्षरूपं प्रमाणं प्राप्तमङ्गुलं प्रमाणाङ्गुलम्, नातः परं बृहत्तरमङ्गुलमस्तीति

भावः, यदिवा समस्तलोकव्यवहारराज्यादिस्थितिप्रणेतृत्वेन प्रमाणभूतोऽस्मिन्नवसर्पिणीकाले तावद्युगादिदेवो भरतो वा तस्याङ्गुलं प्रमाणाङ्गुलम्, एतच्च काकिणीरत्नस्वरूपपरिज्ञानेन शिष्यव्युत्पत्तिलक्षणं गुणाधिक्यं पश्यंस्तद्दवारेण निरूपयितुमाह-' एगमेगस्स रण्णो ' इत्यादि, एकैकस्य राज्ञश्चतुरन्तचक्रवर्त्तिनोऽष्टसौवर्णिकं काकिणीरत्नं षट्तलादिधर्मोपेतं प्रज्ञप्तम्, तस्यैकैका कोटिरुत्सेधाङ्गुलविष्कम्भा, तच्छ्रमणस्य भगवतो महावीरस्यार्द्धाङ्गुलं, तत्सहस्रगुणं प्रमाणाङ्गुलं भवतीति समुदायार्थः । तत्रान्यान्यकालोत्पन्नानामपि चक्रिणां काकिणीरत्नतुल्याताप्रतिपादनार्थमेकैकग्रहणम्, निरुपचरितराजशब्दविषयज्ञापनार्थं राजग्रहणम्, दिक्त्रयभेदभिन्नसमुद्रत्रयहिमवत्पर्वतपर्यन्तसीमाचतुष्टयलक्षणा ये चत्वारोऽन्तास्तांश्चतुरोऽपि चक्रेण वर्त्तयति-पालयतीति चतुरन्तचक्रवर्ती तस्य-परिपूर्णषट्खण्डभरतभोक्तुरित्यर्थः, चत्वारि मधुरतृणफलान्येकः श्वेतसर्षपः, षोडश श्वेतसर्षपाः एकं धान्यमाषफलम्, द्वे धान्यमाषफले एका गुञ्जा, पञ्च गुञ्जाः एकः कर्ममाषकः, षोडश कर्ममाषकाः एक सुवर्णः, एतैरष्टभिः काकिणीरत्नं निष्पद्यते । एतानि च मधुरतृणफलादीनि भरतचक्रवर्त्तिकालसम्भवीन्येव गृह्यन्ते, अन्यथा कालभेदेन तद्वैषम्यसम्भवे काकिणीरत्नं सर्वचक्रिणां तुल्यं न स्यात्, तुल्यं चेष्यते तदिति, चत्वारि चतसृष्वपि दिक्षु द्वे ऊर्ध्वाध इत्येवं षट्तलानि यत्र तत्षट्तलम्, अध उपरि पार्श्वतश्च प्रत्येकं चतसृणामस्त्रीणां भावाद्वादशास्त्रयः कोट्यो यत्र तद्वादशास्त्रिकम्, कर्णिकाः-कोणास्तेषां चाध उपरि च प्रत्येकं चतुर्णां सद्भवादष्टकर्णिकम्, अधिकरणिः-सुवर्णकारोपकरणं तत्संस्थानेन संस्थितं-तत्सदृशाकारं समचतुरस्रमिति यावत्प्रज्ञप्तं-प्ररूपितम्, तस्य-काकिणीरत्नस्यैकैका कोटिरुत्सेधाङ्गुलप्रमाणविष्कम्भा द्वादशाप्यस्त्रय एकैकस्य उत्सेधाङ्गुलप्रमाणा भवन्तीत्यर्थः, अस्य समचतुरस्रत्वादायामो विष्कम्भश्च प्रत्येकमुत्सेधाङ्गुलप्रमाण इत्युक्तं भवति, यैव च कोटिरूर्ध्वीकृता आयाम प्रतिपद्यते सैव तिर्यक् व्यवस्थापिता विष्कम्भभाग् भवतीत्यायामविष्कम्भयोरेकतरनिर्णयेऽप्यपरनिश्चयः स्यादेवेति सूत्रे विष्कम्भस्यैव ग्रहणम्, तद्ग्रहणे चायोमोऽपि गृहीत एव, समचतुरस्रत्वात्तस्येति, तदेवं सर्वत उत्सेधाङ्गुलप्रणाममिदं सिद्धम् ॥ यच्चान्यत्र ' चउरंगुलप्पमाणा सुवण्णवरकागिणी नेये ' ति श्रूयते तन्मतान्तरं सम्भाव्यते, निश्चयं तु सर्ववेदिनो विदन्तीति । तदेकैककोटिगतमुत्सेधाङ्गुलं श्रमणस्य भगवतो महावीरस्यार्द्धाङ्गुलम्, कथमिदम् ? उच्यते-श्रीमहावीरस्य सप्तहस्तप्रमाणत्वादेकैकस्य च हस्तस्य चतुर्विंशत्युत्सेधाङ्गुलमानत्वादष्टषष्ठ्यधिकशताङ्गुलमानो भगवानुत्सेधाङ्गुलेन सिद्धो भवति, स एव चात्माङ्गुलेन मतान्तरमाश्रित्य स्वहस्तेन सार्द्धहस्तत्रय-

मानत्वाच्चतुरशीत्यङ्गुलमानो गीयते, अतः सामर्थ्यादेकमुत्सेधाङ्गुलं श्रीमन्महावीरात्माङ्गुलापेक्षयाऽर्द्धाङ्गुलमेव भवति, येषां तु मतेन भगवानात्माङ्गुलेनाष्टोत्तरशताङ्गुलमानः स्वहस्तेन सार्द्धहस्तचतुष्टयमानत्वात्तन्मतेन भगवत एकस्मिन्नात्माङ्गुले एकमुत्सेधाङ्गुलं तस्य पञ्च नवभागा भवन्ति १ ५/९ अष्टषष्ठ्यधिकशतस्याष्टोत्तरशतेन भागापहारे एतावत एव भावात्, यन्मतेन तु भगवान् विंशत्यधिकमङ्गुलशतं स्वहस्तेन पञ्चहस्तमानत्वात्तन्मतेन भगवत एकस्मिन्नात्माङ्गुल एकमुत्सेधाङ्गुलं तस्य च द्वौ पञ्चभागौ भवतः १ २/५ अष्टषष्ठयधिकशतस्य विंशत्यधिकशतेन भागे हृते इयत एव लाभात् । तदेवमिहाद्यमतमपेक्ष्यैकमुत्सेधाङ्गुलं भगवदात्माङ्गुलस्यार्द्धरूपतया प्रोक्तमित्यवसेयमिति । तदुच्छ्रयाङ्गुलं सहस्रगुणितं प्रमाणाङ्गुलं भवति, कथमिदमवसीयते ? उच्यते-भरतश्चक्रवर्त्ती प्रमाणाङ्गुलेनात्माङ्गुलेन च किल विंशतिशतमङ्गुलानां भवति, भरतात्माङ्गुलस्य प्रमाणाङ्गुलस्य चैकरूपत्वात्, उत्सेधाङ्गुलेन तु पञ्चधनुःशतमानत्वात्, प्रतिधनुश्च षण्णवत्यङ्गुलसद्भावादष्टच[४८०००]त्वारिंशत्सहस्राण्यङ्गुलानां सम्पद्यते, अतः सामर्थ्यादेकस्मिन् प्रमाणाङ्गुले चत्वारिंशतान्युत्सेधाङ्गुलानां भवन्ति, विंशत्यधिकशतेनाष्टचत्वारिंशत्सहस्राणां च भागापहारे एतावतो लाभात् । यद्येवमुत्सेधाङ्गुलात्प्रमाणाङ्गुलं चतुःशतगुणमेव स्यात् कथं सहस्रगुणमुक्तम् ? सत्यं, किन्तु प्रमाणाङ्गुलस्यार्द्धतृतीयोत्सेधाङ्गुलरूपं बाहल्यमस्ति, ततो यदा स्वकीयबाहल्येन युक्तं यथावस्तिमेवेदं चिन्त्यते तदोत्सेधाङ्गुलाच्चतुःशतगुणमेव भवति, यदा त्वर्द्धतृतीयोत्सेधाङ्गुललक्षणेन बाहल्येन शतचतुष्टयलक्षणं दैर्ध्यं गुण्यते तदाङ्गुलविष्कम्भा सहस्राङ्गुलदीर्घा प्रमाणाङ्गुलविषया सूचिर्जायते, इदमुक्तं भवति-अर्द्धतृतीयाङ्गुलविष्कम्भे प्रमाणाङ्गुले तिस्रः श्रेणयः कल्प्यन्ते, एका अङ्गुलविष्कम्भा शतचतुष्टयदीर्घा, द्वितीयाऽपि तावन्मानैव, तृतीयाऽपि दैर्ध्येण चतुःशतमानैव विष्कम्भे त्वर्द्धाङ्गुलम्, ततोऽस्यापि दैर्घ्याच्छतद्वयं गृहीत्वा विष्कम्भोऽङ्गुलप्रमाणः सम्पद्यते, तथा च सत्यङ्गुलशतद्वयदीर्घा अङ्गुलविष्कम्भा इयमपि सिद्धा, ततस्तिसृणामपि एतासामुपर्युपरि व्यवस्थापने उत्सेधाङ्गुलतोऽङ्गुलसहस्रदीर्घा अङ्गुलविष्कम्भा प्रमाणाङ्गुलस्य सूचिः सिद्धा भवति, तत इमां सूचिमधिकृत्योत्सेधाङ्गुलात्तत्सहस्रगुणमुक्तं वस्तुतस्तु चतुःशतगुणमेव, अत एव पृथ्वीपर्वतविमानान्यनेनैव चतुःशतगुणेनार्द्धतृतीयाङ्गुललक्षणस्वविष्कम्भान्वितेनानीयन्ते, न तु सहस्रगुणया अङ्गुलविष्कम्भया सूच्येति, शेषं भावितार्थम् । इत्यनुयोगद्वारसूत्रवृत्तौ १४८ प्रतौ ९८ पत्रे ॥ ३ ॥

इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरिशिष्योपाध्याय-

॥१९६७॥

श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे मध्यभागे अनुयोगद्वारविचारनामा दशमस्तरङ्गः ॥ १० ॥

कल्याणवल्लीजलदच्छटायै, प्रध्वस्तनिःशेषतमोघटायै । सुरासुरश्रेणिनिषेवितायै, नमोऽस्तु नित्यं श्रुतदेवतायै ॥ १ ॥

अथानेकशास्त्रान्तर्वर्त्तीनि मतान्तराणि लिख्यन्ते-

" मल्लिस्स णं अरहओ सत्तावन्नं मरणपज्जवनाणीसते होत्था " । इति समवायाङ्गे । ज्ञाताधर्मकथाङ्गे तु-" अट्ठसया मणनाणीणं " ॥ १ ॥ " सोलसदेवीसहस्सा वरनयणहिययदइया " इति प्रश्नव्याकरणे ४ आश्रवे कृष्णस्य षोडश सहस्राः स्त्रीणाम् । ज्ञाताधर्मे तु-" रुप्पिणीपामोक्खाणं बत्तीसाए महिलासाहस्सीणं " ॥ १ ॥ तथा श्री जम्बूद्वीपप्रज्ञप्तिचतुर्दशे पत्रे- " पंचदस कुलगरा पण्णत्ता-सुमती १ पडिसुमती २ सीमंकरे ३ सीमंधरे ४ खेमंकरे ५ खेमंधरे ६ विमलवाहणे ७ चक्खुमं ८ जसमं ९ अभिचंदे १० चंदाभे ११ पसेणई १२ मरुदेवे १३ नाभी १४ उसभे १५ " इति । स्थानाङ्गे च सावचूरिकप्रतौ १८१ पत्रे समवायाङ्गसूत्रे च ४६ पत्रे-" पढमित्थविमलवाहण १, चक्खुम २ जसमं ३ चउत्थमभिचंदे ४ । तत्तो पसेणईए ५, मरुदेवे चेव नाभी य ॥ १ ॥ " इति सप्तैवेति ॥ ३ ॥ तथा " विजयवेजयंतजयंतअपराजियाणं भंते ! देवाणं केवइयं कालं ठिती पण्णत्ता ? गोयमा ! जहन्नेणं बत्तीसं सागरोवमाइं, उक्कोसेणं तेत्तीसं सागरोवमाइं । " इति समवायाङ्गे ३२ समवाये । प्रज्ञापनायां तु चतुर्थे पदे ७५ पत्रे-" विजयवेजयंतजयंतअपराजिएसु णं भंते ! देवाणं केवइयं कालं ठिती पण्णत्ता ? गोयमा ! जहन्नेणं एक्कतीसं सागरोवमाइं उक्कोसेणं तेत्तीसं सागरोवमाइं " इति ॥ ४ ॥ समवायाङ्गसूत्रे ४६ पत्रे कृष्णजीवोऽममस्त्रयोदशस्तीर्थङ्करो भावीत्युक्तम्, अन्तकृत्सूत्रे तु-" इहेव जंबुद्दीवे दीवे भारहे वासे आगमिस्साए उस्सप्पिणीए पुप्फेसु जणवएसु सतदुवारे णगरे बारसमो अममो णाम अरहा भविस्सइ " इति ॥ ५ ॥ तथा ज्ञातानुसारेण द्रौपदी पञ्चमकल्पं गता । तथैव च श्रीहैमनेमिचरित्रे द्वादशे सर्गे -" आकर्ण्य तदुरुशुचो विमलाद्रिमीयुः, पांडोः सुता विदधिरेऽनशनं च तत्र । उत्केवलाः शिवमगुर्द्रुपदात्मजा तु, सा ब्रह्मलोकमगमत्परमर्द्धिधाम ॥ १ ॥ " एवमेव च श्रीशत्रुञ्जयमाहात्म्येऽपि-" पांडवानामनुप्रापुर्मुनिपञ्चशतानि च । सहस्रे द्वे शिवागारं, प्राप्तानन्तचतुष्टयम् ॥ १ ॥ द्रौपदी पञ्चमं कल्पमवाप्यानल्पपुण्यभृत् । अन्ये तु मुनयः केचिच्छिवं स्वर्गं च केचन ॥ २ ॥ " इति । उत्तराध्ययनद्वितीयाध्ययनचतुर्दशसहस्र्यां तु-" दोवई वि रायमईसगासे पव्वज्जं काऊण अच्चुयकप्पं गया " इति

॥ ६ ॥ " पव्वइओ जो माया-सम्मत्तिउ वीरपायमूलंमि । सो अभयकुमारमुणी, पत्तो विजयं वरविमाणं ॥ १ ॥ " इति श्रीऋषिमण्डलसूत्रे । हैमवीरचरित्रे तु द्वादशे सर्गे-" विविधाभिग्रहपूर्वं, पालयित्वा चिरं व्रतम् । मृत्वा सर्वार्थसिद्धेऽभूदभयः प्रवरः सुरः ॥ १ ॥ " इति ॥ ७ ॥ " श्रुत्वा तां देशनां भर्तुः, सम्यक्त्वं श्रेणिकोऽश्रयत् । श्रावकधर्मं त्वभयकुमाराद्याः प्रपेदिरे । ७६ । " इति श्रीहैमवीरचरित्रे ६ सर्गे । इत्यत्र श्रीवीराच्छ्रेणिकेन सम्यक्त्वं प्राप्तमित्युक्तम् विंशोत्तराध्ययन ५८ गाथावचूर्णौ तु " एवं थुणित्ताण स रायसीहो, अणगारसीहं परमाइ भत्तीए । सओरोहो सपरियणो सबंधवो, धम्माणुरत्तो विमलेण चेयसा ॥ ५८ ॥ " विमलेन विगतमिथ्यात्वमलेन चेतसोपलक्षितः, इति । अत्र तु अनाथानगारादिति ॥ ८ ॥ " ओहिनाणसुए बुद्धे, सीससंघसमाउले । गामाणुगामं रीयंते, सावत्थिं नगरिमागए ॥ ३ ॥ " इत्यत्र त्रयोविंशोत्तराध्ययनतृतीयगाथायां केशीगणधरस्त्रिज्ञानी । राजप्रश्न्यां तु " जेणेव सावत्थी णगरी कोट्ठए चेइए केशीकुमारसमणे पंचहिं अणगारसएहिं संपरिवडे चउनाणी । " इत्यादि, अत्र तु चतुर्ज्ञानी ॥ ९ ॥ " चेडयकोणियजुज्झे, चुलसीछन्नवइलक्खमणुयाणं रहमुसलंमि य नेया, महासिलाकंटए चेव ॥ १ ॥ वरुणो सोहम्मंमि य, तम्मित्तो अ मणूसगईए । नवलक्खमच्छउअरे, सेसा पुण तिरियनरएसु ॥ २ ॥ " तथा श्राद्धप्रतिक्रमणवृत्तावपि-नवलक्षा मत्स्यगर्भे उत्पन्नाः । भगवती-सप्तमशतकनवमोद्देशके तु " तत्थ णं दससहस्सा उ एगाए मच्छियाए कुच्छिंसि उववण्णा । " इति ॥ १० ॥ " सत्तसु खित्तजवियणा, अन्नुन्नकया वि पहरणेहि विणा । पहरणकया वि पंचसु, तिसु परमाहम्मियकया वि ॥ १ ॥ " इति संघयणिसूत्रे । हैमत्रिषष्ठिशलाकापुरुषचरिते सप्तमपर्वणि तु " सिंहादिरूपैर्विकृतैस्तत्र शम्बूकरावणौ । लक्ष्मणेन समं क्रुद्धौ, युध्यमानौ ददर्श सः । ४६ ॥ नैवं वो युध्यमानानां, दुःखं भावीति वादिनः परमाधार्मिकाः क्रुद्धा, अग्निकुण्डेषु तान्यधुः ॥ ४७ ॥ दह्यमानास्त्रयोऽप्युच्चैः, रटन्तो गलिताङ्गकाः । ततः कृष्ट्वा तप्ततैलकुम्भ्यां निदधिरे बलात् ॥ ४८ ॥ " अत्र चतुर्थ्यामपि परमाधार्मिककृता पीडोक्तेति ॥ ११ ॥ तथा " सहसारंतियदेवा, नारयनेहेण जंति तइयभुविं निज्जंति अच्चुयंता, अच्चुयदेवेण इयरसुरा ॥ १ ॥ " इति पञ्चसङ्ग्रहे । हैमवीरचरित्रदशमसर्गे तु " एवमाकर्ण्य सीतेन्द्रो, रामचन्द्रं प्रणम्य च । ययौ प्राक् स्नेहवशतो, दुःखभाग् यत्र लक्ष्मणः ॥ १ ॥ " ॥ १२ ॥ " सोलसरोगायंका, सहिया स(अ)ह चक्किणा चउत्थेण । वाससहस्सा सत्त उ, सामन्नधुरं उवगएणं ॥ १०९ ॥ " इति मरणसमाधिप्रकीर्णके ।

॥१६९॥

ऋषिमण्डलसूत्रे तु " कंडू १ अभत्तसद्धा २, तिव्वा वियणा उ अच्छि ३ कुच्छीसु ४ । कासं ५ सासं च ६ जरं ७ अहियासइ सत्त वाससए ॥ १ ॥ " ॥ १३॥ भगवतीप्रान्ते " चुलसीति सयसहस्सा, पदाणं पवरणाणदंसीहिं । भावाभावमणंता, पण्णत्ता एत्थ पंचमंगंमि " । नन्दीसूत्रे तु-" विवाहपन्नत्तीए दोलक्खा अट्ठासीइ पयसहस्साइं पयग्गेणं संखेज्जा अक्खरा " । समवायाङ्गे तु " विवाहपन्नत्तीए चउरासीपयसहस्सा पयग्गेणं पण्णत्ता " इति ॥ १४ ॥ " नवमो आणयइंदो, दसमो उण पाणयत्थदेविंदो । आरण इक्कारसमो, बारसमो अच्चुए इंदो ॥ ६३ ॥ एए बारस इंदा, कप्पवई कप्पसामिया भणिया । आणाईसरियत्तं, तेण परं णत्थि देवाणं ॥ ६४ ॥ " इति देवेन्द्रस्तवे द्वादशेन्द्राः प्रोक्ताः । १५ ॥ " इच्चेइयाइं भंते ! चत्तारि भासज्जायाइं आउत्तं भासमाणे किं आराहए विराइए ? गोयमा ! इच्चेइयाइं चत्तारि भासज्जायाइं आउत्तं भासमाणे आराहए णो विराहए । " प्रज्ञापना १२ पदे सावचूरौ २६७ पत्रे । श्रीदशवैकालिके ७ अध्ययने तु " चउन्नं खलु भासाणं, परिसंखाय पन्नवं । दोण्हं तु विणयं सिक्खे, दो न भासिज्ज सव्वसो ॥ १ ॥ " इति ॥ १६ ॥ तह उस्सगोज्जाया, बारस वीसा समंगलगचत्ता[४०] । संबुद्धखामणं तिअ, पण सत्त साहूण जहसंखं ॥ ३३ ॥ " इति प्रतिक्रमणविधिसामाचार्याम् । हारिभद्यावश्यकवृत्तौ तु वन्दनकनिर्युक्तिगत ' चत्तारि पडिक्कमणे ' इति । गाथाव्याख्यायां सम्बुद्धक्षामणाविषये " जहण्णेण वि तिन्नि देवसिए पक्खिए पंच अवस्सं । चाउम्मासिए संवच्छरिए वि सत्त अवस्सं " पाक्षिकसूत्रवृत्तौ प्रवचनसारोद्धारवृत्त्युक्तवृद्धसामाचार्यामप्येवमेवोक्तमिति ॥ १७ ॥ " समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेंति वंदंति नमंसंति २ त्ता एवं वयासी-एस णं देवाणुप्पिया मेहे कुमारे अम्हं एगे पुत्ते इट्ठे कंते " । इति वृत्तिर्यथा-' एगे पुत्ते ' इति धारिण्यपेक्षया, श्रेणिकस्य बहुपुत्रत्वात् । इति ज्ञाताप्रथमाध्ययने सावचूरौ ।४५ पत्रे । अनुत्तरोपपातिकसूत्रे तु " ता एवं खलु जंबू ! " समणेणं जाव संपत्तेणं अणुत्तरोववातियदसाणं पढमस्य वग्गस्स पढमज्झयणस्स अयमट्ठे पण्णत्ते एवं सेसाण वि अट्ठण्हं भाणियव्वं । नवरं छ धारिणी सुता वेहल्लो वेहायसो " । इति ॥ १८ ॥ " असोगतरुपायवस्स अहे पासस्स केवलनाणं उप्पण्णं " । उत्तराध्ययन २३ अध्ययने चतुर्दशसहस्त्रीवृत्तौ २८८ पत्रे । कल्पसूत्रपार्श्वचरित्रयोस्तु " धायइ पायवस्स अहे उप्पण्णं केवलं णाणं " ॥ १९ ॥ ज्ञातायं मल्लिनाथस्य विंशतिशतानि अवधिज्ञानिनाम् समवायाङ्गे तु एकोनषष्ठिशतानि अवधिज्ञानिनामिति ॥ २० ॥ तथा ज्ञातायां अष्टशतानि

॥१७०॥

मनःपर्यवज्ञानिनाम् समवायाङ्गे तु सप्तपञ्चाशच्छतानि ॥ २१ ॥ तथा कल्पसूत्रे वीरस्यायुर्द्धासप्ततिवर्षाणि । समवायाङ्गे तु वीरस्यायुर्द्धासप्ततिवर्षाणि साधिकानीति ॥ २२ ॥ तथा " सम्बोध्यैवं ददौ प्रज्ञप्तिप्रमुखां तयोः । अष्टचत्वारिंशद्विद्यासहस्त्रीं पाठसिद्धिदाम् ॥ १७० ॥ इति श्रीहैमऋषभचरित्रे तृतीयसर्गे । आवश्यकनिर्युक्तिहारिभद्रीवृत्तावपि " नमिविनमीणं जायण, नागिंदो विज्जदाण वेयड्ढे । उत्तरदाहिणसेठी " । अक्षरगमनिका-नमिविनमिनोर्याचना नागेन्द्रो भगवद्वन्दनायायातस्तेन विद्यादानमनुष्ठितं वैताढ्यपर्वते उत्तरश्रेणिदक्षिणश्रेण्योर्यथायोगं षष्ठिपञ्चाशन्नगराणि निविष्ठानिती गाथाऽक्षरार्थः । भावार्थः-कथानकादवसेयः । तच्चेदम्-" अण्णया धरणो णागराया भगवंतं वंदिउमागओ, इमेहि य विण्णवियं तओ सो ते तहा जायमाणे भणति भगवं चत्तसंगो ण एयस्स अत्थि किंचि दायव्वं, मा एयं जाएह, अहं तुब्भं भगवओ भत्तीए देमि, सामिसेवा अफला मा भवउ त्ति काउं पढियसिद्धाणं गंधव्वपण्णगाणं अडयालीसं विज्जासहस्साइं गिन्हह, ताण इमाओ चत्तारि महाविज्जाओ तंजहा-गोरी १ गंधारी २ रोहिणी ३ पण्णत्ती । आवश्यकचूर्णावपि-" अडयालीसं विज्जासहस्साइं देमि । " अष्टचत्वारिंशद्वद्या सहस्राणि तयोरदात् । उपदेशमालाकर्णिकायामपि-" प्रज्ञप्तिमुख्याः प्रीतेन, फणीन्द्रेरण तयोर्ददे । पाठसंसिद्धविद्याष्टचत्वारिंशत्सहस्त्र्यथ ॥ १ ॥ " उपदेशसित्तरीवृत्तौ तु त्रयोदशोपदेशे-" अवादीद्धरणो नाहं, पथिकः किं तु नागराट् । राज्यादिदाता याचेथां, तद्युवां यद्विलोक्यते ॥ २० ॥ त्रैलोक्यं यच्छसि त्वं चेन्न कार्यं तदपि त्वया । यदि दास्यति तद्दाता, स्वाम्येव खलु नापरः ॥ २१ ॥ भक्तिस्थैर्यमिति ज्ञात्वाऽवातरत्स्वामिनो मुखे । तुष्टो भवद्भयोमेषोऽहं, साम्राज्यं गृह्यतामिदम् ॥ २२ ॥ इति प्रोच्य स वैताढ्याधिपत्यं प्रददे तयोः । अष्टघ्नषट्सहस्राणि, प्रौढविद्याश्च विश्रुताः ॥ २३ ॥ " वृद्धशत्रुञ्जयमाहात्म्यतृतीयसर्गे तु-" सेवावहे न भरतं, प्रतिज्ञायेति तौ ततः । असेवितां विभुं पार्श्वद्वये कृष्टासिधारिणो ॥ ५८० ॥ पातालविभुरन्येद्युर्धरणेन्द्रः परीक्षणात् । अत्यन्तं तातपादेषु, तावज्ञासीत्सुभक्तिकौ ॥ ५८१ ॥ विद्याः षोडशसहस्राण्यदाद्वैताढ्यपर्वते । दक्षिणोत्तरश्रेण्याश्च, राज्यं ताभ्यां मुदा सह ॥ ५८२ ॥ " अत्र केचिद्विद्यानामष्टचत्वारिंशत्सहस्राणि, केचित् षोडश सहस्राणि, केचिद्धरणेन्द्रेण स्वयं विद्याः प्रदत्ताः, केचिच्च भगवन्मुखेऽवतीर्येति मतद्वयमवसेयम् ॥ २३ ॥ २४ ॥ हरिभद्रसूरिकृतदशवैकालिकवृत्तौ हैमचरित्रे नवपदप्रकरणवृत्तौ च चक्रिणः सप्तम्यामेव गच्छन्तीत्युक्तम् । भगवतीद्वादशशतकनवमोद्देशकाभिप्रायेण तु सप्तस्वपि नरकेषु गच्छन्तीति ॥ २५ ॥ तथा पद्मचरित्रे सीता

।।१७७।।

जनकराजपुत्री गीयते ॥ वसुदेवहिंडि १ खंडे तु मन्दोदरीरावणयोः ॥ २६ ॥ हेमाचार्यकृतनेमिचरित्रशत्रुञ्जयमाहात्म्यशीलतरङ्गिण्यादिग्रन्थेषु द्रौपद्याः सुकुमालिकाभवे अष्टमासिकी संलेखना सौधर्मदेवलोकगमनं च । ज्ञातायां तु अर्द्धमासिकी संलेखना ईशानदेवलोकगमनं च ॥ २७ ॥ कल्पे वीरस्य दीक्षापर्यायः ४२ वर्षाणि । समवायाङ्गे तु साधिकानि ॥ २८ ॥ तथा " तावदावसथद्वारे, राजसूनोरुपायने । केनचिच्चक्रिरे कुम्भाः, नवेक्षुरससम्भृताः ॥ २६१ ॥ श्रेयांसो जातिस्मरणाद्भिक्षादोषोज्झितं रसम् । मत्वा कल्प्यममुं स्वामिन् !, गृहाणेत्यभ्यधात् प्रभुम् ॥ २६२ ॥ प्रभुणाऽप्यञ्जलीकृत्य, पाणिपात्रे पुरोधृते । स रसं कलशश्रेण्याश्चिक्षेपेक्षुसमुद्भवम् ॥ २६३ ॥ " इत्यमरकविकृतपद्मानन्दकाव्ये त्रयोदशे सर्गे । हैमऋषभचरित्रेऽपि-" अत्रान्तरे कुमारस्य, प्राभृते केनचिन्मुदा । नवेक्षुरससम्पूर्णाः, ठौकयाञ्चक्रिरे घटाः ॥ ९० ॥ ततो विज्ञातनिर्दोषभिक्षादानविधिः स तु गृह्यतां कल्पनीयोऽयं, रस इत्यवदद्विभुम् ॥ ९१ ॥ प्रभुणाऽप्यञ्जलीकृत्य, पाणिपात्रमधारयन् । उत्क्षिप्योत्क्षिप्य सोऽपीक्षुरसकुम्भानलोठयत् ॥ ९२ ॥ " आवश्यकचूर्णौ तु-" सयं चेव खोयरसघडगं गहाय दव्वसुद्धेणं दायगसुद्धेणं पडिग्गाहसुद्धेणं तिविहेणं तिगरणसुद्धेणं दाणेणं पडिलाभेस्सामि त्ति " ॥ २९ ॥ चत्तारि पंच जोयणसयाइं गन्धो य मणुअलोअस्स । उड्ढं वच्चइ जेणं, न हु देवा तेण आवंति " । इति सङ्ग्रहण्याम् । उपदेशमालाकर्णिकावृत्तौ तु " ऊर्द्ध्वगत्या शतान्यष्टौ, सहस्रमपि कर्हिचित् । मर्त्यानां याति दुर्गन्धस्तेनेहायान्ति नामराः ॥ ४१ ॥ " ॥ ३० ॥ अनन्तनाथस्येह चतुःपञ्चाशद्गणा गणधराश्चोक्ताः । आवश्यके तु पञ्चाशदुक्तास्तदिदं मतान्तरमिति समवायाङ्गवृत्तौ ॥ विमलस्येह षट्पञ्चाशद्गणा गणधराश्चोक्ताः आवश्यके तु सप्तपञ्चाशत्तदिदं मतान्तरमित्यपि समवायाङ्गवृत्तौ ॥ ३१ ॥ " अणुत्तरोववातियदेवा णं भंते ! केवतियं खेत्तं ओहिणा जाणंति ? पासंति ? गोयमा ! संभिण्णलोगनालिं ओहिणा जाणंति पासंति " इति । वृत्तिर्यथा-' संभिण्णलोगनालिं ' इति परिपूर्णचतुर्दशरज्ज्वात्मिकां लोकनाडीम् । इति प्रज्ञापना ३३ पदे सावचूरौ ४८४ पत्रे ॥ सङ्ग्रहण्यां तु " छट्ठिं छग्गेविज्जा, सत्तमियरे अणुत्तरसुराओ । किंचूणलोगनालिं, पासंति अणुत्तरा देवा ॥ १ ॥ " ॥ ३२ ॥ तथा " छव्वरिसो पव्वइओ, निग्गंथो रोइऊण जिणवयणं । सिद्धं विहूअरयमलं, अइमुत्तरिसिं नमंसामि । " इति श्रीऋषिमंडले । अस्यावचूर्णौ तु श्रीवीरान्तिके प्रव्रज्याष्टवार्षिकोऽतिमुक्तकर्षिः शिवं प्राप्तः । लघुवृत्तौ तु चतुर्वर्षवया अपि प्रवया इव व्रतस्वीकारादिति ॥ ३३ ॥ आवश्यकलघुवृत्तौ तिलकाचार्येण चतुर्विंशतिजिनप्रतिमा

॥१७२॥

भरतः स्वयं प्रतिष्ठितवान्, इति प्रतिपादितमस्ति तत्स्वमतिकल्पितमेव, आवश्यकचूर्णौ आवश्यकबृहद्वृत्तौ च तथाऽदर्शनात् । प्रत्युत शत्रुञ्जयमाहात्म्ये षष्ठे सर्गे भरतेन यतिभिः प्रतिष्ठा कारितेति वर्त्तते । यथा-" एवं सिंहनिषद्याख्यं, प्रासादं विधिवन्नृपः । काराप्याथ यतिव्रातैः, प्रत्यतिष्ठपदुत्सवात् ॥ १ ॥ ततः शुचिः श्वेतवासाः, प्रासादान्तर्विवेश सः । कृत्वा नैषेधिकीं चक्री, त्रिः प्रदक्षिणयच्च तम् ॥ २ ॥ " इत्यादि । तथा पञ्चमसर्गेऽपि " ततोऽर्हद्भक्तिभरितो, भरतो गणधारिभिः । तत्रोपहारैर्विविधैः, प्रतिष्ठामप्यचीकरत् ॥ १ ॥ " तथैव च श्रीहैमऋषभचरित्रेऽपि-" इति चैत्यं विनिर्माप्य, प्रतिष्ठाप्य च चक्रभृत् । श्वेतांशुकधरस्तत्राविशन्मेघ इवोडुपः ॥ १ ॥ " ॥ ३४ ॥ " अरिट्ठनेमिस्स अंते धम्मं सोऊण पव्वइओ, गओ य भगवया सद्धिं, धिज्जाइयस्स अपत्तिरां जायं, कालेण पुण भगवया सद्धिं बारवइमागओ, मसाणे य पडिमं ठिओ, दिट्ठो य धिज्जाइएण, ततो कुविएण कुडयंगे, मत्थए दाउण अंगाराण से भरिओ तस्स य सम्मं अहियासेमाणस्स केवलं समुप्पण्णं " इति आवश्यकबृहद्वृत्तौ १०७ पत्रे । ऋषिमण्डलपञ्चत्रिंशत्तमगाथायां तु " वंदामि नेमिसीसं, वयदिणगहिएगराइवरपडिमं । सोमिलकयउवसग्गं, गयसुकुमालं सिवं पत्तं ॥ ३५ ॥ " " तद्भावमतिविशुद्धं, ज्ञात्वा श्रीधर्मघोषसूरीन्द्राः । सम्प्राप्तास्तस्य पटा-वासे चरणाचरणचतुराः ॥ ९ ॥ स च तेषां घृतममितं, निःशेषैर्दूषणैः परित्यक्तम् । प्रतिलाभयति प्रमदोत्पन्नसमग्राङ्गरोमाञ्चः ॥ १० ॥ " इति श्रीऋषिमण्डलाष्टादशसहस्र्यां वृत्तौ प्रथमगाथायाम् । हैमऋषभचरित्रे तु " अस्यानुपदमेवाथ, साधुद्वितयमागमत् । तदर्हं चान्नपानादि, दैवादैक्षन्न किञ्चन ॥ ३३ ॥ इतस्ततोऽन्वेषयंश्च, सार्थवाहः स्वयं ततः । ईक्षाञ्चक्रे घृतं स्त्यानं, निजाशयमिवामलम् ॥ ३४ ॥ " इति ॥ ३६ ॥ तथा वसुदेवहिण्डौ पुष्पमालावृत्तौ च वसुदेवपूर्वभवे चारित्रपर्यायः ५५००० वर्षाणि । हैमनेमिचरित्रे तु १२००० वर्णाणि ॥ ३७ ॥ तथा वसुदेवहिण्डौ वसुदेवपूर्वभवमातुलस्य कन्यात्रयम् । हैमनेमिचरित्रे तु कन्यासप्तकमिति ॥ ३८ ॥ नेमिचरित्रे वन्दारुवृत्तौ च द्वारिकायां नेमिनाथे सति चतुर्मासके वन्दनाय नागतः कृष्णः । भवभावनावृत्तौ तु " धम्मत्थं मोत्तूण " इत्याद्यक्षरैर्धर्मार्थं विना नियमो गृहीतोऽस्तीति ॥ ३९ ॥ तथा यदा किल नेमिः प्रव्रजितस्तदा रथनेमिज्येष्ठभ्राता राजीमतीमुपचरति, सा मामिच्छेत् इति, सा भगवती निर्विण्णकामभोगा अन्यदा तदभिप्रायं ज्ञात्वा मधुघृतसंयुता पेया पीता, तस्मिन्नागते तया मदनफलाघ्राणेन वान्ता । उक्तं च-' धिगत्थु ते जसोकामी ' इत्यादि । इति गच्छाचारप्रकीर्णकवृत्तौ । तथैव च तिलकाचार्यकृतदशवैकालिकवृत्तावपि

" गृही चतुर्वर्षशतीं, छद्मस्थो वत्सरं स्थितः । पञ्चवर्षशतीमासीद्रथनेमिस्तु केवली ॥ १८५ ॥ राजीमत्या अपि तथा, कौमारं छद्मवासितम् । केवलित्वं च सर्वोऽपि, पर्यायो रथनेमिवत् ॥ १८६ ॥ नेमेर्वर्षशतेनाग्रे, ययौ राजीमति शिवम् । यद्रक्तो माममुचन्नेमिः, सिद्धिं तां किल वीक्षितुम् ॥ १८७ ॥ माहेन्द्रेऽगाच्छिवा देवी, समुद्रविजयोऽपि च । दशार्हा अपरेऽप्यष्टौ, स्वर्गलक्ष्मीभुजोऽभवत् ॥ १८८ ॥" नेमेस्तु त्रीणि शतानि गृहस्थपर्याय इत्यत्रापि नेमितो रथनेमिज्येष्ठभ्रातैव । नेमिचरित्रे तु-" इतश्च नेमिरनुजो, रथनेमिः स्मरातुरः । जज्ञे राजीमतीं पश्यन्निन्द्रियाणां वशंवदः ॥ २५८ ॥ ४० ॥ तथा असुरादयो यावद्वनस्पतिकायिका अनन्तरमुद्धृतास्तीर्थं न लभन्ते, अन्तःक्रियां पुनःकुर्युः । इति प्रज्ञापना २० पदवृत्तौ । वसुदेवचरिते तु नागकुमारेभ्योऽप्युद्धृतोऽनन्तरमेरवतक्षेत्रेऽस्यामवसर्पिण्यां चतुर्विंशतितमस्तीर्थकर उपदर्शितः, तदत्र तत्त्वं केवलिनो विदन्तीति ॥ ४१ ॥ एवं भूयांसि अन्यान्यपि मतान्तराणि शास्त्रे दृश्यन्ते, तेन धर्मार्थिना कुत्रापि कदाग्रहो न कार्यः । पुरातनैर्महापुरुषैर्बहुश्रुतैर्यदि किमपि नाहत्यनिर्णीतं तर्हि आधुनिकैर्मन्दप्रज्ञैः किमिव निर्णेतुं शक्यम् ?, ततो यदा यो ग्रन्थो वाच्यते तदा तद्ग्रन्थस्थमुच्यते, इति जगद्गुरुश्रीहीरविजयसूरीणामनुशिष्टिरिति ॥

॥इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरिशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे मध्यभागे मतान्तरसमुच्चयनामा आवर्त्तः समाप्तः ॥

मिथ्यात्वविषविसंस्थूलनरनिकरविकारसंदगदङ्कारम् । विधिना श्रीजिनवचनं ध्येयं धीमद्भिरुरुरचनम् ॥ १ ॥

अथ श्रीमूलसूत्रविचारा लिख्यन्ते-तत्र तावदावश्यकविचाराः, तत्र च प्रथमं युक्तिरसिकहृदयप्रमोदाय युक्तिशाली इन्द्रियविषयविचारो लिख्यते-

पुट्ठं सुणेइ सद्दं, रूवं पुण पासई अपुट्ठं तु । गंधं रसं च फासं च बद्धपुट्ठं वियागरे ॥ ६ ॥ वृत्तिर्यथा-ननु व्यञ्जनावग्रहप्ररूपणद्वारेणैव तथा श्रोत्रेन्द्रियादीनां प्राप्ताप्राप्तविषयता प्राक् प्रतिपादिता, ततः किमर्थमेष पुनः प्रयासः इति ? उच्यते- तत्र प्रक्रमे गाथाव्याख्यानद्वारेण प्रतिपादिता, सम्प्रति तु सूत्रतः प्रतिपाद्यत इत्यदोषः, श्रोत्रेन्द्रियं कर्तृ, शब्दं कर्मतापन्नं, शृणोति-गृह्णाति परिच्छिन्नतीति भावः, स्पृष्टं तरौ वायुवदालिङ्गितमात्रम्, किमुक्तं भवति ? शब्दद्रव्याणि सकललोकव्यापीनि सूक्ष्माण्यत एव द्रव्येन्द्रियस्यान्तरपि मनाक् प्रविशन्ति,

तदन्यद्रव्यवासनस्वभावानि च, श्रोत्रेन्द्रियं शेषेन्द्रियगणापेक्षया प्रायः पटुतरं ततः स्पृष्टमात्रमेव शब्दद्रव्यसमूहं गृह्णाति, एतेन यदाहुः सुगतमतानुसारिणः श्रोत्रमप्यप्राप्तकारि, तथा च तद्ग्रन्थः-' चक्षुःश्रोत्रमनोऽप्राप्यकारी 'ति ते प्रतिक्षिप्ता द्रष्टव्याः, तथा हि-अप्राप्यकारि तत्प्रतिपत्तुं शक्यते यस्य विषयकृतानुग्रहोपघाताभावः, यथा चक्षुर्मनसी, श्रोत्रस्य च शब्दकृत उपघातो दृश्यते, सद्योजातबालस्य समीपे महाप्रयत्नताडितझल्लरीझात्कारश्रवणतः, यद्वा विद्युत्प्रपाते तत्प्रत्यासन्नदेशवर्त्तिनां निर्घोषश्रवणतो बधिरीभावदर्शनात् । शब्दपरमाणवो हि उत्पत्तिदेशादारभ्य जलतरङ्गन्यायेन प्रसरमभिगृह्णानाः श्रोत्रेन्द्रियमागच्छन्ति, ततः सम्भवत्युपघातः । ननु यदि श्रोत्रेन्द्रियं प्राप्तमेव शब्दं गृह्णाति नाप्राप्तं तर्हि यथा गन्धादौ गृह्यमाणे न तत्र दूरासन्नादितया भेदप्रतीतिः, एवं शब्देऽपि न स्यात्, प्राप्तो हि विषयः परिच्छिद्यमानः सर्वोऽपि सन्निहित एव, तत्कथं दूरासन्नादिभेदप्रतीतिर्भवतुमर्हति ? । अथ च प्रतीयते शब्दो दूरासन्नादितया, तथा च लोके वक्तारः श्रूयते कस्यापि दूरे शब्द इति । अन्यच्च यदि प्राप्तः शब्दो गृह्यते श्रोत्रेन्द्रियेण तर्हि चाण्डालोक्तोऽपि शब्दः श्रोत्रेन्द्रियसंस्पृष्टो गृह्यते, इति श्रोतस्य चाण्डालस्पर्शदोषः, तन्न श्रेयसी श्रोत्रस्य प्राप्तकारिता, तदेतन्महामोहमलीमसमानसभाषितम् । यतो यद्यपि शब्दः प्राप्तो गृह्यते श्रोत्रेन्द्रियेण तथाऽपि यत उत्थितः शब्दस्तस्य दूरासन्नत्वे शब्देऽपि स्वान्यवैचित्र्यसम्भवाद्दूरासन्नादिभेदप्रतीतिरुल्लसिष्यति, तथा हि-दूरादागतः शब्दः क्षीणशक्तिकत्वात्खिन्न इव लक्ष्यते अस्पष्टरूपो वा, ततो लोके व्यवहारो दूरे शब्दः श्रूयते इति, अस्य वाक्यस्यायं भावार्थः- दूरादागतः शब्दः श्रूयते, स्यादेतदेवमतिप्रसङ्गः प्राप्नोति, तथा हि-एतदपि वक्तुं शक्यते दूरे रूपमुपलभ्यते, किमुक्तं भवति ? दूरादागतं रूपमुपलभ्यते, ततश्चक्षुरपि प्राप्यकारीति प्राप्नोति न चैतदिष्यते तस्मान्न तत्समीचिनमिति तदयुक्तं, यत इह चक्षुषो रूपकृतानुग्रहोपघातौ नोपलभ्यते, श्रोत्रेन्दियस्य तु शब्दकृतोपघात उपलम्भगोचरोऽस्ति, यथोक्तं प्राक्, ततो नातिप्रसङ्गोपादानं युक्तिमत् । अन्यच्च प्रत्यासन्नोऽपि जनः पवनस्य प्रतिकूलमवतिष्ठमानः शब्दं न शृणोति, पवनवर्त्मनि पुनरवतिष्ठमानो दूरदेशस्थितोऽपि शृणोति, तथा च लोके वक्तारो न वयं प्रत्यासन्ना अपि त्वदीयं शब्दं शृणुमः पवनस्य प्रतिकूलमवस्थानात्, यदि पुनरप्राप्तमेव शब्दं रूपमिव जना प्रमिणुयुस्तर्हि पवनस्य प्रतिकूलमप्यवतिष्ठमाना रूपमिव शब्दं यथावस्थितं परिच्छिन्द्युः न च परिच्छिन्दन्ति, तस्मात्प्राप्ता एव शब्दपरमाणवः श्रोत्रेन्द्रियेण परिगृह्यन्ते इत्यवश्यमभ्युपगन्तव्यम्, अन्यथा क्रमग्रहणानुपपत्तेः । तथा हि-यद्यप्राप्ता एव शब्दा गृह्यन्ते तर्हि तेषां योग्यदेशावस्थितानां

॥१७५॥

समीपस्थैर्दूरस्थैश्च ग्रहणमेककालं भवेत् यथा चक्षुषा योग्यदेशावस्थितानां घटपटादीनाम्, क्रमेण च ग्रहणमनुभूयते पूर्वं समीपस्थैरिति। यदपि चोक्तं चाण्डालस्पर्शदोष इति तदपि चेतनाविकलपुरुषभाषितमिवासमीचीनम्, स्पर्शास्पर्शव्यवस्था हि लोककाल्पनिकी, न पारमार्थिकी। तथा हि-यामेव भुवमग्रे चाण्डालः स्पृशन् याति तामेव पृष्ठतः श्रोत्रियोऽपि, तथा यामेव नावमारोहति चाण्डालस्तामेवारोहति श्रोत्रियोऽपि, तथा स एव मारुतश्चाण्डालं स्पृष्ट्वा श्रोत्रियमपि स्पृशति, न च तत्र लोके स्पर्शदोषव्यवस्था, तथा शब्दपुद्गलसंस्पर्शेऽपि न भवतीति न कश्चिद्दोषः। अन्यच्च यदा केतकीदलनिचयं शतपत्रादिपुष्पनिचयं वा शिरसि निबद्ध्य वपुषि वा मृगमदचन्दनाद्यवलेपनमारचय्य विपणिवीथीमागत्य चाण्डालोऽवतिष्ठते तदा तद्गतकेतकीदलादिगन्धपुद्गलाः श्रोत्रियादिनासिकास्वपि प्रविशन्ति, ततस्तत्रापि चाण्डालस्पर्शदोषः प्राप्नोतीति तद्दोषभयान्नासिकेन्द्रियमप्राप्यकारि प्रतिपत्तव्यम्, न चैतद्भवतोऽप्यागमे प्रतिपाद्यते ततो बालिशजल्पितमिति कृतं प्रसङ्गेन। केचित् पुनः श्रोत्रेन्द्रियस्य प्राप्यकारिताभ्युपगच्छन्तः शब्दस्याम्बरगुणत्वं प्रतिपन्नाः तदश्लीलमाकाशगुणतायां शब्दस्यामूर्त्तत्वप्रसक्तेः, यो हि यद्गुणः स तत्समानधर्मा यथा ज्ञानमात्मनः, तथा हि-अमूर्त्त आत्मा ततस्तद्गुणो ज्ञानमप्यमूर्त्तमेव, एवं शब्दोऽपि यद्याकाशगुणस्तर्हि आकाशस्यामूर्त्तत्वाच्छब्दस्यापि तद्गुणत्वेनामूर्त्तता भवेत् न चासौ युक्तिसङ्गता तल्लक्षणायोगात्, मूर्त्तिविरहो ह्यमूर्त्तता, न च शब्दानां मूर्त्तिविरहः स्पर्शवत्त्वात्। तथा हि-स्पर्शवन्तः शब्दास्तत्सम्पर्के उपघातदर्शनाल्लोष्टवत्, न चायमसिद्धो हेतुः, यतो दृश्यते सद्योजातबालकानां कर्णदेशाभ्यर्णगाढास्कालितझल्लरीझात्कारश्रवणतः श्रवणस्फोटः, न चेत्थमुपघातकृत्त्वमस्पर्शवत्वे सम्भवति यथा हि विहायसः, ततो विपक्षे गमनासम्भवान्नैकान्तिकोऽपि, अतश्च स्पर्शवन्तः शब्दाः, तैरभिघाते गिरिगह्वरभित्यादिषु शब्दोत्थानाल्लोष्टवत्, अयमपि हेतुरुभयोरपि सिद्धः। तथा हि श्रूयन्ते तीव्रप्रयत्नोच्चारितशब्दाभिघाते गिरिगह्वरादिषु प्रतिशब्दोः प्रतिदिक्, ततः स्पर्शवत्वान्मूर्त्ता एव शब्दाः, ' रूपस्पर्शादिसन्निवेशो मूर्त्ति ' रिति वचनात्, ततः कथमिवाकाशगुणत्वं शब्दानामुपपत्तिमत्। अपि च तदाकाशमेकमनेकं वा, यद्येकं तर्हि योजनलक्षादपि श्रूयेत् आकाशस्यैकत्वेन शब्दस्य तद्गुणतया दूरासन्नादिभेदाभावात्, अथानेकमेवं सति वदनदेशे एव स विद्यते इति कथं भिन्नदेशवर्त्तिभिः श्रूयते, वदनदेशाकाशगुणतया तस्य श्रोत्रेन्द्रियाकाशसम्बन्धाभावात्। अथ च श्रोत्रेन्द्रियाकाशसम्बद्धतया तच्छ्रवणमभ्युपगम्यते तन्न श्रेयानाकाशगुणत्वाभ्युपगमः। नन्वाकाशगुणत्वमन्तरेण शब्दस्यावस्थानमेव नोपपद्यते, अवश्यं हि पदार्थेन

स्थितिमता भवितव्यं तत्र रूपस्पर्शरसगन्धानां पृथिव्यादिमहाभूतचतुष्टयमाश्रयः शब्दस्य त्वाकाशमिति तदयुक्तम्, एवं सति पृथिव्यादीनामप्याकाशाश्रितत्वेनाकाशगुणत्वप्रसक्तेः। अथ नाश्रयणमात्रं तद्गुणत्वनिबन्धनं किन्तु समवायः, स चास्ति शब्दस्याकाशे न तु पृथिव्यादीनामिति। ननु कोऽयं समवायो नाम एकलोलीभावेनावस्थानम्, यथा पृथिव्यादे रूपादिभिरिति चेत् ? न तर्हि शब्दस्याकाशगुणत्वं, आकाशेन सहास्यैकलोलीभावेनाप्रतिपत्तेः। अथाकाशे उपलभ्यमानत्वात्तद्गुणता शब्दस्य तर्हि तूलकादेरप्याकाशे उपलभ्यमानत्वात्तद्गुणता प्राप्नोति, अथ तूलकादेः परमार्थतः पृथिव्यादिस्थानमाकाशे तूपलम्भो वायुना सञ्चार्यमाणत्वात्, यद्येवं तर्हि शब्दस्यापि परमार्थतः स्थानं श्रोत्रादि, यत्पुनराकाशेऽवस्थानं तद्वायुना सञ्चार्यमाणत्वात्। तथा हि-यतो यतो वायुः सञ्चरति ततस्ततः शब्दोऽपि गच्छति, वातप्रतिकूलं शब्दस्याश्रवणात्। उक्तं च प्रज्ञाकरगुप्तेन-" यथा वा प्रेर्यते तूलमाकाशे मातरिश्वना तथा शब्दोऽपि किं वायोः, प्रतीपः कोऽपि शब्दवितः ॥ " तन्नाकाशगुणः शब्दः, किन्तु पुद्गलमय इति। तथा रूप्यत इति रूपम् तत्रूपं पुनः पश्यति-गृह्णात्युपलभ्यत इति यावत्। अस्पृष्टं-अनालिङ्गितं गन्धादिवन्न सम्बद्धमित्यर्थः। तुशब्द एवकारार्थः स चावधारणे, रूपं पुनः पश्यन्नस्पृष्टमेव, चक्षुषोऽप्राप्यकारित्वात् एतच्च प्रागेव भावितम्। पुनः शब्दो विशेषणार्थः, स चैतद्विशिनष्टि अस्पृष्टमपि योग्यदेशावस्थितं न पुनरयोग्यदेशावस्थितममरलोकादि। गन्ध्यते आघ्रायत इति गन्धस्तम्, ' रस ' आस्वादने, रस्यतेऽनेनेति रसस्तञ्च, स्पृश्यत इति स्परस्तिञ्च, चशब्दो पूरणार्थौ। बद्धस्पृष्टमिति बद्धं-आश्लिष्टं तोयवदात्मप्रदेशैरात्मीकृतमित्यर्थः, स्पृष्टं पूर्ववत्, प्राकृतशैल्या चेत्थमुपन्यासो ' बद्धपुट्ठं ' इति। परमार्थतस्तु स्पृष्टं च तद्बद्धं च स्पृष्टबद्धमिति द्रष्टव्यम्। आह-यद्बद्धं गन्धादि तत्स्पृष्टं भवत्येव, अस्पृष्टस्य सम्बन्धायोगात्, तत्र स्पृष्टशब्दोच्चारणं गतार्थत्वादनर्थमिति नैष दोषः, शास्त्रारम्भस्य सर्वश्रोतृसाधारणत्वात्। त्रिविधा हि श्रोतारः-केचिदुद्घटितज्ञाः केचिन्मध्यबुद्धयः तथाऽन्ये प्रपञ्चितज्ञाः, तत्र प्रपञ्चितानामनुग्रहाय गम्यमानस्याप्यभिधानमदोषायेति। प्रकृतभावार्थस्त्वयम्-गन्धद्रव्याणि स्वल्पानि स्थूलानि तदन्यवासनकानि घ्राणादीनि चेन्द्रियाणि श्रोत्रेन्द्रियापेक्षया अपटूनि, ततो घ्राणेन्द्रियादिगणो गन्धादि आलिङ्गितानन्तरमात्मप्रदेशैरात्मीकृतं गृह्णाति नान्यथेति, एवं व्यागृणीयात् प्रतिपादयेत् प्रज्ञापकः स्वशिष्येभ्यः। एतदेव व्याख्यानं भाष्यकारोऽप्याह-पुट्ठं रेणुं व तणुंमि, बद्धमप्पीकयं पएसेहिं। छिक्काइं चिय गिण्हेइ, सद्दव्वाइ जं ताइं ॥ १ ॥ बहुसुहुमभावगाइं, जं पडुयरं च सोयविन्नाणं। गंधादियदव्वाइं, विवरीयाइं जतो ताइं

॥१७७॥

॥ २ ॥ फरिसाणंतरमत्तप्पएसमीसीकयाइ घिप्पंति । पडुयरविण्णाणाइं, जं च न घाणाइ करणाइं ॥ ३ ॥

नन्विदमुक्तं योग्यदेशावस्थितमेव रूपं पश्यति नायोग्यदेशावस्थितम्, तत्र कियान् चक्षुषो (श्रोत्रादीनां) विषयः ?, कियतो देशादागतं श्रोत्रादि शब्दादिकं गृह्णाति ? उच्यते-श्रोत्रं तावत् शब्दं जघन्यतोऽङ्गुलसङ्ख्येयभागमात्रदेशात् उत्कर्षतस्तु द्वादशभ्यो योजनेभ्यः, चक्षुरिन्द्रियमपि जघन्यतोऽङ्गुलसङ्ख्येयभागावस्थितं पश्यति उत्कर्षतस्तु सातिरेकयोजनशतसहस्रव्यवस्थितम्, घ्राणरसनस्पर्शनानि तु जघन्येनाङ्गुलासङ्ख्येयभागमात्रादेशादागतं गन्धादि गृह्णान्ति उत्कर्षतस्तु नवभ्यो योजनेभ्यः ।

॥१७८॥

नन्वङ्गुलं त्रिधा भवति तद्यथा-आत्माङ्गुलं उच्छ्रयाङ्गुलं प्रमाणाङ्गुलं च । तत्र-जेणं जया मणुसा, तेसिं जं होइ माणरूवं तुं । तं भणियमिहायंगुलमणिययमाणं पुण इमं तु ॥ १ ॥ इत्येवं रूपमात्माङ्गुलम् । परमाणू तसरेणू, रहरेणू अग्गयं च वालस्स । लिक्खा जूया य जवो, अट्ठगुणविवड्ढिया कमसो ॥ २ ॥ इत्यादिरूपसमुच्छ्रयाङ्गुलम् । उस्सेहंगुलमेगं, हवइ पमाणंगुलं सहस्सगुणं । तं चेव दुगुणियं, खलु वीरस्सायंगुलं भणियं ॥ ३ ॥ इत्येवं लक्षणं प्रमाणाङ्गुलम् । तत्रात्माङ्गुलेन प्रमीयते तत्तत्काले वापीकूपादिकं वस्तु, उच्छ्रयाङ्गुलेन नरतिर्यग्देवनैरयिकशरीराणि, प्रमाणाङ्गुलेन नगपृथिवीविमानानि । उक्तं च-"आयंगुलेण वत्थुं, उस्सेहपमाणतो मिणसु देहं । नगपुढविविमाणाइं, मिणसु पमाणंगुलेणं तु ॥ १ ॥ तत्रेदमिन्द्रियविषयपरिमाणं किमात्माङ्गुलेन प्रतिपत्तव्यमाहोस्विदुच्छ्रयाङ्गुलेन ? उच्यते-आत्माङ्गुलेन, तथा चाह-चक्षुरिन्द्रियविषयपरिमाणचिन्तायां भाष्यकृत-अप्पत्तकारि नयणं, मणो य नयणस्स विसयपरिमाणं । आयंगुलेण लक्खं, अइरित्तं जोअणाइं तु ॥ २ ॥ ननु देहप्रमाणमुच्छ्रयाङ्गुलेन देहाश्रितानि चेन्द्रियाणि, ततस्तेषां विषयपरिमाणमप्युच्छ्रयाङ्गुलेन वक्तुमुचितम्, कथमुच्यते आत्माङ्गुलेन ?, नैष दोषः, यद्यपि हि नाम देहाश्रितानीन्द्रियाणि तथाऽपि तेषां विषयपरिमाणमात्माङ्गुलेन देहान्यत्वाद्विषयपरिमामस्य, तथा चामुमेवार्थमाक्षेपपुरस्सरं भाष्यकृदाह-नणु भणियमुस्सयंगुलपमाणतो जीवदेहमाणाइं । देहपमाणं तं चिय, न उ इंदियविसयपरिमाणं ॥ अत्र ' देहपमाणं तं चिय ' इति यत्तत् उच्छ्रयाङ्गुलमेयत्वेनोक्तं तद्देहप्रमाणमात्रमेव, न त्विन्द्रियविषयपरिमाणम्, तस्यात्माङ्गुलप्रमेयत्वात् । अथ यदि विषयपरिमाणमिन्द्रियाणामुच्छ्रयाङ्गुलेन स्यात्ततः को दोष आपद्येत ? उच्यते-पञ्चधनुःशतादिमनुष्याणां विषयव्यवहारव्यवच्छेदः । तथा हि-यद्धरतस्यात्माङ्गुलं तत्किल प्रमाणाङ्गुलम्, तच्च प्रमाणाङ्गुलमुच्छ्रयाङ्गुलसहस्रेण भवति । ' उस्सेहंगुलमेगं, हवइ पमाणंगुलं

॥१७८॥

सहस्सगुणं ' इति वचनात्, ततो भरतसगरादिचक्रवर्त्तिनां या अयोध्यादयो नगर्यो ये च स्कन्धावारा आत्माङ्गुलेन द्वादशयोजनायामतया सिद्धान्ते प्रसिद्धास्ते उच्छ्रयाङ्गुलप्रमित्या अनेकानि योजनसहस्राणि स्युः, तथा च सति तत्रायुधशालादिषु ताडितभेर्यादिशब्दश्रवणं न सर्वेषामापद्येत " बारसहि जोअणेहिं, सोयं अहिगिण्हए सद्दं " इति वचनात्, अथ च समस्तनगरव्यापी समस्तस्कन्धावारव्यापी च विजयढक्कादिशब्द आगमे प्रतिपाद्यते, तत एवमागमे प्रसिद्धः पञ्चधनुःशतादि प्रमाणानां मनुष्याणां विषयव्यवहारो व्यवच्छेदं मा प्रापदित्यात्माङ्गुलेनेन्द्रियविषयपरिमाणमवसातव्यम्, नोच्छ्रयाङ्गुलेन । तथा चाह भाष्यकृत्-जं तेण पंचधणुसयनरादिविसयववहारवोच्छेओ । पावइ सहस्सगुणियं, जेण पमाणंगुलं तत्तो ॥ १ ॥ अत्र तस्मादात्माङ्गुलेनैवेन्द्रियाणां विषयपरिमाणं नोच्छ्रयाङ्गुलेनेति, यदप्युक्तं पाक् देहश्रितानीन्द्रियाणि इति तेषां विषयपरिमाणमुच्छ्रयाङ्गुलेनेति तदप्ययुक्तं, इन्द्रियाणामपि केषाञ्चित्पृथुत्वस्यात्माङ्गुलेन मीयमानत्वाभ्युपगमात्, अन्यथा त्रिगव्यूतादिमनुष्याणां रसाद्यभ्यवहारव्यवच्छेदप्रसक्तेः, तथा हि-त्रिगव्यूतादीनां मनुष्याणां षड्गव्यूतादीनां हस्त्यादीनां च स्वशरीरानुसारितया अतिविशालानि मुखानि जिह्वाश्च, ततो यद्युच्छ्रयाङ्गुलेन तेषां क्षुरप्राकारतयोक्तस्याभ्यन्तरनिवृत्त्यात्मकस्य जिह्वेन्द्रियस्याङ्गुलपृथ-क्त्वलक्षणो विस्तारः परिगृह्यते तदाऽत्यल्पतया न तत्सर्वां जिह्वां व्याप्नुयात्, सर्वव्यापित्वाभावे च योऽसौ बाहुल्येन सर्वात्मनाऽपि जिह्वया रसावेदनलक्षणः प्रतिप्राणिप्रसिद्धो व्यवहारः स व्यवच्छेदं यायात् । एवं घ्राणादिविषयोऽपि यथायोगं गन्धादिव्यवहारव्यवच्छेदो भावनीयः, तस्मादात्माङ्गुलेन जिह्वादीनां पृथुत्वमवसातव्यम्, नोच्छ्रयाङ्गुलेन । आह च भाष्यकृत्-इंदियमाणेवि तयं भयणिज्जं जं तिगाउयाईणं । जिब्भिंदियाइमाणं, संववहारे विरुज्झेज्जा ॥ १ ॥ अस्याक्षरगमनिका-तदुच्छ्रयाङ्गुलमिन्द्रियमानेऽप्यास्तामिन्द्रियविषयपरिमाणचिन्ताया-मित्यपि शब्दार्थः भजनीयं-विकल्पनीयं, क्वापि गृह्यते क्वापि न गृह्यते इत्यर्थः । किमुक्तं भवति ? स्पर्शनेन्द्रियपृथुत्वपरिमाणचिन्तायां ग्राह्यमन्येन्द्रियपृथुत्वपरिमाणचिंतायां तु न ग्राह्यम्, तेषामात्माङ्गुलेन परिमाणकरणादिति । कथमेतदवसेयमिति चेत् ? तत आह-यत् यस्मात्सर्वेषामपीन्द्रियाणामुच्छ्रयाङ्गुलेन परिमाणकरणे त्रिगव्यूतानामादिशब्दाद्विगव्यूतादिपरिग्रहः, जिह्वेन्द्रियादिमानं सूत्रोक्तं संव्यवहारे विरुध्येत । यथा च विरुध्येत तथाऽनन्तरमेव भावितं, तस्मात्सर्वमिन्द्रियविषयपरिमाणमात्माङ्गुलेनैवेति स्थितम् । ननु भवत्वात्माङ्गुलेन विषयपरिमाणं तथाऽप्युक्तस्वरूपं चक्षुरिन्द्रियविषयपरिमाणं न घटते, अधिकस्यापि तद्विषयपरिमाणस्यागमान्तरे प्रतिपादनात् । तथा हि-पुष्करवरार्द्धे मानुषोत्तरपर्वतसमीपे मनुष्याः कर्कसङ्क्रान्तौ

॥१७९॥

प्रमाणाङ्गुलनिष्पनैः सातिरेकैकविंशतियोजनलक्षैर्व्यवस्थितमादित्यमवलोकमानाः प्रतिपाद्यन्ते शास्त्रान्तरे, तथा च तद्ग्रन्थः- " इगवीसं खलु लक्खा, चउवीसं चेव तह सहस्साइं । तह पंचसया भणिया, सत्तत्तीसा य अइरित्ता ॥ १ ॥ इइ नयणविसयमाणं, पुक्खरदीवड्ढवासिमणुयाणं । पुव्वेण य अवरेण य, पिहिं पिहिं होइ मणुयाणं ॥ २ ॥ " ततः कथमुक्तस्वरूपं नयनविषयपरिमाणमात्माङ्गुलेनापि घटते प्रमाणाङ्गुलेनापि व्यभिचारात् । उक्तं च-" लक्खेहि एक्कवीसाइ, साइरेगेहि पुक्खरद्धंमि । उदए पेच्छंति नरा, सूरं उक्कोसए दिवसे ॥ १ ॥ नयणिंदियस्स तम्हा, विसयपमाणं जहा सुए भणियं । आउस्सेहपमाणं-गुलेण इक्केण वि न जुत्तं ॥ २ ॥ " सत्यमेतत् केवलमिदं विषयपरिमाणं प्रकाश्यविषयं द्रष्टव्यं न तु प्रकाशकविषयम् । ततः प्रकाशके-ऽधिकतरमपि विषयपरिमाणं न विरुध्यते इति न कश्चिद्विरोधः । कथमेतदवसीयते ? इति चेत् उच्यते-पूर्वसूरिकृतव्याख्यानात्, सकलमपि हि कालिकश्रुतं पूर्वसूरिकृतव्याख्यानानुसारेणैव व्याख्यानयन्ति महाधियः, न यथाऽक्षरसन्निवेशमात्रम् । पूर्वगतसूत्रार्थसङ्ग्रहपरतया कालिकश्रुतस्य क्वचित्सङ्क्षिप्तस्याप्यर्थस्य महता विस्तरेण, क्वचिद्विस्तरवतोऽप्यतिसङ्क्षेपेणाभिधाने अर्वाक्तनैः स्वल्पमतिभिर्यथावस्थितार्थतया ज्ञातुमशक्यत्वात् । अत एवोक्तमिदमन्यत्र- " जं जह भणियं सुत्ते, तहेव जह तं वियालणा नत्थि । किं कालिकाणुयोगो, दिट्ठो दिट्ठिप्पहाणेहिं ॥ १ ॥ " तस्मात्पूर्वसूरिकृतव्याख्यानान्नाधिकृतग्रन्थविरोधः । आह च भाष्यकृत्-सुत्ताभिप्पाओऽयं, पयासणिज्जे तयं नउ पयासे । वक्खाणाउ विसेसो, न हि संदेहादिलक्खणया ॥ १ ॥ अथोक्तप्रमाणविषयमुल्लङ्घ्य कस्माच्छोत्रादि शब्दादिकं न गृह्णाति ? उच्यते-सामर्थ्याभावात्, उत्कर्षतोऽपि श्रोत्रादीनामेतावत्येव शक्तिः । यद्दवादशादिभ्य एव योजनेभ्य आगतान् शब्दादीन् गृह्णाति, न परतः । चक्षुरपि सातिरेकयोजनलक्षात्तद्व्यस्थितं, न परतोऽपीति । तथा द्वादशभ्यो नवभ्यश्च योजनेभ्यः परतः समागतानां शब्दादिद्रव्याणां तथाविधपरिणामाभावाच्च, परतो हि समागताः शब्दपुद्गलास्तथास्वाभाव्यान्मन्दपरिणामास्तथोपजायन्ते येन स्वविषयं श्रोत्रादिज्ञानं नोत्पादयितुमीशाः । आह च भाष्यकृत्- बारसहिंतो सोत्तं, सेसाणि नवहि जोअणेहिंतो । गेण्हंति पत्तमत्थं, एत्तो परतो न गेण्हंति ॥ १ ॥ इत्यावश्यकमलयगिरिवृत्तौ ४३५ प्रतौ २३ । २४ । २५ पत्रे ॥ १ ॥

अथोद्धृतानुद्धृतेषु तिर्यग्नरामरेषु कियन्ति सामायिकानि भवन्तीति विचारो लिख्यते-

तिरिएसु अणुव्वट्टे, तिगं चउक्कं सिया य उव्वट्टे । मणुएसु अणुव्वट्टे, चउरो तिदुगं तु उव्वट्टे ॥ ४४ ॥ व्याख्या- तिर्यक्षु गर्भव्युत्क्रान्तिकेषु संज्ञिष्वनुद्धृतः सन् त्रिकमाद्यं त्रिसामायिकमधिकृत्य प्रतिपत्ता प्रतिपन्नश्च भवतीत्यध्याहारः, ' चउक्कं सिया य उव्वट्टे ' उद्धृतस्तु मनुष्येष्वायातः स्याच्चतुष्कं स्यात्त्रिकं स्याद्द्विकमधिकृत्योभयथाऽपि भवतीति । ' मणुएसु अणुव्वट्टे चउरो तिदुगं तु उव्वट्टे ' मनुष्येष्वनुद्धृतः सन् चत्वारि प्रतिपद्यते प्राक्प्रतिपन्नश्च भवतीति, त्रीणि द्विकं तुशब्दो विशेषणे उद्धृतस्तिर्यग्नरामरेष्वायातस्त्रीणि द्विकं चाधिकृत्योभयथाऽपि भवतीति गाथार्थः । देवेसु अणुव्वट्टे, दुगं चउक्कं सिया य उव्वट्टे । उव्वट्टमाणओ पुण, सव्वो वि न किंचि पडिवज्जे ॥ ४५ ॥ व्याख्या-देवेष्वनुद्धृतः सन् द्विकमाद्यसामायिकद्वयमाश्रित्योभयथा भवतीति क्रिया । ' चउक्कं सिया य उव्वट्टे ' इति पूर्ववत्, उद्वर्त्तमानकः पुनरपान्तरालगतौ सर्वोऽप्यमरादि न किञ्चित्प्रतिपद्यते, प्राक्प्रतिपन्नस्तु द्वयोर्भवतीति गाथार्थः । इत्यावश्यकमलयगिरिवृत्तौ ४३५ प्रतौ ३३६ पत्रे ॥ २ ॥

अथ सम्यक्त्वादिसामायिकचतुष्कविचारो लिख्यते-प्रथमं सामायिकचतुष्कलाभद्वारमाह-

अब्भुट्ठाणे विणये, परक्कमे साहुसेवणाए य । सम्मद्दंसणलंभो, विरयाविरईअ विरईए ॥ १ ॥ अभ्युत्थाने सति सम्यग्दर्शनलाभो भवतीति क्रिया, तथा विनये-अञ्जलिप्रग्रहादिरूपे, तथा पराक्रमे कषायजये, तथा साधुसाध्वीसेवायाम्, तथा विरताविरतेः-देशविरतेर्विरतेः-सर्वविरतेर्लाभः ॥ १ ॥ तच्चतुष्कमित्थं लब्धं सत् कियन्तं कालं जघन्यत उत्कर्षतश्च भवति ? इति स्थितिद्वारं प्रतिपादयन्नाह-सम्मत्तस्स सुअस्स य, छावट्ठीसागरोवमाइ ठिई । सेसाण पुव्वकोडी, देसूणा होइ उक्कोसा ॥ २ ॥ सम्यक्त्वस्य श्रुतस्य च लब्धिमङ्गीकृत्य सम्यक्त्वसामायिकश्रुतसामायिकयोरुत्कृष्टा स्थितिः षट्षष्टिः सागरोपमाणि किञ्चिदधिकानि ॥ २ ॥ कथं इति चेत् ? उच्यते-दो वारे विजयाइसु, गयस्स तिण्णिच्चुए य छावट्ठी । नरजम्मपुव्वकोडी, पुहुत्तमुक्कोसतो अहिअं ॥ ३ ॥ देशविरतिसर्वविरतिसामायिकयोरुत्कृष्टा स्थितिर्देशोना पूर्वकोटी सप्तमासाधिकवर्षाष्टकोना पूर्वकोटीति यावत् । जघन्यतस्त्वाद्यसामायिकत्रयस्य स्थितिरन्तर्मुहूर्त्तम्, सर्वविरतिसामायिकस्यैकः समयः, चारित्रपरिणामारम्भसमयानन्तरमेव कस्याप्यायुष्कक्षयसम्भवात्, देशविरतिपरिणामस्त्वन्तर्मौहूर्त्तिकः, एवं द्विविधत्रिविधादिभङ्गबहुलप्राणातिपातादिनिवृत्तिरूपत्वात्, सर्वजीवापेक्षया तु सर्वाणि सर्वदा इति । ३ । अथैकस्मिन् समये सामायिकचतु-

ष्कस्य प्रतिपद्यमानकान् प्रतिपादयन्नाह-सम्मत्तदेसविरया, पलिअस्स असंखभागमेत्ताओ । सेढीअसंखभागो, सुए सहस्सग्गसो विरई ॥ ४ ॥ उत्कर्षत एकस्मिन् विवक्षितसमये सम्यक्त्वं देशविरतिं च प्रतिपद्यमानाः प्राणिनः क्षेत्रपल्योपमासङ्ख्येयभागमात्राः प्राप्यन्ते, किन्तु देशविरतिसामायिकप्रतिपत्तृभ्यः सम्यक्त्वप्रतिपत्तारोऽसङ्ख्येयगुणाः प्रतिपत्तव्याः, तथोत्कर्षत एकस्मिन् समये श्रुते सामान्यश्रुते अक्षरात्मके प्रतिपत्तारोऽसङ्ख्येयाः घनीकृतलोकैकश्रेण्यसङ्ख्येयभागमात्रा-लभ्यन्ते । तथा सर्वविरतिप्रतिपत्तार उत्कर्षत एकस्मिन् समये सहस्राग्रशो ज्ञेयाः । तथा जघन्यतश्चतुर्णामपि सामायिकानां प्रतिपत्तार एको द्वौ वेति गाथार्थः । ४ । सम्प्रति प्राक्प्रतिपन्नान् प्रतिपतितांश्च प्रतिपादयन्नाह-सम्मत्तदेसविरया, पडिवन्ना संपई असंखिज्जा । संखिज्जा य चरित्ते, तीसु वि पडिया अणंतगुणा ॥ ५ ॥ सम्यग्दृष्टयो देशविरताश्च प्राक् प्रतिपन्नाः सम्प्रति-विवक्षिते वर्त्तमानसमये उत्कर्षतो जघन्यतश्चासङ्ख्येयाः प्राप्यन्ते इति शेषः । किन्तु जघन्यपदादुत्कृष्टपदे विशेषाधिकाः । एते च प्रत्येकं प्रतिपद्यमानकेभ्योऽसङ्ख्येयगुणाः । ' संखिज्जा य चरित्ते ' त्ति चारित्रे प्राक्प्रतिपन्ना सङ्ख्येयाः, एतेऽपि स्वस्थाने प्रतिपद्यमानकेभ्यो पूर्वप्रतिपन्नेभ्यश्च चरणपतिता अनन्तगुणाः, तेभ्यो देशविरतिपतिता असङ्ख्येयगुणाः, तेभ्योऽपि सम्यक्त्वप्रतिपतिता असङ्ख्येयगुणाः । तदेवमत्र श्रुतवर्जसामायिकत्रयपूर्वप्रतिपन्नाः, प्रतिपतिताश्चोक्ताः । ५ । अथ श्रुतस्य तानाह-सुअपडिवन्ना संपइ, पयरस्स असंखभागमेत्ताओ । सेसा संसारत्था, सुअपरिवडिया हु ते सव्वे ॥ ६ ॥ सम्यग्मिथ्यारूपस्य सामान्येनाक्षरात्मकस्य श्रुतस्य ये पूर्वप्रतिपन्नास्ते सम्प्रति-वर्त्तमानसमये प्रतरस्यासङ्ख्येयभागमात्राः प्राप्यन्ते । तथा श्रुतप्रतिपन्नमानकेभ्यस्तु ये शेषाः संसारस्था जीवा भाषालब्धिरहिताः पृथिव्यादय इत्यर्थः, ते सर्वेऽपि व्यावहारिकराश्यनुगता भाषालब्धिं प्राप्य प्रतिपतितत्वात् श्रुतप्रतिपतिता मन्तव्याः, ते च सम्यक्त्वप्रतिपतितेभ्योऽनन्तगुणाः ॥ ६ ॥ अधुनान्तरद्वारमाह-सकृदवाप्तमपगतं पुनः सम्यक्त्वादि कियत्कालेनावाप्यते तत्राक्षरात्मकाविशिष्टश्रुतस्यान्तरं जघन्यतोऽन्तर्मुहूर्त्तम्, उत्कृष्टं त्वाह-कालमणंतं च सुए, अद्धापरियट्टओ य देसूणे । आसायणबहुलाणं, उक्कोसं अंतरं होइ ॥ ७ ॥ एकजीवं प्रति कालोऽनन्त एवान्तरं श्रुतेऽक्षरात्मके उत्कर्षतो भवतीति योगः । केषां ? आशातनाबहुलानां इति । साम्प्रतमविरहितद्वारमाह-अथ कियन्तं कालं अविरहेण एको द्वयादयो वा सामायिकं प्रतिपद्यन्ते ? इत्याह-सम्मसुअमगारीणं, आवलिअअसंखभागमेत्ताओ । अट्ठसमया चरिते, सव्वे वि जहन्नदो समया ॥ ८ ॥ सम्यक्त्वश्रुतदेशविरतिसामायिकानां नैरन्तर्येण प्रतिपत्तिकाल आवलिकासङ्ख्येय-

भागमात्राः समयाः, तथा अष्टौ समयाश्चारित्रे निरन्तरं प्रतिपत्तिकालः, सर्वेषां जघन्योऽविरहितप्रतिपत्तिकालो द्वौ समयाविति गाथार्थः । अथ विरहकालद्वारं प्रदर्श्यते-सुअसम्म सत्तयं खलु, विरयाविरईअ होइ बारसगं । विरए य पन्नरसगं, विरहिअकालो अहोरत्ता ॥ ९ ॥ श्रुतसम्यक्त्वयोरुत्कृष्टः प्रतिपत्तिविरहकालः सप्तकं-अहोरात्रसप्तकम्, ततः परमवश्यं क्वचित् कश्चित् प्रतिपद्यते, जघन्यतस्त्वेक समय इति । देशविरतेरुत्कृष्टः प्रतिपत्तिविरहकाल अहोरात्रद्वादशकम्, जघन्यतस्तु त्रयः समया इति । सर्वविरतेरहोरात्रपञ्चदशकम्, जघन्यतस्तु समयत्रयमेवेति गाथार्थः । साम्प्रतं भवद्वारमाह-कियतो भवानेकजीवः सामायिकचतुष्टयं प्रतिपद्यते ? इति दर्शयन्नाह-सम्मत्तदेसविरया, पलिअस्सासंखभागमेत्ताओ । अट्ठभवा य चरित्ते, अणंतकालं च सुअसमए ॥ १० ॥ सम्यक्त्ववन्तो देशविरतिमन्तश्च स्वं स्वं सामायिकं क्षेत्रपल्योपमासङ्ख्येयभागमात्रान् भवान् यावल्लभन्ते, इदमत्र हृदयम्-एकजीव उत्कर्षतः सम्यकत्वं देशविरतिं चासङ्ख्येयान् भवान् यावल्लभत इत्यर्थः, जघन्यतस्त्वेको भवः । तथोत्कर्षत एकजीवः सर्वविरतिं अष्टौ भवान् यावत्प्राप्नोति, ततः सिद्ध्यतीति । जघन्यतस्त्वेक एव । तथोत्कर्षत एक जीवः सामान्यश्रुतसामायिकमनन्तान् भवान् यावल्लभते, जघन्यतस्त्वेक भवमेव मरुदेवावच्चेति ॥ १०॥ साम्प्रतमाकर्षद्वारमाह-आकर्षणमाकर्षः प्रथमतया ग्रहणं, मुक्तस्य वा ग्रहणमित्यर्थः । तिण्ह सहस्सपुहुत्तं, सयपुहुत्तं च होइ विरईए । एगभवे आगरिसा, एवइया हुंति नायव्वा ॥ ११ ॥ आद्यसामायिकत्रयाणामुत्कर्षत एकभवे सहस्रपृथक्त्वमाकर्षानेकजीवः करोति । सर्वविरतेः शतपृथक्त्वमाकर्षानेकभवे करोति । जघन्यतस्त्वेकमेवेति गाथार्थः ॥ ११ ॥ नानाभवाकर्षानाह-तिण्ह सहस्समसंखा, सहसपुहुत्तं च होइ विरईए । नाणाभवआगरिसा, एवइया होंति नायव्वा ॥ १२ ॥ आद्यत्रयाणां सहस्राण्यसङ्ख्येयानि, सर्वविरतेः सहस्र-पृथक्त्वं च, एतावन्तो नाना-भवेष्वाकर्षाः । इयं भावना-त्रयाणां ह्येकभवे सहस्रपृथक्त्वमाकर्षाणामुक्तम्, भवाश्च पल्योपमासङ्ख्येयभागसमयतुल्याः, ततश्च सहस्रपृथक्त्वं, तैर्गुणितं सहस्राण्यसङ्ख्येयानीति । सर्वविरतेरेकभवे शतपृथक्त्वमाकर्षाणामुक्तम्, भवाश्चाष्टौ शतपृथक्त्वमष्टभिर्गुणितं सहस्रपृथक्त्वं भवतीत्यवयवार्थः ॥ १२ ॥ अधुना क्षेत्रस्पर्शनाद्वारमाह-सम्मत्तचरणसहिआ, सव्वं लोअं फुसइ निरवसेसं । सत्त य चउदसभाए, चंच य सुअदेसविरईए ॥ १३ ॥ सम्यक्त्वचरणयुक्ताः प्राणिन उत्कृष्टतः सर्वं लोकं स्पृशन्ति, एते च केवलिसमुद्घातावस्थायामिति । जघन्यतस्त्वसङ्ख्येयभागमिति । तथा श्रुतसामायिकसहिताः सप्तचतुर्दशभागान् स्पृशन्ति अनुत्तरेष्विलिकागत्या समुत्पद्यमानश्चशब्दात्पञ्च

तमःप्रभायामिति । देशविरतिसहिताः पञ्चचतुर्दशभागान् स्पृशन्ति अच्युते उत्पद्यमानाः, चशब्दाद्द्व्यादींश्च । अन्यत्रेति अधस्तु ते न गच्छन्त्येव तं परिणामापरित्यज्येत्यर्थः ॥ १३ ॥ साम्प्रतं भावस्पर्शनोच्यते-श्रुतादिसामायिकं कियद्भवैः स्पृष्टम् ? इत्याह-सव्वजीवेहिं सुअं, सम्मचरित्ताइ सव्वसिद्धेहिं । भागेहि असंखिज्जेहि, फासिया देसविरई उ ॥ १४ ॥ सर्वजीवैः सांव्यवहारराश्यन्तर्गतैः सामान्यश्रुतं स्पृष्टम् । तथा सर्वसिद्धैः सम्यक्त्वचारित्रे स्पृष्टे तदनुभवमन्तरेण सिद्धत्वानुपपत्तेः, तथा सिद्धभागैरसङ्ख्येयैः स्पृष्टा देशविरतिः । इदमत्र हृदयम्-सर्वसिद्धानां बुद्ध्या असङ्ख्येयभागीकृता असङ्ख्येयभागैरेकभागोनैर्देशविरतिः स्पृष्टा, असङ्ख्येयभागेन तु न स्पृष्टा, यथा मरुदेवीस्वामिन्येति गाथार्थः ॥ १४ ॥ इत्यावश्यकमलयगिरिवृत्तौ ४३५ प्रतौ ३४२ । ३४३ पत्रे ॥ ३ ॥

अथ श्रीदशवैकालिकविचारा यथा-

अज्ञातपरम्पराः केचन धर्मलाभं न वदन्ति तदज्ञानम्, अवग्रहयाचनेऽर्थाद्धर्मलाभस्यायातत्वात् । तथा हि-

साणीपावारपिहियं, अप्पणा नावपंगुरे । कवाडं नो पणुल्लिज्जा, उग्गहं से अजाइया ॥ १८ ॥ वृत्तिर्यथा-शाणी-अतसीवल्कलजा पटी, प्रावारः-प्रतीतः कम्बलाद्युपलक्षणमेतत्, एवमादिभिः विहितं-स्थगितं गृहमिति वाक्यशेषः । आत्मना-स्वयं नापवृणुयात्-नोद्घाटयेत् । अलौकिकत्वेन तदन्तर्गतभुजिक्रियादिकारिणां प्रद्वेषप्रसङ्गात् । तथा कपाटं-द्वारस्थगनं न प्रेरयेत्-नोद्घाटयेत्, पूर्वोक्तदोषप्रसङ्गात्, किमविशेषेण ? न इत्याह-अवग्रहमयाचित्वा, आगाढप्रयोजनेऽननुज्ञाप्यावग्रहंविधिना धर्मलाभमकृत्वा ॥ १८ ॥ इति श्रीदशवैकालिकपिण्डैषणाध्ययन-प्रथमोद्देशके ११४ पत्रे ॥ ४ ॥

गृहस्था हि मुधादायिनः प्रशस्याः साधवश्च मुधाजीविनः प्रशस्याः । उक्तोऽर्थश्च दृष्टान्तद्वारा सुखाधिगम्यो भवतीति सदृष्टान्तं मुधादायिमुधाजीविस्वरूपं लिख्यते-

दुल्लहा उ मुहादाई, मुहाजीवी वि दुल्लहा । मुहादाई-मुहाजीवी, दोऽवि गच्छंति सुग्गइं ॥ १०० ॥ इति । वृत्तिर्यथा-दुर्लभा एव मुधादातारः, तथाविधभागवतवत्, मुधाजीविनोऽपि दुर्लभाः, तथाविधक्षुल्लकवत् । अमीषां फलमाह-मुधादातारो मुधाजीविनश्च द्वावप्येतौ गच्छतः सुगतिं-सिद्धिगतिं कदाचिदनन्तरमेव कदाचिद्देवलोकसुमानुष्यत्वप्रत्यागमनपरम्परया, ब्रवीमीति पूर्ववत् । अत्र भागवतोदाहरणम्-

कश्चित् परिव्राजकः कञ्चनापि भक्तिमन्तं भागवतमवादीत्-यदि मदीयोदन्तमुद्वहसि ततोऽहं तव गृहे वर्षासमयं निर्वाहयामि, तेनोक्तम्,-यदि मदीयां तप्तिं न करोषि, तेनोक्तम्-एवं करिष्ये, ततः प्रदत्तस्तेन तस्मै समाश्रयः । न क्षुण्णं चकार भोजनादिस्तस्य गृहाधिपतिः । अतिक्रान्ते कियत्यपि काले एकदा प्राप्तच्छिद्रैश्चोरैस्तस्य भागवतस्य प्रधानोऽश्वः प्रमादेन रक्षकाणामपह्नतः । प्रभातं वर्त्तते, इति न शक्तास्ते तमश्वं निर्वोढुम्, ततोऽतिगहने तं मुक्त्वा तेऽन्यत्रोपाययुः, अत्रान्तरे प्रातरेव स्नातुं परिव्राजकस्तडागमुपाजगाम्, दृष्टश्च तेन सरःसमीपवर्त्तिन्यां जाल्यामसौ तुरगः प्रत्यभिज्ञातश्च । अये ! सोऽयमश्वो सोऽस्माकमुपकारिणो भागवतस्य तस्करैरपह्नतः । तेन गत्वा स्वमावासमग्रे गृहपतिपुरुषाणामुक्तं यथा-मम स्नातुं सरसीं गतस्य जाल्यां धौतवासो विस्मृतं ततश्चाकथि । ततस्तैः पुमान् प्रहितः, तेन च तत्र गतेन दृष्टोऽसौ वाजी समानीतश्च कथितो गृहपतये । ततस्तेन समचिन्ति-अये ! व्याजेन व्रतिना ममोपकारः कृतः, तत्कथमहं निर्व्याजदानफलं विहाय प्रत्युपकारेण दानप्रवृत्तिं विदधामीति सम्प्रधार्य गदितोऽसौ परिव्राजकः-भद्र ! व्रज त्वमिदानीम्, न कृतोपकारिणे भवते तप्तिं विधास्यामि, यस्मादुपकारिणि विहितं दानं निष्फलमुपजायते, इत्येष मुधादायीति । मुधाजीविन्युदाहरणमुच्यते-कश्चिन्नरपतिरनित्यतां विलोक्य प्रियाणामपि पुत्रकलत्रपौत्रादीनामुपजातवैराग्यो धर्माधर्मपरीक्षां चक्रे । " को वा अणिविट्ठं भुंजइ " ततस्तं परीक्षयामीति सम्प्रधार्य पुरुषानादिदेश-यथा राजा मोदकान् प्रयच्छति समागत्य गृह्यताम् । इति समाकर्ण्योद्घोषणामुपाजग्मुः कार्पटिकप्रभृतयोऽर्थिजनाः । पृष्टाश्च ते भूभुजा-केन भवन्तो जीवथ ? तत्रैकेनोक्तम्-अहं तावन्मुखेन, अपरेण गदितम्-अहं पादाभ्याम्, अपरेणोक्तम्-अहं हस्ताभ्याम्, अन्येन निवेदितम्-अहं लोकानुग्रहेण, क्षुल्लकसाधुनोक्तम्-अहं मुधिकयेति । ततस्तान्नरपतिः पुनर्जगाद-कथमिव ? इति ततः प्रथमो जगाद-अहं तावत्कथको जनानां विस्तार्य रामायणादिकथां कथयामि, तेन मुखेन जीवामीति । द्वितीयः प्राह-अहं लेखवाहको घटिकामध्ये योजनं लङ्घयामि, तेन पादाभ्यां जीवामीति । तृतीयः प्राह-अहं हि लेखकोऽतो हस्ताभ्यां जीवामि । भिक्षुणोक्तम् अहं प्रव्रजितः, अतो लोकानामनुग्रहेण । क्षुल्लकसाधुनोक्तम्-प्रव्रजितो जन्मजरामरणरोगशोकाद्युपद्रवशतोपद्रुतं, दारिद्र्यदौर्भाग्यकलङ्कव्रातकलुषितं, इष्टवियोगानिष्टसंयोगदुःखजनितव्यसनशतनिलयं, क्षुधापिपासाशीतोष्णक्लेशसहस्रसङ्कुलं, दैन्यचिन्ताजरादिभिः क्षणमप्यमुक्तसमीपं संसारं विलोक्य ततो निर्विण्णः प्रतिपद्यामुं शरीरमानसानेकदुःखजलधिविलङ्घनसेतुं, सौभाग्यसौजन्योदार्योपकारकारणप्रतिनिष्टं, ज्ञानविज्ञानजनकं,

॥१७८१॥

विजितसमस्तराजन्यचक्रराज्यसम्पादकं, स्वर्गावाससम्पादितसुखाशयसन्दोहं, मोक्षफलदायकं जैनं धर्मम् । ततो मुधिकया यथोपलब्धेनाहारजातेन जीवामीति निशम्य तद्भाषितं, अहो ! एष धर्मः सर्वदुःखप्रमोक्षप्रसाधक इति निश्चित्य विशेषेणाचार्यसमीपे धर्ममाकर्ण्य प्रतिबुद्धो राज्ये सुतं संस्थाप्य प्रव्रज्चामसौ नरपतिरग्रहीत् । एष मुधाजीवी । इति दशवैकालिकपञ्चमाध्ययने प्रथमोद्देशके ॥ ५ ॥

ननु प्रस्तरघटितायां प्रतिमायां किं वन्दनपूजनादिविधिना, किं वा दर्शनेन ? मैवं अरे भद्रमुख ! भगवतोऽयमाकारः, एतद्दर्शनाच्च भगवत्स्मरणम्, ततश्च पुण्योत्पत्तिर्युक्तैव यथा-चित्रलिखितकान्तकान्तावलोकनात्कामाध्यवसायोत्पत्तेस्तन्निषिद्धं, तथेदं पुण्यहेतुत्वादाद्यमपि । चित्रवशावलोकननिषेधश्चायम्-

चित्तभित्तिं न निज्झाए, नारिं वा सुअलंकियं । भक्खरं पिव दट्ठूणं, दिट्ठिं पडिसमाहरे ॥ ५५ ॥ इति । वृत्तिर्यथा- चित्रभितिं-चित्रगतां स्त्रियं न निध्यायेत्-नालोकयेत्, नारीं वा सचेतनां स्वलङ्कृतां, उपलक्षणादनलङ्कृतां न निरीक्षेत् । कथञ्चिद्दर्शनयोगेऽपि भास्करमिव सूर्यमिव दृष्ट्वा दृष्टिं प्रतिसमाहरेत्-द्राग् निवर्त्तयेत् । इति श्रीदशवैकालिकाष्टमाचारप्रणिधानाध्ययने १५७ पत्रे ॥ ६ ॥

पुनरपि दण्डकाक्षराणि लिख्यन्ते -

से भिक्खू वा भिक्खुणी वा संजयविरयपडिहयपच्चक्खायपावकम्मे दिया वा राओ वा एगओ वा परिसागओ वा सुत्ते वा जागरमाणे वा से कीडं वा पयंगं वा कुंथुं वा पिपीलियं वा हत्थंसि वा पायंसि वा बाहुंसि वा ऊरुंसि वा उदरंसि वा सीसंसि वा वत्थंसि वा पडिग्गहंसि वा कंबलंसि वा पायपुछणंसि वा रयहरणंसि वा गोच्छगंसि वा उडगंसि वा दंडगंसि वा पीढगंसि वा फलगंसि वा सेज्जंसि वा संथारगंसि वा अन्नयरंसि वा तहप्पगारे उवगरणजाए तओ संजयामेव पडिलेहिय पडिलेहिय पमज्जिय पमज्जिय एगंतमवणेज्जा नो णं संघायमावज्जेज्जा इति । वृत्तिर्यथा-' से भिक्खू वा ' इत्यादि, यावज्जागरमाणे वा इति पूर्ववदेव । ' से कीडं वा ' इत्यादि तद्यथा-कीटं वा पतङ्गं वा कुन्थुं वा पिपीलिकां वा, किम् ? इत्याह-हस्ते वा पादे वा बाहौ वा ऊरुणि वा उदरे वा वस्त्रे वा रजोहरणे वा गुच्छे वा उन्दके वा दण्डके वा पीठके वा फलके वा शय्यायां वा संस्तारके वा अन्यतरस्मिन् वा तथाप्रकारे साधुक्रियोपयोगिनि उपकरणजाते कीटादिरूपं त्रसं कथञ्चिदापतित सन्तं संयत एवं सन् प्रयत्नेन वा प्रत्युपेक्ष्य प्रत्युपेक्ष्य-पौनःपुन्येनैव सम्यक्, किम् ? इत्याह-

एकान्ते तस्यानुपघातके स्थाने अपनयेत्-परित्यजेत्, नैनं त्रसं सङ्घातमापादयेत्-नैनं त्रसं सङ्घातं-परस्परगात्रसंस्पर्श-पीडारूपमापादयेत्-प्रापयेत्, अनेन परितापनादिप्रतिषेध उक्तो वेदितव्यः । एकग्रहणे तज्जातीयग्रहणदन्यकारणानुमतिप्रतिषेधश्च, शेषमत्र प्रकटार्थमेव, नवरमुन्दकं स्थंडिलम्, शय्या सर्वाङ्गिकी वसतिर्वेत्युक्ता । इति श्रीदशवैकालिकसूत्रवृत्तौ हारिभद्र्यां षट्जीवनिकायाध्ययनेप्रान्ते ॥ ७ ॥

एतेन वार्द्धकादिकारणाद्दण्डको ग्राह्यो, न तु सर्वैरिति यत्केचन वदन्ति तदपास्तं द्रष्टव्यम्, विशेषानभिधानाद्गुच्छकरजोहरणादीनामपि कारणिकत्वापत्तेः । इति श्रीदशवैकालिकविचाराः ।

अथोत्तराध्ययनविचारा लिख्यन्ते-

तत्राचाम्लादितपोमहिम्ना यथा द्वादशवर्षाणि कुशलिनी द्वारिका स्थिता तथा लिख्यते-

अण्णत्थ वसुदेवनंदणेण बीयवारं पि घोसावियं नयरीए भो जायवा ! भो पुरजणा ! सुहलालिया ! महंतं दीवायणभयं समुट्ठियं ता विसेसेण धम्मपरायणा होह, पाणाइवायमुसावायपरदव्वहरणपरदारसंगपरिग्गहे जह सत्तीउ विवज्जेह, आयंबिलचउत्थछट्ठट्ठमदसमदुबालसाइं तवमणुट्ठेह, पयत्तेण य देवसाहुपूयापरायणा होह, तेहि वि तह त्ति पडिवन्नं हरिवयणं, दीवायणो विदुम्मई अइदुक्करं बालतवमणुचरिऊण बारवईविणासे कयनियाणो मरिऊण समुप्पण्णो भवणवासी देवो अग्गिकुमारे, संभारियं जायववइरं आगओ अ बारवईविणासणिमित्तं जाव सो न पहवइ जओ सव्वओ चेव जणो तवोवहाणनिरओ देवयावंदणच्चणपरो मंतजावपरायणो न परिभविउं वाइज्जइ एवं दीवायणो छिद्दन्नेसी ठिओ अच्छइ ताव जाव गयाइं बारस वरिसाइं । तओ लोएण चिंतियं अहो ! निज्जिओ निप्पभो पडिहयतवो दीवायणो कउ त्ति निब्भओ बारवईजणो पुणरवि कीलिउमाढत्तो, कायंबरीपाणमत्तो रइपरायणो जाओ । तओ सो अग्गिकुमारो छिद्दं लहिऊण विणासेउमारद्धो उप्पाया बहुरूवा समुप्पण्णा । इत्यादि । इति श्रीद्वितीयोत्तराध्ययनगोअरग्गपविट्ठस्सेति गाथा २९ वृत्तौ चतुर्दशसहस्र्याम् ॥ ८ ॥

केचिद्वदन्ति एकगच्छवासिनोऽपि यत्किञ्चित् प्ररूपयन्त्वन्ये आत्मनां किमुत्सूत्रं विलगति ? गणाधीशस्तान् शिक्षयिष्यति आत्मनां गणपृथक्करणादिव्यर्थमित्यादि, परं तदज्ञानविलसितम्, यतो गणाधीशो यदि शिक्षयति तदा तु भव्यमेव, यदि तु गणाधीशस्तत्साहाय्यकारी

तदायत्तो भवति सोऽपि त्याज्य एव, इति तु प्राक् स्थानाङ्गे पञ्चभिः कारणैरुक्तमेव, परं सर्वथा उत्सूत्रभाषिणा सङ्घबाह्येन सहास्तां मण्डल्यादिको व्यवहारः, कथानिमन्त्रणमपि तेन सह न कर्त्तव्यम्, इत्यस्मिन्नर्थे सदृष्टान्तं तेन सह द्वादशविधं सम्भोगवर्जनं लिख्यते-

अन्नया नवमे पुव्वे पच्चक्खाणे साहूणं जावज्जीवाए तिविहं तिविहेणं पाणाइवायं पच्चक्खामि एवं पच्चक्खाणं भणिज्जइ ताहे सो भणइ-अवसिद्धं नो होइ एवं, कहं पुण कायव्वं ? सुणेह-सव्वं पच्चक्खामि पाणाइवायं अपरिमाणाए तिविहं तिविहेणं, किं निमित्तं परिमाणं न कीरइ जो सो आसंसादोसो सो नियत्तिओ होइ, जावज्जीवाए पुण भणंतेण परओ अब्भुवगयं होइ, जहाऽहं हणिस्सामि पाणे तन्निमित्तं अपरिमाणाए कायव्वं, एवं भणंतो विंज्झेण आगमजुत्तीए पडिबोहिओ न पडिबुज्झइ, सव्वे वि भणंति जहा एत्तियं भणियमायरिएहिं, जे अण्णेऽवि थेरा बहुस्सुआ अन्नगच्छेल्ला तेऽवि पुच्छिया एत्तियं चेव भणंति, ताहे भणति-तुब्भे किं जाणह तित्थयरेहिं एत्तियं भणियं, तेहिं भणियं तुमं न याणसि, जाहे न मनइ ताहे संघसमवाओ कओ देवयाए काउस्सग्गो कओ जाहे सद्दिया सा आगया भणइ-संदिसह त्ति, ताहे भणिया वच्च तित्थयरं पुच्छ किं जं सो गोट्ठामाहिलो भणइ तं सच्चं उदाहु दुब्बलियापूसमित्तपमुहो संघो भणइ तं सच्चं, ताहे सा भणइ ममं अणुग्गहं बलं देह, काउस्सग्गो दिण्णो, ताहे सा गया तित्थयरो पुच्छिओ तेहिं वागरियं जहा-संघो सम्मावाई इयरो मिच्छावाई णिण्हवो एस सत्तमो, ताहे आगया भणिओ उस्सारेह काउस्सग्गं संघो सम्मावाई इयरो मिच्छावाई णिण्हवो एस सत्तमो, ताहे सो भणइ-अप्पिड्ढया वराई, का एयाए सत्ती गंतूण तीसेवि न सद्दहइ, ताहे पुस्समित्ता भणंति जहा पडिवज्जह मा उग्घाडिज्जिहिसि नेच्छइ, ताहे संघेण वज्जिओ बारसविहेणं संभोएणं तंजहा-" उवहि १ सुअ २ भत्तपाणे ३, अंजलीपग्गहे ति य ४ । वायणा य ५ निकाए य ६, अब्भुट्ठाणे त्ति ७ आवरे ॥ १ ॥ किइकम्मस्स य करणे ८, वेयावच्चकरणे इय ९। समोसरणए १० सण्णिसिज्जा ११, कहाए य निमंतणा १२ ॥ २ ॥ एस बारसविहो, सत्तरभेओ " इति । इति श्रीतृतीयोत्तराध्ययन-चतुर्दशसहस्र्यां ३९५ प्रतौ ७२ पत्रे ॥ ९ ॥

अथ सप्तदशभेदा मरणस्य लिख्यन्ते-

आवीचि १ ओहि २ अंतिअ ३, बलायमरणं ४ वसट्टमरणं च ५ । अंतोसल्लं ६ तब्भव ७, बालं तह ८ पंडिअं ९ मीसं १०

॥ १ ॥ छउमत्थमरण ११ केवलि १२, वेहाणस १३ गिद्धपिट्ठमरणं च १४ । मरणं भत्तपरिन्ना १५, इंगिणि १६ पाओवगमणं च १७ ॥ २ ॥ सत्तरसविहाणाइं, मरणे गुरुणो भणंति गुणकलिया । तेसिं नामविभत्तिं, वोच्छामि अहाणुपुव्वीए ॥ ३ ॥ व्याख्या-तत्रावीचिमरणम्-वीचिर्विच्छेदस्तदभावादवीचिर्मरणं नारकतिर्यग्नरामराणामुत्पत्तिसमयात्प्रभृतिनिजनिजायुःकर्मदलिकानामनुसमयमनुभवाद्विचटनम् १, अवधिमरणम्-मर्यादामरणं यानि नरकादिभवनिबन्धनतया कर्मदलिकान्यनुभूय म्रियते मृतो वा यदि पुनस्तान्येवानुभूय मरिष्यति तदा तद्द्रव्यावधिमरणम्, सम्भवति हि गृहीतोज्झितानामपि कर्मदलिकानां ग्रहणं परिणामवैचित्र्यादेवं क्षेत्रादिष्वपि भावनीयम् २, अन्तिकमरणम्-यानि नरकाद्यायुष्कतया कर्मदलिकान्यनुभूय म्रियते मृतो वा न पुनस्तान्यनुभूय मरिष्यति एवं क्षेत्रादिष्वपि वाच्यम् ३, बलात्मरणमाह संजमजोगविसन्ना, मरंति जे तं बलायमरणं तु । भग्नव्रतपरिणतीनां व्रतिनामेवैतत् ४, वशार्त्तमरणम्-इंदियविसयवसगया, मरंति जे तं वसट्टं तु ॥ १ ॥ दीपशिखावलोकनाकुलितपतङ्गवत् ५, अन्तःशल्यमाह-लज्जाइ गारवेण य, बहुस्सुयमएण वावि दुच्चरियं । जे न कहंति गुरूणं, न हु ते आराहगा भणिया ॥ २ ॥ गारवपंकनिवुड्डा, अइयारं जे परस्स न कहंति । दंसणनामचरित्ते, ससल्लमरणं भवे तेसिं ॥ ३ ॥ पुनर्गौरवाभिधानेनास्यैवातिदुष्टताख्यापनार्थं परस्येत्याचार्यादेः । एतस्यैव फलमाह-एअं ससल्लमरणं, मरिऊण महब्भए दुरंतंमि । सुइरं भमंति जीवा, दीहे संसारकंतारे ॥ ४ ॥ ६, तद्भवमरणमाह-मोत्तुं अकम्मभूमिअ, नरतिरिए सुरगणे अ नेरइए । सेसाणं जीवाणं, तब्भवमरणं तु केसंचि ॥ ५ ॥ तु शब्दस्तेषामपि सङ्ख्येयवर्षायुषामेवेति विशेषव्यापकः ७ । बाल ८ पंडित ९ मिश्र १० मरणान्याह-अविरयमरणं बालं, मरणं विरयाण पंडिअं होइ । जाणाहि बालपंडियमरणं पुण देसविरयाणं ॥ ६ ॥ ८, ९, १०, एवं चरणद्वारेण बालादिमरणत्रयमभिधाय ज्ञानद्वारेण छद्मस्थमरणकेवलिमरणे आह-मणपज्जवोहिनाणी, सुअमइनाणी मरंति जे समणा । छउमत्थमरणमेयं ११, केवलिमरणं तु केवलिणो १२ ॥ ७ ॥ वैहायसगृध्रपृष्टमरणेऽभिधातुमाह-गिद्धाइ भक्खणं गिद्धपिट्ठ १३ उब्बंधणाइं वेहासं १४ । एए दुन्नि वि मरणा, कारणजाए अणुन्नाया ॥ ८ ॥ न तु निःकारणे यतो भणियं-"भावियजिणवयणाणं, ममत्तहिरयाण णत्थि हु विसेसो । अप्पाणंमि परंमि य, तो वज्जे पीडमुभओ वि ॥ १ ॥" एत एव भक्तपरिज्ञादिषु पीडापरिहाराय संलेखनाविधिरुक्तः । उक्तं च-" चत्तारि विचित्ताइं, विगईनिज्जूहियाइ चत्तारि । संवच्छरे य तिन्नि य, एगंतरियं च आयामं ॥ १ ॥"

॥१७९॥

इत्यादि, अनुज्ञाकरणं त्वनयोर्दर्शनमालिन्यपरिहारादिउदायिनृपानुमृततथाविधाचार्यवत् । साम्प्रतमन्त्यमरणत्रयमाह-भत्तपरिन्ना १५, इंगिणि १६, पाओवगमं १७ च तिन्नि मरणाइं । कण्णसमज्झिमजेट्ठा, धीसंघयणेण उ विसिट्ठा ॥ ५ ॥ ' कन्नस ' इति कनिष्ठम् । भत्तपरिन्नामरणं, तिचउव्विहाहारचायनिप्पन्नं । नियमा सप्पडिकम्मं, सव्वत्थ वि विगयसंगस्स ॥ १४ ॥ १ ॥ इंगियदेसंमि ठिओ, चउव्विहाहारवज्जिओ धीमं । उव्वत्तणाइ कारइ, नन्नेण उ इंगिणीमरणं । १६ ॥ २ ॥ निच्चलनिप्पडिकम्मो, निक्खिवए जं जहिं जहा अंगं । एवं पाओवगमं, नीहारिं वा अनीहारिं ॥ ३ ॥ पाओवगमं भणियं, समविसमो पायवो व्व जह पडिओ । नवरं परप्पओगा, कंपेज्ज जहा फलतरुव्व ॥ ४ ॥ यद्यपि त्रितयमप्येतत् " धीरेण वि मरियव्वं, काउरिसेण वि अवस्स मरियव्वं । तम्हा अवस्स मरणे, वरं खु धीरत्तणे मरणं ॥ १ ॥ संसाररंगमज्झे, धीबलसन्नद्धबद्धकच्छाओ । हंतूण मोहमल्लं, हरामि आराहणपडागं ॥ २ ॥ " इति शुभाशयवानेव प्रतिपद्यते । फलमपि च वैमानिकतामुक्तिलक्षणं त्रयस्यापि समानम् । तथा चोक्तम्-" एअं पच्चक्खाणं, अणुपालेऊण सुविहिओ सम्मं । वेमाणिओ य देवो, हवेज्ज अहवावि सिज्झिज्जा ॥ १ ॥ " तथाऽपि विशिष्टविशिष्टतरविशिष्टतमधृतिमतामेव तत्प्राप्तिरिति कनिष्ठादिस्तद्विशेष उच्यते । तथा हि-भक्तपरिज्ञामरणमार्यिकादीनामप्यस्ति । यत उक्तम्- " सव्वा वि अ अज्जाओ, सव्वेऽवि य पढमसंघयणवज्जा । सव्वेऽवि देसविरया, पच्चक्खाणेण उ मरंति ॥ १ ॥ " अत्र हि भक्तप्रत्याख्यानं भक्तपरिज्ञैवोक्तम् । इंगिणीमरणं तु विशिष्टधृतिमतामेव सम्भवतीत्यार्यिकानिषेधोऽप्यत एवावसीयते, पादपोपगमनं तु नाम्नैव विशिष्टतमधृतिमतामेव । ततश्च वज्रर्षभनाराचसंहनिनामेवैतत् । उक्तं हि-" पढमंमि अ संघयणे, वट्टंते सेलकुड्डसामाणे । तेसिंपि अ वुच्छेओ, चोद्दसपुव्वीण वोच्छेए ॥ १ ॥ " इति । इति श्रीपञ्चमोत्तराध्ययनचतुर्दशसहस्र्याम् ॥ ॥ ३९५ प्रतौ १०१ पत्र ॥ १० ॥

केचिद्धि दीक्षाग्रहणे नामपरावर्त्तनं व्यर्थमिति वदन्ति परं तद्वाचालप्रलपितमित्यसत्यं मन्तव्यम् । यतः नमिराजर्षेः प्रत्येकबुद्धस्य जनन्या मदनरेखाया दीक्षाग्रहणे सुव्रतेति नाम कृतं श्रूयते तदस्माकमिदं साम्प्रदायिकमेव । नूतनानां तु नूतना रीतिर्भवतु नाम । अक्षरतस्तदिदम्-

तीएवि तासिं साहूणीणं समीवे गहिया दिक्खा कयसुव्वयनामा तवसंजमं कुणमाणी विहरइ । श्रीनवमोत्तराद्ययनवृत्तौ चतुर्दशसहस्र्यां

३९५ प्रतौ १४२ पत्रे ॥ ११ ॥

अथ प्रतिपदमागमोक्तमपि सदयहृदयैः सहृदयैरागमोक्तयुक्तिभिर्बोध्यमाननपि योगोद्वहनमश्रद्दधतः कांश्चिद्देवानाप्रियान् वीक्ष्य दूरबोधिबोधाय तीर्थङ्करोऽप्यशक्त इति निःप्रत्याशत्वेऽपि कथमपि भवतूपकार इति योगाक्षराणि लिख्यन्ते-

वसे गुरुकुले निच्चं, जोगवं उवहाणवं । पियंकरे पियंवाई, से सिक्खं लद्धुमारिहइ ॥ १४ ॥ इति । वृत्तिर्यथा-वसेदासीत क्व ? गुरूणां-आचार्यादीनां कुलं-अन्वयो गच्छ इत्यर्थः । गुरुकुलं तत्र तदाज्ञोपलक्षणं च कुलग्रहणम्, नित्यं सदा, किमुक्तं भवति ? यावज्जीवमपि गुर्वाज्ञायामेव तिष्ठेत् । उक्तं च-" णाणस्स होइ भागी " इत्यादि, योगो व्यापारः स चेह प्रक्रमाद्धर्मगतः एव तद्वान्, उपधानं-अङ्गानङ्गाध्ययनादौ यथायोगमाचाम्लादिस्तपोविशेषस्तद्वान्, यद्यस्योपधानमुक्तं न तत्कृछ्रभीरुतयोत्सृज्यान्यथैवाऽधीते शृणोति वा, प्रियं-अनुकूलं करोतीति प्रियङ्करः कथञ्चित्केनचिदपकृतोऽपि न तत्प्रतिकूलमाचरति, किन्तु ममैव कर्मणामयं दोष इत्यवधारयन्नप्रियकारिण्यपि प्रियमेव चेष्टते इदं च भावयति " अपकारिणि कोपश्चेत्कोपे कोपः कथं न ते । धर्मार्थकाममोक्षाणां, प्रसह्य परिपन्थिनि ॥ १ ॥ " अत एव च ' पियंवाइ ' त्ति केनचिदप्रियमुक्तोऽपि प्रियमेव वदतीत्येवंशीलः प्रियवादी । उक्तं च-" सिक्खह पियाइ वोत्तुं, सव्वो तूसइ पियं भणंताणं । किं कोइलाहि दिण्णं, कस्स हियं किं च काएहिं ? ॥ १ ॥ करयलमहिअस्स वि दमणयस्स महमहइ पेसलो गंधो । तवियस्स वि सज्जणमाणुसस्स महुरो समुल्लावो ॥ २ ॥ " अन्यच्च-" सुजनो न याति विकृतिं, परिहितनिरतो विनाशकालेऽपि । छेदेऽपि चन्दनतरुः, सुरभयति मुखं कुठारस्य ॥ ३ ॥ " तथा चास्य को गुणः ? इत्याह-स एव गुणविशिष्टः शिक्षां शास्त्रार्थग्रहणादिरूपां लब्धुं-आप्तुमर्हति-योग्यो भवतीति, अनेनैवाविनीतस्त्वेतद्वीपरीतः शिक्षां च लब्धुं नार्हतीत्यर्थादुक्तं भवति । तथा च यः शिक्षां लभते स बहुश्रुतः इतरस्त्वबहुश्रुत इति भावः, इति सूत्रार्थः । इति श्रीएकादशोत्तराध्ययनचतुर्दशसहस्र्यां ३९५ प्रतौ १७० पत्र ॥ १२ ॥

अथाष्टमीचतुर्दश्योर्वाचना न देया, इत्यक्षराणि लिख्यन्ते-

" अट्ठमिपरिकए मोत्तुं, वायणाकालमेव य सेसकालंमि इंतीओ, नेयाओ अकालचारीओ " इति श्रीउत्तराध्ययनचतुर्दशसहस्र्यां षोडशाध्ययनवृत्तौ २१९ पत्रे ॥ १३ ॥

॥१९१॥

अथौघनिर्युक्तिसूत्रवृत्तिविशेषा गाथा-तत्र प्रथमं चतुर्णामनुयोगानां स्वरूपं, तेषां प्राधान्याप्राधान्ये च जिज्ञासया लिख्यते-

चत्तारि उ अणुओगा, चरणे धम्मगणियाणुयोगे य । दविअणुओगे य तहा, अहक्कमं ते महिड्ढीया ॥ ७ ॥ व्याख्या-' चत्तारि ' चत्वारोऽनुयोगाः, तुशब्दाद् द्वौ च पृथकत्वापृथक्त्वभेदात्, ' चरणे ' उत्तरपदलोपादित्थमुपन्यासः, अन्यथा चरणकरणानुयोग इत्येवं वाच्यम्, स चैकादशाङ्गरूपः, धर्मानुयोग-उत्तराध्ययनप्रकीर्णकरूपः, गणितानुयोगः-सूर्यप्रज्ञप्त्यादिरूपः, चशब्दः प्रत्येकमनुयोगपदसमुच्चायकः, द्रव्यानुयोगः-सदसत्पर्यालोचनारूपः, स च दृष्टिवादः, चशब्दादनार्षः । यथाक्रमं ते महर्द्धिकाः-प्रधानाः एवं व्याख्याते सत्याह परः-चरणपदं भिन्नाया विभक्त्या किमर्थमुपन्यस्तम् ? धर्मगणितानुयोगौ तु एकयैव विभक्त्या, पुनर्द्रव्यानुयोगो भिन्नया विभक्त्येति ? तथाऽनुयोगशब्द एक एवोपन्यसनीयः, किमर्थं द्रव्यानुयोग इति भेदेनोपन्यासः इति ?, उच्यते-चरणपदस्य भेदोपन्यासे एतत्प्रयोजनं, चरणकरणानुयोग एवात्राधिकृतः प्राधान्यख्यापनार्थं भिन्नया विभक्त्योपन्यासः, धर्मगणितानुयोगावभिन्नावुपन्यस्तौ, तावत्र प्रक्रमेऽप्रधानाविति प्रदर्शनार्थम्, द्रव्यानुयोगस्य भिन्नत्वे इदं कार्यम्-यदयं हि एकैकानुयोगो मेलनीयः, न पुनर्लौकिकशास्त्रवद्युक्तिभिर्विचारणीयः अनुयोगशब्द-द्वयोपन्यासे इदम्-यत्रयाणां पदानामन्तेऽनुयोगपदं तदपृथक्त्वाऽनुयोगार्थम्, यच्च द्रव्यानुयोग इति तत्पृथक्त्वानुयोगार्थम् । आह परः यथाक्रमं महर्द्धिका इति चरणलघुत्वं तत्किमर्थं तस्य निर्युक्तिः क्रियते ? अपि तु द्रव्यानुयोगस्यैव क्रियताम् ? गुरुराह-सविसयबलवत्तं पुण, जुज्जइ तहवि य महिड्ढियं चरणं । चारित्तरक्खणट्ठा, जेणियरे तिण्णि अणुओगा ॥ ८ ॥ ' सविसय० ' स्वविषये बलं वर्त्तते सर्वेषामात्मीयात्मीयविषये बलवत्त्वाद्युज्यते बलं तथाऽपि महर्द्धिकं चरणम्, शेषानुयोगानां चरणकरणार्थमेवोपादानादपरे वृत्तिभूताः । कथम् ? चारित्ररक्षणार्थमिति चेत्तदाह-चरणपडिवत्तिहेउं, धम्मकहा कालदिक्खमाईया । दविए दंसणसुद्धी, दंसणसुद्धस्स चरणं तु ॥ ९ ॥ चरणप्रतिपत्तेर्हेतुः किं तदाह-धर्मकथा काले दीक्षादयः शोभननक्षत्रतिथ्यादौ प्रव्रज्याप्रदानं कर्त्तव्यम्, द्रव्यानुयोगे दर्शनशुद्धिः, दर्शनशुद्धस्य चारित्रम्, विशेषेण चारित्रशुद्धस्य दर्शनं दृष्टान्तमाह-जह रण्णो विसएसुं, वइरे कणगे य रयय लोहे य । चत्तारि आगरा खलु, चउण्ह पुत्ताण ते दिन्ना ॥ १० ॥ ' जह ' यथा राज्ञो विषयेषु जनपदेषु वज्रकनकरजतलोहाकराः पुत्राणां ते प्रदत्ताः ॥ १० ॥ चिंता लोहागरिए, पडिसेहं कुणइ सो य लोहस्स । वइराईहिं गहणं, करिंति लोहस्स तिण्णियरे ॥ ११ ॥ चिन्ता लोहाकरोऽस्यास्तीति

लोहाकरिकस्तस्मिन्, राज्ञा परिभूतोऽहमिति सोऽमात्यदत्तबुद्धिर्लोहप्रतिषेधं करोति, ततस्ते त्रुटितलोहोपकरणा वज्रादिभिर्ग्रहणं कुर्वन्ति लोहस्य, चशब्दात्कनकादिभिरितरे वज्राकरिकादयः ॥ ११ ॥ एवं चरणंमि ठिओ, करेइ गहणं विहीइ इयरेसिं । एएण कारणेणं, हवइ उ चरणं महिड्ढीयं ॥ १२ ॥ एवं तदनेन कारणेन चरणं महर्द्धिकम् ॥ १२ ॥ इति श्रीओघनिर्युक्तिसूत्रवृत्तौ ॥ १४ ॥

पौरुष्यनन्तरं प्रातर्यावत्साधूनां जल्पनमनुचितं महादोषनिदानम् । तथा हि-

आउ १ ज्जोवण २ वणिए ३, अगणि ४ कुडंबी ५ कुकम्म ६ कुम्मरिए ७ । तेणे ८ मालागारे ९, उब्भामग १० पंथिए ११ जंते १२ ॥ २६५ ॥ पौरुष्यनन्तरप्रातर्यावत्साधूनां बाढं वदतामेते दोषा द्वादश भवन्ति-शब्दं श्रुत्वा लोको बुध्यते विबुद्धः सन्नप्कायय्न्त्राणि योजयन्ते, वाहनानि सज्जयन्ते, तथा जलार्थं योषितो यान्ति १, ' जोवणं ' धान्यप्रकरस्तदर्थं लोको याति, लाटदेशे जोवणं धान्यनिकरः कथ्यते २, ' वणिय ' त्ति वणिजो विभातमिति कृत्वा व्रजन्ति ३, ' अगणि ' त्ति लोहकारैः शालादिष्वग्निः प्रज्वाल्यते ४, कुटुंबिनः स्वकर्मणि लगन्ति ५, कुत्सितं कर्म येषां ते कुकर्माणो-मात्सिकाः ६, कुत्सितमाराः-सौकरिकास्तेषां विबोधो भवेत् ७, रात्रौ पूत्कारादिना स्तेनकानां बोधः ८, मालाकारा-मालिकास्तेषां बोधः ९, उद्भ्रामकाः-पारदारिका विबुध्यन्ते १०, पथिका विबुध्यन्ते ११, यान्त्रिका विबुद्धाः सन्तो यन्त्राणि वाहयन्ति चाक्रिकादयः १२, एते द्वादश दोषाः स्युस्तर्हि कथं कार्यम् ? यथाऽऽगमे उक्तमस्ति, यथा एका वृद्धा स्त्री पतितदन्ता तस्या भोजनार्थं लपनश्रीः क्रियते, शब्दादिरहितं यथा तया भोजनं विधीयते तथाऽत्रापि परश्रावणं विना (यदा परश्रावणं) कृतं विलोक्यते तदा किं क्रियते तत्राप्येष आगमोक्तो दृष्टान्तः यथा-सबद्धः कूपो वहन् केनापि न ज्ञायते तद्ज्ञप्त्यर्थं षट्को विधीयते तथा मुख्यप्रतिक्रामयिताऽधिकारे२ तथा तथा बाढस्वरेण सूत्रमुच्चरति । इति श्री ओघनिर्युक्तिसूत्रवृत्तौ ॥ १५ ॥

ननु ये केचित् केवलिशरीराज्जीवविराधना न भवतीति वदन्ति ते स्वमतस्थापनायालपन्ति-केवली हि अचित्तवाय्वादिवत्येव प्रदेशे चलति निषीदति मेषोन्मेषादिकं करोति, ततस्तस्य विराधनासम्भव एव नास्ति इति, एतच्चानागमिकं कुत्राप्येवमनुक्तत्वात् अयौक्तिकं च, यदि केवलिनो विराधनासम्भव एव नास्ति तर्हि केवली कुतः प्रत्युपेक्षणादिकं करोति ? कथं वा तदुपकरणे जन्तुसन्ततिसम्भवः ? किं वा तामृते प्रत्युपेक्षणप्रयोजनम् ? किं च प्रत्युपेक्षणं कुर्वतः केवलिनो वायुकायविराधना सम्भवत्येव । केवलिप्रत्युपेक्षणाक्षराणि चेमानि-

॥१९३॥

दुविहा खलु पडिलेहा, छउमत्थाणं च केवलीणं च । अब्भिंतरबाहिरिया, दुविहा दव्वे य भावे य ॥ ४०३ ॥ द्विविधा प्रत्युपेक्षणा कतमेन द्वैविध्येन ? द्विधा इत्यत आह-छद्मस्थानां केवलिनां च, सा चैकेका द्विविधा, याऽसौ छद्मस्थानां साद्विधा ग्राह्या बाह्या अभ्यन्तरा च, या च केवलिन साऽपि अभ्यन्तरा बाह्या च, ' दव्वे भावे य ' त्ति याऽसौ बाह्या प्रत्युपेक्षणा सा द्रव्यविषया, याऽप्यभ्यन्तरा सा भावविषयेति, तत्र केवलिप्रत्युपेक्षणां प्रतिपादयन्नाह-पाणेहि उ संसत्ता, पडिलेहा होइ केवलीणं तु । संसत्तमसंसत्ता, छउमत्थाणं तु पडिलेहा ॥ ४०४ ॥ प्राणिभिः संसक्तं यद्द्रव्यं तद्विषया प्रत्युपेक्षणा भवति केवलिनाम्, ' संसत्तमसंसत्त ' त्ति संसक्तद्रव्यविषया असंसक्तद्रव्यविषया च छद्मस्थानां प्रत्युपेक्षणा भवति । आह-यथोपन्यासस्तथा निर्देश इति न्यायात्प्रथमं छद्मस्थानां व्याख्यातुं युक्तं पश्चात्केवलिनामिति ? उच्यते, प्रधानत्वात्केवलिनां प्रथमं व्याख्या कृता पश्चाच्छद्मस्थानामिति । आह-तत्कथं प्रथममेवैवमुपन्यासो न कृत ? इत्युच्यते तत्पूर्वकाः केवलिनो भवन्तीति अस्यार्थस्य ज्ञापनार्थमिति । अनेन वा कारणेन केवलिनः प्रत्युपेक्षणा कृता, पश्चाच्छद्मस्थानामिति । आह-तत्कथं प्रत्युपेक्षणां कुर्वन्ति ? इति-संसज्जइ धुवमेयं, अपेहियं तेण पुव्वपडिलेहे । पडिलेहियंपि संसज्जइ त्ति संसत्तमेव जिणा ॥ ४०५ ॥ संसज्यते-प्राणिभिः संसर्गमुपयाति ध्रुवमवश्यमेतद्वस्त्रादि अप्रत्युपेक्षितं सत् तेन पूर्वमेव केवलिनः प्रत्युपेक्षणां कुर्वन्ति, यथा तु पुनरेवं संविद्यते इदमिदानीं वस्त्रादिप्रत्युपेक्षितमपि उपभोगकाले संसज्यते तदा ' संसत्तमेव जिण ' त्ति संसक्तमेव जिनाःकेवलिनः प्रत्युपेक्षन्ते, न त्वनागतमेव पलिमंथदोषात्, उक्ता केवलिद्रव्यप्रत्युपेक्षणा, इदानीं केवलिन एव भावप्रत्युपेक्षणां प्रतिपादयन्नाह-नाऊण वेयणिज्जं, अइबहुयं आउयं च थोवागं । कम्मं पडिलेहेउं, वच्चंति जिणा समुग्घायं ॥ ४०६ ॥ ज्ञात्वा वेदनीयं कर्म अतिप्रभूतं आयुष्कं च स्तोकं कर्म प्रत्युपेक्ष्य ज्ञात्वेत्यर्थः, किमित्यत आह- ' वच्चंति जिणा समुग्घायं 'ति जिनाः-केवलिनः समुद्घातं व्रजन्ति । अत्र च भावः-कर्मण उदय औदयिको भाव इत्यर्थः । उक्ता केवलिभावप्रत्युपेक्षणा, इदानीं छद्मस्थद्रव्यप्रत्युपेक्षणामाह-संसत्तमसंसत्ता, छउमत्थाणं तु होइ पडिलेहा । चोयग जह आरक्खी, हिंडिताहिंडिया चेव ॥ ४०७ ॥ ' संसत्त ' त्ति संसक्तद्रव्यविषया असंसक्तद्रव्यविषया च छद्मस्थानां भवति प्रत्युपेक्षणा, अत्रचोदक आह-युक्तं तावत्संसक्तस्य वस्त्रादेः प्रत्युपेक्षणाकरणं असंसक्तस्य तु कस्मात्प्रत्युपेक्षणा क्रियते ? आचार्य आह-यथा आरक्षकयोर्हिण्डिताहिण्डितयोर्यथासङ्ख्येन प्रसादविनाशौ सञ्जातौ, तथाऽत्रापि द्रष्टव्यम् । तथाहि-किञ्चिन्नगरम्, तत्थ

॥१९४॥

राया, तेण चोरनिग्गहणत्थं आरक्खिओ ठविओ, सो एगं दिवसं हिंडइ बीए तईए हिंडंतो चोरं न किंचि पासति ताहे ठितो निव्विण्णो, चोरेहिं आगमियं जहा वीसत्थो जाओ आरक्खिओ, ताहे एगदिवसेणं सव्वं नगरं मुट्ठं ताहे नागरगा उवट्ठिया मुट्ठिया, तो राया भणइ वाहरह आरक्खियं, वाहित्ता पुच्छितो किं तुमए अज्ज न हिंडियं नगरे ? सो भणति न हिंडियं, ताहे रुट्ठो राया भणइ-जइ नाम एत्तिए दिवसे चोरेहिं न मुट्ठं सो ताण चेव न गुणो, तए पुण पमायं करितेण मुसावियं, ततो सो निग्गहिओ राइणा अण्णो पट्ठविओ, सो पुण जइ वि दिक्खति चोरे तहवि रत्तिं सयलं हिंडति, अह तत्थ एगदिवसे अण्णरत्थाए गयं नाऊणं चोरेण खत्तियं खणियं, सो य नागरओ रायउले उवट्ठिओ, राइणा पुच्छितो आरक्खिओ जहा तुमं हिंडसि ? सो भणति आमं हिंडामि, ताहे राइणा लोगो पुच्छिओ, लोगो भणति आमं हिंडइ त्ति । ताहे सो निद्दोसो कीरति । एवं चेव रायत्थाणीया तित्थयरा, आरक्खत्थाणीया साहू, उवगरणं नगरत्थाणीयं, कुंथुकीडीया चोरा, णाणदंसणचरित्ताणि हिरणत्थाणीयाणि, संसारो दंडो । एवं केणवि आयरियएण भणितो सीसो दिवसे दिवसे पडिलेहेइ जाहे न पेच्छइ ताहे न पडिलेहेइ एवं तस्स अपडिलेहंतस्स संसतो उवही ण सक्को सोहेउं तेण तित्थयराणा भग्गा, तं च दव्वं अपरिभोगं जायं, एवं अण्णो भणिओ तेण सव्वकयं तित्थयराणा य कया, दव्वं च परिभोगं जायं । इति श्रीओघनिर्युक्तिसूत्रवृत्तौ ॥ १६ ॥

अथ दंडकाक्षराणि उपधिरक्षणाक्षराणि केवलिशरीराज्जीवविराधना भवतीत्यक्षराणि च लिख्यन्ते-

मोक्खट्ठा नाणाई तणू तयट्ठा तयट्ठिया लट्ठी । दिट्ठो जहोवयारो, कारणतक्कारणेसु तहा ॥ १०६२ ॥ मोक्षार्थं ज्ञानादीनि इष्यन्ते, ज्ञानादीनां चार्थाय तनुः शरीरमिष्यते, तदर्थाय च यष्टिः शरीरार्थायेत्यर्थः यतः शरीरं यष्ट्याद्युपकरणेन प्रतिपाल्यते, अत्र च कारणतत्कारणेषूपचारो दृष्टः, यथा घृतं वर्षत्यन्तरिक्षं इति, एवं मोक्षस्य ज्ञानादीनि कारणानि ज्ञानादीनां च तनुः कारणं शरीरस्य च यष्टिरिति ॥ १०६२ ॥ किं च न केवलं ज्ञानादीनां यष्टिरुपकरणं वर्त्तते, अन्यदपि यद् ज्ञानादीनुपकरोति तदेवोपकरणमुच्यते, एतदेवाह-जं जुज्जइ उवगरणे उवगरणं, तं सि होइ उवगरणं । अइरेगं अहिगरणं, अजतो अजतं परिहरंतो ॥ १०६३ ॥ यदुपकरणं पात्रकादि उपकारे ज्ञानादीनामुपयुज्यते तदेवोपकरणं ' से ' तस्य साधोर्भवति, यत्पुनरतिरेकं ज्ञानादीनामुपकारे न भवति तत्सर्वमधिकरणं भवति, किंविशिष्टस्य सतः ?

अयतोऽयत्नवतः अयतनया परिहरन्-प्रतिसेवमानस्तदुपकरणं भवतीति, ' परिहरंतो ' त्ति, इयं सामयिकी परिभाषा प्रतिसेवनार्थे वर्त्तते इति ॥ १०६३ ॥ किञ्च-उग्गमउप्पायणासुद्धं, एसणादोसवज्जियं । उवहिं धारये भिक्खू, पगासपडिलेहणं ॥ १०६४ ॥ एवं गुणविशिष्टामुपधिं धारयेत् भिक्षुः । किंविशिष्टामित्यत आह-' पगासपडिलेहणं ' इति प्रकाशे प्रकटप्रदेशे प्रत्युपेक्षणं क्रियते यस्या उपधेस्ता-मेवंगुणविशिष्टां धारयेत्, एतदुक्तं भवति-यस्याः प्रकटमेव कल्पाद्युपधेः प्रत्युपेक्षणा क्रियते, न तु महार्घमूल्याच्चौरभयादभ्यन्तरे या क्रियते सा तादृशी उपधिर्धारणीया इति ॥ १०६४ ॥ उग्गमउप्पायणासुद्धं, एसणादोसवज्जियं । उवहिं धारए भिक्खू, जोगाणं साहणट्ठया ॥ १०६५ ॥ सुगमम् । नवरं योगाः संयमात्मका गृह्यन्ते, तेषां साधनार्थमिति । नवरं अध्यात्मविशुद्ध्या उपकरणं ग्राह्यम्, पात्रकादि परिहरन्तो भणितो जिनैस्त्रैलोक्यदर्शिभिः, अतो यत्किञ्चिद्धर्मोपकरणं तत्परिग्रहो न भवति । अत्राह कश्चिद्वोटिकपक्षपाती-यद्युपकरणसहिता अपि निर्ग्रन्था उच्यन्ते, एवं तर्हि गृहस्था अपि निर्ग्रन्थाः, यतस्तेऽपि उपकरणसहिता वर्त्तन्ते ॥ १०६५ ॥ अत्रोच्यते-अज्झप्पविसोहीए, जीवनिकाएहि संथडे लोए । देसियमहिंसगत्तं, जिणेहि तेलुक्कदंसीहिं ॥ १०६६ ॥ नन्विदमुक्तमेव यदुताध्यात्मविशुद्ध्या सत्युपकरणे निर्ग्रन्थाः साधवः । किञ्च यद्यध्यात्मविशुद्धिर्नेष्यते ततो ' जीवनिकाएहि संथडे लोए ' इति, जीवनिकायैर्जीवसङ्घातैरयं लोकः संस्तृतो वर्त्तते, ततश्च जीवनिकायसंस्तृते व्याप्ते लोके कथं नग्नश्चङ्क्रमन् वधको न भवति । यद्यध्यात्मविशुद्धिर्नेष्यते, तस्मादध्यात्मविशुद्ध्या देशितमहिंसकत्वं जिनैस्त्रैलोक्यप्रदर्शिभिरिति ॥ १०६६ ॥ क्व प्रदर्शितं ! तदित्यत आह-उच्चालियंमि पाए, ईरियासमियस्स संकमट्ठाए । वावज्जेज्ज कुलिंगी, मरिज्ज तं जोगमासज्ज ॥ १०६७ ॥ ' उच्चालियंमि ' इत्यादि, उच्चालिते उत्पाटिते पादे सति ईर्यासमितस्य साधोः सङ्क्रमार्थमुत्पाटिते पादे इत्यत्र सम्बन्धः, व्यापद्येत सङ्घट्टनपरितापनेन कः कुलिङ्गी ? कुत्सितानि लिङ्गानि-इन्द्रियाणि यस्यासौ कुलिङ्गी द्वीन्द्रियादिः, स परिताप्येत उत्पाटिते पादे सति म्रियते चासौ कुलिङ्गी, तं व्यापादनयोगमासाद्य ॥ १०६७ ॥ न य तस्स तन्निमित्तो, बन्धो सुहुमो वि देसिओ समए । अणवज्जो उ पओगेण, सव्वभावेण सो जम्हा ॥ ९६७ ॥ न च तस्य तन्निमित्तो बन्धः सूक्ष्मोऽपि देशितः समये-सिद्धान्ते, किं कारणम् यतोऽनवद्योऽसौ साधुस्तेन व्यापादनप्रयोगेण-व्यापादनव्यापारेण, कथम् ? सर्वभावेन सर्वात्मना मनोवाक्कायकर्मभिरनवद्योऽसौ, यस्मात् न सूक्ष्मोऽपि बन्धस्तस्येति ॥ ९६८ ॥ णाणी कम्मस्स खयट्ठमुट्ठिओऽणुट्ठिओ अ

हिंसाए। जयइ असढं अहिंसत्थमुट्ठिओ अवहओ सो उ ॥ ९६९ ॥ ' णाणी ' ज्ञानमस्यास्तीति ज्ञानी-सम्यग्ज्ञानयुक्तः कर्मक्षयार्थमुत्थित उपयुक्तो हिंसायां च न स्थितः। तथा यतते-कर्मक्षयार्थं प्रयत्नं करोति शठभावरहितो यत्नं करोति न पुनर्मिथ्याभावेन, सम्यग्ज्ञानयुक्त इत्यर्थः। तथा अहिंसार्थमुत्थितः-उद्यतः, किन्तु सहसा कथमपि यत्नं कुर्वतोऽपि प्राणिवधः सञ्जातः स एवंविद्योऽवधकः साधुः ॥ ९६९ ॥ तस असंचेअयओ, संचेययओ अ जाणि सत्ताणि। जोगं पप्प विणस्संति, णत्थि हिंसाफलं तस्स ॥ ९७० ॥ ' तस्स ' तस्येव प्रकारस्य ज्ञानिनः कर्मक्षयार्थमभ्युद्यतस्यासञ्चेतयतः अजानानस्य किं सत्त्वानि कथं प्रयत्नवतोऽपि कथमपि न दृष्टः प्राणी व्यापादितश्च, तथा सञ्चेतयतः कथमस्त्यत्र प्राणी ज्ञातो दृष्टश्च न च प्रयत्नं कुर्वताऽपि रक्षितुं पारितः ततस्तस्यैवंविधस्य यानि सत्त्वानि योगं कायादिव्यापारं प्राप्य विनश्यन्ति, तत्र तस्य नास्ति साधोर्हिंसाफलं साम्परायिकं संसारजननम्। यदि परमीर्यापथप्रत्ययं कर्म भवति तदैकत्र समये बद्धमन्यत्र क्षपयति ॥ ९७० ॥ इति श्रीओघनिर्युक्तिसूत्रवृत्तौ ॥ १६ ॥

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरीश्वरशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते विचाररत्नाकरे मध्यभागे श्रीमूलसूत्रविचारसमुच्चयनाम्नी कलिका समाप्ता ॥

॥ समाप्तश्चायं मध्यभागः॥

अनेकसिद्धान्तविचाररत्नारम्ये गुरूपासनमार्गलभ्ये। विचाररत्नाकरनामशास्त्रे, प्राप्तः समाप्तिं किल मध्यभागः ॥ १ ॥

॥ सर्वेषामवबोधाय, सर्वभाषामयीमिव। सर्वदोषापहां सार्वां, सर्वविद्गमुपास्महे ॥ १ ॥

अथ श्रीछेदग्रन्थविचाराः, तत्र च पूर्वं श्रीनिशीथसूत्रभाष्यचूर्णिविचारा यथा-तत्रापि अयोजितसौत्रकल्पं केवलमौर्णिकं साधुभिर्न व्यापारणीयमित्यक्षराणि लिख्यन्ते-

इक्कं पाउरमाणो, खोमियं उन्निए लहुमासो। दुन्नियपाउरमाणो, अंतो खोमी बहिं उन्नी ॥ १ ॥ छप्पइयपणगरक्खा, भूसाउज्झायणा य परिहरिया। सीयत्ताणं च कयं, तेण य खोमं न बाहिरओ ॥ २ ॥ एतच्चूर्णिर्यथा-इक्कं खोमिअं-कार्पासिकं पाउणिज्जइ उन्नियमेगं न पाउणिज्जइ अह पाउणइ मासलहुं च से पच्छित्तं, पच्छद्धं कंठं ॥ १ ॥ खोमियस्स अंतो उन्निअस्स बहिं परिभोगे

इमे गुणा ' छप्पइ ' गाहा, व्याख्या-कप्पासिए छप्पइया न संभवंति इयरहा बहू भवंति, ' पणग ' उल्ली अंतो उन्निअं पाउणिज्जमाणं मलीमसं तत्थ मलीमसे उल्ली भवति, सा य विहिपरिभोगेण रक्खिया भवइ, बाहिं खोमिएण विभूसा भवइ सावि उज्झिया य परिहरिया भवति, वत्थं मलक्खमं न कंबली, मलीमसा य कंबली दुग्गंधा, साऽवि उज्झायणापरिहरिया भवइ, पडिगब्भा कंबलीइ सीयत्ताणं कयं हवइ, एएहिं कारणेहिं बहिं न पंगुरिज्जा ॥ इति श्रीनिशीथभाष्यचूर्णौ प्रथमोद्देशके ॥ १ ॥

अथ साधुभिरुत्सर्गतः प्रासुकोदकेनापि हस्तपादमुखादिक्षालनं न कर्त्तव्यम् । अपवादतश्च यथा यत्कर्त्तव्यं तत्किञ्चिल्लिख्यते-

जे लहुसएण सीतोदगवियडेण वा उसिणोदगवियडेण वा हत्थाणि वा दंताणि वा णहाणि वा उच्छोलेज्ज वा पच्छोलेज्ज वा उछोलेंतं वा पछोलेंतं वा सातिज्जइत्ति । एतद्भाष्यं यथा-तिण्णि पसई उ लहुगं, विगडं पुण होति विगतजीवं तु । उच्छोलणा तु तेणं, देसे सव्वे य नायव्वा ॥ १ ॥ आइण्णमणाइण्णा, दुविहा देसंमि होंति नायव्वा ॥ आइण्णावि य दुविहा, निक्कारणओ य कारणओ ॥ २ ॥ भत्तामासे लेवे, कारण निक्कारणे य विवरीयं । मणिबंधाउ करेसुं, जत्तियामेत्तं तु लेवेणं ॥ ३ ॥ एवं खलु आइण्णं, तव्विवरीयं भवे अणाइण्णं । चलणादि जावसिरं, सव्वंमी होंति णायव्वा ॥ ४ ॥ मुहनयणचलणदंता, कक्खसिराबाहुबत्थिदेसा य । परिदाहदुगंछावत्तियं च उच्छोलणा देसे ॥ ५ ॥ एतच्चूर्णिर्यथा-' जे भिक्खू लहुसएण सीओदगेण ' इत्यादि लहुकं-स्तोकं यावत्तिण्णि पसती सीतोदगं-सीतलं उसिणोदगं-उण्हं वियडं-ववगयजीवं एत्थ सीओदगवियडेहिं सपडिवक्खेहिं चउभंगा सुत्ते य पढमततिया भंगा गहिया दो हत्था हत्थाणि वा दो पादा पादाणि वा बत्तीसं दंता दंताणि वा आसए पोसए य अण्णे य इंदियमुहा मुहाणि वा उछोलणं-धोवणं तं पुण देसे सव्वे य णिज्जुतिवित्थरो इमो । ' तिण्णि पसती तु ' गाहा, गतार्था ' आइण्णं ' गाहा, देसे उछोलणा दुविहा आइण्णा अणाइण्णा य साधुभिराचर्यते या सा आचीर्णा इतरा-तद्विपरीता, आइण्णा दुविहा कारणे णिक्कारणे य, जा कारणे सा दुविहा ॥ २ ॥ ' भत्तामासे लेवे ' गाहा, तत्थ भत्तामासे मणिबन्धाउ करेसु त्ति असणलेवाडेण हत्था लेवाडिया ते मणिबन्धातो जाव धोवति एसा भत्तामासे इमा लेवे ' जत्तियमेत्तं तु लेवेणं ' असज्झति य मुत्तपुरीसादिणा जत्तियसरीरावयवेण चलणादिगात्तं लेवाडितं तस्स तत्तियमेत्तं धोवइ एसा कारणओ, णिक्कारणे तव्विवरीयं ति । ३ । ' एवं खलु आइण्णं ' गाहा, भत्तामासे लेवे य इमं आइण्णं

तव्विवरीयं देसे सव्वे वा सव्वं अण्णाइणं तत्थ देसे इमं अणाइण्णं । ४ । ' मुहणयण ' गाहा, मुहणयणादियाण केसिं च दुगंच्छप्रत्ययं परिदाघप्रत्ययं वा देसे सव्वे वा उच्छोलणं करोतीत्यर्थः । ५ । तथाऽस्यैव सूत्रस्य भाष्ये चूर्णौ च कियदग्रतः स्नानस्य दोषानपवादं चाह- छक्कायाण विराहण, तप्पडिबंधो य गारवविभूसा । परिसहभीरुत्तंपि य, अविसासो चेव ण्हाणंमि । ६ । बितियपदं गेलण्णे, अद्धाणे वाइवाति (सय) मायरिते । मोहतिगिच्छभिओगे, ओमे जयणा य जा जत्थ ॥ ७ ॥ चूर्णिर्यथा-ण्हाणे इमे दोसा-' छक्कायाण ' गाहा, ण्हायंतो छज्जीवणिकाए वहति ण्हाणे पडिबंधो भवति-पुनः पुनः स्नातीत्यर्थः । अस्नातसाधुशरीरेभ्यो निर्मलशरीरोऽहमिति गारवं कुरुते, स्नान एव विभूषालङ्कारः इत्यर्थः । अण्हाणपरीसहाओ बीहति तं न जिणातीत्यर्थः, लोकस्याविश्रंभणीया एते स्नानदोषाः । ६ । इदाणिं कप्पिया-' बितियपद ' गाहा, गिलाणस्स सिंचणाति अंते वा सर्वस्नानं कर्त्तव्यम्, अद्धाणे श्रान्तस्य पादादिदेशस्नानं सर्वस्नानं वा कर्त्तव्यम्, वादिनो वादिपर्षदं गच्छतो पादादिदेशस्नानं सर्वस्नानं वा आचार्यस्य अततिशयमिति कृत्वा देशस्नानं सर्वस्नानं वा मोहतिगिच्छा एकिंदियादिसङ्घियाभिगमे वा देशादिस्नानं सर्वस्नानं वा करोति, रायादिअभियोगे सुदुल्लसियातिकारणेसु रायंतेपुरादिअभिगमे देशादिस्नानं कर्त्तव्यम्, ओमे-उज्जलवेसस्स भिक्खा लभति रंको वा मा भण्णिहिति जा जयणा जत्थ पाणए ण्हाणपाणे वा सा सव्वा कुज्जा । इति निशीथसूत्रे द्वितीयोद्देशके २० प्रतौ २ पत्रे । तद्भाष्ये १३४ प्रतौ १९ पत्रे । तच्चूर्णौ ४२० प्रतौ ७७ पत्रे ॥ २ ॥

अथ केचिदनाकलितश्रीजिनप्रवचनकला विकला इव कल्पितानल्पजल्पकल्पना अकल्प्यमपि नीचजुगुप्सनीयकुलाहारमाहारयन्ति, तेन च जिनशासनापभ्राजनां कुर्वतो ' मा मा च उच्चनीयमज्झिमकुलाइं ' इत्यादिविवदिषुः कंठाधरोष्ठं श्रमयेथाः, ऋद्ध्यपेक्षया गृहापेक्षया वेति तत्तात्पर्यस्यास्माभिः सुनिर्णीतत्वात् । इतरथा ' पडिकुट्ठकुलं न पविसे ' इत्यादिवचोभिः सह विरोधापत्तेः । तथैव चात्रापि नीचकुलपिण्डनिषेधः स्फुट एव । यथा-जे भिक्खू ठवणाकुलातिं अजाणिय अपुच्छिय अगवेसिय पुव्वामेव पिंडवायपडियाते अणुप्पविसइ अणुप्पविसंतं वा सातिज्जइ । त्ति । एतद्भाष्यं यथा-ठवणकुलाओ दुविहा, लोइयलोउत्तरा समासेणं । इत्तरिय यावकहिया, दुविहा पुण लोइया हुंति ॥ (१॥) सुयगमतगकुलाइं, इत्तरिया जे य हुंति निज्जूढा । जे जत्थ जुंगिया खलु, ते होंती आवकहियाओ ॥ (२॥) दुविहा लोउत्तरिया, वसहीसंबद्धएयरा चेव । सत्तघरंतरजाव उ, वसहीओ वसहिसंबद्धा ॥ (३॥) दाणे अभिगमसड्ढे, सम्मत्ते खलु तहेव मिच्छत्ते ।

॥१९९॥

मा मा एयचियत्ते य, एयरा होंति नायव्वा ॥ (४॥) एएसामन्नयरं, ठवणकुलं जो य पविसते भिक्खू । पुव्वं अपुच्छिऊणं, सो पावइ आणमादीणि ॥ (५॥) लोउत्तरंमिवि ठिया, लोयाण बाहिरत्तमिच्छंति । लोगजढे परिहरंतो तित्थविवुड्ढी य वण्णो य ॥ (६ ॥) अयसो पवयणहाणी विप्परिणामो तहेव कुच्छा य । लोगिगठवणकुलेसुं, गहणे आहारमाईणं ॥ (७॥) एतच्चूर्णिर्यथा-' जे भिक्खू ठवणकुलाइं ' इत्यादि ठप्पाकुलाठवणाकुला-अभोज्या इत्यर्थः । साहू ठवणाए ठाविज्जंति त्ति ठवणाकुला शय्यातरा इत्यर्थः । पुव्वदिट्ठे पुच्छा अदिट्ठे गवेसणा, अथवा नामेण वा गोत्तेण वा दिसाए वा पुच्छा थूभियादिचिंधेहिं गवेसणा, पुव्वं प्रथममादावेव जो पुण पुच्छणगवेसणं करोति तस्य पूर्वं भवतीत्यर्थः । ' ठवणा ' गाहा, समासो-संखेवो लोइया दुविहा-इत्तरिया आवकहिया य (१) ॥ इमे इत्तरिया-' सूतग ' गाहा, कालावहीए जे ठप्पा कया ते, ' निज्जूढा जे ' त्ति कुला जत्थ विसए जुंगिता-दुगुंछिता अभोज्या इत्यर्थः । कम्मेण वा सिप्पेण वा जातीए वा । कम्मेण ण्हाविया सोहिका मोरपोसका, सिप्पेण हट्टण्हाविता तेरिमा पतकरा निल्लेवा, जातीए पाणा डोंबा मोरुत्तिया य, खलुसद्दो अवधारणे ते चेव अन्नत्थ अजुंगिता जहा सिंधूए निल्लेवगा ॥ (२) ॥ इमे लोगुत्तरा । ' दुविहा ' गाहा, वसहीए संबद्धा य असंबद्धा य वसतिं मोत्तुं सत्तधरा वसतिसंबद्धा तेसु भत्तं वा पाणं वा ण घेत्तव्वं ॥ (॥३ ॥) इमा असंबद्धा । ' दाणे ' गाहा, अह भद्दो दाणरुई दाणसड्ढो सम्मदिट्ठी गहीताणुव्वतो अभिगमसड्ढो ' सम्मत्ते ' त्ति अविरसम्मदिट्ठी एतेसु एसणा दोसा, खलु-पादपूरणे, अभिग्गहितमिच्छे साहुपडिणीए ईसालुअत्तणेणं मा मम घरं अतीहिसमणत्ति, भए ति अन्नस्य ईसालुयत्तणेण चेव साहू घरं पविसंता अचियता वायाए भणति ण किंचि ॥ एतेसु विसगरपंतावणादिदोसा, इतरेति असंबद्धा (॥४॥) 'एए सा ' गाहा-कंठा (॥५॥) चोदग आह-लोगुत्तरे ठियाणं लोइयठवणापरिहारेण किं अम्हं, आचार्य आह-' लोउत्तर ' गाहा, पुव्वद्धं कंठं लोए दुगुंछा जे ते परिहरंतेण तित्थस्स वुड्ढी कता भवति ' वन्नो ' त्ति जसो पभावितो भवति (॥६॥) लोइयठवणकुलेसु गेण्हंतस्स इमे दोसा । ' अयसो ' त्ति गाहा, अयसो त्ति-अवन्नो पवयणहाणी न कश्चित् प्रव्रजति सम्मत्तचरित्ताभिमुहा विप्परिणमंति कावालिया इव लोए जुगुप्सिता भवन्ति, अस्पृश्या इत्यर्थः । पच्छद्धं कंठं (॥७॥) इति निशीथसूत्रे चतुर्थोद्देशके २० प्रतौ २ पत्रे । भाष्ये १३४ प्रतौ ३४ पत्रे । चूर्णौ ४२० प्रतौ १३१ पत्रे ॥ ३ ॥

अथ उत्सर्गतस्तावत्साधुभिर्मिथ्यात्ववर्णनं न कर्त्तव्यम् । अथ कदाचित् कारणबलादापन्ने च तत्कर्त्तव्ये यथा कर्त्तव्यं तल्लिख्यते-

जे भिक्खू मुहवन्नं करेति, करेंतं वा सातिज्जइ । त्ति । एतद्भाष्यं यथा-कुतित्थकुसत्थेसुं, कुधम्मकुव्वतकुदाणमाईसु । जो मुहवण्णं कुज्जा, उम्मगो आणमादीणि ॥ १ ॥ गंगादी सक्कमया, गणधम्मादी य गोव्वयादी य । भोम्मादी दाणा खलु, तिन्नितिसट्ठा उ उम्मग्गा ॥ २ ॥ असिवे ओमोयरिते, रायदुट्ठं भयेव गेलण्णे । एतेहि कारणेहिं, जयणाते कप्पती काउं ॥ ३ ॥ पण्णवणे उ उवेहं, पुट्ठो बंभादि वा धरेंते ते । आगाढे वा पुट्ठो से य भणेज्जा अव (तुह) विधम्मो ॥ ४ ॥ जे जे सरिसा धम्मा, सच्चाहिंसादितेहिं य पसंसे । एतेसिंपि हु आया, अत्थि हु णिच्चो कुणति वत्ति ॥ ५ ॥ एवं ता सव्वादिसु, भणेज्ज वेतुल्लिगेसिमं बूया । अम्हवि ण संति भावा, इयरेतरभावतो सव्वे ॥ ६ । एतच्चूर्णिर्यथा-' जे भिक्खू मुहवन्नं करेति ' इत्यादि मुहंति पवेसो तस्स चउव्विहो नामातीओ णिक्खेवो णामं ठवणातो गतातो, दव्वमुहं गिहादिवत्थुपवेसो तिन्नितिसट्ठा पावा दुयसया भावमुहं तस्स भावमुहस्स वन्नस्स अणतीति वन्नं आदत्ते गृह्णातीत्यर्थः । कथं पुण सो मुहवन्नं करोति ? ' कुतित्थकुसत्थेसु ' गाहा, बितियगाहाए जहासंखं उदाहरणं । 'गंगादी सक्क ' गाहा, गंगा आदिग्रहणतो प्रहासप्रयागअवकरंडसिरिमायकेयारादिया एते सव्वे कुतित्था शाक्यमतं-कापिलमतं इयरमतादिया सव्वे कुसत्था, मल्लगण-सारस्सयगणधम्मो कूपसभादिया सव्वे कुधम्मा गोव्वयादिया दिसापोक्खिया पंचग्गितावया पंचगव्वासणिया एवमादिया सव्वे कुव्वया, भूमिदाणं गोदाणं आसहत्थिसुवन्नादिया य सव्वे कुदाणा, कुत्सितार्थाभिधारणे खलुशब्दः । तिन्नितिसट्ठा पावा दुयसया जतिणवज्जा सेसा सव्वे उम्मग्गा जो जत्थ भतो तदणुकूलं भासंतस्स आणादिया दोसा चतुगुरुगं च पच्छितं मिच्छते य पवत्तीकरणं पवयणे उभावणया एते अदिन्नादाणा साणा इव एते चाडुकारिणो एतद्दोसपरिहरणत्थं तम्हा णो कुतित्थियाण मुहवन्नं करेज्ज (॥ १ ॥ २ ॥) ' असिवे ओमेय ' गाहा, सपक्खपंतासिवे परलिंगपडिवन्नो पसंसति, अहवा असिवोमेसु असंत्थरंतो तब्भावियखेत्तेसु थलीसु वा पसंसेज्ज परलिंगी वा जो रायदुट्ठं पसंसेज्जा तदाणुवत्तीते पसंसेज्जा रायभया बोहिगभएण वा सरणावगतो पसंसेज्ज अन्नतो गिलाणपाउगो अलब्भंते तेसु चेव लब्भंति पसंसेज्जा । (॥३ ॥) ' पण्णवणे ' गाहा, कारणे चरगादिभावितेसु खित्तेसु ठियस्स जति ते चरगादिया बहुजणमज्झे ससिद्धंतं पन्नवेंति तत्थ उवेहं कुज्जा मा पडितहकरणे खेत्तातो णीणिज्जेज्ज उवासगादिपुट्ठो अत्थि णं एतेसि णं भिक्खुयाणं वयो वा णियमे वा ताहे तेसिं दाणसड्ढयाणं अणुवत्तीए भणिज्ज एतेवि बंभव्वयं धरेंति आदिसद्दातो जीवेसु दयालुया अन्नतरे वा आगाढे-

॥209॥

गिलाणादिकारणे भणेज्जा इमा पसंसणे जयणा ॥ (॥४॥) ' जे जे सरिस ' गाहा, सरिसधम्मेहिं पसंसंति, तुम्हवि सच्चवयं अम्हवि, तुम्हवि अहिंसा अम्हवि, तुम्हवि अदिण्णादाणं वज्जं अम्हवि, तुम्हवि अत्थिया अम्हवि दव्वत्तेण वा, जहा तुम्हं निच्चो तहा अम्हवि निच्चो, जहा अम्हवि आता सुहासुहं कम्मं करेति तहा तुम्हवि (॥५॥) ' एवं तास ' गाहा, सच्छोभनो वादी सद्वादी आत्माऽस्तित्ववादीत्यर्थः । जे पुण वेतुलियातीसु इमं बूता विगयतुल्लभावे वेतुलिया नास्तित्ववादिन इत्यर्थः । सव्वभावा इतरेतरभावतो णत्थित्ति, नित्यत्वं अनित्यत्वे नास्ति, एवं आत्मा अनात्मा, कर्तृत्वमकर्तृत्वं, मूर्त्तत्वं सर्वगत्वं अमूर्त्तत्वं घटत्वं पटत्वं परमाणुत्वं द्विप्रदेशिकत्वं कृष्णत्वं नीलत्वं अश्वत्वं एवमादि । इति श्रीनिशीथसूत्रे (एकादशोद्देशे) २०नीप्रतौ ११ पत्रे । भाष्ये १३४ प्रतौ ६९ पत्रे । चूर्णौ ४२० प्रतौ २०९ पत्रे ॥ ४ ॥

साधुनां हि पलालादितृणानां सलोमालोमचर्मणां तूलिकागंडोपधानादीनां यावदन्येषामपि तथाविधानां शुषिराणां अप्रतिलेख्यानामुपभोगः कर्तुं न कल्पते कारणं विना । किं बहुना पुस्तकाद्यपि स्वनिश्रया न रक्षणीयं; न लिखनीयं च, महादोषहेतुत्वात् । तथा हि-

जे भिक्खु सलोमाइं धरेति धरेंतं वा सातिज्जइ । त्ति । एतद्भाष्यं यथा-चम्मम्मि सलोमम्मी, ठाणं निसीयणतुयट्टणादीणि । जे भिक्खू वेए(य करे) ज्जा, सो पावति आणमादीणि ॥ १ ॥ गेण्हंते चिट्ठंते, णिसियंते चेव तह तुयट्टंते । लहुगा चउजमलपदा, चरमपदे दोहिवी गुरुगा ॥ २ ॥ अविदिण्णोवहि पाणा, पडिलेहावि य ण सुज्झइ सलोमे । वासासु असंसज्जति, पदावणऽपदावणा दोसा ॥ ३ ॥ अजिणसलोमं जतिणं, ण कप्पते झुसिर तं तु पंचविहं । पोत्थगतणपणगं वा, दुसदुविधचम्मपणगं च ॥ ४ ॥ गंडी कच्छवि मुट्ठिय, संपुडफलए तहा छिवाडी य । साली वीही कोद्दव, रायगरण्णे तणाइं च ॥ ५ ॥ अप्पडिलेहियदूसे, तूली उवधाणगं च णायव्वं । गंडुवधाणालिंगिणि, मसूरते चेव पोत्तमए ॥ ६ ॥ पल्हवि १ कोयवि २ पावार ३, णवतते ४ तव्व य दाडिगाली ५ उ । दुप्पडिलेहियदूसे, एवं बितियं भवे पणगं ॥ ७ ॥ अथ एलुगाविमहिसी-मिगाणमजिणं च पंचमं होइ । तलिगा खल्लगवज्झे, कोसग कत्तीय बितियं ॥ ८ । पोत्थगजिणदिट्ठंतो, वग्गुर लेवे य जालचक्के य । लोहिग लहु आणादी सुयाण संघट्टणावज्जे ॥ ९ ॥ चउरंगवग्गुरापरिवुडोवि फिट्टेज्ज अवि मिगोरण्णे । खीरखउरलेवे वा, पडिओ सउणो पलाएज्जा ॥ १० ॥ दारं । सिद्धत्थगजालेणं,

गहितो मच्छोवि णिप्फिडिज्जाहि । तिलकीडगावि चक्को तिलावि णय ते ततो जीवा ॥ ११ ॥ जइ तेसिं जीवाणं, तत्थ गयाणं तु लोहियं होज्जा । पीलिज्जंते धणियं, गलेज्ज तं अक्खरे फुसियं ॥ १२ ॥ जत्तियमित्ता वारा, मुंचति बंधति व जत्तिया वारा । जति अक्खराणि लिहति च, तति लहुगा जं च आवज्जं ॥ १३ ॥ दारं । तणपणगंमिवि दोसा, विराहणा होंति संजमा ताते । सेसेसुवि पणएसुं, विराहणा संजमे होंति ॥ १४ ॥ अहिविच्छुगविसकंटगमादीहि खयं व होज्ज आतातें । कुंथंमि संजमंमि य, जह उव्वत्ता तती लहुगा ॥ १५ ॥ दिट्ठसलोमे दोसा, निल्लोमं नाम कप्पते घेत्तुं । गेण्हणे गुरुगा पडिलेहपणगतसपाणसतिककरणं ॥ १६ ॥ भुत्तस्स सतीकरणं, सरिसं इत्थीणमेयफासेणं । जइया अचेयणेऽयं, फासो किमु चेयणे वित्ति ॥ १७ ॥ बितियपयं तु गिलाणे, वुड्ढे तद्दिवसभुत्तजयणाए । णिल्लोमगिलाणे मक्खणट्ठं, घट्ठे भिण्णे च अरिसाओ ॥ १८ ॥ संथारट्ठगिलाणे, अमिलायजियाण सरोमगिण्हंति । वुड्ढाऽसहबालाण वा, अछुरणाएवि एमेव ॥ १९ ॥ कुंभारलोहकारेहिं, दिवसमलियं तु जं तसविहूणं । उवरिं लोमे काउं, सोउं पाउपणामेंति ॥ २० ॥ जह कारणे सलोमं तु , कप्पती तह हवेज्ज इयरंपि । आगाढे असलोमं, आदिकाउं जा पोत्थते गहणं ॥ २१ ॥ अवताणगादिणिल्लोम, तेल्लमक्खणट्ठघेप्पई अतिणं । घट्ठा व जस्स पासा, गलंतकोढेऽरिसासुं वा ॥ २२ ॥ सोणियपुव्वालित्ते, दुक्खं धुवणा दिणे दिणे वीरे । कच्छुल्ले किडिमिल्ले, छप्पतिमिल्ले ण णिल्लोमं ॥ २३ ॥ भत्तपरिण्णगिलाणे, कुसुमादि खरासती य झुसिरावि । अप्पडिलेहिय दूसाऽसती तु पच्छा तणा होंति ॥ २४ ॥ अप्पडिलेहियदूसं, अद्धाणादी विचित्तगेण्हंति । घेप्पति पोत्थगपणगं, कालिगणिज्जुत्ति कोसट्ठा ॥ २५ ॥ एतच्चूर्णिर्यथा-'जे भिक्खू सलोमा ' इत्यादि सह लोमेहिं सलोमं अहिट्ठेह नाम ममेयंति जो गिण्हइ तस्स चउलहुं । ' चम्मंमि ' गाहा, सलोमे चम्मे जो ठाणं चेवत्ति करेइ णिसीयइ तुयट्टइ वा सो आणादी दोसे पावेति (॥१॥) इमं च से पच्छित्तं-' गिण्हंते ' गाहा, गेण्हणादिएसु चउसु ठाणेसु चउलहुगा चउरो हवंति ' जमलपयंति ' कालतवातेहिं विसिट्ठा दिज्जंति चरिमपयंति-तुयट्टणं तंमि चरिमपदे दोहिंवि कालतवेहिं गुरुगा इत्यर्थः । (॥२ ॥) अन्ने य इमे दोसा-' अविदिण्णे ' गाहा, तित्थकरेहिं अविदिन्नोवही रोमंतरेसु य पाणा संमुच्छंति, सरोमे पडिलेहणा ण सुज्झति कुंथुपणगादितेहिं वासासु संसज्जति, जह संसज्जणभया पतावेइ तो अगणिविराहणा अह न पयावेइ तो संसज्जति उभयथावि दोसा । (॥३॥) सलोमदोषदर्शनार्थं, झुसिरप्रतिपादनार्थं चेदमाह-' अजिण ' गाहा, चर्म-अजिनं

॥203॥

'जतयो' त्ति साहवो तं तेसिं न कप्पए, झुसिरदोषत्वात् । शिष्य आह-किं झुसिरं कइविहं ? वा के वा तत्थ दोसा ? आचार्य आह-झुसिरं-पोल्लं जीवाश्रयस्थानमित्यर्थः । तं इमं पंचविहं पोत्थगपणगं तणपणगं, पणगशब्दः प्रत्येकं योज्यः । दूसं-वत्थं तत्थ दो भेदा-अपडिलेहपणगं दुप्पडिलेहपणगं च चम्मपणगं च पंचमं (॥४॥) इमं पोत्थगपणगं । ' गंडी ' गाहा-दीहो बाहल्लपुहत्तेण तुल्लो चउरंसो गंडीपोत्थगो १, अंते तणुओ मज्झे पिहलो अप्पबाहल्लो कच्छभी २, चउरंगुलो दीहो वा वृत्ताकृती मुट्ठीपोत्थगो अहवा चउरंगुलदीहो चउरंसो मुट्ठिपोत्थगो ३, दुगाइफलगा संपुडं ४, दीहो हस्सो वा पिहुलो अप्पबाहल्लो छेवाडी । अहवा तणुपत्तेहिं उस्सीओ छेवाडी ५ । ' राउल ' गाहा-कंगुपलालं स मगाइया रन्नतणा (॥५॥) ' अप्पडि ' गाहा, एगबहुकमेगरगा तूली अक्कडोड्डगाइतूलभरिया वा तूली १ पूयादिपुन्नं सिरोवहाणमुवहाणगं २ तस्सोपरि गंडपदेसे जा दिज्जति सा गंडुवधाणिगा ३ जाणुकोप्परादिसु जा दिज्जति सा आलिंगणी ४ चम्मवत्थकतं वा वट्टपूयादिपुन्नं विवसणं मसूरगो ५ । इमं दुप्पडिलेहियपणगं (॥६॥) 'पल्हवि ' गाहा, पल्हवी गयत्थरणी जो य वदुत्थरगादिसूयिमाणभेदा मट्ठरोमा अभ्युत्तरोमा वा ते सव्वे एत्थ निवयंति १ । कोयविगो वरक्कातो जे अन्ने वावि भेदा विउलरोमा कंबलगादि ते सव्वे एत्थ निवयंति २ पावारगो पुल्लपडवत्तिगाइ अत्थुरणं पाउरणं वा ३ अकत्तियउन्नाए नवयं कज्जत्ति ४ धोयपुत्ती दाढीयाली विरलियादिभूरिभेदा सव्वे एत्थ निवतंति (॥७॥) ' अथ एल, ' गाहा, अथवा बितियाएसेण पच्छद्धगहियं चम्मपणगं (॥८॥) इयाणिं झुसिरदोसा भणंति, तत्थ पढमं पोत्थगे इमा दारगाहा-' पोत्थग ' गाहा, ' झुसिरो ' त्ति पोत्थगो णय घेत्तव्वो जिणेहिं तत्थ बहुजीवोवघातो दिट्ठो इमो दिट्ठंतो-वग्गुरा अस्य व्याख्या-चउरंगिणी सेणा हत्थी १ अस्सा २ रहा ३ पाइक्का ४ स एव वागुरा, तया परिवृत्तः आहेडगारूढेहिं समंताद्वेष्टित इत्यर्थः । अवि तत्थ मिगो छुट्टेज्ज न य पोत्थगपत्तंतरट्ठिया जीवा छुट्टेज्जा ' लेवि ' त्ति सउणो पक्खी सो मच्छिगादी सो खीरे पडितो चिक्कणे वा अनंतरं खउरे अन्नत्थ वा अवस्त्रावणादिचिक्कणलेवे पडितो पलायेन्नश्यतीत्यर्थः, न च पुस्तकपत्रान्तरजालेत्ति (॥१०॥) ' सिद्धत्थग ' गाहा, सिद्धत्थगादि जेण जालेण घिप्पंति तं सिद्धत्थगजालं अवि तत्थ मच्छो न घेप्पज्ज नय पोत्थगे जीवा ण घेप्पिज्जा । ' चक्के तिलावि ' त्ति तिलपीलगचक्के तिला कीडगा वा छुट्टेज्जा न य पोत्थगे जीवा (॥११॥) ' लेहिय ' त्ति । अस्य व्याख्या-' यदि तेसिं ' गाहा-' तत्थ गयाणं ' ति कुंथुमादि जोणिगाणं जहा तिलेसु पीलिज्जंतेसु तेसु तेल्लं णीती

॥२०४॥

तहा यदि तेसिं जीवाणं रुहिरं होज्जा तो पोत्थगबंधणकाले तेसिं जीवाणं सुट्ठुपीलिज्जंताणं अक्खरे फुसिउं रुहिरं गलेज्जा (॥१२॥) ' लहुग ' त्ति । अस्य व्याख्या-' जत्तिय ' गाहा, बघणमुयणे य संघट्टणादि आवज्जति तं च पच्छित्तं सेसं कंठं (॥१३॥) इयाणिं तणपणगादिसु दोसा । ' तणपणग ' गाहा-तणेसु झुसिरत्ति काउं चउलहू (॥१४॥) दुविहा विराहणा य इमा । ' अहिविच्छुग ' गाहा, पुव्वद्धेण आयविराहणा कुंथुमादीसु विराहिज्जंतेसु संजमविराहणा जत्तिया वारा उव्वत्तति परावत्तति वा आउंचति पसारति वा तत्तिया चउलहू । अह गहियं झुसिरत्ति परिच्चयति तो अहिगरणं न य झुसिरतणेसु पडिलेहणा सुज्झति सेसा पणगा अप्पडिलेहियचम्मपणगं च एतेसु गहणे चउलहू धूवा य संजमविराहणा आयविराहणा जहासंभवा जम्हा एते दोसा तम्हा पोत्थगादिझुसिरा ण कप्पंति घेत्तुं । (॥१५॥) चोदग आह-' दिट्ठस ' गाहा, चोदगो भणति-अम्हमुवगतं सलोमे चम्मे दिट्ठा दोसा तं मा कप्पतु अच्छतु आवण्णं, निल्लोमं कप्पतु । आयरितो भणति-निलोमं गेण्हंतस्स चउगुरुगा चिट्ठंतस्स णिसियंतस्स तुयट्टंतस्स तिसुवि चउगुरुगा कालतवविसेसिता तत्थ पडिलेहा ण सुज्झति निलोमे कुंथुमादिया य तसा संमुच्छंति । तं च सुकुमारं इत्थीफासतुल्लं तत्थ भुत्तभोगीणं सतिकरणं भवति, अभुत्तभोगीणं च इत्थीफासे कोउयं जणेति । (॥१६॥) इदमेवात्थमाह-' भुत्तस्स ' गाहा, जदि ताव अचेयणे अयं एरिसो सुहफासो ' इयर ' त्ति सचेयणे इत्थीसरीरे सागारिये वा किमित्यतिशयो भवेत्, द्रष्टव्यः । यस्मादेते दोषा तम्हा निल्लोमंपि न घेतव्वं । (॥१७॥) जइ अववादतो चम्मं गेण्हति तदा पुव्वं सलोमं तत्थिमं । ' बितियपद ' गाहा, ' गिलाणे वुड्ढे ' त्ति । अस्य व्याख्या-' संथारट्ठ ' गाहा, गिलाणस्स अच्छुरणट्ठा घेप्पति तं च अमिलादि अजिणं वुड्ढअसहबालाणवि कारणे अच्छुरणट्ठा एमेव घेप्पति । (॥१९॥) ' तद्दिवसभुत्तजयणाए ' त्ति । अस्य व्याख्या 'कुंभारलोह ' गाहा, कुंभारादिया तत्थ दिवसतो य चेट्ठाकम्मं करेंति । तम्मि तद्दिवसं परिभुंजमाणे तसादिया पाणा ण हवंति तद्दिवसंते उट्ठितेसु तेसु तं पडिहारियं गिण्हंति रातो अछुरित्ता पातो-पभाए पच्चप्पिणंति एस गहणपरिभोगजयणा (॥२०॥) इयाणीं अलोमस्सावववादो 'निल्लोम ' पच्छद्धं निल्लोमं सलोमाभावे गिलाणादि अच्छुरणट्ठा घेप्पति । ' अवताण ' गाहा, तेण वा मक्खणट्ठा कुलागादिवासेसु वा घट्ठेसु वा अच्छुरणट्ठा भिन्नकुट्टिपरिहाणच्छुरणट्ठा वा अरिसासु वा सवंतीसु उवेसणट्ठा गिण्हंति । अस्यैव व्याख्या-' जह कारणे ' गाहा, ' इयरं ' ति अलोमं आगाढे-कारणे तं अलोमं काउं अप्पणो झुसिरपरिभोगट्ठाणेसु पच्छाणुपुव्वीते ताव

॥२०५॥

गहेयव्वं जाव पोत्थगोत्ति अलोमगहणकारणाणं वक्खाणं इमं । ' अवताण ' गाहा, गतार्था । (॥२२॥) भिन्नकुट्ठारिसासु अलोमचम्मगहणं च इमेण कारणेण ण घेप्पति । ' सोणित ' गाहा, कच्छू-पामा किडिभं-कुट्ठभेदो सरीरेगदेसे भवति छप्पदातो वा जस्स अतीव संमुच्छंति सनिल्लोमपरिहाणं गेण्हति एमादिकारणेहिं निल्लोमं घेप्पति (॥२३॥) तणदुसझुसिरग्गहणे इमा जयणा ' भत्तपरि ' गाहा, भत्तपच्चक्खायस्स गिलाणस्स वा अववादे जयणाए घेप्पति तदा अझुसिरा कुसादी घेत्तव्वा अथ ते खरा असहा वा तेसिं तहि झुसिरावि घेप्पंति । अहवा भत्तपच्चक्खाणस्स गिलाणस्स अववातेणं अप्पडिलेहियदूसग्गहणं पत्तं तं तूलिमादी घेत्तव्वं तस्स असती अझुसिरझुसिरा तणा घेत्तव्वा (॥२४॥) ' दुप्पडिलेह ' गाहा, अद्धणादिसु विवत्ता जहुत्तोवहिअलभंता दुप्पडिलेहियपणगं गेण्हंति । मेहाओ गहणधारणादिपरिहाणिं जाणिऊण कालियसुयट्ठा कालियसुयणिज्जुत्तिनिमित्तं वा पोत्थगपणगं घेप्पति । कोसोत्ति-समुदायो । इति श्रीनिशीथसूत्रे (द्वादशोद्देशे) २० प्रत्तौ ११ पत्रे । भाष्ये १३४ प्रतौ ८१ पत्रे । चूर्णौ ४२० प्रतौ २३७ पत्रे ॥ ५ ॥

तथा साधूनां प्रातिहारिकव्यापारणमनुचितं, बहुदोषत्वात् । तथा हि-

" जे गिहिवत्थं परिहेति, परिहेंतं वा सातिज्जति त्ति । एतद्भाष्यं यता-गिहिमत्ते जो उ गमो, णियमा सो चेव होइ गिहिवत्थे । नायव्वो उ मइमया पुव्वे अवरम्मि य एयम्मि ॥ १ ॥ कोट्टियछिण्णे उद्दाढमतिले अंकिते व अचियत्तं । दुग्गंधजूयतावण, उप्फोसणधोवधूवणया ॥ २ ॥ " एतच्चूर्णिर्यथा-जे भिक्खू गिहिवत्थं इत्यादि, गिहिवत्थं पाडिहारियं भुंजंतस्स चउलहुं आणादिया य दोसा । ' गिहिमत्ते ' गाहा, कंठा, इमे विसेसदोसा । ' कोट्टित ' गाहा, मूसगेण कुट्टितं पमाणातिरित्तं छिन्ने दोसा अछिन्ने सकज्जहाणी घयतेलादिणा वा अंकियं एमाइएहिं कारणेहिं अचियत्तं भवइ साहूणं अण्हाणपरिमलेण वा दुग्गंधं जुगुंछति । ' जूय ' इति छप्पया भवंति छड्डेति वा ताओ अगणिउण्हेण वा तावेति संजतेहिं परिभुत्तं उप्फोसति धोवति वा दुग्गंधं वा धूवेति । इति श्रीनिशीथसूत्रे (द्वादशोद्देशे) २० प्रतौ ११ पत्रे । भाष्ये १३४ प्रतौ ८२ पत्रे । चूर्णौ ४२० प्रतौ २३८ पत्रे ॥ ६ ॥

तथा साधूनां गृहस्थगृहे गतानामुपवेष्टुं न कल्पते, निषिद्धत्वात् । तथा हि-

जे भिक्खू गिहिणिसेज्जं वाहेति वाहेंतं वा सातिज्जति त्ति । एतद्भाष्यं यथा-गोयरमगोअरे वा, जे भिक्खू णिसेवती गिहिणिसेज्जं ।

आयारकहा दोसा, अववादस्सावववादो य ॥ १ ॥ बंभस्स होइऽगुत्ती, पाणाणंपि य वहो भवे अवही । चरगादी पडिघातो, गिहीणपडियत्तसंकादी ॥ २ ॥ खरते खरियासुं वा, णट्ठे वट्टखुरे य संकेज्जा । खण्णे अगणिकाए, दारवती संकणा हरिते ॥ ३ ॥ उच्छुद्धसरीरे वा, दुब्बलतवसोसिते व जे होज्जा । थेरे जुण्णमहल्ले, वीसंभणवेसहयसंको ॥ ४ ॥ एतच्चूर्णिर्यथा-' जे भिक्खू गिहिणिसेज्जं ' इत्यादि, गिहिणिसेज्जा-पलियंकादी तत्थ णिसीदंतस्स चउलहुं आणादिया य दोसा । ' गोयर ' गाहा, भिक्खायरियाए गतो अगतो वा धम्मत्थकामा आयारकहा तत्थ जे दोसा भणिया ते गिहिणिसेज्जं वाहेंतस्स इह वत्तव्वा, अस्थाने अपवादापवादश्च कृतो भवति । किं चान्यत् ' बंभस्स ' गाहा ' खरए ' गाहा, गिहिणिसेज्जं वाहेंतस्स बंभचेरअगुत्ती भवति अवधिपाणीणं वधो । उदाहरणम् धम्मत्थकामाए चरगादी भिक्खागयाणं साधुसमीवसन्निविट्ठा कहमुट्ठेमित्ति पडिसेहं करेति किमेस संजत्तो णिविट्ठो चिट्ठतित्ति अचियत्तं मेहुणासंका भवति खरगादीसु य णट्ठेसु स संजतो संकिज्जति खेत्ते वा खए अगणिणा वा दड्ढे दारेण वा हरिते वतीवोछेत्तुं हरिते साधू संकिज्जति । जम्हा ऐते दोसा तम्हा णो गिहिणिसेज्जं वाहेइ इमेसिं पुण अणुण्णा । ' उच्छुद्ध ' गाहा, वाउसग्गं अवकरेंतो मलपंकियसरीरो उच्छुद्धसरीरो भन्नति रोगपीडितो दुब्बलसरीरो तबसोसियसरीरो वा जो थेरत्ति सट्ठिवरिसे विसेसेणं जुन्नसरीरे ' महल्ले ' त्ति सव्वेसिं वुड्ढतरो संविग्गो वेसधारी विसंभणवेसो चेव हतसंको । अहवा तत्थ णिसन्नो ण संकिज्जति जे केणइ दोसेण सो हतसंको । इति श्रीनिशीथसूत्रे (द्वादशोद्देशे) २० प्रत्रौ ११ पत्रे ॥ भाष्ये १३४ प्रतौ ८२ पत्रे चूर्णौ ४२० प्रतौ २३८ पत्रे ॥ ७ ॥

अथ साधूनामुपकरणादिकं गृहस्थैर्वाहयितुं न कल्पन्ते, इति लिख्यते-

जे भिक्खू अन्नउत्थिएण वा गारत्थिएण वा उवहिं वहावेइ वहावेंतं वा सातिज्जति त्ति । एतद्भाष्यं यथा-जे भिक्खू उवगरणं, वहावइ गिहीहिं अहव अण्णतित्थीहिं । आहारं वा देज्जा, पडुच्च तं आणमादीणि (॥१॥) पाडिज्ज व भिंदेज्ज, मलगंधाऽवण्णच्छप्पतिअनासो । अत्थंडिले ठवेज्ज, हरेज्जा वा सो व अण्णो वा ॥ २ ॥ चूर्णिर्यथा-' जे भिक्खू अन्नउत्थिएण वा ' इत्यादि, 'जे भिक्खू ' गाहा, ममेस उवकरणं वहइत्ति पडुच्च आहारं देज्जा तस्स चउलहुं आणादिया य दोसा इमे-' पाडिज्ज ' गाहा, स गिहत्थो अन्नतित्थिओ वा उवकरणं पाडिज्जा भायणं वा भिंदेज्जा मलिणे दुग्गंधे वा उवकरणे अवन्नं वदेज्ज छप्पतिआओ वा छड्डेज्ज वा मरिज्ज वा, अथवा-सो अयगोलो

अथंडिले पुढविहरियादिसु ठवेज्ज । अहवा तस्स भारेण आयविराहणा हवेज्जा तत्थ परितावणादी जं व ओसहभेसज्जाणि वा करेंतो वा विराधेति तण्णिप्फण्णं च से पच्छित्तं तं उवकरणं सो वा हरेज्जा अणुवउत्ते वा अन्नो हरेज्ज किं च जो तं पडुच्च असणादी देज्जा तस्स चउलहुं । इति श्रीनिशीथसूत्रे (द्वादशोद्देशे) २० प्रतौ १२ पत्रे । भाष्ये १३४ प्रतौ ८५ पत्रे । चूर्णौ ४२० प्रतौ २४५ पत्रे ॥ ८ ॥

केचिद्वदन्ति दन्तास्थिरुधिरमांसादिमये शरीरे सत्येव किमिदं यदस्वाध्याये सति सिद्धान्तादि न गणनीयमित्यादि, परं तदुन्मत्तप्रलपितमित्यपकर्णनीयं, यतोऽस्वाध्याये सति सिद्धान्तपाठस्य सुतरां निषिद्धत्वात् । तथा हि-

॥२०८॥

जे अप्पणो असज्झायंसि सज्झायं करेति, करेंतं वा सातिज्जइ त्ति । एतद्भाष्यं यथा-अव्वाउलाण णिच्चोडुयाण मा होज्ज णिच्चऽसज्झाओ । अरिसाभगंदलादिसु, इति वायणसुत्तसंबन्धे ॥ १ ॥ आयसमुत्थमसज्झाइयं तु, एगविध होइ दुविधं वा । एगविधं समणाणं, दुविधं पुण होइ समणीणं ॥ २ ॥ धोतंमि य णिप्पोग्गल-बंधा तिण्णेव होंति उक्कोसा । परिगलमाणे जयणा, दुविधंमि य होइ कायव्वा ॥ ३ ॥ समणो उ वणे व, भगंदले व बंधेक्क काउ वाएति । तहवि गलंते च्छारं, दाउं दो तिण्णि वा बंधा ॥ ४ ॥ एमेव य समणीणं, वणंमि इयरंमि सत्तबंधाओ । तहवि अद्धावायमाणे, धोत्तूण अहव अण्णत्थ ॥ ५ ॥ एते सामण्णतरे, असज्झाए अप्पणो व सज्झायं । जो कुणइ अजयणाए, सो पावइ आणमादीणि ॥ ६ ॥ सुयणाणंमि अभत्ती, लोगविरुद्धं पमत्तछलणा य । विज्जासाहण-वेगुण्णधम्मयाए य मा कुणसु ॥ ७ ॥ जदि दंतअट्ठिमंससोणियादी असज्झाया णणु । देहो एयमतो चेव, कहं तेण सज्झायं करेइ ॥ ८ ॥ कामं देहावयवा, दंतादी अबजुया तह विवज्जा । अणवजुत्ता उण वज्जा, इति लोए उत्तरे चेव ॥ ९ ॥ अब्भंतरमालिन्ने, कुणंति देवाण अच्चणं लोए । बाहिरमालिन्ने पुण ण कुणइ अवणिइयतत्तेणं ॥ १० ॥ त्ति । एतच्चूर्णिर्यथा-' जे भिक्खू अप्पणो असज्झाइए ' इत्यादि, अप्पणो सरीरसमुत्थेवि असज्झाइए सज्झाओ अप्पणा न कायव्वो । परस्स पुण वायणा दायव्वा महंतेसु गच्छेसु अव्वाउलत्तणओ समणीण य णिच्चोडुयसंभवे माऽसज्झाओ पुण भविस्सति तेण वायणसुत्ते विही भण्णति । आयसमुत्थमसज्झाइयस्स इमे भेदा- ' आयस ' गाहा, एगविहं समणाणं तं च व्रणे भवति, समणीणं दुविहं वणे उडुसंभवं च, इमं वणे विहाणं ' धोयंमि ' गाहा, पढमं चिय व्रणो हत्थसयस्स बाहिरतो धोविउं णिप्पोग्गलो कतो ततो परिगलेंते तिण्णि बंधा उक्कोसेणं करेंतो वाएति दुविहं च व्रणसंभवं उडुयं

च दुविहेवि एवं पट्टगजयणा कायव्वा । ' समणो ' गाहा, व्रणं धोवेइ णिप्पोग्गले हत्थसयबाहिरतो पट्टगं दाउं वाएइ, परिगलमाणे भिण्णे तम्मि पट्टगे तस्सेव उवरिं छारिं दाऊण पुणोवि पट्टगं देति वाएति य, एवं ततियंपि पट्टगं बंधेज्ज वायणं वट्टेज्ज, ततो परं परिगलमाणे हत्थसयबाहिरं गंतुं व्रणं पट्टगं च धोवेति, तओ पुणो एतेणेव कमेण वाएति, अहवा अन्नत्थ गंतु पढंति । ' एमेव य ' गाहा, ' इयंर ' ति उडुयं एवं चेव णवरं सत्तबंधा उक्कोसेण कायव्वा तहवि अट्ठंते हत्थसयबाहिरतो धोविउं पुणो वाएंति । अहवा अण्णत्थ पढंति । ' एते सा ' गाहा, आणादिया य दोसा भवंति इमे य 'सुयणाण ' गाहा, सुअणाणे अणुवचारतो अभत्ती भवति अहवा सुयणाणभत्तिरागेण असज्झातिते सज्झातियं मा कुणसु उवदोसा एस जं लोगधम्मविरुद्धं च तण्ण कायव्वं, अविहीए पमत्तो लब्भति तो देवया छलेज्ज जहा विज्जासाहणवेगुण्णयाए विज्जा न सिज्झति तहा इहंपि कम्मक्खओ न भवति, वैगुण्यं-वैधर्म्यता विपरीतभावेत्यर्थः । धम्मयाए य सुयधम्मस्स एस धम्मो जं असज्झाइए सज्झाइयवज्जणं (ण) करेंतो य सुयणाणं विराहेइ तम्हा मा कुणसु ' चोदग ' गाहा, जदि दंतअट्ठिमंससोणियादी असज्झाया णणु देहो एयमतो चोव, कहं तेण सज्झायं करेह ? आचार्य आह-' कामं देह ' गाहा, कामं चोदगाभिप्पायअणुमयत्थे सम्मं तम्मयो देहोवि जे सरीरातो ' अवयुत ' त्ति पृथग्भावे वज्जणिज्जा जे पुण अणवजुया ते तत्थ अवज्जणिज्जा इति उपप्रदर्शने एवं लोगे दृष्टं, लोगोत्तरेऽप्येवमित्यर्थः । किं चान्यत्-' अब्भंतर ' गाहा, अभ्यंन्तरा मूत्रपुरीषादी तेहिं चेव उ बाहिरे उवलित्तो कुणइ तो अवण्णं करेइ । इति श्रीनिशीथसूत्रे (एकोनविंशत्युद्देशे) २० प्रतौ १६ पत्रे । भाष्ये १३४ प्रतौ १२४ पत्रे । चूर्णौ ४२० प्रतौ ३५० पत्रे । इति स्वाध्यायविचारः । अथ यदि परास्वाध्यायविचारोऽपेक्षितस्तदा इतोऽनन्तरमेव पाश्चात्यसूत्राणां भाष्यचूर्णी विलोकनीये ॥ ९ ॥

॥ इति निशीथसूत्रभाष्यचूर्णिविचाराः समाप्ताः ॥

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरीश्वरशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते विचाररत्नाकरेऽपरतटे श्रीनिशीथविचारनामा प्रथमस्तरङ्गः ॥ १ ॥

यद्वदनामृतकुंडादुदिता मुदितं करोति जननिवहं । अमृतच्छटेव वाणी, स जयति जिनपुङ्गवो वीरः ॥ १ ॥

॥२०९॥

अथ श्रीमहानिशीथविचारा लिख्यन्ते-

तत्र च समुदायीकृतसकलपापप्रकृतिभ्योऽप्यसङ्ख्यातगुणं व्रतसंयमखंडनोत्सूत्रभाषणादरणोपेक्षणोद्भवं पापमित्यभिप्रायो लिख्यते-

दुप्पडिक्कंताणं नियकम्माणं ण अवेइयाणं मोक्खो घोरतवेणं अज्झोसियाणं वा, अणुसमयं बंधए, कम्मं नत्थि अबंधो उ पाणिणो मोत्तुं सिद्धे अजोगी य सेलेसीसंठिए तहा, सुहं सुहज्झवसाएणं असुहं दुट्ठज्झवसायाओ, तिव्वयरं तिव्वयरेण मंदं मंदेण वा संचिण्णे, सव्वेसिं पावकम्माणं एगीभूयाण जत्तियं रासिं भवे तमसंखगुणं वयतवसंजमचारित्तखंडणविराहणे उस्सुत्तमग्गपन्नवणपवत्तणआयर-णोवेक्खणेण य समज्जिणेइ अपरिमाणगुरुतुंगा, महया घणनिरंतरा, पावरासी खयं गच्छे, जहा तं सव्वोवाएहिमायरे ॥ आसवदारे निरुंभित्ता, अप्पमादी भवे जया । बंधे सप्पं बहुं वेदे, जह सम्मत्तं सुनिम्मलं ॥ १ ॥ आसवदारे निरुंभित्ता, आणं नो खंडए जया । दंसणनाणचरित्तेसु, उज्जुतो य दढं भवे ॥ २ ॥ तया वेए खणं बंधे, पोराणं च सव्वं खवे । अणुइण्णमवि उइरित्ता, निज्जियघोरपरीसहो ॥ ३ ॥ आसवदारे निरुंभित्ता, सव्वासायणवज्जिओ । सज्झायज्झाणजोगेसुं, धीरवीरतवे रओ ॥ ४ ॥ इति श्रीमहानिशीथद्वितीयाध्ययन ८ पत्रे ॥ १ ॥

मैथुनसेवी साधुः सर्वथाऽवन्द्यः । यस्तु तं वन्दते सोऽप्यनन्तसंसारी, इत्यक्षराणि लिख्यन्ते-

से भयवं ! जे णं केई साहू वा साहूणी वा मेहुणमासेवेज्जा से णं वंदेज्जा ? गोयमा ! जे णं साहू वा साहुणी वा मेहुणं सयमेव अप्पणा सेवेज्ज वा परेहिं उवइसेत्तुं सेवाविज्जा वा सेविज्जमाणं समणुजाणिज्जा वा जे दिव्वं वा माणुसं वा तिरिक्खजोणियं वा जाव णं करकम्माइं सचित्ताचित्तवत्थुविसयं वा विविहज्झवसाएण कारिमाकारिमोवगरणेण मणसा वा वयसा वा काएणं से णं समणे वा समणी वा दुरंतपंतलक्खणे अदट्ठव्वे अमग्गसामायारी महापावकम्मे णो णं वंदिज्जा णो णं वंदावेज्जा णो णं वंदिज्जमाणं समणुजाणेज्जा तिविहं तिविहेणं जाव णं विसोहिकालं ति । से भयवं ! जे वंदेज्जा से किं लभेज्जा ? गोयमा ! जे तं वंदेज्जा से अट्ठारसण्हं सीलंगसहस्सधारीणं महाणुभागाणं तित्थयरादीणं महती आसायणं कुज्जा, जे णं तित्थयरादीणं आसायणं कुज्जा से णं अज्झवसायं पडुच्च जाव णं अणंतसंसारियत्तं लभेज्जा विण्पहिज्जित्थियं सम्मं सव्वहा मेहुणं पि य । इति श्रीमहानिशीथद्वितीयाध्ययने १३ पत्रे ॥ २ ॥

॥290॥

अथ केचिदुपधानोद्वहनं न स्वीकुर्वते तेऽवश्यं बहुलसंसारिणो वेद्याः ।

जे केइ अणुवहाणेणं सुपसत्थं नाणं अहीयंति अज्झावयंति वा अहीयंते इ वा अज्झावयंते इ वा समणुजाणंति तेणं महापावकम्मे महती सुपसत्थनाणस्सासायणं पकुव्वंति, से भयवं ! जइ एवं ता किं पंचमंगलस्स णं उवहाणं कायव्वं ? गोयमा ! पठमं नाणं तओ दया । इति श्रीमहानिशीथतृतीयाध्ययने पञ्चदशे पत्रे ॥ ३ ॥

अथातिस्फुटानि प्रतिमार्चनाक्षराणि लिख्यन्ते-

भावच्चणमुग्गविहारिया य दव्वच्चणं तु जिणपूया पढमा जइण दोन्निवि गिहीण पढम च्चिय पसत्था । इति महानिशीथतृतीयाध्ययने १९ पत्रे ॥ ४ ॥

केचिच्चाज्ञानिनो वराकाः श्रीजिनोक्ताक्षरमात्रमप्यश्रद्दधानोऽनन्तसंसारीति विदन्तोऽप्यवश्यंभाविभावानामप्रतीकार्यत्वेन कर्मगतेरचिन्त्यत्वेन सकलागमप्रधानं श्रीमहानिशीथाभिधानं शास्त्रमेव न मन्वते किं कुर्मस्तान् प्रति, न चाशङ्कनीयम्, इदं हि कलिकालबलात्क्वचित्क्वचित्रुटितमभूदिति श्रूयते, ततोऽस्य संयोजनावसरे कैश्चिदशिष्टैरत्र यत्किञ्चित्क्षिप्तं भविष्यतीति । यत इदं श्रीहरिभद्रसूरिभिः सर्वसंमत्या लिखितं श्रीवृद्धवादिसूरिश्रीसिद्धसेनदिवाकरश्रीजिनदासगणिक्षमाश्रमणादिभिर्महापुरुषैर्युगप्रधानैः पूर्वगतश्रुतधारिभिर्भूयोभिः संभूयेदं बहुमतं चेत्यत्रैव लिखितमस्ति । तथा हि-

एयं तु जं पंचमंगलमहासुअक्खंधस्स वक्खाणं तं महया पबंधेणं अणंतगमपज्जवेहिं सुत्तस्स अप्पियभूयाहिं निज्जूत्तिभासचुण्णीहिं जहेव अणंतनाणदंसणधरेहिं तित्थयरेहिं वक्खाणियं तहेव समासओ वक्खाणिज्जंतं आसि । अह सन्नया कालपरिहाणिदोसेणं ताओ निज्जुत्तिभासचुन्नीओ वुच्छिनाओ, इओ य वच्चंतेणं कालसमएणं महिड्ढिपत्ते पयाणुसारीवइरसामीनाम दुवालसंगसुयहरे समुप्पन्ने, तेण य पंचमंगलमहासुयक्खंधस्स उद्धारो मूलसुत्तस्स मज्झे लिहिओ, मूलसुत्तं पुण सुत्तत्ताए गणहरेहिं अत्थत्ताए अरिहंतेहिं भगवंतेहिं धम्मतित्थयरेहिं तिलोगमहिएहिं वीरजिणंदेहिं पन्नवियं, एस वुड्ढसंपदायो एत्थ य जत्थ जत्थ पएणाणुलग्गं सुत्तालवगं न संपज्जइ तत्थ तत्थ सुयहरेहिं कुलिहियदोसो न दायव्वोत्ति, किं तु जो सो एयस्स अचिंतचिंतामणिकप्पभूयस्स महानिसीहसुयक्खंधस्य पुव्वायरिसो

आसि तहिं चेव खंडाखंडीए उद्देहियाएहिं हेऊहिं बहवे पत्तगा परिसडिया तहावि अच्चंतसुहुमत्थाइसयंति इमं महानिसीहसुयक्खंधं कसिणपवयणस्स परमसारभूयं परं तत्तं महत्थंति कलिऊण पवयणवच्छल्लत्तणेणं बहुभव्वसत्तोवयारियंति काउं तहा य आयहियट्ठाए आयरियहरियभद्देणं जं तत्थायरिसे दिट्ठं तं सव्वसम्मत्तीएं साहिऊण लिहियंति, अन्नेहिंवि सिद्धसेणदिवायरवुड्ढवाइजक्खसेणदेवगुत्तजसवद्धणखमासमणसीसरविगुत्तणेमिचंदजिणदासगणिखमगसव्वरिसिपमुहेहिं जुगप्पहाणसुअहरेहिं बहुमन्नियमिणंति । इति श्रीमहानिशीथतृतीयाध्ययने २१ पत्रे ॥ ५ ॥

यो निरुपधानः श्रुतमधीते स यादृशो भवति तल्लिख्यते-

अविणओवहाणेणं चेव पंचमंगलाइं सुअनाणं अहिज्जेज्जा अज्झावेज्जा अज्झावयमाणस्स वा अणुमन्नियमाणेज्जा से णं पियधम्मे ण भवेज्जा दढधम्मे ण भवेज्जा, भत्तिजुत्ते हीलिज्जा सुत्तं हीलिज्जा अत्थं हीलिज्जा सुत्तत्थुभए हीलिज्जा जाव णं गुरुं हीलिज्जा गुरुं आसाएज्जा अतीताणागए वट्टमाणे तित्थयरे आसाएज्जा आयरियउवज्झायसाहुणो जणं आसाएज्जा सुयणाणारिहंतसिद्धसाहू तस्स णं सुदीहकालं अणंतसंसारसागरमाहिंडेमाणस्स तासु तासु असंवुडवियडासु चुलसीलक्खपरिसंखासु सिउसिणमिस्सजोणीसु परियडइ इति । इति महानिशीथतृतीयाध्ययने २२ पत्रे ॥ ६ ॥

केचिच्च सामायिकपौषधादि कृत्वाऽनन्तरमीर्यापथिकीं प्रतिक्रामन्ति परं तत्कल्पितं ज्ञेयमत्र त्वेवमुक्तमस्ति तद्यथा-

अणाउलचित्ते असुहकम्मक्खवणट्ठा किंचि आयहियं चिइवंदणाई अणुट्ठेज्जा तया तयट्ठे चेव उवउत्ते से भवेज्जा, जया णं से तयत्थे उवउत्ते भवेज्जा तया णं तस्स परमेगग्गचित्तसमाही हवेज्जा तया चेव सव्वजगज्जीवपाणभूयसत्ताणं जहिट्ठफलसंपत्ती भवेज्जा, तो गोयमा णं अपडिक्कंताए इरियावहियाए न कप्पई चेव काउं किंचि चिइवंदणसज्झायाइयं फलासायमभिकंखगाणं एएणं अट्ठेणं गोयमा ! एवं वुच्चइ । इति श्रीमहानिशीथतृतीयाध्ययने २२ पत्रे ॥ ७ ॥

अथ प्रज्ञांशपदमूलभूतवर्द्धमानविद्यासत्तासूचकगन्धचूर्णसत्तासूचकजिनप्रतिमासत्तासूचकमालारोपणविधिसत्तासूचकाक्षराणि लिख्यन्ते-

चउत्थभत्तेण साहिज्जइ एयाए विज्जाए सव्वगओ नित्थारगपारगो होइ, उवट्ठावणाए वा गणिस्स अणुन्नाए वा सत्तवारा

परिजवेयव्वा नित्थारगपारगो होइ, उवट्ठावणाए वा अभिमंतिज्जइ आराहगो भवइ विग्घविणायगा उवसमं ति, सूरो संगामे पविसंतो अपराजिओ भवइ, कप्पसम्मत्तीए मंगलवाहिणी खेमवाहिणी भवइ, तहा साहुसाहुणीसमणोवासगसड्ढियासेससाहम्मियजणचउव्विहेणंपि समणसंघेणं नित्थारगपारगो भवेज्जा, धन्नो संपुन्नलक्खणो सि तुमं ति उच्चारेमाणेणं गंधमुट्ठीओ घेतव्वाओ, तओ जगगुरूणं जिणिंदाणं पूएगदेसाओ गंधड्ढामिलाणसेयमल्लदामं गहाय सहत्थेणोभयक्खंधेसुमारोवयमाणेणं गुरुणा णीसंदेहमेवं भाणियव्वं जहा भो भो जम्मंतरसंचियगुरुपुन्नपब्भारसुलद्धसुविढत्तसुसहलमणुयजम्मे देवाणुप्पिया ठइयं च णरयतिरियगइदारं तुज्झ त्ति । इति श्रीमहानिशीथतृतीयाध्ययने २३ पत्रे ॥ ८ ॥

॥२१३॥

यो हि सावद्यानवद्यभाषाविशेषं न जानीते तस्य वक्तुमपि नानुज्ञा किं पुनर्व्याख्यानादि कर्त्तुम् । तथा हि-

जिब्भकुसीले से णं अणेगहा तं जहा-तित्तकडुकसायमहुराइं लवणाइं रसाइं आसायंते अदिट्ठासुयाइं इहपरलोगोभयविरुद्धाइं सदोसाइं मयारजयारुच्चारणाइं अयसब्भक्खाणासंताभिओगाइं वा भणंति, असमयन्नू धम्मदेसणापवत्तणेणं य जिब्भाकुसीले णेए, से भयवं ! भासाए विभासियाए कुसीलत्तं भवति ? गोयमा ! भवति, से भयवं ! जइ एवं ता धम्मदेसणं न कायव्वं ? गोयमा ! सावज्जणवज्जाणं, वयणाणं जो न याणइ विसेसं । वुत्तुंपि तस्स न खमं, किमंग पुण देसणं काउं ॥ १ ॥ इति श्रीमहानिशीथतृतीयाध्ययने २४ पत्रे ॥ ९ ॥

अथ केचन मिथ्यात्विकृतं तपोऽनुष्ठानादिकं सर्वं व्यर्थं, प्रत्युत कर्मबन्धकारणं, इत्यादि वदन्ति, परं किं कुर्वन्तु ते वराका अनाघ्रातसिद्धान्तगन्धाः, आघ्रातसिद्धान्तगन्धा वा, कर्मैकवशगा भूरितरभवभ्रमणभवितव्यतया परिभूयमाना यत्किञ्चिद्वदन्तु, परं सिद्धान्ते त्वेवम्-

तओ भणियं नाइलेणं जहा मा वच्छ ! तुमं एतेणं परिओसमुवयासु जहा अहयं असइवारेणं परिमुसिओ, अकामनिज्जराएवि किंचि कम्मक्खयं भवइ किं पुण जं बालतवेणं, ता एते बालतवस्सिणो दट्ठुव्वा जओ णं किंचि उस्सुत्तं मग्गयारित्तमेएसिं पदीसइ इत्यादि । इति श्रीमहानिशीथचतुर्थाध्ययने २८ पत्रे ॥ १० ॥

॥२१३॥

तथा ये आचारादिश्रुतोक्तमन्यथाऽनुतिष्ठन्ति ते यादृशा भवन्ति तल्लिख्यते-

तेणं सङ्घगेणं हरिवंसतिलयमरगयच्छविणो बावीसइमं धम्मतित्थयरअरिट्ठनेमिनामस्स सयासे वंदणवत्तियाए गएणं आयारंगं अणंतगमपज्जवेहिं पन्नविज्जमाणं समवधारियं, तत्थ य छत्तीसआयारे पन्नविज्जंति तेसिं च णं जे केई साहू वा साहूणि वा अन्नयरमायारमइक्कमेज्जा से णं गारत्थीहिं उवमेयं, अहन्नहा समणुट्ठेज्जा वायरेज्जा पन्नविज्जा वा तओ णं अणंतसंसारी भवेज्जा । इति श्रीमहानिशीथचतुर्थाध्ययने ३१ पत्रे ॥ ११ ॥

॥२१४॥

यश्च कर्णेऽनिक्षिप्तकर्पासतूलः शेते, तस्य प्रायश्चित्तमित्यक्षराणि लिख्यन्ते-

ऽकएणं कन्नविवरेसु कप्पासगरुवेणं तुयट्टइ संथारंमि ठाएज्जा एएसुं पत्तेगं उवट्ठावणं । इति श्रीमहानिशीथसप्तमाध्ययने ६२ पत्रे ॥ १२ ॥

केचिच्च चतुर्दशीं विहाय पौर्णमास्यामुपवासादिकं कुर्वते तदनागमिकम् । यतः-

संते बलवीरियपुरिसक्कारपरक्कमे अट्ठमिचउद्दसीनाणपंचमीपज्जोसवणचाउम्मासिए चउत्थदुमछट्ठेणं करेज्जा । इति श्रीमहानिशीथ-सप्तमाध्ययने ६१ पत्रे ॥ १३ ॥

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरीश्वरशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे अपरतटे श्रीमहानिशीथविचारनामा द्वितीयस्तरङ्गः ॥ २ ॥

॥ यद्वदनकन्दरोदरसमुत्थितः श्रुतमृगाधिराजयुवा । व्यापादयति भवद्विपमुन्मत्तं स जयताद्गणभृत् ॥ १ ॥

अथ श्रीदशाश्रुतस्कन्धविचारा यथा-तत्र च श्रावकप्रतिमास्वरूपं लिख्यते-

से किं तं किरियावादीयावि भवति तंजहा-आहियवादी आहियपण्णे आहियदिट्ठी सम्मावादी णियावादी अत्थि परलोगवादी अत्थि इह लोए अत्थि परलोगे अत्थि माता अत्थि पिता अत्थि अरहंता अत्थि चक्कवट्टी अत्थि बलदेवा अत्थि वासुदेवा अत्थि सुकडदुक्कडाणं फलवित्तिविसेसे सुचिण्णा कम्मा सुचिण्णफला भवंति दुच्चिण्णा कम्मा दुच्चिण्णफला भवंति सफले कल्लाणपावए पच्चायांति जीवा

अत्थि णिरया अत्थि देवा अत्थि सिद्धा से एवं वादी एवं पण्णे एवं दिट्ठी छंदरागमतिणिविट्ठेयावि भवति से भवति महिच्छे जाव उत्तरगाभिए नेरइए सुक्कपक्खिए आगमेस्साणं सुलभबोधिएयावि भवति, से तं किरियावादी, सव्वधम्मरुईयावि भवइ, तस्स णं बहूणि सीलव्वयगुणविरमणपच्चक्खाणपोसहोववासाइं णो सम्मं पट्ठविताइं भवंति पढमा उवासगपडिमा १ । अहावरा दोच्चा उवासगपडिमा सव्वधम्मरुईयावि भवति, तस्स णं बहूणि सीलव्वय जाव पट्ठविताइं भवंति से णं सामाइयं देसावगासियं णो सम्मं अणुपालित्ता भवति दोच्चा उवासगपडिमा २ । अहावरा तच्चा उवासगपडिमा सव्वधम्मरुईयावि भवइ तस्स णं बहूइं सील जाव सम्मं पट्ठविताइं भवंति सेणं सामाइयं देसावगासियं सम्मं अणुपालइत्ता भवति से णं चाउद्दसट्ठमुद्दिट्ठपुण्णिमासिणीसु पडिपुण्णं पोसहं णो सम्मं अणुपालेत्ता भवति, तच्चा उवासगपडिमा ३ । सव्वधम्मरुईयावि भवइ तस्स णं बहूइं सीलव्वयजाव सम्मं पट्ठवियाइं भवंति से णं सामाइयदेसावगासियं सम्मं अणुपालइत्ता भवति से णं चाउद्दसट्ठम जाव अणुपालइत्ता भवति से णं एगराइयं उवासगपडिमं णो सम्मं अणुपालइत्ता भवति, चउत्था उवासगपडिमा ४ । अहावरा पंचमा उवासगपडिमा सव्वधम्मरुईयावि भवति जाव से णं एगरातियं उदासगपडिमं सम्मं अणुपालइत्ता भवति से णं असिणाणए वियडभोई मउलियडे दियाबंभयारी रत्तिं परिमाणकडे से णं एतारूवेणं विहारेणं विहरणमाणे जहन्नेणं एगाहं वा दुयाहं वा तियाहं वा उक्कोसेणं पंच मासे विहरेज्जा, पंचमा उवासगपडिमा ५ । अहावरा छट्ठा उवासगपडिमा सव्वधम्मरुईयावि भवति जाव से णं एगरातियं उवासगपडिमं सम्मं अणुपालइत्ता भवति से णं असिणाणवियडभोई मउलियडे रातोवरायं बंभयारी सचित्ताहारे से अपरिण्णाते भवति से णं एतारूवेणं विहारेणं विहरमाणे जाव एगाहं वा दुयाहं वा तियाहं वा उक्कोसेणं छम्मासे विहरेज्जा, छट्ठा उवासगपडिमा ६ । अहावरा सत्तमा उवासगपडिमा सव्वधम्मरुईयावि भवति जाव रोयवरायं बंभयारी सच्चित्ताहारे से परिण्णाते भवति से णं एतारूवेणं विहारेण विहरमाणे जाव एगाहं वा दुयाहं वा तियाहं वा उक्वोसेणं सत्तमासे विहरेज्जा, सत्तमा उवासगपडिमा ७ । अहावरा उट्ठमा उवासगपडिमा सव्वधम्मरुईयावि भवति जाव रातोवरातं बंभयारी भवति सच्चितताहारे से परिण्णाते भवति आरंभे से परिण्णाते भवति पेस्सा से अपरिण्णाते भवति से णं एतारूवेणं विहारेणं विहरमाणे जाव एगाहं वा दुयाहं वा तियाहं वा उक्कोसेणं अट्ठमासे विहरेज्जा, अट्ठमा उवासगपडिमा ८ । अहावरा णवमा उवासगपडिमा सव्वधम्मरुईयावि भवइ जाव आरंभे से

परिण्णाते भवति पेस्सा से परिण्णाता भवति उद्दिट्ठभत्ते से अपरिण्णाते भवति से णं एतारूवेणं विहारेणं विहरमाणे जाव एगाहं वा दुयाहं वा तियाहं वा उक्कोसेणं णवमासे विहरेज्जा, णवमा उवासगपडिमा ९ । अहावरा दसमा उवासगपडिमा सव्वधम्मरुईयावि भवति पेस्सा से परिण्णाता भवति उद्दिट्ठभत्ते से परिण्णाते भवति से णं खुरमुंडे छिहलिधारए वा तस्स णं आभट्ठस्स समाणस्स कप्पंति दुवे भासाओ भासितए तं जहा जाणं जाणं अजाणं वा णो जाणं एतारूवेणं विहारेणं विहरमाणे जहन्नेणं एगाहं वा दुयाहं वा तियाहं वा उक्कोसेणं दसमासे विहरेज्जा, दसमा उवासगपडिमा १० । अहावरा एक्कारसमा उवासगपडिमा सव्वधम्मरुईयावि भवइ जाव उद्दिट्ठभत्ते से परिण्णाते भवति सेणं खुरमुंडे वा लुत्तसिरए वा गहितायारभंडगणेवत्थे जारिसे समणाणं णिग्गंथाणं धम्मे पण्णते तं सम्मं काएणं फासेमाणे पालेमाणे पुरतो जुगमायाए पेहमाणो दट्ठुण तसे पाणे उद्धुट्ठ पायं रीएज्जा साहट्ठु पायं रीएज्जा वा तिरिच्छं वा पायं कट्टु रीएज्जा संति परक्कमे संजतामेव परक्कमेज्जा णो उज्जुयं गच्छेज्जा केवलं से णाए पेज्जबंधणे अव्वोच्छिण्णे भवति एवं से कप्पति णायाणुवित्तिए, एत्थ णं तस्स पुव्वागमणेणं पुव्वाउत्ते चाउलोदणे पच्छाउत्ते भिलिंगसूवे कप्पइ से चाउलोदणे पडिग्गहित्तए णो से कप्पति भिलिंगसूवे पडिग्गहित्तए, तत्थ णं तस्स पुव्वाउत्ते भिलिंगसूवे पच्छाउते चाउलोदणे कप्पति से भिलिंगसूवे पडिग्गहित्तए णो कप्पति चाउलोदणे पडिग्गहित्तए, तत्थ णं पुव्वागमणेणं दोवि पुव्वाउत्ताइं कप्पंति दोवि पडिग्गहित्तए, तस्स पुव्वागमणेणं दोवि पच्छाउत्ताइं णो से कप्पंति दोवि पडिग्गहित्तए, जे से तत्थ पुव्वागमणेणं पुव्वाउत्ते से कप्पति पडिग्गहितए, जे से तत्थ पुव्वागमणेणं पच्छाउत्ते णो से कप्पइ पडिग्गहित्तए । तस्स णं गाहावतिकुलं पिंडवायपडियाए अणुप्पविट्ठस्स कप्पति एवं वदित्तए समणोवासगस्स पडिमापडिवण्णस्स भिक्खं दलयह, तं चेत्तारूवेणं विहारेणं विहरमाणं केइ पसित्ता वदेज्जा-के आउसो तुमेसि वत्तव्वे सिया समणोवासए पडिमापडिवण्णए अहमंसीति वत्तव्वं सिया, से णं एतारूवेणं विहारेणं विहरमाणे जाव एगाहं वा दुयाहं वा तियाहं वा उक्कोसेणं एक्कारसमासे विहरेज्जा, एक्कारसमा उवासगपडिमा ११ । एतोओ थेरेहिं भगवंतेहिं एक्कारसउवासगपडिमाओ पण्णत्ताओ त्तिबेमि । छट्ठा दसा सम्मत्ता ॥ अथैतच्चूर्णिर्यथा-किरियावादीवि भवति आहियवादी एवं चेव अत्थित्तेण भाणियव्वं जाव से य भवति महिच्छे जहा अकिरियावादिस्स णवरं उत्तरगामिए सुक्कपक्खिए आगमिस्सेणं सुलभबोहीए यावि भवति सव्वधम्मरुई यावि भवति, धर्मः-स्वभाव

इत्यनर्थान्तरम्, जीवाजीवयोः यस्य द्रव्यस्य गतिस्थित्यवगाहनादि अहवा सर्वधर्मा आज्ञाग्राह्या हेतुग्राह्याश्च, ते रोचते-सद्दहति दसप्पगारो वा खमादिसमणधम्मो तस्स णं बहूणि सीलव्वय० सीलं-सामाइयं देसावगासियं पोसहोववासो अतिहिसंविभागो य, वयाणि पंचाणुव्वयाणि, ' गुण ' त्ति तिण्णि गुणव्वयाणि, पोसहो चउव्विहो आहारपोसहो, सरीरसक्कारपोसहो, अव्वावारपोसहो, बंभचेरपोसहो । ' णो सम्मं पट्ठवियाइं ' णो सक्कारो पडिसेधो ' णो सम्मं ' यथोक्तं ' पट्ठवियाइं ' ति प्रस्थापितानि आत्मनि यथा प्रतिमा प्रस्थापिता देवकुले प्रतिपत्तिः प्रतिमानां वा ' पडिमा दंसणसावगो ' त्ति पढमा पडिमा १ । अहावरा दोच्चा-अथेत्यानन्तर्ये अपरा-अन्या सामाइयं देसावगासियं ' णो सम्मं ' यथोक्तं ण सक्केति काएण तिविहेणावि करणेन काएण दुक्खं अणुपालिज्जति तेण कायग्रहणं, दोच्चा पडिमा २ । चतुर्दशी अट्ठमी उद्दिट्ठा-अमावासा पडिपुण्णं आहारादि ४ तच्चा पडिमा ३ । यद्दिवसं उववासो तद्दिवसं रत्तिं पडिमं पडिवज्जति तं ण सक्केति चउत्था पडिमा ४ । पडिमंपि अणुपालेति असिणाणते ण ण्हाहिति पंचमासे वियडभोजी-प्रकाशभोजी दिवसतो भुंजति न रात्रौ पंचवि मासे मउलिकडो-साडगस्स दोवि अंचलाओ हेट्ठा करेति कच्छं ण बंधति जाव पडिमा पंचमासिया ण समप्पेति तावद्दिवसो बंभयारी रत्तिं परिमाणं करेति दो तिण्णि य, पोसहिओ रत्तिंपि बंभचारी ' से ' त्ति णिद्देसे जो हेट्ठा भणितो इट्ठगूलक्षणेन एतारूवेण अह दिवसो कहं एगाहं स तं पडिवण्णो कालगतो य संजमं वा गेण्हेज्जा एतेणेगाहं वा दुयाहं वा इयरहा संपुण्णा पंचमासा अणुपालेयव्वा एवं जहा भणिया ' एस ' त्ति पंचमासिया अहासुत्ता-जहासुत्ते भणिया कप्पेति-मज्जाया यथातथ्यो मग्गो १ णाणादी ३ जहामग्गो ण विराहिज्जति सम्मं अट्टदुहट्टाणि ण चिंतेति स्पृष्टा-फासिता पालिता-रक्खिता सोभिता-ण भग्गा तीरिता-अंतं नीता किट्टिता-कीर्त्तिता आयरियाणं कहिता आराधिता ण विराहिता आणा-सुअं तदुपदेसेण अण्णेहिं पालितं पालेइ अणुपालेइ भवति होति पंचमा ५ । रातोवरातंति रत्तिंदिया य रत्तीए उवरमो दिवसे सच्चित्तं उदगं कंदादि वा अपरिण्णाता अपच्चक्खाता आहारेति अपोसहितो, छट्ठा पडिमा ६ । आरंभकरणे कारावणे वा णिउज्जति जं से कम्मं तं करेति सयं परेणवि कारवेति अणुमोयति अ पोसहितो पोसहिए अणुमोयति केवलं सच्चितं णाहारेति उदगफलादि, सत्तमा पडिमा ७ । आरंभं सयं ण करेति किसिवाणिज्जादि पेस्सा-भयगा तेहिं करावेति अट्ठमा पडिमा ८ । णवमासियाए अप्पणा परेणवि ण करेतिवि ण कारवेतिवि । जं पुण तं णिमित्तं कोइ उवक्खडेति तं भुंजइ नवमा पडिमा

९ । दसमाए उद्दिट्ठभत्तंपि न भुंजति स गिहे चेव अच्छति तहिं अच्छंतो खुरमुंडतो छिंगलिं वा धारेमाणो छिगली चंडो जहा परिव्वायगाणं, आभट्ठो एक्कसिं समाभट्ठो पुणो पुणो परियाभट्ठो वा, तेण किंचिद्दवजातं णिक्खतगं तं च से पुत्तादी ण जाणति सामातितो वा से ताहे पुच्छति कहिं कयंतं दवियं जति ण कहेति अंतराइयदोसा अचियत्तं च तेसिं संकादि वा तेसिं णूणं एअं गिण्हितुकामो खइयं चणेण तम्हा जति जाणति तो कहेति अह ण याणति तो भणति अहंपि ण याणामि एयातो दोभासातो दसमा पडिमा १० । एक्कारसमीए गिहातो णिक्खमति से णं खुरमुंडए वा लुत्तसिरजो लोओ कतो । सिरे जायंते शिरजा केशा इत्यर्थः । गहियारभंडगं साहुलिंगं रयोहरणपात्रादिविभासा णेवत्थं साहुरूवसरिसं तेसिं जे इमे समणधम्मे तारिसं धम्मं अणुपालेमाणे विहरंति इरियासमिए उवउत्ता पुरतो युगमात्रं आदाय गृहीत्वा रीयंति-विहरंति दट्ठूण चक्खुसा तसा-बेइंदियादिपाणा किं तेसिं मज्झेणं जंति नेत्युच्यते-तद्दट्ठू उक्खिवित्ता साहट्टु साहरित्ता व्यतिरिच्यन्ते रित्थं करेंति संतित्ति जति अण्णो मग्गो विज्जति संजयाए जयणाए उवउत्ता इरियासमितीए परक्कमेज्जा अविज्जमाणे वा तेणेव जयणाए गच्छति । अहवा सति परक्कमे संते उट्ठाणकम्मबलविरियपरक्कमे परिहारेणं गच्छति जयणाए उवउत्तो इरियासमितीए अण्णो वा सपरक्कमो पंथो णत्थि तेणा वा सावताणि वा सीहादीणि वा सव्वं तेण चत्तं केवलंति तदेवेगेणं संणातगा-मातादि पेज्जंबधणं-राग इत्यर्थः । ताहे णायविहिं इति तस्स णं तत्थागमणेणं पुव्वाउत्ते विभासा सो भिक्खं हिंडतो ण धम्मलाभेति तस्स णं गाहावति एवं वदति समणोवासगस्स पडिमा-कंठा एतारूवेणं-एतप्पगारेणं रूवसद्दो लक्खणत्थो केवित्ति इत्थी वा पुरिसो वा पासित्ता पेक्खित्ता कस्त्वं ? किं व्रती वा ? ब्रवीति-समणोहं किं वतित्ति जं भणह पडिमापडिवण्णोहमिति उपप्रदर्शने ।

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरीश्वरशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरेऽपरतटे दशाश्रुतविचारनामा तृतीयस्तरङ्गः ॥ ३ ॥

यद्वदनपद्मकोशादुदितः सिद्धान्तमारुतः सुरभिः । कविचञ्चरीकचक्रं, प्रीणयति स तीर्थकृज्जयति ॥ १ ॥

अथ श्रीबृहत्कल्पविचारा यथा-

तत्र च केचन ' सुसाणि सुन्नागारे वा ' इत्यादीन्यन्यानि वा कपाटनिषेधाक्षराणि दर्शयन्तः सकपाटवेश्मस्थायिन इमे मुनय एव

न भवन्तीत्यादि ब्रुवाणा आचार्योपाध्यायादिमहापुरुषाशातनया संसारं पल्लवयंति, कपाटनिषेधश्च जिनकल्पिकाश्रितः स्थविरकल्पिके योजयन्तीति नयनौषधं श्रवणयोः क्षिपन्तीति । स्थविरकल्पिकानां प्रत्युताकपाटोपाश्रयावस्थाने दोषा इत्यक्षराणि लिख्यन्ते-

कप्पइ निग्गंथाणं अवंगुयदुवारिए उवस्सए वत्थए । कल्पते निर्ग्रन्थानामपावृत्तद्वारे-उद्घाटद्वारे उपाश्रये वस्तुमिति सूत्रार्थः । अथ भाष्यविस्तरः-निग्गंथदारपिहणे, लहुओ मासो उ दोसु आणाई । अइगमणे निग्गमणे, संघट्टणमाइ पलिमंथो ॥ १ ॥ निर्ग्रन्था यदि द्वारपिधानं कुर्वन्ति तदा लघुको मासः प्रायश्चित्तम्, आज्ञादयश्च दोषाः, विराधना त्वियम्-कोऽपि साधुरतिगमनं-प्रवेशं करोति, अन्येन च साधुना द्वारपिधानाय कपाटं प्रेरितं तेन च तस्य शिरस्यभिघाते परितापादिका ग्लानारोपणा, एवं निर्गमनं कुर्वतोऽपि केनचिद्बहिःस्थितेन पश्चान्मुखं कपाटे प्रेरिते शीर्षं भिद्यते तथा त्रसजन्तूनां सङ्घट्टनमादिशब्दात्परितापनमपद्रावणं वा द्वारे पिधीयमाने अपाव्रियमाणे वा भवेत्, परिमन्थश्च-सूत्रार्थव्याघातो भूयो भूयः पिदधतामपावृण्वतां च भवति । एतामेव निर्युक्तिगाथां व्याख्यानयति-घरकोइलिया सप्पे, संच[redacted] य हुंति हेट्ठुवरिं । ढक्किंतवंगुरिंते, अभिघातो निंतइंताणं ॥ २ ॥ द्वारस्याधस्तादुपरि च गृहकोकिला वा सर्पो वा सञ्चारिम[redacted] कीटिकाकुन्थुकंसारिकादयो जीवा भवेयुः, आदिशब्दात्कोलिकादयो वा संपातिमसत्वाः, ततो द्वारं ढंक्कयतामपावृएवतां च-उद्घ[redacted] 'निंतइताणं' ति निर्गच्छन्तां प्रविशतां वा गृहकोकिलादिप्राण्यभिघातो भवेत् । सर्पवृश्चिकादिभिर्वा साधूनामेवाभिघातो भवेत् । द्वितीय[redacted] द्वारं पिदध्यादपि कथम् ? इत्याह-सिय कारणे पिहिज्जा, जिणजाणग गच्छि इच्छिमो नाउं । आगाढकारणंमि उ, कप्पइ जयणाइ उवएसं ॥ ३ ॥ स्यात्-कदाचित् कारणे पुष्टालंबने पिदध्यादपि द्वारम् । जिनाः-जिनकल्पिका ज्ञायकाः-तस्य कारणस्य सम्यग्वेत्तारः परं द्वारं न पिदधति । शिष्यः प्राह-गच्छे गच्छवासिनां इच्छामो वयं विधिं ज्ञातुम्, सुरिराह-आगाढं प्रत्यनीकस्तेनादिरूपं यत्कारणं तत्र यतनया वक्ष्यमाणलक्षणया गच्छवासिनां द्वारं स्थगयितुं-पिधातुं कल्पते । एष निर्युक्तिगाथासमासार्थः । अथैनामेव विवृणोति-जाणंति जिणा कज्जं, पत्तेवि उ तं न ते निसेवंति । थेरावि उ जाणंती, अणागयं केइ पत्तं तु ॥ ४ ॥ जिनाः जिनकल्पिका अधितसातिशयश्रुतास्तत्कार्यमनागतमेव जानन्ति येन द्वारं पिधीयते तच्च प्रत्यनीकस्तेनादिकं वक्ष्यमाणलक्षणं तस्मिंश्च प्राप्तेऽपि तत् द्वारपिधानं ते भगवन्तो न निषेवन्ते, निरपवादानुष्ठानपरत्वात् । स्थविरा अपि स्थविरकल्पिकाः अपि सातिशयश्रुतज्ञानाद्युपयोगबलेन केचिदनागतमेव जानन्ति, केचित्तु

॥२१९॥

निरतिशयाः प्राप्तमेव तत्कार्यं जानन्ते, ज्ञात्वा च यतनया तत्परिहरन्ति । अहवा जिणप्पमाणा कारणसेवी अदोसवं होइ । थेरावि जाणग च्चिय, कारणजयणाइ सेवंता ॥ ५ ॥ अथवा ' जिणजाणग ' त्ति पदमन्यथा व्याख्यानयति-जिनः-तीर्थङ्करस्तस्य प्रामाण्यात्कारणाद्द्वारपिधानसेवी अदोषवान् भवति, कुत इत्याह-' थेरावि ' इत्यादि, जिनानां हि भगवतामियमाज्ञा कारणे यतनया द्वारपिधानं सेवमानाः स्थविरकल्पिका अपि ज्ञायका एव सम्यग्विधिज्ञा एव । आह-किं तत्कारणं ? येन द्वारं पिधीयते उच्यते-पडिणीयतेणसावयउब्भामगगोणसाणएऽणप्पज्झे । सीयं च दुरधियासं, दीहा पक्खी व सागरिए ॥ (६॥) उद्घाटिते द्वारे प्रत्यनीकः प्रविश्य हननं-अपद्रावणं वा कुर्यात् । स्तेना उपधिस्तेनाः शरीरस्तेना वा प्रविशेयुः एवं श्वापदाः-सिंहव्याघ्रादयः उद्भ्रामकाः-पारदारिकाः गौः-बलीवर्दः श्वानः प्रतीतः एते वा द्वारमुद्घाटं दृष्ट्वा प्रविशेषुः तथा ' अणप्पज्झे ' ति अनात्मवशः-क्षिप्तचित्तादि द्वारेऽपिहिते निर्गच्छेत् शीतं वा दुरधिसहं हिमकणानुषक्तं निपतेत् दीर्घा वा- सर्पाः पक्षिणो वा काककपोतप्रभृतयः प्रविशेयुः सागारिको वा कश्चित् प्रतिश्रयमुद्घाटद्वारं दृष्ट्वा तत्र प्रविश्य शयीत विश्रामं वा गृह्णीयात् एक्केक्कंमि उ ठाणे, चउरो मासा हवंति उग्घाया ॥ आणाइणो य दोसा, विराहणा संजमायाए ॥ (७॥) द्वारमस्थगयतामनन्तरोक्तेषु स्थानेषु एकैकस्मिन् प्रत्यनीकप्रवेशादौ स्थाने यदि द्वारं न स्थगयंति तदा चत्वारो मासा उद्घाताः-लघवः प्रायश्चित्तं भवन्ति, आज्ञादयश्चात्र दोषा विराधना च संयमात्मविषया भावनीया । यदुक्तं चत्वारो मासा उद्घाता इति तदेतद्बाहुल्यमङ्गीकृत्य द्रष्टव्यम् । अतोऽपवादयन्नाह-अहिसावयपच्चत्थिसु, गुरुगा सेसेसु हुंति चउलहुगा । तेणे गुरुगा लहुगा, आणाइविराहणा दुविहा ॥ (८॥) अहिषु श्वापदेषु च प्रत्यर्थिषु च प्रत्यनीकेषु द्वारमस्थगयतां प्रत्येकं चत्वारो गुरुकाः । शेषेषूद्भ्रामकादिषु सागारिकान्तेषु चतुर्लघुकाः । स्तेनेषु गुरुका लघुकाश्च भवन्ति, तत्र शरीरस्तेनेषु चतुर्गुरुकाः, उपधिस्तेनेषु चतुर्लघुकाः आज्ञादयश्च दोषाः विराधना द्विविधा-संयमविराधना, आत्मविराधना च, तत्र संयमविराधना स्तेनैरुपधावपहृते तृणग्रहणमग्निसेवां वा कुर्वन्ति । सागारिकादयो वा तप्तायोगोलकल्पाः प्रविष्टाः सन्तो निषदनशयनादि कुर्वाणा बहूनां प्राणिजातीयानामुपमर्दनं कुर्युः । आत्मविराधना तु प्रत्यनीकादिषु स्फुटैवेति ॥ आह-ज्ञातमस्माभिर्द्वारपिधानकारणं, परं काऽत्र यतना ? इति नाद्याऽपि वयं जानीमः, उच्यते-उवओगं हिट्ठुवरिं, काऊण ठविंतवंगुरंते य । पेहा जत्थ न सुज्झइ, पमज्जिउं तत्थ सारिंति ॥ (९॥) श्रोत्रादिभिरिन्द्रियैरधस्तादुपरि चोपयोगं कृत्वा द्वारं स्थगयन्ति वाऽपावृण्वन्ति वा । यत्र चान्धकारे प्रेक्षा-चक्षुषा निरीक्षणं

न शुद्ध्यति तत्र रजोहरणेन दारुदंडेन वा रजन्यां प्रमृज्य सारयन्ति द्वारं स्थगयन्तीत्यर्थः । उपलक्षणत्वादुद्घाटयन्तीत्यपि द्रष्टव्यम् । इति बृहत्कल्पसूत्रवृत्तौ द्वितीयखंडे विंशे पत्रे ॥ १ ॥

साध्वीनां तु वसतौ कपाटमवश्यमपेक्षितं, सर्वथा च तदभावे विधिः कर्त्तव्यः स लिख्यते-

द्वितीयपदमाह-अद्धाणनिग्गयादी, तिक्खुत्तो मग्गिऊण असईए । दव्वस्स व असईए ताओवि अपच्छिमा पिंडी ॥ (१॥) अध्वनो निर्गतादयः संयत्यस्त्रिकृत्वस्त्रीन् वारान् वसतिं मार्गयित्वा असत्यलभ्यमाने गुप्तद्वार उपाश्रये अपावृतद्वारेऽपि वसन्ति । तत्र च यदि कपाटमवाप्यते ततः सुन्दरमेव, अथ न प्राप्यते, अतो द्रव्यस्य कपाटस्यासति कंटकादिकमप्यानीय पिधातव्यं यावदपश्चिमा सर्वान्तिमा यतना । ' तओवि पिंडी ' त्ति ताः सर्वा अपि पिंडीभूय परस्परं करबन्धं कृत्वा दंडकव्यग्रहस्तास्तिष्ठन्तीति । एनामेव निर्युक्तिगाथां व्याचष्टे-अन्नत्तो व कवाडं, कंटियदंडचिलिमिलिबहिंकिटिया । पिंडीभवंति सभए, काऊण न्नोन्नकरबन्धं ॥ (२॥) कपाटयुक्तस्य द्वारस्याभावे अन्यतोऽपि कपाटं याचित्वा द्वारं पिधातव्यम्, अथ याच्यमानमपि तत्र लब्धं, ततो वंशकटो याचितव्यः, तस्यालाभे कंटिकाः-कंटकशाखाः, तासामप्राप्तौ दंडकैस्तिरश्चीनाश्चिलिमिलिका क्रियते, तावतां दंडकानामभावे वस्त्रचिलिमिलिका बध्यते, बहिर्द्वारमूले किटिकाः-स्थविराः क्रियन्ते । अथ कोऽपि तासामभिद्रवणं करोति, ततस्ताद्दशे सभये सोपसर्गे सति अन्योन्यकरबन्धं कृत्वा पिंडीभवन्ति । कथं पुनः ? इत्यत आह-अंतो हवंति तरुणी, सद्दं दंडेहि ते य तालिंति । अह तत्थ होंति वसभा, वारिंति गिहीव तो होउं । (३॥) अन्तर्मध्ये तरुण्यो गृहीतदंडकहस्तास्तिष्ठन्ति, बहिस्तु स्थविराः, तास्तरुण्योऽपि शब्दं-बृहद्धनिताबोलं कुर्वन्ति, येन भूयान् लोको मिलति । तांश्च स्तेनान् मैथुनार्थिन उपद्रवतो दंडकैः प्रताडयन्ति । अथ तत्र वृषभाः सन्निहिता भवन्ति । ततस्ते गृहिण इव भूत्वा तान् वारयन्ति । इति श्री बृहत्कल्पसूत्रवृत्तौ द्वितीयखंडे २७ पत्रे ॥ २ ॥

ज्ञानदर्शनादिकं कञ्चिद्गुणं प्रेक्ष्य पार्श्वस्थादिपुरुषवन्दनेऽपि न दोष इत्यभिप्रायो लिख्यते-

दंसणनाणचरित्तं, तवविणयं जत्थ जत्तियं जाणे । जिणपन्नत्तं भत्तीइ, पूअए तं तहिं भावं ॥ १ ॥ दर्शनं च निःशङ्कितादिगुणोपेतं सम्यक्त्वम्, ज्ञानं चाचारादिश्रुतम्, चारित्रं च मूलोत्तरगुणानुपालनात्मकम्, दर्शनज्ञानचारित्रं द्वन्द्वैकवद्भावः, एवं तपश्चानशनादि,

॥२२९॥

विनयश्चाभ्युत्थानादिस्तपोविनयं, एतद्दर्शनादि यत्र पार्श्वस्थादौ पुरुषे यावद्यत्परिणामं स्वल्पं बहु वा जानीयात्तत्र तमेव भावं जिनप्रज्ञप्तं स्वचेतसि व्यवस्थाप्य तावत्यैव भक्त्या कृतिकर्मादिलक्षणया पूजयेत् । इति बृहत्कल्पवृत्तौ तृतीयखंडैकादशपत्रे ॥ ३ ॥

एतेनैव च ये पार्श्वस्थं सर्वथाऽचारित्रिणं मन्यन्ते तेऽपि परास्ता द्रष्टव्याः ।

केनचित्कारणबलेन परैः सह संवासे समापन्ने येन सह स्थेयं, यद्वा कर्त्तव्यं तल्लिख्यते-

पच्छन्नअसति निण्हव, बोडिय भिखु य असोय सोआय । पउरदवचडुगाई, गरहा य सअंतरं एक्को ॥ १ ॥ प्रच्छन्नस्य कंटकचिलिमिलिकयोश्चाभावे निह्नवेषु तिष्ठन्ति । तदभावे बोटिकेषु, तदप्राप्तौ भिक्षुकेषु । एतेष्वपि पूर्वमशौचवादिषु, ततः शौचवादिषु, ततः शौचवादिषु च स्थिता आचमनादिषु क्रियासु प्रचुरद्रव्येण कार्यं कुर्वन्ति । चडुकं कमढकं तत्र भुञ्जते आदिशब्दादपरेणापि येन ते शौचवादिनो जुगुप्सां न कुर्वन्ति, तस्य परिग्रहः । एवं प्रवचनस्य गर्हा परिहृता भवति ॥ सान्तरं चोपविष्ठा भुञ्जते । ' एको ' त्ति । एकः क्षुल्लकादिः कमढकानां कल्पं करोति । इति श्रीबृहत्कल्पतृतीयखंडे २४ पत्रे ॥ ४ ॥

कदाचिदज्ञानात्स्त्यानर्द्धिनिद्रावति दीक्षिते सति यो विधिः स लिख्यते-

केसवअद्धबलं पन्नवेति मुअ लिंग णत्थि तुह चरणं । णेच्छस्स हरइ संघो, णवि एक्को मा पदोसं तु ॥ १ ॥ केशवोवासुदेवस्तस्य बलादर्द्धबलं स्त्यानर्द्धिमतो भवतीति तीर्थकृदादयः प्रज्ञापयन्ति, एतच्च प्रथमसंहननमङ्गीकृत्योक्तम्, इदानीं पुनः सामान्यलोकबलाद्द्विगुणं त्रिगुणं चतुर्गुणं वा बलं भवतीति मन्तव्यम् । यत एवमतः स प्रज्ञापनीयः सौम्य ! मुञ्च लिङ्गं नास्ति तव चरणं-चारित्रम्, यद्येवं गुरुणा सानुनयं भणितो मुञ्चति ततः शोभनमथ न मुञ्चति ततो मोक्तुमनिच्छतः, ततः सकाशात्सङ्घः समुदितः 'से ' तस्य लिङ्गं हरति-उद्दालयति, न पुनरेकः । कुतः ? इत्याह-मा तस्यैकस्योपरि प्रद्वेषं गच्छेत्, प्रद्विष्टश्च व्यापादनमपि कुर्यात् । लिङ्गापहारनियमार्थमिदमाह-अवि केवलमुप्पाडे, ण य लिङ्गं देइ अणतिसेसी से । देसवय दंसणं वा, गिण्ह अणिच्छे पलायन्ति ॥ २ ॥ अपिः-सम्भावने, स चैतत्सम्भावयति । यद्यपि तेनैव भवग्रहणेन केवलमुत्पादयति तथाऽपि ' से ' तस्य स्त्यानर्द्धिमतो लिङ्गमनतिशयी न ददाति, यः पुनरतिशयज्ञानी स जानाति न भूय एतस्य स्त्यानर्द्धिनिद्रोदयो भविष्यति ततो लिङ्गं ददाति इतरथा न ददाति, लिङ्गापहारे पुनः क्रियमाणेऽ-

यमुपदेशो दीयते, देशव्रतानि-स्थूलप्राणातिपातविरमणादीनि गृहाण, तानि चेत्प्रतिपत्तुं न समर्थस्ततो दर्शनं-सम्यक्त्वं गृहाण । अथैवमप्यनुनीयमानो यदि लिङ्गं मोक्तुं नेच्छति तदा रात्रौ तं सुप्तं मुक्त्वा पलायन्ते-देशान्तरं गच्छन्ति । इति श्रीबृहत्कल्पभाष्यवृत्तौ तृतीयखंडे ४० पत्रे ॥ ५ ॥

यः सेनापति १ मन्त्रि २ पुरोहित ३ श्रेष्ठि ४ सार्थवाहसहितो राज्यं भुङ्क्ते, तस्य पिंडो वर्जनीयः । अन्यत्र तु भजना । इती श्रीबृहत्कल्पचतुर्थखंडे १५३ पत्रे ॥ ६ ॥

इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरीश्वरशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे अपरतटे श्रीबृहत्कल्पविचारनामा चतुर्थस्तरङ्गः ॥ ४ ॥

पीयूषपुद्गलाः खलु, निखिलाः परिणामिताः श्रुतत्वेन । गणिपुङ्गवेन तदिदं, मधुरं तदलभ्यमपि लोके ॥ १ ॥

अथ श्रीव्यवहारविचारा यथा-तत्र च केचिन्नीचकुलपिण्डनिषेधविषये प्रज्ञाप्यमाना वदन्ति-न ह्येते छिम्पकादयो नीचाः, किं तु ते म्लेच्छधिग्जात्यादयः, परं तत्र किञ्चित्, एतेऽपि तथैव । यथा-

लोगुत्तरपरिहारो, दुविहो परिभोग धरणे य । अत्रैवं व्युत्पत्तिः-परिहरणं परिहारः,' लोगुत्तरवज्जं इत्तरिए ' ' वज्जं ' वर्ज्यम्, तद्द्विधा-' लोग ' त्ति लौकिकं, ' उत्तर ' त्ति लोकोत्तरम्, लौकिकं द्विधा-इत्वरं यावत्कथिकं च, तत्रेत्वरं यत्सूतकमृतकादि तथा लोके सूतकादि दशदिवसान् यावद्वर्ज्यते च इति, यावत्कथिकं च वरुडछिम्पकचर्मकारडोम्बादि, एते हि यावज्जीवं शिष्टैः सम्भोगादिना वर्ज्यन्ते । लोकोत्तरमपि वर्ज्यं द्विधा-इत्वरं यावत्कथिकं च, तत्रेत्वरं ' दाणे अभिगमसड्ढे ' इत्यादि । यावत्कथिकं ' अट्ठारस पुरिसेसुं, वीसं इत्थीसु दस नपुंसेसु ' इत्यादि । इति श्रीव्यवहारभाष्यवृत्तौ प्रथमोद्देशे ' कंठगमादी दव्वे ' इत्येतद्गाथायां ६५९ प्रतौ ५८ पत्रे ॥ १ ॥

अथ येषु द्रव्यक्षेत्रकालभावेषु येन विधिनाऽऽलोचना ग्राह्या तल्लिख्यते-तत्र यदुक्तमधस्तात् ' अवराहे दिवसतो पसत्थंमि ' तदिदानीं व्याख्यानयति-

दव्वादिचउरभिग्गह, पसत्थमपसत्थ ते दुहेक्केका । अपसत्थे वज्जेउं, पसत्थएहिं तु आलोए ॥ १ ॥ अपराधालोचनायां दीयमानायां विधिर्वक्तव्यः, तत्र यदुक्तमधस्तात् द्रव्यादयो द्रव्यक्षेत्रकालभावाश्चत्वारश्चतुःसङ्ख्याका अपेक्षणीया भवन्ति । तथा ' अभिग्गह '

त्ति दिशामभिग्रहः कर्त्तव्यः । ते च द्रव्यादयो दिशश्चैकैके प्रत्येकं द्विधा द्विप्रकाराः, तद्यथा-प्रशस्ताः अप्रशस्ताश्च, तत्राप्रशस्तान् द्रव्यादीन् अप्रशस्तांश्च दिशो वर्जयित्वा प्रशस्तैर्द्रव्यादिभिर्दिग्विशेषैश्च, किमुक्तं भवति ? प्रशस्तेषु द्रव्यादिषु प्रशस्ताश्च दिशोऽभिगृह्यालोचयेत्-आलोचनां दद्यात् ॥ तत्राप्रशस्तद्रव्यादिप्रतिपादनार्थमाह-भग्गघरे कुड्डेसु अ, रासीसु य जे दुमा य अमणुण्णा । तत्थ न आलोएज्जा, तप्पडिवक्खे दिसा तिन्नि ॥ (२॥) यत्र स्तम्भकुम्भकुड्यादीनामन्यतमत्किमपि पतितं तद् भग्नगृहं तत्र, तथा ' कुड्डेसु ' त्ति कुड्यग्रहणात् कुड्यमात्राविशेषे । तत्र पाठान्तरम्-' रुद्देसु य ' त्ति, तत्र रुद्रेषु-रुद्रगृहेषु, तथा राशिषु-अमनोज्ञतिलमाषकोद्रवादिधान्यराशिषु, ये च द्रुमा अमनोज्ञाः-निष्पत्रकंटकीप्रभृतयोऽमनोज्ञाः, तत्र तेष्वप्याश्रयभूतेषु, उपलक्षणमेतत् अप्रशस्तासु तिथिषु, अप्रशस्तेषु च सन्ध्यागतादिषु नक्षत्रेषु अप्रशस्ताश्च याम्यादीर्दिशोऽभिगृह्य नालोचयेत्, किं तु तत्प्रतिपक्षे प्रशस्तद्रव्यादिरूपे आलोचयेत् । + +

+ + + + + + + +

तथा प्रशस्ताश्च तिस्रो दिशः पूर्वामुत्तरां चरन्तीं चाऽभिगृह्य आलोचयेत् । इदानीममनोज्ञधान्यराश्यादिषु द्रव्यादित्वयोजनामाह-अमणुण्णधण्णरासी, अमणुण्णदुमा य होंति दव्वंमि । भग्गधररुद्दऊसर, पवा य दड्ढाइ खित्तंमि ॥ (३॥) अमनोज्ञधान्यराशयोऽमनोज्ञद्रुमाश्च भवन्ति द्रव्ये द्रष्टव्याः, भग्नगृहं-प्रागुक्तस्वरूपम् । ' रुद्द ' त्ति रुद्रगृहं ' ऊसर ' त्ति उषरं यत्र तृणादिकं नोद्गच्छति, छिन्नटङ्का-तटीप्रपातः, भृगुप्रपातादिकं वा, दग्धं-दवदग्धं, आदिशब्दाद्विद्युद्दग्धादिपरिग्रहः । इत्यादि सर्वं क्षेत्रं द्रष्टव्यम्, तत्र यत् ' अमणुण्णदुमा य होंति दव्वंमि ' इत्युक्तं तदेतद्व्याख्यानयति-निप्पत्तकंटइल्ले, विज्जुहते खारकडुयदड्ढे य । अयतउयतंबसीसग, दव्वे धण्णा य अमणुण्णा ॥ (४॥) निष्पत्राः-स्वभावतः पत्ररहिताः करीरादयः, कंटकिनो-बदरीबब्बूलप्रभृतयः, विद्युद्धता-विद्युत्प्रपातभग्नाः, क्षाररसा-मोरडप्रभृतयः, कटुकाः-कटुकरसा रोहिणीकुटजनिम्बादयः, दग्धा-दवदग्धाः, एतान् द्रुमान् अमनोज्ञान् जानीहीति वाक्यशेषः । न केवलममनोज्ञा धान्यराशयोऽमनोज्ञा द्रुमाश्च द्रव्ये वर्जनीयाः, किं तु अयस्त्रपुताम्रसीसकराशयो द्रव्ये वर्जनीयाः । ' अमणुन्नधन्नरासी ' त्ति व्याख्यानयति-अमनोज्ञानि धान्यानि पुनः चशब्दः पुनरर्थे अमनोज्ञधान्यराशयः । सम्प्रति कालतो ये दिवसा वर्जनीयास्तानेवाह-पडिकुट्ठेल्लगदिवसे, वज्जेज्जा अट्ठमिं च नवमिं च । छट्ठिं च चउत्थिं, बारसिं च दोण्हंपि पक्खाणं ॥ (५॥) इह इल्लप्रत्ययः प्राकृते स्वार्थे, प्रतिकुष्टा एवं प्रतिकुष्टेल्लकाः, ते

च ते दिवसाश्च प्रतिकुष्टेल्लकदिवसाः-प्रतिषिद्धा दिवसास्तान् वर्जयेत्, तानेव नामत आह-द्वयोरपि शुक्लकृष्णरूपयोः पक्षयोरष्टमीं नवमीं षष्ठीं चतुर्थीं द्वादशीं च, एता हि तिथयः शुभप्रयोजनेषु सर्वेष्वपि स्वभावत एव प्रतिकूलास्ततो वर्जनीयाः, इदं कालतोऽप्रशस्तं वर्ज्यम् । सन्ध्यागतादिनक्षत्रं तदेवाह-संज्झागयं १ रविगयं, २ विड्डेरं ३ सग्गहं ४ विलंबिं ५ च । राहुहयं ६ गहभिन्नं ७, वज्जेज्जा सत्तनक्खत्ते ॥ ६ ॥ सन्ध्यागतं नाम यत्र नक्षत्रे सूर्योऽनन्तरं स्थास्यति तत् आदित्यपृष्टस्थितम्, अन्ये पुना राहुर्यस्मिन्नुदिते सूर्य उदेति तत् सन्ध्यागतम्, अपरे त्वेवं ब्रुवते यत्र रविस्तिष्ठति तस्माच्चतुर्दशं पञ्चदशं वा नक्षत्रं सन्धयागतम्, रविगतं-यत्र रविस्तिष्ठति, पूर्वद्वारिके नक्षत्रे पूर्वदिशागन्तव्ये यदा अपरया दिशा गच्छति तदा तद्विद्वारं-विगतद्वारमित्यर्थः, यत्क्रूरग्रहेणाक्रान्तं तत्सग्रहम्, विलम्बि-यत्सूर्येण परिभुज्य मुक्तम्, अन्ये त्वाहुः-सूर्यस्य पृष्टतोऽग्रतो वाऽनन्तरं नक्षत्रं सन्ध्यागतम्, यत्पुनः सूरगतान्नक्षत्रात्पृष्टतस्तृतीयं तद्विलम्बि इति । राहुहतं यत्र सूर्यस्य चन्द्रस्य वा ग्रहणम्, यस्य मध्येन ग्रहोऽगमत् तद्ग्रहभिन्नम्, एतानि सप्तनक्षत्राणि चन्द्रयोगयुक्तानि वर्जयेत् । यत एतेष्विमे दोषाः-संज्झागयंमि कलहो, होइ कुभत्तं विलंबिनक्खत्ते । विड्डेरे परविजयो, आइच्चगए अनिव्वाणी ॥ ७ ॥ जं सग्गहंमि कीरइ, नक्खत्ते तत्थ वुग्गहो होइ । राहुहयंमि अ मरणं, गहभिन्ने सोणिउग्गालो ॥ ८ ॥ सन्ध्यागते नक्षत्रे सुभेषु प्रयोजनेषु प्रारभ्यमाणेषु कलहो-राटिर्भवति, विलम्बिनक्षत्रे कुभक्तम्, विद्वारे परेषां शत्रूणां विजयः, आदित्यगते-रविगते अनिर्वाणिः-असुखम्, सग्रहे पुनर्नक्षत्रे यत्क्रियते तत्र व्युद्ग्रहः-सङ्ग्रामो भवति, राहुहते मरणम्, ग्रहभिन्ने शोणितोद्गारः-शोणितविनिर्गमः, एवं भूतेष्वप्रशस्तद्रव्यक्षेत्रकालभावेषु नालोचयेत्, किं तु प्रशस्तेषु । तत्र प्रशस्ते द्रव्ये शाल्यादिप्रशस्तधान्यराशिषु मणिकनकमौक्तिकवज्रवैडूर्यपद्मरागादिराशिषु च । प्रशस्तं क्षेत्रं साक्षादाह-तप्पडिवक्खे खेत्ते, उच्छुवणे सालिचेइयघरे वा । गंभीरसाणुणाए, पयाहिणावत्त उदए य ॥ ९ ॥ तस्य प्रागुक्तस्याप्रशस्तस्य क्षेत्रस्य प्रतिपक्षे प्रशस्ते क्षेत्रे इक्षुवने, उपलक्षणमेतत्, आरामे वा पत्रपुष्पफलोपेते ' सालि ' त्ति, वनशब्दोऽत्रापि सम्बध्यते, शालिवने चैत्यगृहे वा, वाशब्दो विकल्पने तथा गम्भीरे गम्भीरं नाम भग्नत्वादिदोषवर्जितम्, शेषजनेन च प्रायेणालक्षणीयमध्यभागं स्थानं गम्भीरमिति वचनात्, सानुनादे यत्रोच्चारिते शब्दे प्रतिशब्दः समन्तादुत्तिष्ठति तत्सानुनादम्, प्रदक्षिणावर्त्तमुदकं यत्र नद्यां पद्मसरसि वा तत्प्रदक्षिणावर्त्तोदकं तस्मिन् वा चशब्दो वाशब्दार्थः क्वचिद्वाशब्दस्यैव पाठः, प्रशस्तं कालमाह-उत्तदिणसेसकाले, उच्चट्ठाणा गहा य भावंमि । पुव्वदिसउत्तरा वा, चरंतिया जाव

॥२२५॥

नवपुव्वी ॥ १० ॥ उक्तानि यानि दिनानि अष्टम्यादीनि, तेभ्यो ये शेषा द्वितीयादयो दिवसास्ते स च कालश्च उक्तदिनशेषकालस्तस्मिन् प्रशस्ते व्यतिपातादिदोषवर्जिते, उपलक्षणमेतत्, प्रशस्ते चर करणे प्रशस्ते मुहूर्त्ते, एतत् कालतः प्रशस्तमुक्तम्, भावतः प्रशस्तमाह-उच्चैःस्थानं येषां ते उच्चैःस्थाना ग्रहा भावे भावविषये प्रशस्तम्, किमुक्तं भवति ? भावत उच्चैःस्थानगतेषु ग्रहेषु, तत्र ग्रहाणामुच्चैःस्थानमेवम्-सूर्यस्य मेष उच्चैःस्थानम्, सोमस्य वृषः, मङ्गलस्य मकरः, बुधस्य कन्या, बृहस्पतेः कर्कटः, शुक्रस्य मीनः, शनेश्च तुला, सर्वेषामपि च ग्रहाणामात्मीयादुच्चैःस्थानाद्यत्सप्तमस्थानं तन्नीचैःस्थानम् । अथवा भावतः प्रशस्ता ये सोमग्रहा बुधशुक्रबृहस्पतिशशिनः, एतेषां सम्बन्धिषु राशिषु, एतैरवलोकितेषु च लग्नेषु आलोचयेत् । तथा तिस्रो दिशः प्रशस्ता ग्राह्याः, तद्यथा-पूर्वा उत्तरा चरंती, चरन्ती नाम यस्यां स भगवानर्हन् विहरति, सामान्यतः केवलज्ञानी, मनःपर्यायज्ञानी, अवधिज्ञानी, चतुर्दशपूर्वी, त्रयोदशपूर्वी यावन्नवपूर्वी, यदिवा यो यस्मिन्, युगप्रधानः आचार्यः स वा यया विहरति, एतासां तिसृणामन्यतमस्या दिशोऽभिमुखं आलोचनार्होऽवतिष्ठते । तस्येयं सामाचारी-निसज्जऽसति पडिहारिय, किइकम्मं काउ पंजलुक्कुडुओ । बहुपडिसेवरिसासु य, अणुण्णवेउं निसिज्जगतो ॥ ११ ॥ आत्मीयकल्पैरपरिभुक्तैराचार्यस्य निषद्यां करोति, असति-आत्मीयकल्पानामभावेऽन्यस्य सक्तान् प्रातिहारिकान् कल्पान् गृहीत्वा करोति, कृत्व च यद्याचार्यः पूर्वाभिमुखो निषीदति तत आलोचको दक्षिणत उत्तराभिमुखोऽवतिष्ठते, यद्याचार्य उत्तराभिमुखो निषण्णस्तत आलोचको वामपार्श्वे पूर्वाभिमुखस्तिष्ठति, चरन्तीं वा दिशं प्रत्यभिमुखो भवति, ततः कृतिकर्म-द्वादशावर्त्तवन्दनकं कृत्वा प्रबद्धोऽञ्जलिर्येन स प्रबद्धाञ्जलिः उत्सर्गत उत्कुटुकस्थितः सन्नालोचयेत्, यदि पुनर्बहुप्रतिसेवितमस्तीति चिरेणालोचना परिसमाप्तिं यास्यति तावन्तं च कालमुत्कुटुकः स्थातुं न शक्नोति, यदिवा अर्शोरोगवत उत्कुटुकस्य सतोऽर्शांसि क्षोभमुपयान्ति, ततो बहुप्रतिसेवी अर्शःसु च सत्सु गुरुमनुज्ञाप्य निषद्यायामौपग्रहिकपादप्रोछने वा अन्यस्मिन् वा यथार्हे आसने स्थित आलोचयति । किं पुनस्तदालोचनीयमुच्यते-चतुर्विधं द्रव्यादि, तथा चाह-चेयणमचित्तदव्वं, जणवयमद्धाण होति खित्तंमि । दिणनिसि सुभिक्खदुब्भिक्खकाले भावंमि हिट्ठियरे ॥ १२ ॥ द्रव्यतश्चेतनं-सचित्तमुपलक्षणमेतत्, मिश्रं वा, अचित्तं-अचेतनं वा, अकल्पिकं यत्प्रतिसेवितं, क्षेत्रतो जनपदे अध्वनि वा, कालतो दिने निशि वा यदिवा सुभिक्षे दुर्भिक्षे वा भावे ' हिट्ठियरे ' सप्तमी तृतीयार्थे हृष्टेन इतरेण वा ग्लानेन सता यतनयाऽयतनया वा दर्पतः कल्पतो

वा, तदालोचयति । कथम् ? इत्याह-जह बालो जंपंतो, कज्जमकज्जं च उज्जुअं भणइ । तं तह आलोएज्जा, मायामयविप्पमुक्को उ ॥ १३ ॥ यथा बालो मातुः पितुर्वा पुरतो जल्पन् कार्यमकार्यं च ऋजुकं-अकुटिलं भणति तथा आलोचकोऽपि मायामदविप्रमुक्तः सन् तदालोचनीयं यथा ऋजुकभावेनालोचयेत् । आलोचनायाश्चेमे गुणाः-लहुयाह्लादीजणणं, अप्पपरनियत्ति अज्जवं सोही । दुक्करकरणं विणओ, निस्सल्लत्तं च सोहिगुणा ॥ १४ ॥ लघोर्भावो लघुता, यथा भारवाही अपहृतभारो लघुर्भवति तथा आलोचकोऽप्युद्धृतशल्यो लघुर्भवति इति लघुत्ता, तथा-ह्लादनं, ह्लादिरोणादिक इप्रत्ययः प्रह्लत्तिस्तस्य जननं उत्पत्तिर्ह्लादिजननं प्रमोदोत्पाद इति यावत्, तथा ह्यतीचारधर्मोपतप्तस्य चित्तस्य मलयगिरिपवनसम्पर्केणेवालोचनाप्रदानेनातीचारधर्मापगमो भवति संविग्नानां महामुनीनां परमः प्रमोद इति, तथा ' अप्परनियत्ति ' आलोचनाप्रदानतः स्वयमात्मनो दोषेभ्यो निवृतिः कृता, तं च दृष्ट्वाऽप्यन्ये आलोचनाभिमुखा भवन्तीत्यन्येषामपि दोषेभ्यो निवर्त्तनमिति, तथा यदतीचारजातं प्रतिसेवितं तत्परस्मै प्रकटयतामात्मन आर्जवं सम्यग्विभावितं भवति, आर्जवं नामामायाविता, तथा अतीचारपङ्कमलिनस्यात्मनश्चरणस्य वा प्रायश्चित्तजलेनातीचारपङ्कप्रक्षालनतो निर्मलताशोधिः, तथा दुष्करकरणं-दुष्करकारिता तथा हि- यत्प्रतिसेवनं तन्न दुष्करं, अनादिभवाभ्यस्तत्वात्, यत्पुनरालोचयति तद्दुष्करं, प्रबलमोक्षानुयायिवीर्योल्लासविशेषेणैव तस्य कर्त्तुं शक्यत्वात् तथा ' विणउ ' त्ति आलोचयता चारित्रविनयः सम्यगुपपादितो भवति । ' निस्सल्लत्तं ' ति सशल्य आत्मा निःशल्यः कृतो भवतीति निःशल्यता, एते शोधिगुणाः-आलोचनागुणाः, आलोचनाशोधिरित्यनर्थान्तरत्वम् । अथ कस्य समीपे आलोचना दातव्या ? उच्यते-आगमव्यवहारिणः श्रुतव्यवहारिणो वा । तथा चाह-आगमसुअववहारी, आगमओ छव्विहो उ ववहारो । केवलिमणोहिचोद्दसदसनवपुव्वी उ नायव्वो ॥ १५ ॥ ' आगमसुयववहारी ' त्ति व्यवहारिशब्दः प्रत्येकमभिसम्बध्यते आलोचनार्हो द्विविधः, तद्यथा-आगमव्यहारी श्रुतव्यवहारी च, तत्रागमतो व्यवहारी षड्विधः, तद्यथा-केवली-केवलज्ञानी, ' मणोहि ' त्ति पदैकदेशे पदसमुदायोपचारान्मनःपर्यायज्ञानी अवधिज्ञानी च, ' चोद्दसदसनवपुव्वी ' त्ति पूर्वशब्दः प्रत्येकमभिसम्बध्यते चतुर्दशपूर्वी दशपूर्वी नवपूर्वी च ज्ञातव्याः, एते च आगमव्यवहारिणः-प्रत्यक्षज्ञानिन उच्यन्ते चतुर्दशादिपूर्वबलसमुत्थस्यापि ज्ञानस्य प्रत्यक्षतुल्यत्वात् । तथा हि-येन यथा योऽतिचारः, कृतस्तं तथा सर्वमेते जानन्तीति । पह्युट्ठे पडिसारण, अप्पडिवज्जंतयं न खलु सारे । जइ पडिवज्जइ सारे, दुविहतियारंपि पच्चक्खी ॥ १६ ॥ प्रत्यक्षी-

प्रत्यक्षज्ञानी आगमव्यवहारीत्यर्थः द्विविधमपि मूलगुणविषयमुत्तरगुणविषयं चातिचारमालोचयंतो यत्किमपि आलोचनीयम् । 'पल्लुट्ठे' त्ति विस्मृतं भवति ततस्तस्मिन् विस्मृते प्रतिसारणं करोति, यथाऽमुकं तवालोचनीयं विस्मृतमिति तदप्यालोचयति, केवलं यदि केवलज्ञानादिबलेनैतज्जानाति यथैष भणितः सन् शुद्धभावत्वात्सम्यक् प्रतिपद्यते । ' वर्त्तमानसामीप्ये वर्त्तमानवद्वा ' इति वचनतो भविष्यति वर्त्तमानाभिधानात्प्रतिपत्स्यते इति तदा स्मारयति, यदि पुनरेतदवगच्छति यथैष भणितोऽपि सन्न सम्यग् प्रतिपत्स्यते इति, तदा तमप्रतिपद्यमानं-अप्रतिपत्स्यमानं न खलु नैव स्मारयति, निष्फलत्वात् । अमूढलक्षो हि भगवानागमव्यवहारी, अत एव दत्तायामप्यालोचनायां यद्यालोचकः सम्यगावृत्तौ ज्ञातस्ततस्तस्मै प्रायश्चित्तं प्रयच्छति अथ न प्रत्यावृत्त-स्ततो न प्रयच्छतीति । श्रुतव्यवहारिणः प्राह-कप्पपकप्पी उ सुए आलोयावेंति ते उ तिक्खुत्तो । सरिसत्थमपलिउंची, विसरिसपरिणामतो कुंची ॥ १७ ॥ कल्पग्रहणेन दशाश्रुतस्कन्धकल्पव्यवहारा गृहीताः प्रकल्पग्रहणेन निशीथः कल्पश्च प्रकल्पश्च कल्पप्रकल्पं तदेषामस्तीति कल्पप्रकल्पिनः, दशाकल्पव्यवहारादिसूत्रार्थधराः, तुशब्दत्वात् महाकल्पश्रुतमहानिशीथनिर्युक्तिनिशीथपीठिकाधराश्च श्रुते श्रुतव्यवहारिणः प्रोच्यन्ते । तथाऽऽलोचकं त्रिःकृत्वस्त्रीन् वारानालोचापयन्ति, ते ह्येकं द्वौ वा वारावालोचिते अनेन प्रतिकुञ्चनयाऽऽलोचितमप्रतिकुञ्चनया वेति विशेषं नावबुध्यते, ततस्त्रीन् वारानालोचापयन्ति । कथम् ? इति चेत्, उच्यते-प्रथमवेलायां निद्रायमाण इव शृणोति, ततो ब्रूते निद्राप्रमादं गतवानहमिति न किमप्यश्रौषमतो भूयोऽप्यालोचय, द्वितीयवारमालोचिते भणति न सुष्ठु मयाऽवधारितमनुपयोगभावादतः पुनरप्यालोचय, एवं त्रिष्वपि वारेषु यदि सदृशार्थमालोचितं ततो ज्ञातव्यमेषोऽप्रतिकुञ्चोऽमायावी, अथ विसदृशं तर्हि ज्ञातव्यमेष परिणामतः कुञ्ची कुटिलो मायावी, अथैकं द्वौ वा वारावालोचनादापनेन मायावी किं नोपलभ्यते येन त्रीन् वारानित्युक्तं उच्यते-उपलभ्यते परं स्फुटतरोपलब्धिनिमित्तं त्रीन् वारानालोचाप्यते, तस्यापि च प्रत्ययो भवति यथाऽहं विसदृशभणनेन मायावी लक्षितः ततो मायानिष्पन्नं मासगुरुप्रायश्चित्तं पूर्वं दातव्यं तदनन्तरमपराधनिमित्तं प्रायश्चित्तमिति । अत्रैवार्थे दृष्टान्तमाह-तिन्नि उ वारा जह दंडियस्स, पलिउंचियंमि अस्सुवमा । सुद्धस्स होइ मासो, पलिउंचिइ तं चिमं चण्णं ॥ १८ ॥ दंडिको नाम करणपतिस्तस्य यथाऽन्यायपीडितं करणमुपस्थितं किं मायाव्येषोऽमायावी वेति परिज्ञानाय त्रीन् वारानपन्यायमुच्चारयितुमभियोगः । एवं श्रुतव्यवहारिणोऽपि अतीचारशल्यपीडितं प्रायश्चित्तव्यवहारार्थमुपस्थितं एष प्रतिकुञ्चनापरो न वेति परिज्ञानार्थं त्रीन् वारानुच्चारयितुं

संरम्भः, ततो यदा श्रुतव्यवहारिभिस्त्रिःकृत्व आलोचनाप्रदापनेनागमव्यवहारिभिः प्रथमवेलायामागमबलेन तस्य प्रतिकुञ्चितकौटिल्यं ज्ञातं भवति तदा तस्मिन् प्रतिकुञ्चिते ज्ञाते अश्वोपमा-अश्वदृष्टान्तः क्रियते यथा-आर्य ! शृणु तावदिदमुदाहरणम्-जहा कस्सवि रन्नो एगो अस्सो सव्वलक्खणसंजुत्तो धावणपवणसमत्थो, तस्स आसस्स गुणेणं अजेयो, सो राया सव्वे सामंतराइणो आणवेइ, ताहे सामंतराइणो अप्पप्पणो सभासु भणंति नत्थि कोइ एरिसो पुरिसो जो तं हरित्ता आणेइ, सव्वेहिं भणियं सो पुरिसपंजरत्थो चिट्ठइ गच्छए वा न सक्का हरिउं, एगस्स रण्णो एगेण पुरिसेण भणियं-जइ सो मारेयव्वो तो मारेमि, ताहे रन्ना भणियं मा अम्हं तस्स वा भवउ घाएहत्ति, ततो सो तत्थ गओ, तेणछन्नपदेसं ठिएण श्लक्ष्णाया ईषिकाया अग्रभागे क्षुद्रकंटकं प्रोतं कृत्वा दिक्करुयधणुएण मिल्लेइ तेण आसो विद्धो, ईषिका अश्वमाहत्य पतिता रिङ्गिणीकाकंटकोऽश्वशरीरेऽनुप्रविष्टः, ततो सो आसो तेण अव्वत्तसल्लेण परिहायइ पभूयगुणजोग्गासणमपि चरंतो, ततो विज्जस्स अक्खातो विज्जेण परिचिंतिऊण भणियं-नत्थि अण्णो कोइ रोगो अवस्समव्वत्तो कोइ सल्लो, ताहे विज्जेणं सो आसो जमगसमगपुरिसेहिं चिक्खल्लेण आलिंपावितो, ततो जत्थ पढमं सुक्कं दिट्ठं तत्थ फालेत्ता अवणीतो सो क्षुद्रकंटकी सल्लो, जहा सो आसो ससल्लो न सक्केइ सामंतरायाणो निज्जिणिउं पुव्वं एवं तुमंपि किरियाकलावं करेंतोवि संजमवुड्ढिमकुव्वमाणो न कम्माणं जयं करेसि ता सव्वं सम्मं आलोएहि इति । यदि पुनर्न किमपि तस्य प्रतिकुञ्चितं ज्ञातं भवति तदा नासावश्वदृष्टान्तः क्रियते, स्वभावत एव तस्य सम्यगालोचकत्वात्, तस्य च शुद्धस्य मासिकं परिहारस्थानं प्राप्तस्य प्रायश्चित्तं भवति मासः, इतरस्य तु कृतप्रतिकुञ्चनस्य तच्चापन्नं मासिकं प्रायश्चित्तमिदं चान्यत् मायानिष्पन्नं मासगुरु, इति गाथार्थः । सम्प्रति यदुक्तं ' जह दंडियस्स ' त्ति तद्विभावयति । अत्थुप्पत्ती असरिसनिवेयणे दंडो पच्छ ववहारो । इय लोयउत्तरम्मिवि, कुंचियभावं तु दंडंति ॥ १९ ॥ उत्पद्यते यस्मादिति उत्पत्तिः, अर्थस्योत्पत्तिरर्थोत्पत्तिः, अर्थश्चोत्पद्यते व्यवहारात् अर्थोत्पत्तिर्व्यवहार उच्यते तस्यामर्थोत्पत्तौकरणव्यवहारे असदृशनिवेदने दंडः, इयमत्र भावना-यथा कोऽपि पुरुषोऽपन्यायपीडितो राजकरणमुपस्थितो निवेदयति-अहं देवदत्तेन अपन्यायेन पीडितः ततः कारणिकाः पृच्छन्ति-कथमन्यायः संवृत्तः ? सोऽकथयत् कथिते करणपतिर्ब्रूते-पुनः कथय, ततो भूयः कथयति, ततः पुनरपि ब्रूते भूयो कथय, तत्र यदि तिसृष्वपि वेलासु सदृशं वक्ति ततो ज्ञायते यथाऽनेन यथावस्थितः सद्भावः कथितः । अथ विसदृशं ततो जानाति करणपतिरेष प्रतिकुञ्च्य कथयति, ततः

॥२२९॥

स निर्भर्त्सयति-किमिति राजकुलेऽपि समागतस्त्वं मृषा वदसीति पूर्वं मायामृषाप्रत्ययं दण्ड्यते । ' पच्छ ववहारो ' त्ति पश्चाद्व्यवहारं कार्यते, व्यवहारेऽपि यदि पराजितो भवति ततो द्वितीयवेलं दण्ड्यते, एष दृष्टान्तो दार्ष्टान्तिकयोजनमाह-' इय ' इत्यादि । एवमुक्तप्रकारेण लोकोत्तरेऽपि वारत्रयमालोचनादापनेन यदि कुञ्चितो भावो ज्ञातो भवति ततस्तं कुञ्चितभावं-कुटिलभावं पूर्वमाचार्यो निर्भर्त्सयति-किमित्यालोचनायामुपस्थितोऽपि मृषा वदसि । ततो ' दंडो ' इति प्रथमतो मायानिष्पन्नेन मासगुरुप्रायश्चित्तेन दंडयति । पश्चाद्यदापन्नं मासिकं तेन द्वितीयवेलं दंडयति । अथ वारत्रयमालोचनादानेऽपि कथं श्रुतव्यवहारिणो मायामन्तर्गतां लक्षयन्ति । तत आह-आगारेहि सरेहि य, पुव्वावरवाहयाहि य गिराहिं । नाउं कुंचियभावं, परोक्खनाणी ववहरंति ॥ २० ॥ आकाराः-शरीरगता भावविशेषाः, तत्र यः शुद्धस्तस्य सर्वेऽप्याकारा संविग्नभावोपदर्शका भवन्ति, इतरस्य तु न तादृशाः, स्वरा अप्यालोचयतः शुद्धस्य व्यक्ता विस्पष्टा अक्षुभिताश्च निस्सरन्ति, इतरस्य त्वव्यक्ता-अविस्पष्टाः क्षुभितगद्गदाश्च । तथा शुद्धस्य वाणी पूर्वापराव्याहता इतरस्य तु पूर्वापरविसंवादिनी, तत एवं परोक्षज्ञानिनः श्रुतव्यवहारिण आकारैः स्वरैः पूर्वापरव्याहताभिश्च गीर्भिस्तस्यालोचकस्य कुञ्चितभावं-कुटिलभावं ज्ञात्वा तथा व्यवहरति पूर्वं मायाप्रत्ययेन प्रायश्चित्तदण्डेन दण्डयति, पश्चादपराधप्रत्ययेन प्रायश्चित्तदण्डेनेति भावः इति श्रीव्यवहारप्रथमोद्देशके ६५९ प्रतौ ८४ पत्रे ॥ २ ॥

निश्चयतस्तु एकस्मिन् महाव्रते भग्ने सर्वाण्यपि भग्नानि, व्यवहारतस्तु यद्विराद्धं तदेव भग्नमित्यभिप्रायो लिख्यते-

अथ मूलगुणप्रतिसेवनायां उत्तरगुणप्रतिसेवनायां वा चारित्रभ्रंशे अस्ति कश्चिद्विशेषः उत नास्ति ? अस्तीति ब्रूमः, कोऽसौ इत्याह-मूलगुणदइयसगडे, उत्तरगुणमंडवे सरिसवाई । छक्कायरक्खणट्ठा, दोसुवि सुद्धे चरणसुद्धी ॥ १ ॥ मूलगुणेषु दृष्टान्तो दृतिः शकटं च, केवलमुत्तरगुणा अपि तत्र दर्शयितव्याः, उत्तरगुणेषु दृष्टान्तो मण्डपे सर्षपादि आदिशब्दाच्छिलादिपरिग्रहः तत्रापि मूलगुणा अपि दर्शयितव्याः, इयमत्र भावना-एकेनापि मूलगुणप्रतिसेवनेन तत्क्षणादेव चारित्रभ्रंश उपजायते उत्तरगुणप्रतिसेवनायां पुनः कालेन, अत्र दृष्टान्तो दृतिकः तथा हि-यथा दृतिक उदकभृतः पञ्चमहाद्वारः, तेषां महाद्वाराणामेकस्मिन्नपि महाद्वारे मुत्कलीभूते तत्क्षणादेव रिक्तीभवति, सुचिरेण तु कालेन पूर्यते, एवं महाव्रतानामेकस्मिन्नपि महाव्रतेऽतिचर्यमाणे तत्क्षणादेव समस्तचारित्रभ्रंशो भवति एकमूलगुणघाते सर्वमूलगुणानां

घातात्, तथा च गुरवो व्याचक्षते-एकव्रतभङ्गे सर्वव्रतभङ्ग इति एतन्निश्चयनयमतं, व्यवहारतः पुनरेकव्रतभङ्गे तदेवैकं भग्नं प्रतिपत्तव्यम्, शेषाणां तु भङ्गः क्रमेण, यदि प्रायश्चित्तप्रतिपत्त्या नानुसन्धत्ते, इति । अन्ये पुनराहुः-चतुर्थमहाव्रतभङ्गप्रतिसेवनेन तत्कालमेव सकलचारित्रभ्रंशः, शेषेषु पुनर्महाव्रतेष्वभीक्ष्णप्रतिसेवनया महताऽतिचारेण वा वेदितव्यः । उत्तरगुणप्रतिसेवनायां पुनः कालेन चरणभ्रंशो यदि पुनः प्रायश्चित्तप्रतिपत्त्या नोज्ज्वालयति । एतदपि कुतोऽवसेयम् ? इति चेत्, उच्यते- शकटदृष्टान्तात् । तथा हि-शकटस्य मूलगुणा द्वे चक्रे, उद्धी अक्षश्च, उत्तरगुणा बुध्नकीलकलोहपट्टादयः एतैर्मूलगुणैरुत्तरगुणैश्च सुसम्प्रयुक्तं सत् शकटं यथा भारवहनक्षमं भवति मार्गे च सुखं वहति, तथा साधुरपि मूलगुणैरुत्तरगुणैश्च सुसम्प्रयुक्तः सन् अष्टादशशीलाङ्गसहस्रभारवहनक्षमो भवति, विशिष्टोत्तरोत्तरसंयमाध्यवसायस्थानपथे च सुखं वहति । अथ शकटस्य मूलाङ्गानामेकमपि मूलाङ्गं भग्नं भवति तदा न भारवहनक्षमं, नापि मार्गे प्रवर्त्तते । उत्तराङ्गैस्तु कैश्चिद्विनाऽपि कियत्कालं शकटं भारक्षमं भवति प्रवहति च मार्गे, कालेन पुनर्गच्छता अन्यान्यपरिशटनादयोग्यमेव तदुपजायते । एवमिहापि मूलानामेकस्मिन्नपि मूलगुणे हते न साधूनामष्टादशशीलाङ्गसहस्रभारवहनक्षमता नापि संयमश्रेणिपथे प्रवहनम्, उत्तरगुणैस्तु कैश्चित्प्रतिसेवितैरपि कियतं कालं चरणभारवहनक्षमता संयमश्रेणिपथे प्रवर्त्तनं च, कालेन पुनर्गच्छता तत्राप्यन्यान्यगुणप्रतिसेवनातो भवति समस्तचारित्रभ्रंशः ततः शकटदृष्टान्तादुपपद्यते मूलगुणानां प्रतिसेवने एकस्यापि मूलगुणस्य नाशे तत्कालं चारित्रभ्रंशः उत्तरगुणनाशे कालक्रमेणेति । इतश्चैतदेव मण्डपसर्षपादिदृष्टान्तात् । तथा हि-एरण्डादिमण्डपे यद्येको द्वौ बहवो वा सर्षपाः उपलक्षणमेतत्-तिलतन्दुलादयो वा प्रक्षिप्यन्ते तथाऽपि मण्डपो न भङ्गमापद्यते अतिप्रभूतैस्त्वाढकादिसङ्ख्याकैर्भज्यते, अथ तत्र महती शिला प्रक्षिप्यते तदा तयैकयाऽपि तत्क्षणादेव ध्वंसमुपयाति, एवं चारित्रमण्डपोऽप्येकद्वित्र्यादिभिरुत्तरगुणैरतिचर्यमाणैर्न भङ्गमापद्यते बहुभिस्तु कालक्रमेणातिचर्यमाणैर्भज्यते, शिलाकल्पेन पुनरेकस्यापि मूलगुणस्यातिचारेण तत्कालं ध्वंसमुपगच्छतीति । इति श्रीव्यवहारभाष्यवृत्तौ प्रथमोद्देशके ६५९ प्रतौ १२७ पत्रे ॥ ३ ॥

अथऽऽलोचयतो गुणा दोषाश्च लिख्यन्ते-

" आलोयंतो एत्तो, दसहि गुणेहिं तु होइ उववेओ । जाइकुलविणयणाणे दंसणचरणेहि संपन्नो (॥ १ ॥) खंते दंतेऽमाई अपच्छतावी य होति बोधव्वे । आलोयणाए दोसा, एत्तो वुच्छं समासेणं ॥ २ ॥ इत ऊर्द्धं आलोचयन्नालोचको वक्तव्यः, स च

॥२३१॥

दशभिर्गुणैरुपपेत एव-युक्त एव भवति, तुरेवकारार्थो भिन्नक्रमत्वादत्र सम्बध्यते । तानेव गुणानुपदर्शयति ' जाइ ' इत्यादि, जातिसम्पन्नः, कुलसम्यन्नः, मातृपक्षो जाति, पितृपक्षः कुलम्, विनयसम्पन्नः, ज्ञानसम्पन्नः, दर्शनसम्पन्नः, चरणसम्पन्नः, क्षान्तः, दान्तः, अमायी, अपश्चात्तापी च बोद्धव्यः । अथ कस्मादालोचकस्यैतावान् गुणसमूहोऽन्विष्यते ? उच्यते-जातिसम्पन्नः प्रायोऽकृत्यं न करोति अथ कथमपि कृतं तर्हि सम्यगालोचयति, कुलसम्पन्नः प्रतिपन्नप्रायश्चित्तनिर्वाहक उपजायते, विनयसम्पन्नो निषद्यादानादिकं विनयं सर्वं करोति सम्यगालोचयति, ज्ञानसम्पन्नः श्रुतानुसारेण सम्यगालोचयति, अमुकश्रुतेन मे दत्तं प्रायश्चित्तमतः शुद्धोऽहमिति च जानीते, दर्शनसम्पन्नः, प्रायश्चित्ताच्छुद्धिं श्रद्धत्ते, चरणसम्पन्नः प्रायोऽतिचारं पुनर्न करोति अनालोचितं वा चारित्रं न शुध्यतीति सम्यगालोचयति, क्षान्तो नामं क्षमायुक्तः स कस्मिंश्चित्प्रयोजने गुर्वादिभिः खरपरुषमपि भणितः सम्यक् प्रतिपद्यते यदपि च प्रायश्चित्तमारोपितं तदपि सम्यग् वहति, दान्तो नाम इन्द्रियनोइन्द्रियजयसम्पन्नः स प्रायश्चित्ततपः सम्यक्करोति, मायाऽस्यास्तीति मायी न मायी अमायी सोऽप्रतिकुञ्चितमालोचयति, अपश्चात्तापी नाम यः पश्चात् परितापं न करोति हा दुष्ठु कृतं मया यदालोचितमिदानीं प्रायश्चित्ततपः कथं करिष्यामीति किं त्वेवं मन्यते-कृतपुण्योऽहं यत्प्रायश्चित्तं प्रतिपन्नवानिति । अत ऊर्द्धवमालोचनाया दोषान् समासेन सङ्क्षेपेण वक्ष्ये । प्रतिज्ञातमेव निर्वाहयति-आकंपित्ताऽणुमाणित्ता, (आकंपिअ अणुमाणिअ) जं दिट्ठं बायरं च सुहुमं वा । छण्णं सद्दाउलगं, बहुजणमव्वत्ततस्सेवी (॥२॥) आवर्जित सन्नाचार्यः स्तोकमेवं प्रायश्चित्तं दास्यतीति बुद्ध्या वैयावृत्त्यकरणादिभिरालोचनाचार्यमाकम्प्य-आराध्य यत् आलोचयति, एष आलोचनादोषः १, तथा अनुमान्यानुमानं कृत्वा लघुतरापराधनिवेदनतो मृदुदण्डप्रदायकत्वादिस्वरूपमाचार्यस्याकलय्य यदालोचयत्येषोऽप्यालोचनादोषः २, तथा यद्दृष्टमपराधजातं क्रियमाणमाचार्यदिना तदेवालोचयति नापरमिति तृतीय आलोचनादोष ३, ' बायरं च ' त्ति बादरं दोषजातमालोचयति न सूक्ष्मं, तत्रावज्ञापरत्वात् एष चतुर्थः ४, ' सुहुमं व ' त्ति सूक्ष्मं वा दोषजातमालोचयति न बादरम्, यःसूक्ष्ममालोचयति स कथं बादरं नालोचयतीत्येवंरूपभावसम्पादनार्थमाचार्यस्यैष पञ्चम आलोचनादोषः ५, तथा ' छण्णं ' ति प्रच्छन्नमालोचयति किमुक्तं भवति ? लज्जालुतामुपदर्श्यापराधानल्पशब्देन तथाऽऽलोचयति यथा केवलमात्मैव शृणोति, न गुरुरित्येष षष्ठ आलोचनादोषः, ' सद्दाउलं ' त्ति शब्दाकुलं बृहच्छब्दं यथा भवत्येवमालोचयति इदमुक्तं भवति-महता शब्देन तथाऽऽलोचयति यथाऽन्येऽप्यगीतार्थादयः शृण्वन्तीत्येष सप्तम आलोचनादोषः

॥२३२॥

७, तथा ' बहुजण ' त्ति बहुजनमध्ये यदालोचनं तद्बहुजनम्, अथवा बहवो जना आलोचनागुरवो यत्र तद्बहुजनमालोचनम्, किमुक्तं भवति ? एकस्य पुरत आलोच्य तदेवापराधजातमन्यस्यापि पुरत आलोचयति एषोऽष्टम आलोचनादोषः ८, ' अवत्त ' त्ति अव्यक्तोऽगीतार्थः, तस्याव्यक्तस्य गुरोः पुरतो यदपराधालोचनं तदव्यक्तम्, एष नवम आलोचनादोषः ९, ' तस्सेवि ' त्ति शिष्यो यमपराधमालोचयिष्यति तमेव सेवते यो गुरुरसौ तत्सेवी तस्य समीपे यदपराधालोचनं एष ममातिचारेण तुल्यस्ततो न किमपि मे प्रायश्चित्तं दास्यत्यल्पं वा दास्यति नं च मां खरंटयिष्यते यथा विरूपं कृतं त्वयेति बुद्ध्या तदालोचनं तत्सेवि, एष दशम आलोचनादोषः १० । इति श्रीव्यवहारभाष्यवृत्तौ प्रथमोद्देशके ९५९ प्रतौ १४१ पत्रे ॥ ४ ॥

अथ साधूनामपि योगादितपोऽनुष्ठानपरिसमाप्तावश्यं नन्द्यादिर्महोत्सवः कर्त्तव्य एव, न च किमिदं निर्ग्रन्थानामुत्सवकरणमित्यादिशङ्का कार्या, जिनशासनोन्नतिकरत्वाच्छास्त्रोक्तत्वाच्च । तथा हि-इत्युक्तः प्रतिमाप्रतिपत्तिविधिः, इदानीं समाप्तिविधिमाह-तीरियउब्भामणतो य, दरिसणं साहुसन्निमप्पाहे । दंडियभोइयअसती, सावगसंघो व सक्कारं ॥ (१) ॥ तीरितायां समाप्तायां प्रतिमायामुत्प्राबल्येन भ्रमन्त्युद्भ्रमाः-भिक्षाचरास्तेषां नियोगो व्यापारो यत्र स उद्भ्रमैकनियोगो ग्रामस्तत्र दर्शनमात्मनः प्रकटनं करोति, ततः साधुं-संयतं संज्ञिनं-सम्यग्दृष्टिं श्रावकं वा ' अप्पाहे ' त्ति संदेशयति, ततो दंडिनो-राज्ञो निवेदनं स सत्कारं करोति, तदभावे भोजिकः, तस्याप्यभावे श्रावकवर्गः, तस्याप्यभावे सङ्घः-साधुसाध्वीवर्गः । इयमत्र भावनाप्रतिमायां समाप्तायां यस्मिन् ग्रामे प्रत्यासन्ने बहवो भिक्षाचराः साधवश्च समागच्छन्ति, तत्रागत्यात्मानं दर्शयति दर्शयंश्च यं साधुं श्रावकं वा पश्यति तस्य सन्देशं कथयति यथा-समापिता मया प्रतिमा ततोऽहमागत इति । तत्राचार्या राज्ञो निवेदयन्ति यथा-अमुको महातपस्वी समाप्ततपःकर्माभूदिति स महता सत्कारेण गच्छे प्रवेशनीय इति । ततः स राजा तस्य सत्कारं कारयितव्यः, तदभावेऽधिकृतस्य ग्रामस्य नगरस्य वा नायकः, तदभावे समृद्धः श्रावकवर्गः, तदभावे साधुसाध्वीवर्गप्रभृतिकः सङ्घो यथाशक्ति सत्कारं करोति । सत्कारो नाम तस्योपरि चन्द्रोदयधारणं, नान्दीतूर्यास्फालनं, सुगन्धवासक्षेपणमित्यादि, एवंरूपेण सत्कारेण गच्छं प्रवेशयेत् । सत्कारेण प्रवेशनायामिमे गुणाः-उब्भावणा पवयणे, सद्धाजणणं तहेव बहुमाणो । ओहावणा कुतित्थे, जीअं तह तित्थवुड्ढी य ॥ (२) ॥ प्रवेशसत्कारेण प्रवचने-प्रवचनस्योद्भाजनाप्राबल्येन प्रकाशनं भवति, तथाऽन्येषां बहूनां साधूनां श्रद्धाजननं

यथा वयमप्येवं कुर्मो येन महती शासनस्य प्रभावना भवति, तथा श्रावकश्राविकाणामन्येषां च बहुमानमुपजायते शासनस्योपरि यथा अहो महाप्रतापिपारमेश्वरं शासनं, यत्रेदृशा महातपस्विन इति, तथा कुतीर्थे जातावेकवचनं, कुतीर्थानामपभ्राजना-हीलना, तत्रेदृशां महासत्वानां तपस्विनामभावात्, तथा जीतमेतत्-कल्प एष यथा समाप्तप्रतिमानुष्ठानानां सत्करणीय इति, तथा तीर्थवृद्धिश्च । एवं प्रवचनस्यातिशयमुदीक्ष्यमाणा बहवः संसारादुद्विरज्यन्ते, विरक्ताश्च परित्यक्तसङ्गाः प्रव्रज्यां प्रतिपद्यन्ते, ततो भवति तीर्थप्रवृद्धिरिति । इति श्रीव्यवहारभाष्यवृत्तौ प्रथमोद्देशके ६५९ प्रतौ १९५ पत्रे ॥ ५ ॥

अथाचार्यैः शरीरचिन्तार्थं बहिर्न गन्तव्यम्, इत्यक्षराणि लिख्यन्ते-

बहिगमणे चउगुरुगा, आणादी वाणिए य मिच्छत्तं । पडियरणमणाभोगे, खरमुहि मरुए तिरिक्खादी ॥ (१) ॥ आचार्यो यदि विचारभूमिं बहिर्गच्छति ततः प्रायश्चित्तं चत्वारो गुरुकाः, आज्ञादयश्च दोषाः । तथा ' वाणिए य मिच्छत्तं ' ति वणिजि पूर्वमभ्युत्थानं कृतवति, पश्चादकुर्वति केषाञ्चिन्मिथ्यात्वमुपजायते, इयमत्र भावना-आचार्यं संज्ञाभूमिं व्रजन्तं ततः प्रत्यागच्छन्तं च दृष्ट्वा वणिजो निजनिजापणस्था अभ्युत्थानं कृतवन्तः, तं च तथा वणिजां बहुमानेनाभ्युत्थानं दृष्ट्वा केचिदन्ये मन्यन्ते गुणवानेष आचार्यो येन वणिज एवमेनमभ्युत्तिष्ठन्ति तस्मादस्माकमपि पूज्य इति तेऽपि पूजयन्ति । यदा त्वाचार्यः कदाचिद्द्वौ वारौ संज्ञाभूमिं व्रजति तदा चतुरो वारान् गमने प्रत्यागमने चोत्थातव्यं ते चालस्यं मन्यमाना अभ्युत्थानं भविष्यतीति कृत्वा आचार्यं दृष्ट्वाऽन्यतो मुखं कुर्वन्ति तांश्च तथा कुर्वतो दृष्ट्वाऽन्ये चिन्तयन्ति नूनमेष प्रमादी जातो, ज्ञातोपि गुणवानपि यदीदृशः पतति तर्हि न किञ्चिदिति ते मिथ्यात्वं गच्छन्ति । तथा आचार्यं लोकेन पूज्यमानं दृष्ट्वा मरुके ब्राह्मणस्य मारणबुद्ध्या प्रतिचरणं भवति, ततः संज्ञाभूमिं गतं विजने प्रदेशे मारयेत् । तथा खरमुखीं-नपुंसकीं दासीं वा प्रापयित्वा उड्डाहं कुर्यात् । अनाभोगेन वा वनगहने प्रविष्टे तिर्यगादौ कुलटादौ च प्रविष्टायामात्मपरोभयसमुत्था दोषा एष गाथासङ्क्षेपार्थः । इति श्रीव्यवहारभाष्यवृत्तौ षष्ठोद्देशके ६५९ प्रतौ ४४१ पत्रे ॥ ६ ॥

आचार्यो हि भगवांस्तीर्थङ्करकल्पः, ततस्तेन गोचरचर्यायां न गन्तव्यम्, यदि याति तर्हि प्रायश्चित्तम्, तं गच्छन्तं वा यदि गीतार्थो भिक्षुर्वा न निषेधयति तर्हि तयोरपि प्रायश्चित्तमित्यभिप्रायो लिख्यते-

तत्र प्रथमं तीर्थङ्करकल्पद्वारं व्याख्यानयति-देविंदचक्कवट्टी, मंडलिया ईसरा तलवरा य । अभिगच्छन्ति जिणंदे, तो गोअरिअं न हिंडंति ॥ १ ॥ जिनेन्द्रान् भगवत उत्पन्ने ज्ञाने देवेन्द्राः-शक्रप्रभृतयश्चक्रवर्त्तिनः उपलक्षणमेतत् यथायोगं वासुदेवा बलदेवाश्च तथा माण्डलिकाः-कतिपयमण्डलप्रभव ईश्वरास्तलवराश्चाभिगच्छन्ति, ततस्ते गोचरचर्यां न हिण्डन्ति ॥ संखादीया कोडी, सुराण निच्चं जिणे उवासंति । संसयवागरणाणि य, मणसा वचसा च पुच्छंति ॥ २ ॥ सङ्ख्यातीताः सुराणां कोटयो नित्यं-सर्वकालं जिनान्-तीर्थकृत उपासते, तथा सततं मनसा वचसा च पृच्छन्ति, सुरादिके मनसा वचसा च संशयं व्याकरणानि करोति, ततो भिक्षां न हिण्डते ॥ उप्पन्ननाणा जह नो अडंति, चोत्तीसबुद्धातिसया जिणंदा । एवं गणी अट्ठगुणोववेओ, सत्था व नो हिंडइ इड्ढिमं तु ॥ ३ ॥ यथा उत्पन्ने ज्ञाने जिनेन्द्राश्चतुस्त्रिंशद्बुद्धातिशयाः सर्वज्ञातिशया देहसौगन्ध्यादयो येषां ते तथा भिक्षां न हिण्डन्ते । एवं तीर्थकरदृष्टान्तेन गणी आचार्योऽष्ट-गुणोपेतोऽष्टविधगणिसम्पदुपेतः शास्ता इव तीर्थकर इव ऋद्धिमान्न हिण्डते ॥ गुरुहिडणंमि गुरुगा, वसभे लहुआनिवारयंतस्स । गीतागीते गुरुलहु, आणादीया बहू दोसा ॥ ४ ॥ आचार्यं भिक्षामटामीति व्यवसितं यदि वृषभो न निवारयति तदा तस्यानिवारयतः प्रायश्चित्तं चत्वारो लघुकाः, अथ वृषभेण निवारितोऽपि न तिष्ठति तर्हि वृषभः शुद्ध आचार्यस्य प्रायश्चित्तं चत्वारो गुरुकाः, तथा गीतार्थो भिक्षुश्चेन्न निवारयति तदा तस्य मासगुरुः, अगीतार्थस्य भिक्षोरनिवारयतो मासलघुः । आचार्यस्य गीतार्थागीतार्थाभ्यां वारितस्यापि गमने प्रत्येकं चतुर्गुरुः । आज्ञादयश्चेमे वक्ष्यमाणा बहवो दोषाः, तानेवाह + + + + + + + + रायामच्चपुरोहिय, सेट्ठी सेणावई तलवरा य । अभिगच्छंतायरिए, तहियं च इमे उदाहरणं ॥ (५ ॥) यथा तीर्थकरश्छद्मस्थकाले हिण्डमानोऽप्युत्पन्ने ज्ञाने देवेन्द्राद्यभिगमान्न हिण्डते । एवमाचार्यानपि-आचार्यपदस्थानपि राजा अमात्यः पुरोहितः श्रेष्ठी सेनापतितलवराश्चाभिगच्छन्ति, ततस्ते भिक्षां न हिण्डन्ते अन्यथा दोषः, तत्र चेदमुदाहरणम्, तदेवाह-सोऊण य उवसंतो, अमच्चो रण्णो तगं निवेदेइ । रायावि बितियदिवसे, तइए अमच्ची य देवी य ॥ (६ ॥) राज्ञोऽमात्य आचार्यसमीपे धर्मं श्रुत्वा उपशान्तः, स च राज्ञस्तकमाचार्यं निवेदयति यथा-गुणवानतीवाचार्योऽमुकप्रदेशे तिष्ठति, ततो द्वितीयदिवसे राजा अमात्येन सह गतः, स धर्मं श्रुत्वा परितुष्ट आगतो निजाग्रमहिष्याः परिकथयति अमात्येनाप्यात्मीयभार्यायाः कथितम्, ततोऽमात्यी देवी च तृतीयदिवसे धर्मश्रवणाय समागते आचार्यो भिक्षार्थं गतः । ततः

॥२३५॥

सोउं पडिच्छिऊणं, व गया अहवा पडिच्छिणे खिंसा । हिंडंति होंति दोसा, कारण पडिवत्तिकुसलेहिं ॥ (७ ॥) भिक्षार्थं गत इति श्रुत्वा ते हीलयित्वा गते, अथवा क्षणमात्रं प्रतीक्ष्य हीलयन्त्यौ गते, यदि वा यावदाचार्य आगच्छति तावत्प्रतीक्ष्यमाणे हीलयतः, अथवा प्रस्विन्नशरीरं-परिगलत्प्रस्वेदमागतं दृष्ट्वा खिंसतः, यदि वा क्लमेन सुष्ठु कृतं वन्दनं न वा सोमं कथयतो वा परिश्रमेण न सुष्ठुवचनविनिर्गमस्तत उत्थिते हीलयतो यथा पिण्डोलक इवैष भिक्षामटति, किमाचार्यत्वमेतस्य एते भिक्षां हिण्डमाने दोषाः-यदि पुनः कारणे वक्ष्यमाणे भिक्षार्थं गतो भवेत् राजादयश्च तत्रागताः, ते च पृच्छेयुः क्व गत आचार्यः तत्र ये प्रतिपत्तिकुशलास्तैर्नेदं वक्तव्यम्-भिक्षार्थं गत इति, चैत्यवन्दननिमित्तं गत इति । ते यदि राजादय आचार्यमागच्छन्तं प्रतीक्षेरन् तदा येऽतीवदक्षा गीतार्थास्ते सुन्दरं पानकं प्रथमालिकां सुन्दरं कल्पं चोलपट्टं च गृहीत्वाऽऽचार्यसमीपे गत्वाऽऽचार्यस्य कथयन्ति । तत आचार्यो मुखहस्तपादादि प्रक्षाल्य प्रथमालिकां पानकं कृत्वा कल्पं प्रावृत्य पात्राण्यन्यस्य समर्प्य तादृशवेषो वसतावानीयते । यथाऽनाख्यातोऽपि राजादिभिर्ज्ञायते, एष आचार्य इति । ततो वसतिं प्राप्तस्य पादप्रोञ्छनं पादप्रमार्जनार्थमादाय साधव उपतिष्ठन्ति । पादप्रमार्जनानन्तरं वसतेरन्तः प्रविश्य पूर्वरचितायां निषद्यायामुपविशति । उपविष्टस्य चरणकल्पकरणाय कोऽपि साधुरुपढौकते । चरणप्रक्षालनानन्तरं च सर्वे साधवः पुरतः पार्श्वतः पृष्ठतो वा किङ्करभूतास्तिष्ठन्ति । यथा राजा चकितस्तिष्ठति । इति श्रीव्यवहारभाष्यवृत्तौ षष्ठोद्देशके ६५९ प्रतौ ४४९ पत्रे ॥ ७ ॥

न केवलं वैयावृत्त्यकरेणैवाहारादिना गुरोर्भक्तिः कार्या, किंत्वन्येन गीतार्थेनापि स्वयमाहृताहारादिना गुरोर्भक्तिः कर्त्तव्येत्यभिप्रायो लिख्यते-

दव्वे भावे भत्ती, दव्वे गणिगाउ दूति जाराणं । भावंमि सीसवग्गो, करेइ भत्तिं सुअधरस्स ॥ (१ ॥) आचार्यस्य भक्तौ क्रियमाणायां तीर्थस्याव्यवच्छेदः, भक्तावक्रियमाणायां तु तीर्थव्यवच्छेदः । सा च भक्तिर्द्विधा-द्रव्य भावे च, तत्र यन्नामगणिका भुजङ्गानां भक्तिं कुर्वन्ति दूतयो वा जाराणां, सा द्रव्ये द्रव्यभक्तिः, भावे भावविषया भक्तिः पुनरियं यच्छिष्यवर्गः श्रुतधरस्य भक्तिं करोति । यद्यपि चान्योऽपि गुरोर्भक्तिं करोति तथाऽपि ममापि निर्जरा स्यादित्यात्मानुग्रहबुद्ध्याऽन्येनापि भक्तिः कर्त्तव्येति । लौहार्यगौतमदृष्टान्तेन भावयति-जइवि य लोहसनामो, गिण्हइ खीणंतराइणो उंछं । तहवि य गोअमसामी, पारणए गेण्हए गुरुणो ॥ (२ ॥) यद्यपि च

लोहसमानो लोहार्यः क्षीणांतरायस्य भगवतो वर्द्धमानस्वामिनः सदैवोच्छं-एषणीयभक्तादिकं गृह्णाति, तस्य भ्गवद्वैयावृत्त्यकरत्वात् । यतः " धन्नो सो लोहज्जो, खंतिखमो पवरलोहसरिवन्नो । जस्स जिणो पत्तातो, इच्छइ पाणीहि भुत्तुं जे ॥ " तथाऽपि गौतमस्वामी स्वपारणके गुरोर्वर्द्धमानस्वामिनो योग्यं गृह्णाति । एवमन्येनाप्यवैयावृत्त्यकरभावेऽपि यथायोग्यं गुरोः कर्त्तव्यम् । इति व्यवहारभाष्यवृत्तौ षष्ठोद्देशके ६५९ प्रतौ ४५७ पत्रे ॥ ८ ॥

अस्वाध्याये सर्वथा स्वाध्यायो न कर्त्तव्य इत्यभिप्रायो लिख्यते-

राया इव तित्थगरो, जाणवया साहुघोसणं सुत्तं । मेच्छा य असज्झातो, रयणधणाइं व नाणादी ॥ १ ॥ अत्र राजा ईव तीर्थकरः जानपदा इव साधवः, घोषणमिव सूत्रं, म्लेछा इवास्वाध्यायः, रत्नधनानीव ज्ञानादीनि । तत्र ये साधवो जानपदस्थानीया राजस्थानीयस्य तीर्थकरस्याज्ञां नानुपालयन्ति ते प्रान्तदेवतया छल्यन्ते, प्रायश्चित्तदण्डेन इव दण्ड्यन्ते । इति व्यवहारभाष्यसप्तमोद्देशके ६५९ प्रतौ ५०५ पत्रे ॥ ९ ॥

तथा सन्ध्यास्वपि स्वाध्यायो न कर्त्तव्य इत्यक्षराणि लिख्यन्ते-

चउसंज्झासु न कीरइ, पाडिवएसुं तहेव चउसुंपि । जो जत्थ पूजती तू, सव्वेहिं सुगिम्हतो नियमा ॥ (१ ॥) चतस्रः सन्ध्यास्तिस्रो रात्रौ । तद्यथा-प्रस्थिते सूर्ये, अर्द्धरात्रे, प्रभाते च, चतुर्थी दिवसस्य मध्यभागे, एतासु चतसृष्वपि दिनसन्ध्यासु स्वाध्यायो न क्रियते, शेषक्रियाणां तु प्रतिलेखनादीनां न प्रतिषेधः । स्वाध्यायकरणे चाज्ञाभङ्गादयो दोषास्तथा चतस्रः प्रतिपदः तद्यथा-आषाढपौर्णमासीप्रतिपत् १ इन्द्रमहप्रतिपत् २ कार्त्तिकपौर्णमासीप्रतिपत् ३, सुग्रीष्मप्रतिपत् ४ चैत्र पौर्णमासीप्रतिपदित्यर्थः, एतास्वपि चतसृष्वपि प्रतिपत्सु तथैव स्वाध्याय एव न क्रियते । न शेषक्रियाणां प्रतिषेधः । इह प्रतिपद्ग्रहणेन प्रतिपत्पर्यन्ताश्चत्वारो महाः सूचिताः । इत्येषां तु चतुर्णां महानां मध्ये यो महो यस्मिन् देशे यतो दिवसादारभ्य यावन्तं कालं पूर्यते तस्मिन् देशे ततो दिवसादारभ्य तावन्तं कालं स्वाध्यायं न कुर्वन्ति । प्रतिपत्पुनः सर्वेषां पर्यन्तः, ' सव्वेसिं जाव पडिवंतो ' इति वचनात् । सुग्रीष्मकश्चैत्रमासभावी पुनर्महामहः सर्वेषु देशेषु शुक्लपक्षप्रतिपद आरभ्य चैत्रपौर्णमासीप्रतिपत्पर्यन्तो नियमात्प्रसिद्धस्तो यद्यध्वानं प्रतिपन्नस्तथाऽपि चैत्रमासस्य शुक्लपक्षप्रतिपद आरभ्य सर्वं पक्षं पौर्णमा-

सीप्रतिपत्पर्यन्तं यावदवश्यमनागाढो योगो निक्षिप्यते शेषेषु आगाढादिकेषु योगो न निक्षिप्यते, केवलं स्वाध्यायं न कुर्वन्ति । इति श्रीव्यवहारभाष्यवृत्तौ सप्तमोद्देशके ६५९ वृतौ ५०८ पत्रे ।

॥ इति श्रीव्यवहारविचाराः समाप्ताः ॥

अथ श्रीपञ्चकल्पविचाराः-तत्र च पूर्वं साधुभिर्मलमूत्रादिपीडा न रक्षणीयेत्यभिप्रायो लिख्यते-

मुत्तनिरोहे चक्खुं, वच्चणिरोहेण जिविअं हणइ । छद्दनिरोहे कोट्ठं, सुक्कनिरोहे भवे अपुमं ॥ (१ ॥) एतच्चूर्णिर्यथा-मूत्रनिरोधे चक्षुस्तस्मान्मूत्रनिरोधे चक्षुरुपघातो भवति, पुरीषनिरोधे च जीवितोपघातः, छर्दिनिरोधे च कुष्टोत्पत्तिः शुक्रनिरोधे चापौरुषं स्यादिति । आह-यद्येवं शुक्रनिरोधेऽपुरुषत्वं भवति नन्वेवमनवस्था, यस्मादमी भगवन्तः साधवः पूर्वकोट्यायुष्का अपि ब्रह्म धारयन्ति, न च तेषामपुमत्वं भवत्यतः समयविरुद्धमुदाहृतम्, आचार्य आह-न सिद्धान्तापरिज्ञानात्, इह सामस्त्येन सूत्रमभिहितम्, तत्र ये ते शकुनी तत्कर्मसेवी पक्षिकापक्षिक इर्ष्यालुकाद्या-उत्कटवेदास्तान् प्रतीत्य सूत्रनिपातः, यस्मात्तेषां वेदप्रादुर्भावनिरोहेण नपुंसकत्वमापद्यते इत्यतो न विरोधः । इति श्री पंचकल्पभाष्यचूर्णौ वृद्धसङ्घसक्तद्वादशे पत्रे ॥

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरीश्वरशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे विशेषसमुच्चयापरनाम्नि अपरतटे व्यवहारपञ्चकल्पविचाराः समाप्ताः ॥

॥ समाप्तं चेदं छेदग्रन्थविचारसमुच्चयनामाऽपरतटम् ॥

अनेकसिद्धान्तविचाररत्नरम्ये गुरूपासनमार्गलभ्ये । विचाररत्नाकरवामशास्त्रेऽपरं तटं प्राप्तमिदं समाप्तिम् ॥ १ ॥

येन प्रवचनमेतद्विहितं सहितं हितोपदेशेन । तमहितरहितं सुरनरमहितं श्रीजिनपतिं स्तौमि ॥ १ ॥

अथ निरनुक्रमं प्रकीर्णकप्रकरणादिसङ्कीर्णविचारा लिख्यन्ते-

अथ ये केचिन्मिथ्यात्विनां मार्गानुसारि कर्त्तव्यमपि नानुमोदयन्ति ते सिद्धान्तबाह्या ज्ञेयाः, विप्रतीपभावित्त्वात् । तथा हि-

अहवा सव्वं चिय वीयरायवयणाणुसारि जं सुकटं । कालत्तएवि तिविहं, अणुमोएमो तयं सव्वं ॥ अथवेति सामान्यरूपप्रकारदर्शनो ।

चिय एवार्थे ततः सर्वमेव वीतरागवचनानुसारि-जिनमतानुयायि यत्सुकृतं जिनभवनबिम्बकारणतत्प्रतिष्ठासिद्धान्तपुस्तकलेकनतीर्थयात्राश्रीसङ्घ-वात्सल्यजिनशासनप्रभावनाज्ञानाद्युपष्टम्भधर्मसान्निध्यक्षमामार्दवसंवेगादिरूपं मिथ्यादृग्सम्बन्ध्यपि मार्गानुसारि कृत्यं कालत्रयेऽपि त्रिविधं मनोवाक्कायैः कृतं कारितमनुमत्तं च यदभूद्भवति भविष्यति चेति तत् इति तच्छब्दात् ' त्यादिसर्वादेः स्वरेष्वन्त्यात्पूर्वोऽक् ' (७-३-२९) इत्यादिसूत्रेण स्वार्थेऽक्प्रत्यये रूपं तदित्यर्थः तत्सर्वं निरवशेषमनुमोदयामो-अनुमन्यामहे हर्षगोचरतां प्रापयाम इत्यर्थः । बहुवचनं चात्र पूर्वोक्तचतुःशरणप्रतिपत्त्या उपार्जितपुण्यसम्भारत्वेन स्वात्मनि बहुमानसूचनार्थम् । इति श्रीचतुःशरणप्रकीर्णके ५८ गाथायाम् ॥ १ ॥

तथाऽऽराधनापताकायामपि-

जो जारिसओ कालो, भरहेरवएसु होइ वासेसु । ते तारिसया तइया, अडयालीसं तु निजवग्गा ॥ १ ॥ एए उक्कोसेणं, परिहाणीए जहन्नओ दुन्नि । एगो परित्तिपासे, बीओ पाणाइगच्छेज्जा ॥ २ ॥ कियदग्रतश्च-सेसाणं जीवाणं, दाणरुइत्तं सहावविणियत्तं । तह पयणुकसायत्तं, परोवयारित्त भव्वत्तं ॥ १ ॥ दक्खिन्नदयालुत्तं, पियभासित्ताइविविहगुणनिवहं । सिवमग्गकारणं जं, तं सव्वं अणुमयं मज्झ ॥ २ ॥ इत्याराधनापताकायां ३११ गाथा ॥ २ ॥

अथ गर्भस्वरूपं लिख्यते-

दाहिणकुच्छी पुरिसस्स, होइ वामा उ इत्थियाए य । उभयंतरं नपुंसे, तिरिए अट्ठेव वरिसाइं ॥ १६ ॥ इमो खलु जीवो अम्मापिउसंजोगे माउओयं पिउसुक्कं तं तदुभयसंसट्ठं कलुसं किव्विसं तप्पढमयाए आहारमाहारेइ आहारमाहरित्ता गब्भत्ताए वक्कमेइ ॥ सत्ताहं कललं होइ, सत्ताहं होइ अब्बुयं ॥ अब्बुया जायए पेसि, पेसीओ य घणं भवे ॥ १८ ॥ तो पढमे मासे करिसूणं पलं जायइ १ । बीए मासे पेसी संजायए घणा २ । तइए मासे माऊए डोहलं जणइ ३ । चउत्थे मासे माऊए अंगाइं पीणेइ ४ । पंचमे मासे पंच पिंडियाउ पाणिं २ पायं २ सिरं चेव निवत्तेइ ५ । छट्ठे मासे पित्तसोणियं च उवचिणेइ ६ । सत्तमे मासे सत्तसिरासयाइं पंच पेसीसयाइं नव धमणीओ नवनउइं च रोमकूवसयसहस्साइं निव्वत्तेइ विणा केसमंसुणा सह केसमंसुणा अद्धट्ठाओ रोमकूवकोडीओ निवत्तेइ ७ । अट्ठमे मासे वित्तीकप्पो हवइ ॥ इति श्रीतन्दुलवैयालिकप्रकीर्णके ॥ ३ ॥

केचिच्चान्तकाले गृहस्थानां दीक्षाग्रहणं प्रति सन्दिह्यन्ते यद्दीक्षा ही विहारादिसामर्थ्ये सत्येव ग्राह्येति, परं तदसमीचीनम् शास्त्रे तस्योक्तत्वात्, तथा हि-परगच्छआगयस्स उ, निरईयारस्स नेव उट्ठवणा । दिसिबंधो कायव्वो, तह पज्जंते वयारोवो ॥ १ ॥ पासत्थाईणं पुण, भणिओ उट्ठावणाविही सव्वो । दिसिबंधो तो नियमा, अह जइ सुस्सावगो कोई ॥ २ ॥ संथारगपव्वज्जं, पडिवज्जइ तस्स जिणगिहाईसु । पव्वज्जाविहि सव्वो, कायव्वो नेव उट्ठवणा ॥ ३ ॥ जइ पुण भत्तपरिन्नं, पडिवज्जइ सावगो ससम्मत्तो । नवकारपुव्वयं पटमाणुव्वयं समुच्चरइ ॥ ४ ॥ इति श्रीआराधनापताकायाम् ॥ ४ ॥

॥२४०॥

अथा भक्तपरिज्ञायामपि-

जइ सोवि सव्वविरइं कयाणुराओ विसुद्धमणकाओ । छिन्नसयणाणुराओ, विसयकसाया विरत्तो य ॥ १ ॥ संथारगपव्वज्जं, पडिवज्जइ सोवि नियमनिरवज्जं । सव्वविरइप्पहाणं, सामइयचरित्तमारुहइ ॥ २ ॥ गाथा ३२ । ३३ ॥

अथ साधुभिः प्रायो लेपकृद्वस्तु न ग्राह्यमित्यक्षराणि लिख्यन्ते-

चउलहुयं लहइ मुणी, लित्ते दहिमाइलित्तकरमत्ते । छड्डियमिह पुढवाईसु, अणंतरपरंपरंति दुहा ॥ ६१ ॥ इह दधिक्षीरघृततैलतीमनादिद्रव्यस्य यस्य लेपः करभाजनादौ लगति तल्लेपकृत् लिप्तमुच्यते, तच्च कारणं विना न ग्राह्यम् । यदाह- " घित्तव्वमलेवकडं, लेवकडे मा हु पच्छकम्माइ । न य रसगेहिपसंगो, न य भुत्ते बंभपीडा य ॥ इह साधुना सदैवालेपकृद्वल्लचणककुल्माषशुष्कौदनादि गृहीतव्यम् । मा भूवन् लेपकृति ग्राह्यमाणे पश्चात्कर्मादयो दोषाः-दध्यादिलिप्तहस्तादिक्षालनादिरूपाः । न च सदैवालेपकृद्ग्रहणे रसगृद्धिप्रसङ्गो-रसाभ्यवहारलाम्पट्यवृद्धिप्रसक्तिः । न च तादृशे भुक्ते ब्रह्मपीडा-ब्रह्मव्रतस्य बाधा । तादृशस्य नीरसाहारस्य दर्पोत्पादकत्वाभावात् । अत्राह-नोदकः-ननु यदि लेपकृद्ग्रहणे पश्चात्कर्मप्रभृतयो दोषा भवन्ति ततस्तन्न गृह्यते तर्हि मा कदाचनापि साधुर्भुक्ताम् । एवं सर्वेषां दोषाणां मूलत एवोत्थानं निषिद्धं भवति । गुरुराह-सर्वकालं क्षपणमेव कुर्वतः साधोश्चिरकालभावितपोनियमसंयमानां हानिर्भवति, तस्माद्यावज्जीवक्षपणं न कार्यम्, पुनः प्राह-यदि सर्वकालं क्षपणं कर्त्तुमशक्तस्तर्हि षण्मासक्षपणं कृत्वा पारणकमलेपकृता विधत्ताम् । गुरुराह-यद्येवं तपः कुर्वन् संयमयोगान् कर्त्तुं शक्नोति तर्हि करोतु, न कोऽपि तस्य निषेधः । पुनरप्याह-यदि षण्मासक्षपणं कर्त्तुं न

॥२४०॥

शक्नोति तर्हि एकदिनोनं षण्मासक्षपणं कृत्वा आचाम्लेन पारयतु, एवमकैकेन (कया) दिनहान्या तावदात्मानं तोलयेद्यावच्चतुर्थं कृत्वा आचाम्लेन पारणं करोतु, एवमप्यसामर्थ्ये दिवसे दिवसे गृह्णीत्वाचाम्लनिर्लेपम् । गुरुराह-करोत्वेवं तपः, यदि प्रत्युपेक्षणादिसंयमयोगभ्रंशो न भवति, केवलं सम्प्रति सेवार्त्तसंहनानां नास्ति तादृशी शक्तिरिति न तथोपदेशो विधीयते । पुनः परः प्राह-ननु महाराष्ट्रकोशलदेशोद्भवाः सदैव सौवीरकूरमात्रभोजिनः सैवार्त्तसंहननास्ततो यदि तेऽपीत्थं यापयन्ति यावज्जीवं तर्हि तथा सौवीरकूरमात्रभोजनेन किं न यतयो मोक्षगमनैकबद्धकक्षा यापयन्ति ? तैः सुतरामेव यापनीयम्, प्रभूतगुणसम्भवात् । गुरुराह-तिअ सीअं समणाणं, तिअमुण्ह गिहीण तेणणुन्नायं तक्काईणं गहणं, कट्ठरमाईसु भइयव्वं ॥ १ ॥ त्रिकं वस्तुत्रयं श्रमणानां शीतं भवति, तेन प्रतिदिवसमाचाम्लकरणे तक्राद्यभावत आहारपाकासम्भवेनाजीर्णादयो दोषा- प्रादुष्यन्ति । तदेव त्रिकमुष्णं गृहिणाम्, तेन सौवीरकूरमात्रभोजनेऽपि तेषामाहारपाकभावतो नाजीर्णादिदोषा जायन्ते, ततस्तेषां तथा यापयतामपि न कश्चिद्दोषः । साधूनां तूक्तनीत्या दोषस्तेन कारणेन तक्रादिग्रहणं साधूनामनुज्ञातम् । इह प्रायो यतिना विकृतिपरिभोगपरित्यागेन सदैवात्मशरीरं यापनीयं कदाचिदेव च शरीरस्यापाटवे संयमयोगवृद्धिनिमित्तबलाधानाय विकृतिपरिभोगः । तथा चोक्तं सूत्रे-' अभिक्खणं निविगइगया य ' त्ति । निर्विकृतिपरिभोगे च तक्राद्येवोपयोगीति तक्रादिग्रहणम् । कट्ठरादिषु-घृतवटिकोन्मिश्रतीमनादिषु ग्रहणं भाज्यं-विकल्पनीयं, ग्लानत्वादिप्रयोजनोत्पत्तौ कार्यं न शेषकालमिति भावः । तेषां च बहुलेपत्वात्, गृद्ध्यादिदोषजनकत्वाच्च । अथ किं तत्त्रिकम् ? उच्यते-आहारः, उपधिः, शय्या । एतानि त्रीण्यपि गृहिणां शीतकालेऽप्युष्णानि भवन्ति, तेन तेषां तक्रादिग्रहणमन्तरेणापि बाह्याभ्यन्तरोष्णतापेनाहारो जीर्यते, तत्राभ्यन्तरे भोजनवशात्, बाह्यः शय्योपधिवशात् । एतान्येवाहारोपधिश्शायरूपाणि त्रीणि वस्तूनि यतीनां ग्रीष्मकालेऽपि शीतानि भवन्ति । तत्राहारस्य शीतता भिक्षाचर्यायां प्रविष्टस्य बहुगृहेषु स्तोकस्तोकलाभेन वृहद्वेलालगनात् । उपधेरेकवारं वर्षाकालादर्वाग् प्रक्षालनेन मलिनत्वात् । शय्यायास्तु प्रत्यासन्नाग्निकरणाभावेन तेन कारणेन ग्रीष्मकालेऽप्याहारादीनां शीतत्वसम्भवरूपेणोपहन्यते जाठरोऽग्निः । तस्माच्चाग्न्युपघातादजीर्णबुभुक्षामान्द्यादयो दोषा जायन्ते, ततस्तक्रादिग्रहणं साधूनामनुज्ञातम् । तक्रादिनाऽपि हि जाठरोऽग्निरुद्दीप्यते, तेषामपि तथास्वाभाव्यात् । इति श्रीयतिजीते ६१ गाथावृत्तौ ४९ पत्रे ॥ ५ ॥

अथाजातश्मश्रुणः शिष्यादेराचारप्रकल्पाध्ययनं पाठयितुं न कल्पते, इत्यभिप्रायो लिख्यते-

नो कप्पइ निग्गंथाण वा निगंथीण वा खुड्डगस्स वा खुड्डियाए वा अवंजणजायस्स आयारपकप्पे नामं अज्झयणे उद्दिसित्तए । १ । कप्पइ निग्गंथाण वा निग्गंथीण वा खुड्डगस्स वा खुड्डियाए वा वंजणजायस्स आयारपकप्पे नामं अज्झयणे उद्दिसित्तए । २ । तिवासपरियागस्स समणस्स निग्गंथस्स कप्पति आयारपकप्पे नामं अज्झयणे उद्दिसित्तए ॥ इत्यादि, व्यवहारदशमोद्देशकोक्तेन विधिना सूत्रं पाठनीयम् । इति गच्छाचारप्रकीर्णके ' विहिणा जो उ चोएइ ' इति गाथा २४ वृत्तौ ॥ ६ ॥

परिशटिवस्त्रे यावन्ति थिग्गलानि ग्रन्थयश्च कल्पन्ते तल्लिख्यते-

जे भिक्खू वत्थस्स एगं पडियाणियं देइ देंतं वा सातिज्जति । यो वस्त्रस्यैकं थिग्गलं ददाति, ददतं वा स्वादयति-अनुमोदयति तस्य दोषाः । द्वौ कल्पौ सौत्रिकौ एव और्णिको ग्राह्यः, वर्षाकालं विना और्णिक एकको न व्यापार्यो मध्यो सौत्रिको बहिरौर्णिक इति विधिपरिभोगः । और्णिके शरीरे लग्ने षट्पदिकादिजन्तुसंसक्त्यादिदोषाः स्युः । जे भिक्खू वत्थस्स परं तिण्हं पडियाणियं देइ देंतं वा सातिज्जइ । त्ति यः कारणे त्रयाणां थिग्गलानां परतश्चतुर्थं थिग्गलं ददाति तस्य प्रायश्चित्तम् । जे भिक्खू अविहीए वत्थं सिव्वति, सिव्वंतं वा सातिज्जइ । त्ति अविधिसीवनं यथा गृहस्थानां पार्श्वद्वयमीलनेन सीवनं तथा न सीव्येत् । जे भिक्खू वत्थस्स एगं फालियगंठियं करेइ, करेंतं वा सातिज्जति । त्ति पाटितवस्त्रस्योभयोरञ्चलयोर्मीलनेन ग्रन्थिं ददाति, अधिकं मा पाटयत्विति । जे भिक्खू वत्थस्स परं तिण्हं फालियगंठियाणं करेइ करेंतं वा सातिज्जति । त्ति वस्त्रे ग्रन्थिस्तावदुत्सर्गतो न कार्यः, यदि वस्त्रस्यालाभे ग्रन्थिं करोति तदा त्रयाणां ग्रन्थीनामधिकं ग्रन्थिं न कुर्यात् । इति श्रीगच्छाचारप्रकीर्णके ' देसं खित्तं तु जाणित्ता ' इत्येतद्गाथा १४ वृत्तौ १२ पत्रे ॥ ७ ॥

जघन्यतोऽप्यधीताचारप्रकल्पस्यैव निश्रया विहर्त्तव्यमित्यभिप्रायो लिख्यते-

आयारपकप्पधरा, चौद्दसपुव्वी य जे य तं मज्झा । तन्नीसाइ विहारो, सबालबुड्ढस्स गच्छस्स ॥ १ ॥ आचारप्रकल्पधराः-निशीथाध्ययनधारिणो जघन्या गीतार्थाः, चतुर्दशपूर्विणः पुनरुत्कृष्टाः, तन्मध्यवर्त्तिनः कल्पव्यवहारदशाश्रुतस्कन्धधरादयो मध्यमाः । तेषां जघन्यमध्यमोत्कृष्टानां गीतार्थनां निश्रया सबालवृद्धस्यापि गच्छस्य विहारो भवति, न पुनरगीतार्थस्य इति श्रीगच्छाचारप्रकीर्णके ' सीयावेइ विहारं ' इत्येतद्गाथा २३ वृत्तौ २६ पत्रे ॥ ८ ॥

अथ कल्पत्रेपस्वरूपं किञ्चिल्लिख्यते-

आउत्ता कप्पतिप्पेसु त्ति । आयुक्ता-उद्यताः सावधाना वा यत्र गच्छे साधवः स्युः कयोः ? कल्पश्च त्रेपश्च कल्पत्रेपौ तयोः, तत्र कल्पो-भोजनानन्तरं पात्रधावनादिरूपः, स च सामान्येन सर्वत्र कल्पसप्तकरूपः, विशेषतस्तु जघन्यमध्यमोत्कृष्टभेदेन त्रिधा, कथम् ? ओदनमण्डकयवक्षोदकुल्माषराजमुद्गचवलकचवलिकावृत्तचणकसामान्यचणकनिष्पावतुवरीमसूरमुद्गाद्यलेपकृदाहारे गृहीते सति एकः पात्रस्य मध्ये कल्पो द्वितीयो बहिस्तृतीयस्तु सर्वत्रेति कल्पत्रयरूपो जघन्यः । शाकपेयायवागूकङ्कोद्रवौदनराद्धमुद्गदाल्यादिसौवीरतीमनाद्यल्पलेपकृदाहारे गृहीते सति द्वौ कल्पौ पात्रस्य मध्ये, ततो द्वौ बहिः; तत एकः सर्वत्रेति कल्पपञ्चकरूपो मध्यमः । तथा दुग्धदधिक्षैरेयीतैलघृतगुडपानकादिबहुलेपकृदाहारे गृहीते सति कल्पत्रयं मध्ये, ततो द्वौ बहिः ततो द्वौ सर्वत्रेति कल्पसप्तकरूप उत्कृष्टः । इत वृद्धवादः । हस्ते तु मणिबन्धं यावत्कल्पो देय इति, त्रेपो-अपानादिक्षालनलक्षणः, अत्र किञ्चिन्निशीथसूत्रचतुर्थोद्दिशकगतं लिख्यते-जे भिक्खू वा भिक्खूणी वा साणुप्पाए उच्चारपासवणभूमिं ण पडिलेहेइ न पडिलेहंतं वा सातिज्जति । अस्य चूर्णिः-साणुप्पाओ णाम चउब्भागावसेसचरिमा तीए उच्चारपासवणभूमीओ पडिलेहियव्वाओ ॥ १ ॥ जे भिक्खू वा भिक्खूणी वा तओ उच्चारपासवणभूमीओ ण पडिलेहेइ ण पडिलेहंतं वा सातिज्जति । जे भिक्खू वा भिक्खूणी वा खुड्डागंसि थंडिलंसि उच्चारपासवणं परिट्ठवइ परिट्ठवंतं वा सातिज्जइ ॥ अस्य चूर्णिः रयणिप्पमाणाओ जं आरओ तं खुड्डागं, तत्थ जो वोसिरइ तस्स मासलहुं आणादिया य दोसा, वित्थरायामेणं, थंडिल्लं जं भवे रयणिमेत्तं चउरंगुलमोगाढं, जहन्नयं तं तु विच्छिन्नं ॥ १ ॥ वित्थारो-पोहत्तं आयामो-दिग्घत्तणं रयणी-हत्थो तम्माणे ठितं रयणिमेत्तं जस्स थंडिलस्स चत्तारि अंगुला अहे अचित्ता तं चउरंगुलावगाढं एयप्पमाणं जहण्णयं विच्छिण्णं । एत्तो हीणतरागं, खुड्डागं तं तु होइ नायव्वं । अइरेगयरं एत्तो, विच्छिण्णं तं तु नायव्वं ॥ २ ॥ सव्वुक्कोसं विच्छिण्णं, बारसजोअणं तं च जत्थ चक्कवट्टिखंधावारो ठिओ ॥ इति श्रीगच्छाचारप्रकीर्णके ' जत्थ य सन्निहिउक्खड ' इत्येतद्गाथा ७२ वृत्तौ ॥ ९ ॥

अथ कारणे चतुर्मासकमद्येऽपि नावा नद्याद्युत्तरणमनुज्ञातम् । तथा हि-

सत्त उ वासासु भवे, संघट्टा तिन्नि हुंति उडुबधे । ते तु न हणंति खित्तं, भिक्खायरियं च न हणंति ॥ २ ॥ ये सप्तोदकसङ्घट्टा

॥२४३॥

वर्षासु, त्रयः सङ्घट्टाः ऋतुबद्धे साधूनां भवन्ति, ते एतावन्तः क्षेत्रं नोपघ्नन्ति, न च भिक्षाचर्यामुपघ्नन्ति-जह कारणंमि पुण्णे, अंतो तह कारणंमि असिवादी । उवहीगहणे लिंपण, नावोपगतेपि जयणाए ॥ ३ ॥ त्ति यथा कारणे पूर्णे मासकल्पे वर्षावासे वा अपरक्षेत्राभावे दृष्टमुत्तरणं तथा मासस्यान्तरप्यशिवादिभिः कारणैरुपधेर्वा ग्रहणार्थं लेपानयनार्थं वोत्तरणीयम् । कारणे यत्र नावाऽप्युदकं तीर्यते, तत्रापि यतनया सन्तरणीयम् । तत्र चायं विधिः-नावथललेवहेट्ठा, लेवो वा उवरिए व लेवस्स । दोण्णि य दिवड्ढमेगं, अद्धं नावाइ परिहाणी ॥ ४ ॥ तत्र पूर्वार्द्धपश्चार्द्धपदानां यथासङ्ख्येन योजना-नावुत्तरणस्थानाद्यपि द्वे योजने वक्रं स्थलेन गम्यते तर्हि तेन गन्तव्यम्, न च नौरारोढव्या । ' लेवहिट्ठ ' त्ति लेपस्याधस्ताद्दकसङ्घट्टेन यदि सार्द्धयोजनपरिरयेण गम्यते ततस्तत्र गम्यतां न नावमधिरोहेत्, एवं योजनपरिहारेण लेपेन गच्छतु न च नावमधिरोहेत्, अर्द्धयोजनपरिहारेण लेपोपरिणा गच्छतु, न च नावमधिरोहेत् । एवं नावुत्तरणस्थानात्स्थलादिषु योजनद्वयादिकं परिहीयते, एवमेव लेपोपर्युत्तरणस्थानात्सार्द्धयोजनपरिहारेण स्थलेन, एकयोजनपरिहारेण सङ्घट्टेन, अर्द्धयोजनपरिहारेण वा लेपेन गम्यतां, न च लेपोपरिणा । लेपोत्तरणस्थानादेकयोजनपरिहारेण स्थलेनार्द्धयोजनपरिहारेण वा सङ्घट्टेन गन्तव्यं न लेपेन । सङ्घट्टोत्तरस्थानादर्द्धयोजनपरिहारेण स्थलेन गम्यतां, न च सङ्घट्टेन । एतेषां परिहारपरिमाणानामभावे नावा १ लेपोपरिणा २ लेपेन ३ सङ्घट्टेन वा गम्यते न कश्चिद्दोष इत्यादि । एतत्सूत्रद्वयार्थः प्रायः सर्वोऽपि श्रीनिशीथचूर्णिद्वादशोद्देशकप्रान्तेऽप्यस्ति । इति श्रीगच्छाचारप्रकीर्णके दंसणियारं कुणई, चरित्तनासं जणेइ मिच्छत्तं । दुण्हवि वग्गाणज्जा, विहारभेयं करेमाणी १३२ गाथावृत्तौ १२० पत्रे ॥ १० ॥ अनयैव च गाथया ये आर्यिकायाः पृथग्विहारं मन्यन्ते तेऽपि परास्ता द्रष्टव्याः ।

गामे एगराइयं नगरे पंचराइयं ' अयं व्यवहारस्तु प्रतिमाप्रतिपन्नानां साधूनां, जिनकल्पिकानां परिहारविशुद्धिकानां च नियमत एव नवकल्पव्यवहारः, स्थविरकल्पिकानां तु कारणेऽष्टावपि मासकल्पा एकत्र कर्त्तुं मासान्तरेऽपि विहर्त्तुं कल्पन्ते यथा-

पडिमापडिवण्णाणं, एगाहं पंचाहं तहा लंदे । जिणसुद्धाणं मासो, निक्कारणओ अ थेराणं ॥ ४ ॥ ' जिण ' त्ति जिणकप्पियाणं ' सुद्ध ' त्ति सुद्धपारिहारियाणं सुद्धग्गहणं पच्छित्तावन्नपरिहारियनिसेहत्थं ' थेराणं ' च एतेसिं मासकप्पविहारो णिव्वाघाएकारणाभावे वाघाए पुण थेरकप्पिया ऊणं अतिरित्तं वा मासं अच्छंति ॥ ऊणअतिरित्तमासा, एवं थेराण अट्ठ नायव्वा । इयरे अट्ठ विहरिउं नियमा

चत्तारि अच्छंति ॥ ५ ॥ इत्यपि गच्छाचारप्रकीर्णके ' दंसणियारं कुणई ' इत्येतद्गाथा १३२ वृत्तौ ॥ ११ ॥

अथ साधूनां चतुर्मासकं विना पीठफलकोपभोगः कर्त्तुं न कल्पते, इत्यभिप्रायो लिखयते-

सच्छंदयारिं दुस्सीलं, आरंभे सुपवत्तयं । पीढयाइ पडिबद्धं, आउक्कायविहिंसगं ॥ १० ॥ व्याख्या-स्वच्छन्देन स्वाभिप्रायेण, न तु जिनाज्ञया चरतीति स्वच्छन्दचारी तम्, तथा दुष्टं शीलं आचारो यस्य स दुःशीलस्तम्, तथाऽऽरम्भाः पृथिव्याद्युद्भवणानि, उपलक्षणत्वात्संरभ-समारम्भावपि, तत्र संरम्भः-सङ्कल्पः, समारम्भस्तु परितापकरः । उक्तं च-" संकप्पो संरंभो, परितापकरो भवे समारंभो । आरंभो उद्दवओ, सुद्धनयाणं तु सव्वेसिं ॥ १ ॥ " तत्र स्वान्ययोः प्रवर्त्तकस्तम् । तथा पीठकं-फलकं, आदिशब्दात् पट्टिकादयस्तत्र प्रतिबद्धः कारणं विनाऽपि ऋतुबद्धकाले तत्परिभोजीत्यर्थः तं, ऋतुबद्धकाले पीठकादिग्रहणे महान् दोषः । उक्तं च-जे भिक्खू उडुबाद्धियं सेज्जासंथारयं परं पज्जोसवणाओ उवाइणेइ उवाइणेतं वा सातिज्जति, इति श्रीनिशीथसूत्रद्वितीयोद्देशके । अथैतच्चूर्णिः-उडुबद्धगहियं सेज्जासंथारयं पज्जोसवणरातीओ परं उवातिणावेइ तस्स मासलहु पच्छित्तं । सेज्जासंथारविशेषज्ञापनार्थमाह-सव्वंगिया उ सेज्जा, दोहत्थद्धं च होइ संथारो । अह संथडा व सेज्जा, तत्पुरिसो वा समासो उ ॥ १ ॥ इत्यादि । इति श्रीगच्छाचारप्रकीर्णकवृत्तौ ॥ १२ ॥

अथोत्सर्गतस्तावद्गृहस्थानां सिद्धान्ताध्ययनं न कल्पते, अपवादतस्तु दीक्षाभिमुखादिस्तस्य षट्जीवनीकायाध्ययनं यावत् सूत्रार्थाभ्यां, पिण्डैषणाध्ययनं यावदर्थतश्च पाठयितुं कल्पते, इत्यभिप्रायो लिख्यते-

पढंतु साहूणो एयं, असज्झायं विवज्जिउं ॥ १३६ ॥ इत्यादि । व्याख्या-पठंतु-व्यक्तवाचा सूत्रतोऽर्थतश्च कंठगतं कुर्वंतु साधवो-मोक्षसाधनतत्परा मुनयः उपलक्षणत्वात्साध्व्योऽपि, ननु यदुक्तं साधुसाध्व्य एव पठन्ति किं श्राद्धादयो न सिद्धान्तं पठन्ति ? उच्यते-न पठन्त्येव, यदुक्तं-श्रीनिशीथसूत्रस्यैकोनविंशतिकोद्देशकप्रान्ते-जे भिक्खू वा भिक्खूणी वा अण्णउत्थियं वा गारत्थियं वा वाएइ, वाएंतं वा सातिज्जति । अस्य चूर्णिः-गिहिअण्णतित्थिया ण वाएयव्वा, इत्थ दसमउद्देसाओ अत्थो जहा अण्णउत्थियं वा गारत्थियं वा ण वाएति, अण्णतित्थिया अण्णतित्थिणीओ अहवा गिहत्था गिहत्थीओ, त्ति तथाभावे कारणे वाएज्जावि ' पव्वज्जाए ' गाहा-गिहि अण्णपासंडियं पव्वज्जाभिमुहं सावगं वा छज्जीवणियंति जाव सुत्तत्थो, अत्थओ जाव पिंडेसणा, एस गिहत्थाइसु अववाओ त्ति ॥ इति

॥२४५॥

श्रीगच्छाचारप्रकीर्णकावचूर्णौ प्रान्ते ॥ १३ ॥

ननु प्रकीर्णकोक्तैर्वचनैः प्रतिपदमस्माकं निरासः क्रियते भवद्भिः, तेषां तु प्रामाण्यं नास्माभिः स्वीक्रियते, मैवं वावदूक ! प्रकीर्णकानां भगवत्स्वशिष्यप्रणीतत्वेन प्रत्येकबुद्धप्रणीतत्वेन वा सुतरां प्रमाणत्वादिति । तथा चोक्तम्-अत्र शिष्यः प्रश्नयति-प्रकीर्णकानामुत्पत्तिः किं तीर्थकरात्, गणधरात्, गणधरशिष्यात्, प्रत्येकबुद्धात् ? वा उच्यते-तीर्थकरहस्तदीक्षितमुनेः प्रकीर्णकानामुत्पत्तिरिति । यदुक्तं नन्दीसूत्रे-

" से किं तं अंगबाहिरं ? अंगबाहिरं दुविहं पण्णत्तं तं जहा-आवस्सयं च १ आवस्सयवइरित्तं च २ । से किं तं आवस्सयं ? आवस्सयं छव्विहं पन्नत्तं तं जहा-सामाइयं १ चउवीसत्थओ २ वंदणयं ३ पडिक्कमणं ४ काउसग्गो ५ पच्चक्खाणं ६ से तं आवस्सयं । से किं तं आवस्सयवइरित्तं ? आवस्सयवइरित्तं दुविहं पण्णत्तं तं जहा-कालियं च १ उक्कालियं च २ । से किं तं उक्कालियं ? उक्कालिअं अणेगविहं पण्णत्तं तंजहा-दसवेयालियं १ कप्पियाकप्पियं २ चुल्लकप्पसुयं ३ महाकप्पसुयं ४ उवाइयं ५ रायपसेणियं ६ जीवाभिगमो ७ पन्नवणा ८ महापन्नवणा ९ पमायप्पमायं १० नंदी ११ अणुओगदाराइं १२ देविंदत्थओ १३ तंदुलवेयालियं १४ चंदाविज्झयं १५ ॥ सूरपण्णत्ती १६ पोरिसिमंडलं १७ मंडलप्पवेसो १८ विज्जाचरणविणिच्छओ १९ गणिविज्जा २० झाणविभत्ती २१ मरणविभत्ती २२ आयविसोही २३ वीयरायसुयं २४ संलेहणासुयं २५ विहारकप्पो २६ चरणविही २७ आउरपच्चखखाणं २८ महापच्चक्खाणं २९ एवमाइ से तं उक्कालियं । से किं तं कालियं ? कालियं अणेगविहं पण्णत्तं तं जहा-उत्तरज्झयणाइं १ दसाओ २ कप्पो ३ ववहारो ४ निसीहं ५ महानिसीहं ६ इसिभासियाइं ७ जंबुद्दीवपण्णत्ती ८ दीवसागरणपण्णत्ती ९ चंदपण्णत्ती १० खुड्डियाविमाणपविभत्ती ११ महल्लियाविमाणपविभत्ती १२ अंगचूलिया १३ वग्गचूलिया १४ विवाहचूलिया १५ अरुणोववाए १६ गरुलोववाए १७ वरुणोववाए १८ धरणोववाए १९ वेसमणोववाए २० वेलंधरोववाए २१ देविंदोववाए २२ उट्ठाणसुए २३ समुट्ठावसुए २४ नागपरियावलियाओ २५ निरयावलिओ २६ कप्पियाओ २७ कप्पवडिंसियाओ २८ पुप्फियाओ २९ पुप्फचूलियाओ ३० वह्नीदसाओ ३१ एवमाइआइं चउरासीइं पइन्नगसहस्साइं भगवओ अरहओ उसहसामिस्स आइतित्थयरस्स तहा संखिज्जाइं

पइन्नगसहस्साइं मज्झिमगाणं जिणवराणं चउद्दसपइण्णगसहस्साणि भगवओ वद्धमाणसामिस्स । अहवा जस्स जत्तिया सीसा उप्पत्तियाए वेणइयाए कम्मियाए पारिणामियाए चउव्विहाए बुद्धीए उववेया तस्स तत्तियाइं पइण्णगसहस्साइं पत्तेयबुद्धावि तत्तिया चेव से तं कालिअं आवस्सयवइरित्तं से तं अणंगपविट्ठं ॥ अस्य वृत्तिः-' एवमाइयाइं ' इत्यादि, कियन्ति नामग्राहमाख्यातुं शक्यन्ते प्रकीर्णकानि ? तत एवमादीनि चतुरशीतिप्रकीर्णकसहस्राणि भगवतोऽर्हतः श्रीऋषभस्वामिनस्तीर्थकृतः । तथा सङ्ख्येयानि प्रकीर्णकसहस्राणि मध्यमानामजितादीनां जिनवरेन्द्राणां तीर्थकराणाम्, एतानि च यस्य यावन्ति भवन्ति तस्य तावन्ति प्रथमानुयोगतो वेदितव्यानि । तथा चतुर्दशप्रकीर्णकसहस्राणि भगवतोऽर्हतो वर्द्धमानस्वामिनः । इयमत्र भावना-इह भगवत ऋषभस्वामिनश्चतुरशीतिसहस्रसङ्ख्याः श्रमणा आसीरन्, ततः प्रकीर्णकरूपाणि चाध्ययनानि कालिकोत्कालिकभेदभिन्नानि सर्वसङ्ख्यया चतुरशीतिसहस्रसङ्ख्यान्यभवन् कथम् ? इति चेत्, उच्यते इह यद्भगवदर्हदुपदिष्टं श्रुतमनुश्रत्यि भगवन्तः श्रमणा विरचयन्ति तत्सर्वं प्रकीर्णकमुच्यते, अथवा श्रुतमनुसरन्तो यदात्मनो वचनकौशलेन धर्मदेशनादिषु ग्रन्थपद्धतिरूपतया भाषन्ते तदपि सर्वं प्रकीर्णकम्, भगवतश्च ऋषभस्वामिन उत्कृष्ठा श्रमणसम्पदासीत् चतुरशीतिसहस्रप्रमाणा, ततो घटन्ते प्रकीर्णकान्यपि भगवतश्चतुरशीतिसहस्रसङ्ख्यानि, एवं मध्यमतीर्थकृतामपि सङ्ख्येयानि प्रकीर्णकसहस्राणि भावनीयानि । भगवतस्तु वर्द्धमानस्वामिनश्चतुर्दशश्रमणसहस्राणि तेन प्रकीर्णकान्यपि भगवतश्चतुर्दशसहस्राणि । अत्र द्वे मते-एके सूरय एवं प्रज्ञापयन्ति-इदं किल चतुरशीतिसहस्रादिकवृषभादीनां तीर्थकृतां श्रमणपरिमाणं प्रधानसूत्रविरचनसमर्थान् श्रमणानधिकृत्य वेदितव्यं, इतरथा पुनः सामान्यश्रमणा प्रभूततरा अपि तस्मिन् तस्मिन् ऋषभादिकाले आसीरन्, अपरे पुनरेवं प्रज्ञापयन्ति-ऋषभादितीर्थकृतां जीवतामिदं चतुरशीतिसहस्रादिकं श्रमणपरिमाणं प्रवाहतः पुनरेकैकस्मिन् तीर्थे भूयांसः श्रमणा वेदितव्याः, तत्र ये प्रधानसूत्रविरचनशक्तिसमन्विताः सुप्रसिद्धास्तद्ग्रन्था अतीतकालिका अपि तीर्थे वर्त्तमानास्तेऽत्राधिकृता द्रष्टव्याः । एतदेव मतान्तरमुपदर्शयन्नाह-' अहवा ' इत्यादि, अथवेति प्रकारान्तरोपदर्शने यस्य ऋषभादेस्तीर्थकृतो यावन्तः शिष्या औत्पत्तिक्या १ वैनयिक्या २ कर्मजया ३ पारिणामिक्या ४ चतुर्विधया बुद्ध्योपेताः-समन्विता आसीरन्, तस्य ऋषभादेस्तावन्ति प्रकीर्णकसहस्राणि, प्रत्येकबुद्धा अपि तावन्त एव । अत्रैके व्याचक्षतेइहैकैकस्य तीर्थकृतस्तीर्थेऽपरिमाणानि प्रकीर्णकानि भवन्ति, प्रकीर्णककारिणामपरिमाणत्वात्, केवलमिह प्रत्येकबुद्धरचितान्येव प्रकीर्णकानि द्रष्टव्यानि, प्रकीर्णकपरिमाणेन प्रत्येकबुद्धपरिमाण-प्रतिपादनात्,

॥२४७॥

स्यादेतत् प्रत्येकबुद्धानां शिष्यभावो विरुध्यते, तदेतदसमीचीनम् । यतः प्रव्राजकाचार्यमेवाधिकृत्य शिष्यभावो निषिध्यते, न तु तीर्थकरोपदिष्टशासनप्रतिपन्नत्वेनापि, ततो न कश्चिद्दोषः । तथा च तेषां ग्रन्थः-इह तित्थे अपरिमाणा पइन्नगा पइण्णगसामिअपरिमाणत्तणओ, किं तु इह सुत्ते पत्तेयबुद्धपणीयं पइण्णगं भाणियव्वं । कम्हा जम्हा पइण्णगपरिमाणेण चेव पत्तेयबुद्धपरिमाणं कीरइ इति, भणियं ' पत्तेयबुद्धावि तत्तिया चेव ' त्ति । चोयग आह-नणु पत्तेयबुद्धा सिस्सभावो य विरुज्झए । आयरिओ आह-तित्थगरपणीयसासणपडिवन्नत्तणओ तस्स सीसा हवंति ॥ अन्ये पुनरेवमाहुः-सामान्येन प्रकीर्णकैस्तुल्यत्वात्प्रत्येकबुद्धानामभिधानं, न तु नियोगतः प्रत्येकबुद्धरचितान्येव प्रकीर्णकानीति । ' से तं ' इत्यादि, तदेतत्कालिकम्, तदेतदावश्यकव्यतिरिक्तमिति ॥ १३५ ॥ इति श्रीगच्छाचारप्रकीर्णकावचूर्णौ । ३४ । पत्रे ॥ १४ ॥

उत्कृष्टा चैत्यवन्दना ऐर्यापथिकीप्रतिक्रमणपूर्विकैव भवति । जघन्यमध्यमे तु चैत्यवन्दने ऐर्यापथिकीप्रतिक्रमणमन्तरेणाऽपि भवतः । इति प्रवचनसारोद्धारे चैत्यवन्दनद्वारवृत्तौ ॥ १५ ॥

अथ साधर्मिकवात्सल्यप्रभावनाऽक्षराणि लिख्यन्ते-

निस्संकिय १, निक्कंखिय २, निव्वितिगिच्छा ३, अमूढदिट्ठी य ४ । उववूह ५ थिरीकरणे ६, वच्छल्ल ७, पभावणे ८, अट्ठ ॥ ३२ ॥ शङ्कितं-देशसर्वात्मकं, तदभावो निःशङ्कितम् १, काङ्क्षितं-अन्यान्यदर्शनग्रहात्मकं, तदभावो निष्काङ्क्षितम् २, विचिकित्सा-फलं प्रतिसन्देहस्तदभावो विदो-विज्ञास्ते च तत्त्वतः साधव एव तज्जुगुप्सा वा तदभावो निर्विचिकित्सितं, निर्विजुगुप्सां वा ३, आर्षत्वात्सूत्र एवं पाठः, अमूढा-ऋद्धिमत्कुतीर्थिकदर्शनेऽप्यवगीतमस्मद्दर्शनमिति मोहरहिता चासौ दृष्टिश्च-बुद्धिरूपा अमूढदृष्टिः ४, स च चतुर्विधोऽप्ययमान्तर आचारः । बाह्यं त्वाह-उपवृंहणा-गुणवतां स्तुतिः ५, स्थिरीकरणं-चाङ्गीकृतधर्मानुष्ठानं प्रति सीदतां स्थिरीकरणम् ६, वात्सल्यं-साधर्मिकजनस्य भक्तपानादिनोचितप्रतिपत्तिकरणम् ७, प्रभावना च-स्वतीर्थोन्नतिहेतुचेष्टा सुप्रवर्त्तनात्मिका ८, वात्सल्यप्रभावने अष्टौ एते दर्शनाचाराः स्युरिति शेषः । इति श्रीअष्टाविंशोत्तराध्ययने एकत्रिंशत्तमगाथायाम् ॥ १६ ॥

एतेन प्रतिमापूजनादिकं सजन्तुविराधनं कर्म भगवान्न समादिशतीति यत्केचन प्रलपन्ति तेऽपि परास्ता द्रष्टव्याः, सदारम्भस्य

भगवद्भिः प्रतिपादितत्वात्, इतरथा उक्तस्यापि साधर्मिकवात्सल्यस्य निषिद्धत्वापत्तेर्विराधनायास्तुल्यत्वादिति ।

केचिच्च देवगुर्वादिपुरतः स्वस्तिकादिरचनां न स्वीकुर्वते तेऽज्ञानिनो वेदितव्याः । यतः साधुस्तान्यर्चनवन्दनादीनि मनसाऽपि न प्रार्थयेत् । गृहस्थैस्तु गुरुभक्त्या तानि कर्तव्यान्येव अन्यथा तत्रैवोक्तानां क्रियमाणानां च वन्दनादीनामप्यकर्त्तव्यतापत्तेः । अक्षराणि चेमानि-अच्चणं सेवणं चेव, वंदणं पूयणं तहा । इड्ढीसक्कारसम्माणं, मणसावि न पत्थए ॥ १८ ॥ इति पञ्चत्रिंशोत्तराध्ययने ॥ १७ ॥

अथ देवपूजाविधिविचारा यथा-

शुचिरिति-मलोत्सर्गदन्तधावनजिह्वालेखनगंडूषकरणसर्वदेशस्नानादिना पवित्रः सन्, इति श्राद्धविधौ । १८ ।

ततः पवित्रमृदुगन्धकाषायिकाद्यंशुकेनाङ्गरूक्षणपौतिकमोचनपवित्रवस्त्रान्तरपरिधानादियुक्त्या क्लिन्नाङ्घ्रिभ्यां भूमिमस्पृशन् पवित्रस्थानमागत्योत्तरामुखः संव्ययते नव्यमव्यङ्गमकीलितं पृथुलं श्वेतांशुकद्वयम् । " विशुद्धिर्वपुषः कार्या, यथायोगं जलादिभिः । धौते सिते वसीत द्वे, विशुद्धे धूपधूपिते ॥ १ ॥ " लोकेऽप्युक्तम्-" न कुर्यात्सन्धितं वस्त्रं, देवकर्मणि भुमिप !। न दग्धं न तु वैच्छिन्नं, परस्य तु न धारयेत् ॥ २ ॥ कटिस्पृष्टं तु यद्वस्त्रं, पुरीषं येन कारितम् । समूत्रं मैथुनं चाऽपि, तद्वस्त्रं परिवर्जयेत् ॥ ३ ॥ एकवस्त्रो न भुञ्जीत, न कुर्याद्देवतार्चनम् । न कञ्चुकं विना कार्या, देवार्चा स्त्रीजनेन तु ॥ ४ ॥ " एवं हि पुंसां वस्त्रद्वयं स्त्रीणां च वस्त्रत्रयं विना न कल्पते देवार्चादि । इति श्राद्धविधौ ॥ १८ ॥

न च दुकूलं भोजनादिकरणेऽपि सर्वदा पवित्रमेवेति लोकोक्तिरत्र प्रमाणयितव्या, किं त्वन्यधौतिकवद्दुकूलमपि भोजनमलमूत्राशुचिस्पर्शवर्जनादिना सत्यापनीयम् व्यापारणानुसारेण पुनः पुनर्धावनधूपनादिना पावनीयम्, धौतिकं च स्वल्पवेलमेव व्यापार्यं, प्रस्वेदश्लेष्मादि च धौतिकेन न स्फेटनीयम्, अपावित्र्यप्रसक्तेः, व्यापारितवस्त्रान्तरेभ्यश्च पृथग् मोच्यम् । इति श्राद्धविधौ ॥ १९ ॥

एवं द्रव्यभावाभ्यां शुचिर्गृहे गृहचैत्ये-" आश्रयन् दक्षिणां शाखां, पुमान् योषित्त्वदक्षिणाम् । यत्नपूर्वं प्रविश्यान्तर्दक्षिणेनाङ्घ्रिणा ततः ॥ १ ॥ सुगन्धिमधुरैर्द्रव्यैः, प्राङ्मुखो वाऽप्युदङ्मुखः । वामनाड्यां प्रवृत्तायां, मौनवान् देवमर्चयेत् ॥ २ ॥ " इत्याद्युक्तेन नैषेधिकीत्रयकरणप्रदक्षिणात्रयचिन्तनादिकेन विधिना शुचिपट्टकादौ पद्मासनादिसुखासनासीनश्चन्दनभाजनाच्चनदनं स्थानान्तरे हस्ततले वा

प्रक्षिप्य कृतभालतिलकहस्तकङ्कणः श्रीचन्दनचर्चितहस्तद्वयो जिनमर्हन्तं पूजयित्वा वक्ष्यमाणाभिरङ्गाग्रभावपूजाभिरभ्यर्च्य संवरणं प्रत्याख्यानं प्राक्कृतमकृतं वा यथाशक्ति करोति । इति श्राद्धविधौ ॥ २० ॥

अथोपोषणे पोरुष्यादिप्रत्याख्याने वा देवमर्चयतो न दन्तधावनापेक्षेत्यक्षराणि लिख्यन्ते-

उपवासपौरुष्यादिप्रत्याख्यानिनस्तु दन्तधावनादि विनाऽपि शुद्धिरेव, तपसो महाफलत्वात् । लोकेऽपि उपवासादौ दन्तकाष्ठादि विनाऽपि देवार्चादिकरणात् । निषिद्धं च लौकिकशास्त्रेऽप्युपवासादौ दन्तकाष्ठादि । यदुक्तं विष्णुभक्तिचन्द्रोदये " प्रतिपद्दर्शषष्ठीषु, मध्यान्ते नवमीतिथौ । सङ्क्रातिदिवसे प्राप्ते, न कुर्याद्दन्तधावनम् ॥ १ ॥ उपवासे तथा श्राद्धे, न कुर्याद्दन्तधावनम् । दन्तानां काष्ठसंयोगो, हन्ति सप्तकुलानि वै ॥ २ ॥ " इति श्राद्धविधौ ॥ २१ ॥

तथाऽन्यतीर्थिका हि पञ्चामृतमध्ये मधु गणयन्ति, श्रावकैस्तु तत्स्थाने इक्षुरसो ज्ञेय इति लिख्यते-ततो घृते १ क्षुरस २ दुग्ध ३ दधि ४ सुगन्धिजलैः ५ पञ्चामृतस्नात्रम् । इति श्राद्धविधौ ॥ २ ॥

अथ भगवतोऽङ्गे तिलककरणानुक्रमो लिख्यते-

ततः सुयत्नवालककुञ्चिकां व्यापार्य प्रक्षाल्याङ्गरूक्षणद्वयेन निर्जलतामापाद्याङ्घ्रिजानुकरांसेषु मूर्ध्नि पूजा यथाक्रममित्युक्तेर्वक्ष्यमाणतया सृष्टया नवाङ्गेषु श्रीचन्दनादिनाऽर्चयेत् । केऽप्याहुः-पूर्वं भाले तिलकं कृत्वा नवाङ्गपूजा कार्या । जिनप्रभसूरिकृतपूजाविधौ तु-" सरससुरहिचन्दणेण देवस्स दाहिणजाणु१ दाहिणखंध२ निडाल३ वामस्वंध६ वामजाणू५ लक्खणेसु पंचसु हिअएण वा सह छस्सु वा अंगेसु पूयं " । इति श्राद्धविधौ ॥ २३ ॥

तथा स्वगृहचैत्यढौकितचोक्षपूगीफलनैवेद्यादिविक्रयोत्थं पुष्पभोगादि स्वगृहचैत्ये न व्यापार्यम्, नापि चैत्ये स्वयमारोप्यम्, किं तु सम्यक्स्वरूपमुक्त्वाऽर्चकादेः पार्श्वात् तद्योगाभावे सर्वेषां स्फुटं स्वरूपमुक्त्वा स्वयमारोपयेत् अन्यथा मुधा जनप्रशंसादिदोषः । गृहचैत्यनैवेद्यादि चारामिकस्य प्रागुक्तमासदेयस्थाने नार्प्यम्, आदावेव नैवेद्यार्पणेन मासदेयोक्तौ तु न दोषः, मुख्यवृत्त्या मासदेयं पृथगेव कार्यम्, गृहचैत्यनैवेद्यचोक्षादि तु देवगृहे मोच्यम् । अन्यथा गृहचैत्यद्रव्यणैव गृहचैत्यं पूजितं स्यात् न तु स्वद्रव्येण, तथा चानादरावज्ञादिदोषः न

चैवं युक्तम्, स्वदेहगृहकुटुम्बाद्यर्थं भूयसोऽपि व्ययस्य गृहस्थेन करणात् देवगृहे देवपूजाऽपि स्वद्रव्येणैव यथाशक्ति कार्या, न तु स्वगृहढौकितनैवेद्यादिविक्रयोत्थद्रव्येण देवसक्तपुष्पादिना वा प्रागुक्तदोषात्। तथा देवगृहागतं नैवेद्याक्षतादि स्ववस्तुवत् सम्यग् रक्षणीयम्, सम्यग्मूल्यादियुक्त्या च विक्रेयम्, न तु यथा तथा मोच्यम्, देवद्रव्यविनाशादिदोषापत्तेः। सर्वप्रयत्नेन रक्षणादिचिन्ताकरणे जातु चौराग्न्याद्युपद्रवाद्देवद्रव्यादि विनश्यति तदा तु चिन्ताकर्त्ता निर्दोष एव, अवश्यभाविभावस्याप्रतिकार्यत्वात्। इति श्रीश्राद्धविधौ ॥ २४ ॥

ज्ञानद्रव्यं हि देवद्रव्यवन्न कल्पते एव श्राद्धानां। साधारणमपि सङ्घदत्तमेव कल्पते व्यापारयितुं न त्वन्यथा, सङ्घेनापि सप्तक्षेत्रीकार्ये एव व्यापार्यम्, न मार्गणादिभ्यो देयम्, साम्प्रतिकव्यवहारेण तु यद्गुरुन्युञ्छनादिसाधारणं कृतं स्यात्तस्य श्रावकश्राविकाणामर्पणे युक्तिरेव न दृश्यते, शालादिकार्ये तु तद्व्यापार्यते श्राद्धैः। एवं ज्ञानसक्तं कागदपत्रादिसाध्वाद्यर्पितं श्राद्धेन स्वकार्ये न व्यापार्यं स्वपुस्तिकायामपि न स्थाप्यं समधिकनिष्क्रयं विना। साध्वादिसत्कमुखवस्त्रिकादेरपि व्यापारणं न युज्यते गुरुद्रव्यत्वात्, स्थापनाचार्यजपमालादि तु प्रायः श्राद्धार्पणार्थं गुरुभिर्विहियते तेन गुर्वर्पिततद्ग्रहणे व्यवहारो दृश्यते, इति श्राद्धविधौ ॥ २५ ॥

तस्माद्देवज्ञानादेर्देयं क्षणमपि न स्थाप्यं, अन्यस्यापि देयस्य प्रदाने विवेकिभिः सर्वथा न विलम्ब्यते, किं पुनर्देवज्ञानादेः। यदा च यावता मालापरिधानादि कृतं तदा तावद्देवादिद्रव्यं जातं, तच्च कथमुपभुज्यते, कथं वा तल्लाभादि गृह्यते, पूर्वोक्तदेवादिद्रव्योपभोगदोषप्रसङ्गात्, तस्मात्सद्य एव तदर्पणीयम्। यस्तु सद्योऽर्पयितुमशक्तस्तेनादावेव पक्षार्द्धपक्षाद्यवधिः स्फुटं कार्यः। अवधिमध्ये च स्वयमर्प्यम्, मार्गणादिविनाऽपि अवध्युल्लङ्घने देवद्रव्योपभोगदोषः। उद्ग्राहणिकापि शीघ्रमभग्नतया तच्चिन्ताकारकैः स्वद्रव्यवद्देवादिद्रव्येऽपि कार्या। अन्यथा बहुविलम्बे दुर्भिक्षदेशभङ्गदौस्थ्यापातस्यापि सम्भवात्, बहूपक्रमेऽपि तदसिद्धेः, तथाऽपि च महादोषः इति श्राद्धविधौ ॥ २६ ॥

तथा देवादिदेयं सम्यगेवार्प्यं, न तु घृष्टकूटनाणकादिना यथा कथञ्चिद्देवद्रव्योपभोगदोषापत्तेः, तथा देवज्ञानसाधारणसम्बन्धिगृहाट्टक्षेत्रवाटिकापाषाणेष्टकाकाष्टवंशकवेल्लुकमृत्सुधादिकं श्रीखण्डकेसरभोगपुष्पादिकं पिङ्गानिकाचङ्गेरीधूपपात्रकलशवासकुम्पिकादिकं श्रीकरीचमरचन्द्रोदयझल्लरीभेर्यादिवाद्यसाबाणसिरावकजवनिकाकम्बलकपाटपट्टपट्टिकाकुण्डिकाकुम्भओरसकज्जलजलप्रदीपादिकं चैत्यशालाप्रणालाद्यागतजलाद्यपि च स्वकार्ये किमपि न व्यापार्यम्, देवद्रव्यवत्तदुपभोगस्यापि दुष्टत्वात्। चमरसाबाणादीनां मलिनीभवनत्रुटनपाटनादिसम्भवे

॥२५१॥

त्वधिकदोषोऽपि । इति श्राद्धविधौ ॥ २७ ॥

तथा अन्त्यावस्थायां पित्रादीनां यन्मान्यते तत्सावधानत्वे गुरुश्राद्धादिबहुसमक्षमेव वाच्यं यद्भवन्निमित्तमियद्दिनमध्ये इयद्व्ययिष्यामि तदनुमोदना भवद्भिः कार्येति, तदपि सद्यः सर्वज्ञातं व्ययितव्यम् । स्वनाम्ना व्यये स्तैन्यादिदोषः पुण्यस्थानेऽपि स च महर्षेरपि हीनताहेतुः । यदार्षम्-" तवतेणे वयतेणे, रूवतेणे अ जे नरे । आयारभावतेणे अ, कुव्वई देवकिव्विसं ॥ १ ॥ " धर्मव्ययश्च मुख्यवृत्त्या साधारण एव क्रियते । यथा यथा विशेषविलोक्यमानं धर्मस्थानं तत्र तदुपयोगः स्यात् । सप्तक्षेत्र्यां हि यत्सीदत् क्षेत्रं स्यात्तदुपष्टम्भे भूयान् लाभो दृश्यते ॥ इति श्राद्धविधौ ॥ २८ ॥

सर्वेष्वपि नियमेषु च सहसाऽनाभोगाद्याकारचतुष्कं चिन्त्यम्, तेनानाभोगादिनाऽनियमितबहुवस्तुग्रहणेऽपि नियमभङ्गे न स्यात्, किन्त्वतिचारमात्रम् । ज्ञात्वा त्वंशमात्रग्रहणेऽपि नियमभङ्गः एव जातु दुःकर्मपारवश्येन ज्ञात्वाऽपि भङ्गेऽग्रतो नियमः पाल्य एव धर्मार्थिना । प्रतिपन्नपञ्चमीचतुर्दश्यादितपोदिनेऽपि तिथ्यन्तरभ्रान्त्यादिना सचित्तजलपानताम्बूलभक्षणकियद्भोजनादौ यदा तपोदिनं ज्ञातं तदनु मुखान्तःस्थमपि न गिलति, किं तु तत्त्यक्त्वा प्रासुकवारिणा मुखशुद्धिं कृत्वा तपोरीत्यैव तिष्ठति तद्दिने च यदि भ्रान्त्या पूर्णं भुक्तस्तदा द्वितीयदिने दण्डनिमित्तं तत्तपः कार्यम् । समाप्तौ च तत्तपो वर्द्धमानं कार्यम् । एवं चातिचार एव स्यान्न तु भङ्गः । तपोदिनज्ञानादनुसिक्थादिमात्रगिलने तु भङ्ग एव नरकादिहेतुः । दिनसंशये कल्प्याकल्प्यसंशये वा कल्प्यग्रहणेऽपि भङ्गादिदोषः । गाढमान्द्ये भूतादिदोषपारवश्ये सर्पदंशाद्य-समाधौ च यदि तत्तपः कर्तुं न शक्नोति तथाऽपि चतुर्थाकारोच्चारान्न भङ्गः । एवं सर्वनियमेष्वपि भाव्यम् । इति श्राद्धविधौ ॥ २९ ॥

तयणु हरिसुल्लसंतो, कयमुहकोसो जिणिंदपडिमाणं । अवणेइ रयणिवसियं, निम्मल्लं लोमहत्थेणं ॥ १ ॥ मुखकोशश्चाष्टपुटः प्रान्तनासानिश्वासनिरोधार्थं कार्यः । इति श्राद्धविधौ ॥ ३० ॥

नित्यं पर्वसु वा वर्षमध्ये कियद्वारं वा खाद्यस्वाद्यादिसर्ववस्तूनां देवस्य गुरोश्च प्रदानपूर्वं भोजनम् । इति श्राद्धविधौ ॥ ३१ ॥

तथा ऋणसम्बन्धे हि प्रायः कलहानिवृत्तेर्वैरवृद्धाद्यपि प्रतीतं तस्मादृणसम्बन्धस्तद्भव एव यथा कथञ्चिन्निर्वाल्यः । अन्यत्राऽपि व्यवहारे निजस्वस्याचटने धर्मार्थमिदमिति चिन्त्यं धर्मार्थिना । अतः साधर्मिकैरेव सह मुख्यवृत्या व्यवहारो न्याय्यः । तत्पार्श्वे स्थितस्य

निजस्वस्य धर्मोपयोगित्वसम्भवात् । म्लेच्छादिपार्श्वाल्लभ्ये तु यत्र कोऽपि पुण्योपयोगो न स्यात् । तस्य प्राप्त्यसम्भवे व्युत्सर्जनमेव युक्तम् । व्युत्सर्गादनु प्राप्तं तु तत्सङ्घस्यैव धर्मार्थमर्प्यम् । एवं स्वकीयं गतमपि वस्तु शस्त्रादिप्राप्त्यसम्भवे व्युत्सृज्यम् । यथा तदुत्थं पापं न लगेत् । इत्थं युक्त्याऽनन्तभवसक्तं देहगेहकुटुम्बवित्तशस्त्रादि सर्वं पापहेतु विवेकिना व्युत्सर्जनीयम् । अन्यथा तदुत्थदुरितस्यानन्तैरपि भवैरनिवृत्तेः । इति श्राद्धविधौ ॥ ३२ ॥

तथा यथा तथा शपथादिकं न विदध्यात् । विशिष्य य देवगुर्वादिविषयं तदभिहितम्-" अलिएण व सच्चेण व, चेइयसम्मं करेइ जो मूढो । सो वमइ बोहिवीअं, अणंतसंसारिओ होइ । इति श्राद्धविधौ ॥ ३३ ॥

अथ निर्माल्यविचारः-

यदि च प्राक्केनापि पूजा कृता स्यात्तदा विशिष्टान्यपूजासामग्र्यभावे तां नोत्सारयेत्, भव्यानां तद्दर्शनजन्यपुण्यानुबन्धिपुण्यानुबन्धस्यान्तरायप्रसङ्गात् । किंतु तामेव विशेषयेत् । यद्बृहद्भाष्यम्-" अह पुव्वं चिय केणइ, हविज्ज पूया कया सुविहएण । तंपि सविसेससोहं, जह जह होइ तहा तहा कुज्जा ॥ १ ॥ निम्मल्लंपि न एवं, भन्नइ निम्मल्ललक्खणाभावा । भोगविणट्ठं दव्वं, निम्मलं बिंति गीयत्था ॥ २ ॥ इतो चेव जिणाणं, पुणरवि आरोवणं कुणंति जहा । वत्थाभरणाईणं, जुगलिअकुंडलिअमाईणं ॥ ३ ॥ कहमन्नह एगाए, कासाइए जिणिंदपडिमाणं । अट्ठसयं लूहंता, विजयाई वण्णिया समए ॥ ४ ॥ " यज्जिनबिंबारोपितं सत् विच्छायीभूतं विगंधं जातं दृश्यमानं च निःश्रीकं न भव्यजनमनःप्रमोदहेतु तन्निर्माल्यं ब्रुवन्ति स्म बहुश्रुताः । इति सङ्घाचारवृत्तौ । प्रद्युम्नसूरिकृतविचारसारप्रकरणे त्वेवमुक्तम्-" चेइयदव्वं दुविहं, पूयानिम्मल्लभेयओ इत्थ । आयाणाई दव्वं, पूयारित्थं मुणेयव्वं ॥ १ ॥ अक्खयफलबलिवत्थाइ, संतिअं जं पुणो दविणजायं । तं निम्मल्लं जायइ, जिणकम्मंमि उवओगो य ॥ २ ॥ " अत्र ढौकिताक्षतादेर्निर्माल्यत्वमुक्तं; परमन्यत्रागमे प्रकरणचरित्रादौ वा क्वापि न दृश्यते, वृद्धसम्प्रदायादिना क्वापि गच्छेऽपि नोपलभ्यते यत्र च ग्रामादावादानादिद्रव्यागमोपायो नास्ति तत्राक्षतबल्यादिद्रव्येणैव प्रतिमाः पूज्यमानाः सन्ति । अक्षतादेर्निर्माल्यत्वे तु तत्र प्रतिमापूजाऽपि कथं स्यात्तस्माद्भोगविनष्टस्यैव निर्माल्यत्वमुक्तम् । " भोगविणट्ठं दव्वं, निम्मल्लं बिंति गीअत्था । " इत्यागमोक्तेरपि । तत्त्वं तु केवलिगम्यम् । इति श्राद्धविधौ । एते सर्वेऽपि

विचाराः श्राद्धविधौ दिनकृत्याधिकारे ॥ ३४ ॥ एतेषामादौ अभिप्रायास्तु स्पष्टतमत्वादेव नोल्लेखिता इति ।

अथ केचित् सुविहितपरंपरावन्तोऽपि गृहस्थाः सदारम्भमप्यारम्भमिव गणयन्ति परं तेऽनवबुद्धा ज्ञेयाः, यतोऽसदारम्भवतः सदारम्भस्य सुतमां विहितत्वात् । अयमेवाभिप्रायो लिख्यते-

राजादेस्तु विधापयितुः प्रचुरतरभाण्डागारनगरमण्डलगोकुलादिप्रदानं जिनभवनक्षेत्रे वपनम् । तथा जीर्णशीर्णानां चैत्यानां समारचनं, नष्टभ्रष्टानां समुद्धरणं चेति । ननु निरवद्यजिनधर्मसमाचरणचतुराणां जिनभवनबिम्बपूजादिकरणमनुचितमिव प्रतिभासते, षट्जीवनिकायविराधनाहेतुत्वात्तस्य भूमिखननदलपाटकानयनगर्त्तापूरणेष्टकाचयनजलप्लावनवनस्पतित्रसकायविराधनामन्तरेण न हि तद्भवति । उच्यते-य आरम्भपरिग्रहप्रसक्तः कुटुम्बपरिपालननिमित्तं धनोपार्जनं करोति, तस्य धनोपार्जनं विफलं माभूदिति जिनभवनादौ धनव्ययः श्रेयानेव, न च धर्मार्थं धनोपार्जनं युक्तम् । यतः-" धर्मार्थं यस्य वित्तेहा, तस्यानीहा गरीयसी । प्रक्षालनाद्धि पङ्कस्य, दूरादस्पर्शनं वरम् " ॥ इत्युक्तमेव, न च वापीकूपतडागादिखननवदशुभोदर्कं जिनभवनादिकरणम् । अपि तु सङ्घसमागमधर्मदेशनाकरणव्रतप्रतिपत्त्यादिकरणेन शुभोदर्कमेव । षट्जीवनिकायविराधना च यतनाकारिणामगारिणां कृपापरवशत्वेन सूक्ष्मानपि जन्तून् रक्षयतामविराधनैव । यदाहुः-" जा जयमाणस्स भवे, विराहणा सुत्तविहसमग्गस्स । सा होइ निज्जरफला, अज्झत्थविसोहिजुत्तस्स ॥ १ ॥ परमरहस्समिसीणं, समग्गगणिपिडगधरियसाराणं । परिणामिअं पमाणं, निच्छयमवलंबमाणाणं ॥ २ ॥ " यस्तु निजकुटुम्बार्थमपि नारम्भं करोति प्रतिमाप्रतिपन्नादिस्तस्य माभूज्जिनबिम्बादिविधानमपि । यदाह-" देहाइनिमित्तंपि हु, जे कायवहंमि इह पयट्टंति । जिणपूआ कायवहंमि, तेसिमपवत्तणं मोहो " ॥ इत्यलं प्रसङ्गेन । इति श्रीयोगशास्त्रतृतीयप्रकाशकवृत्तौ ॥ ३५ ॥

अथ केचिदनिषेवितसुविहितगीतार्थचरणाः, अनवगतपरम्परागतागमतत्त्वाः प्रलपन्ति अहोरात्रिक एव पौषधः कर्त्तव्यः, तत्सामग्र्यभावे न कर्त्तव्य एव, न तु केवलरात्रिकः केवलदैवसिको वेति । तदनुरूपा एवान्ये च । ' एगराइं न हावए ' इत्याद्युत्तराध्ययनोक्तवचनबलादहोरात्रिककेवलरात्रिकौ कर्त्तव्यो, न तु केवलदेवसिक इति । ततस्तदुपकाराय श्राद्धविधिलिखितावश्यकचूर्ण्याद्यागमोक्तः पौषधविधिपाठो लिख्यते-

पौषधं च त्रेधा-अहोरात्र १ दिवस २ रात्रिपौषध ३ भेदात् । तत्रायमहोरात्रपौषधविधिः–"इह जम्मि दिणे सावओ पोसहं लेइ तंमि दिणे घरवावारं वज्जिय पोसहसालाए गहियपोसहजुग्गोवगरणो पोसहसालं साहुसमीवे वा गच्छइ । तओ अंगपडिलेहणं करिअ उच्चारपासवणथंडिले पडिलेहिय गुरुसमीवे नवकारपुव्वं ठवणायरियं ठावित्ता ईरिअं पडिक्कमिअ खमासणे वंदिअ पोसहमुहपत्तिं पडिलेहेइ । ततो खमासणं दाउंउद्धट्ठिओ भणइ-इच्छाकारेण संदिसह भगवन् ! पोसहं संदिसावेमि । बीएण पोसहं ठावेमित्ति भणिय नमुक्कारपुव्वं पोसहमुच्चारेइ-करेमि भंते ! पोसहं आहारपोसहं सव्वओ देसओ वा सरीरसक्कारपोसहं सव्वओ बंभचेरपोसहं सव्वओ अव्वावारपोसहं सव्वओ चउव्विहे पोसहे ठामि जाव अहोरत्तं पज्जुवासामि दुविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि तस्स भंते ! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि । एवं पुत्तिपेहणपुव्वं खमासणदुगेण सामाइयं करिअ खमासणदुगेण जइ वासारत्तो तो कट्ठासणं सेसट्ठमासेसु पाउंच्छणगं संदिसाविअ खमासणदुगेण सज्झायं करेइ, तओ पडिक्कमणं करिअ खमासणदुगेण बहुवेलं संदिसाविअ खमासणपुव्वं पडिलेहं करेमित्ति भणिअ मुहपत्तिं पाउंच्छणं पहिरणगं च पेहिय साविया पुण पुत्ती पाउंछणमुत्तरीअं कंचुगं साडियं च पेहिअ खमासमणं दाउं भणइ-इच्छकारि भगवन् ! पडिलेहणा पडिलेहावओ, तओ इच्छं भणिय ठवणायरियं पेहिअ ठविअ खमासणपुव्वं उवहिमुहपत्तिं पेहिअ खमासणदुगेणं संदिसाविअ वत्थकंबलाइ पडिलेहेइ । तओ पोसहसालं पमज्जिअ कज्जयं उद्धरिय परिट्ठविअ ईरिअं पडिक्कमिअ गमणागमणमालोइय खमासमणपुव्वं मंडलीइ साहुव्व सज्झायं करेइ, ताओ पढइ गुणइ पुत्थयं वावाएइ जाव पउणा पोरिसी, तओ खमासणपुव्वं पुत्तिं पेहिअ तहेव सज्झायइ जाव कालवेला जइ देवा वंदियव्वा हवंति तो आवस्सिआपुव्वं चेइहरे गंतुं देवे वंदेइ, जइ पारणइत्तो तो पच्चक्खाणे पुन्ने खमासणपुव्वं पुत्तिं पेहिय खमासमणं दाउं भणइ-पारावह पोरिसी पुरिमड्ढो वा चउहारकओ तिहाहारकओ वा आसि निव्विएणं आयंबिलेणं एगासणेणं पाणाहारेण वा जा काइ वेला तीए, तओ देवे वंदिय सज्झायं करिअ गेहे गंतुं जइ हत्थसयाओ बाहिं तो ईरिअं पडिक्कमिअ आगमणं आलोइअ जहासंभवं अतिहिसंविभागवयं फासित्ता निच्चलासणे उवविसिअ हत्थपाए मुहं च पेहित्ता नमुक्कारं भणिअ फासुअमरत्तदुट्ठो जेमेइ, पोसहसालाए वा पुव्वसंदिट्ठनियसयणेहिं आणिअं नो भिक्खं हिंडइ, तओ पोसहसालाए गंतुं ईरिअं पडिक्कमिअ देवे वंदिअ वंदणं दाउं तिहाहारस्स चउहाहारस्स वा

पच्चक्खाइ, जइ सरीरचिंताए अट्ठो तो आवस्सिअं करिअ साहुव्व उवउत्तो निज्जीवे थंडिले गंतुं विहिणा उच्चारपासवणं वोसिरिअ सोअं करिअ पोसहसालाए आगंतुं ईरिअं पडिक्कमिअ खामासणपुव्वं भणइ-इच्छाकारेण संदिसह भगवन् ! गमणागमणं आलोउं इच्छं वसतिहूंता आवसीकरी अवरदक्खिणदिसि जाइअ दिसालोअं करिअ अणुजाणह जस्सुग्गहुत्ति भणिअ संडासए थंडिलं च पमज्जिय उच्चारपासवणे वोसिरिय निसीहियं करिअ पोसहसालाए पविट्ठा आवंतजंतेहिं जं खंडिअं जं विराहिअं तस्स मिच्छामि दुक्कडं । तओ सज्झायं करेइ ।" एवं सन्ध्याप्रतिलेखानाप्रतिक्रमणपौरुषीपाठनशयन पुनः प्राभातिकप्रतिक्रमणदेववन्दनस्वाध्यायकरणपौषधपारणादिक-सर्वोऽपि विधिः क्रियमाणत्वेन दृश्यमान एव पाठबद्धो ज्ञेयः । यावत् " एवं दिवसपोसहंपि । नवरं-जावदिवसं पज्जुवासामित्ति भणइ । देवसियाइपडिक्कमणे कए पारेउं कप्पइ । रत्तिपोसहंपि एवं । नवरं मज्झन्हाओ परओ जाव दिवसस्स अंतोमुहुत्तो ताव घिप्पइ तहा दिवससेसं रत्तिं पज्जुवासामित्ति भन्नइ पोसहपारणए साहुसंभवे नियमा अतिहिसंविभागवयं फासिअ पारेयव्वं । इति श्राद्धविधौ पर्वकृत्याधिकारे ॥ ३६ ॥

केचिदविदितपरमार्थाः समर्थयन्ति, श्रावकाणां दशवैकालिकादिसिद्धान्तः पठनीय एवेति । यतः समवायांगे श्रावकवर्णके उवासगदसासु णं उवासगाणं णगराइं उज्जाणाइं चेइयाइं यावत् सुअपरिग्गहा तवोवहाणाइं । अत्र ' सुअपरिग्गहा ' इति शब्देन सिद्धान्ताध्ययनस्य विहितत्वादिति । अत्रोच्यते अहो द्रष्टव्यं खलु खलस्य तव कैतवकलाविलसितम् यदत्रैव ' चेइयाइं तवोवहाणाइं ' इति प्रदर्शनं, परमिदमपि तव तात्पर्यानवबोधसूचकमेव, यतोऽत्र श्रुतशब्देन श्रुतार्थस्य गृहीतत्वात् । यदुक्तमर्थस्यापि श्रुतत्वं स्थानाङ्गे-" दुविहे धम्मे पण्णत्ते तंजहा-सुअधम्मे चेव चरित्तधम्मे चेव । सुअधम्मे दुविहे पण्णत्ते तंजहा-सुत्तसुअधम्मे अ अत्थसुअधम्मे य " इति । न च वाच्यं सूत्रमर्थमुभयमपि गृह्यतामिति । राजप्रश्नीये-" लद्धट्ठे गहियट्ठे पुच्छियट्ठे अहिगयट्ठे विणिच्छियट्ठे " । अर्थश्रवणतः १ अर्थावधारणातः २ संशये सति३ सम्यगुत्तरश्रवणतो विमलावबोधात् ४ ऐन्दंपर्योपलम्भात् ५ इत्यादिनाऽर्थग्रहणस्यैवोक्तत्वात्, न सूत्रस्य । निशीथसूत्राद्युक्तः स्पष्टनिषेधश्च प्रागुक्त एव ॥ ३७ ॥

ग्लानस्य प्रतिचरणे महापुण्यमित्यभिप्रायो लिख्यते-

ग्लानस्य प्रतिचरणे महत्फलम् । यदागमः-गोयमा ! जो गिलाणं पडिअरइ से मं दंसणेणं पडियरइ, जे मं दंसणेणं पडिवज्जइ सो गिलाणं पडियरइ आणाकरणसारं खु अरहंताणं दंसणं । इत्यादि भगवत्याम् । इति श्रीश्राद्धविधौ ॥ ३८ ॥

अथ पुनरपि पौषधे भोजनाक्षराणि लिख्यन्ते-

तत्थ जइ देसओ आहारपोसहिओ तो भत्तपाणस्स गुरुसक्खिअं पारावित्ता, आवस्सिअं करित्ता, ईरियासमिओ गंतुं ईरियावहिअं पडिक्कमइ, आगमणआलोअणं करेइ, चेइए वंदइ, तओ संडासयं पमज्जित्ता पाउंछणे निसीयइ, भायणं पमज्जइ, जहुच्चिए भोअणे परिवेसिए पंचमंगलमुच्चारेइ, पच्चक्खाणं सरित्ता तओ, वयणं पमज्जित्ता असुरसुरं अचवचवं अवडुमविलंबिअं अपरिसाडिं मणवयण-कायगुत्तो भुंजइ साहुव्व उवउत्तो, जायामायाए वा भुच्चा फासुअजलेणं मुहसुद्धिं काउं नउकारसरणेण उट्ठाइ देवे वंदइ, वंदणयं दाउं संवरणं काऊण पुणोवि पोसहसालाए गंतूण सज्झायंतो चिट्ठइ । इति प्रतिक्रमणावचूर्णौ ॥ ३९ ॥

अथ ये केचन पौषधे भोजनं न स्वीकुर्वते, तेषामेव पूर्वजानां वाक्यं यथा-

" जो पुण आहारपोसहो देसओ पुण्णे पच्चक्खाणे तीरीए खमासमणदुगेण मुहपत्तिं पडिलेहिय खमासमणेण वंदिअ भणइ इच्छाकारेण संदिसह भत्तपाणं पारावेह पोरिसिं पुरिमड्ढं चउव्विहारं एकासणं निव्वियं आयंबिलं वा जा कावि कालवेला तीए पडिलेहियनमुक्कारपुव्वगं अरत्तदुट्ठो भुंजइ । इति श्रीजिनवल्लभसूरिकृतपौषधविधिप्रकरणे ॥ ४० ॥

उपधानपौषधेऽयं विधिः, अयमिति चेद्बालचेष्टितं त्यज्यतां पौषधत्वस्य तत्राऽपि तुल्यत्वात् ।

अथोत्सर्गतस्तावत्साधूनां यत्र चतुर्मासकस्थितास्तत्र मासद्वयं यावदुपकरणं ग्रहीतुं न कल्पतेऽपि तथा हि-अथ चतुर्मासकानन्तरं कारणमपेक्ष्य न निर्गच्छन्ति ततो मासद्वयमध्ये गृहणीयात्, तदेव दर्शयति-

गच्छे सबालवुड्ढे, असई परिहर दिवड्ढमासं तु । पणतीसा पणवीसा, पन्नरस दसेव इक्कं च ॥ १ ॥ सबालवृद्धे गच्छे वस्त्राभावे शीतं सोढुमसमर्थे सार्द्धमासं परिहर परिवर्जय, परिहृत्य च तत ऊर्ध्वं गृहणीयात् । अथ सार्द्धमासमपि परिहर्त्तुमशक्तस्ततः पञ्चत्रिंशतं दिनानि परिहर अथैवमपि गच्छो न संस्तरति ततः पञ्चविंशतिर्दिनानि, तथाऽप्यशक्तौ पञ्चदशदिनानि तथाऽप्यशक्तौ दशदिनानि,

॥२५७॥

तथाऽप्यसामर्थ्ये एकमपि दिनं परिहर, इति सङ्ग्रहगाथासमासार्थः । इति श्रीबृहत्कल्पवृत्तौ तृतीयखंडे तृतीयद्देशके ॥ ४१ ॥

चउद्दस दस य अभिन्ने, नियमा सम्मं तु सेसए भयणा । यस्य चतुर्दशपूर्वाणि दशपूर्वाणि अभिन्नानि परिपूर्णानि सन्ति, तस्मिन्नियमात्सम्यक्त्वम् । शेषे च किञ्चिदूनदशपूर्वधरादौ सम्यक्त्वं वा स्यान्मिथ्यात्वं वेत्यर्थः । इति बृहत्कल्पे १५ पत्रे ॥ ४२ ॥

अथ साधूनां चित्रिते उपाश्रये वस्तुं न कल्पत इत्यक्षराणि लिख्यन्ते-

नो कप्पइ निग्गंथाण वा निग्गंथीण वा सचित्तकम्मए उवस्सए वत्थुं । कप्पइ निग्गंथाण वा निग्गंथीण वा अचित्तकम्मए उवस्सए वत्थुं इति । वृत्तिर्यथा-नो कल्पते निर्ग्रन्थानां निर्ग्रन्थीनां वा सचित्रकर्मणि उपाश्रये वस्तुम् । कल्पते पुनरचित्रकर्मणि उपाश्रये निर्ग्रन्थानां निर्ग्रन्थीनां वा वस्तुमिति सूत्रार्थः । अथ भाष्यविस्तरः-निद्दोष सदोसे वा, सचित्तकम्मे उ आणमादीणि । सइकरणं विकहा वा, बीअं असई य वसहीए ॥ १ ॥ निर्द्देषे वा सदोषे वा सचित्रकर्मणि प्रतिश्रये तिष्ठतामाज्ञादयो दोषाः ये च तादृशे वा चित्रकर्मखचिते वेश्मनि पूर्वभोगान् बुभुजिरे तेषां स्मृतिकरणम्, उपलक्षणत्वादितरेषां कौतुकमुपजायते, विकथा वा तत्र वक्ष्यमाणलक्षणा भवेत् । द्वितीयपदं चात्र वसतावसत्यां तत्रापि वसेत् । अथैनामेव निर्युक्तिगाथां व्याख्याति-तरुगिरिनदीसमुद्दा, भवणा वल्ली लया वियाणा य । निद्दोसचित्तकम्मे, पुन्नकलससोत्थियादी य ॥ १ ॥ तरवः सहकारादयो, गिरयो हिमवदादयो, नद्यादयो गङ्गासिन्धुप्रभृतयः, समुद्रा लवणोदादिकाः, भवनानि गृहाणि, वल्लयो नागवल्ल्यादयः, लता माधवीचम्पकलतादयः, तासां वितानं निकुरंबं, तथा पूर्णकलशः स्वस्तिकादयश्च ये माङ्गलिकाः पदार्थाः, एतेषां रूपाणि यत्रालिखितानि तच्चित्रकर्म निर्दोषं ज्ञातव्यम् । इति बृहत्कल्पप्रथमोद्देशे १६५ पत्रे ॥ ४३ ॥

अथ गच्छपरिमाणं लिख्यते-

तिगमाईया गच्छा, सहस्सबतीसई उसभसेणे । थंडिल्लंपि य पढमं, वयंति सेसेवि आगाढे ॥ १ ॥ त्रिकादयस्त्रिचतुःप्रभृतिपुरुषपरिमाणा गच्छा भवेयुः । किमुक्तं भवति ? एकस्मिन् गच्छे जघन्यतस्त्रयो जना भवन्ति, गच्छस्य समुदायरूपत्वात्, तस्य त्रयाणामधस्तादभावादिति । तत ऊर्द्धं ये चतुःपञ्चप्रभृतिपुरुषसङ्ख्याका गच्छास्ते मध्यमपरिमाणतः प्रतिपत्तव्यास्तावद्यावदुत्कृष्टपरिमाणं न प्राप्नोति । किं पुनस्तत् ? इतिचेदत आह ' सहस्सबत्तीसई उसभसेणे त्ति । द्वात्रिंशत्सहस्राण्येकस्मिन् गच्छे उत्कृष्टं साधूनां परिमाणं यथा

श्रीऋषभस्वामिप्रथमगणधरस्य भगवत ऋषभसेनस्य । इति श्रीबृहत्कल्पप्रथमखंडे १६५ पत्रे ॥ ४४ ॥

अथ साधूनां तरोरधो विटुत्सर्गः कर्त्तुं न कल्पते, इत्यक्षराणि लिख्यन्ते-

सच्चित्तरुक्खमूले, उच्चारादि आचरेउ जो भिक्खू । सो आणा अणवत्थं, विराहणं अट्ठिमादीहिं ॥ १ ॥ थंडिल्लअसति अद्धाण, रोधते संब्भमे भयासण्णे । दुव्वलगहणगिलाणे, वोसिरणं होइ जयणाए ॥ २ ॥ इति निशीथभाष्ये पञ्चमोद्देशके ॥ ४५ ॥

पञ्चपर्व्या आराध्यत्वे हेतुर्लिख्यते-

भयवं ! बीयपमुहासु पंचसु तिहीसु विहियं धम्माणुट्ठाणं किं फलं होइ ? गोयमा ! बहुफलं होइ, जह्मा एयासु पाएणं जीवो परभवाउयं समज्जिणइ । इति श्रीमहानिशीथे ॥ ४६ ॥

अथ दिवसेऽपि प्रथमचरमचतुर्घटिकर्योबहिः पात्रादि न स्थाप्यं, बहिर्न गन्तव्यं यतस्तदा सूक्ष्मः स्नेहकायः प्रपतति इति लिख्यते-

अत्थि णं भंते ! सदा समितं सुहुमे सिणेहकाए पवडति ? हंता अत्थि । से भंते ! किं उड्ढं पवडति ? अहे पवडइ तिरिए पवडति ? गोयमा ! उड्ढेवि पवडति अहेवि पवडति तिरिएवि पवडति । वृत्तिर्यथा-' अत्थि ' इत्यादि, सदा-सर्वदा ' समियं ' ति सपरिमाणं न बादराप्कायवदपरिमितमपि, अथवा ' सदा ' त्ति सर्वर्त्तुषु ' समितं ' ति रात्रौ दिवसस्य च पूर्वापरयोः प्रहरयोः तत्रापि कालस्य स्निग्धे-तरभावमपेक्ष्य बहुत्वमल्पत्वं चावसेयमिति । यदा-" पढमचरिमाउ सिसिरे, गिम्हे अद्धं तु तासि वज्जित्ता । पायं ठवे सिणेहाइ, रक्खणट्ठा पवेसे वा ॥ १ ॥ " लेपितपात्रं बहिर्न स्थापयेत्, स्नेहादिरक्षणार्थायेति । सूक्ष्मस्नेहकाय इति-अप्कायविशेष इत्यर्थः । इति श्रीभगवतीप्रथमशतकषष्ठोद्देशके ॥ ४७ ॥

त्रिविधाहारे जलमेव कल्पते, तत्रापि फुंकानीरं सीकरीकर्पूरएलाकत्थकखदिरचूर्णकसेल्लकपाटलादिजलं च नीतरितं गालितं वा नान्यथा । शास्त्रेषु मधुगुडशर्कराखंडादिस्वाद्यतया द्राक्षशर्करादिजलं तक्रादि च पानकतया उक्तं, परं द्विविधाहारादौ न कल्पते, उक्तं च नागपुरीयगच्छप्रत्याख्यानभाष्ये-दक्खापाणाईयं, पाणं तह साइमं गुडाईयं । पढियं सुअंमि तहवि हु, तित्तीजणगं तु नायरियं । इति श्राद्धविधौ ॥ ४८ ॥

वासासु सगदिणोवरि, पन्नरसदिणोवरिं च हेमंते । जायइ य सचित्तं से, गिम्हे मासोवरिं लोणं ॥ इति व्यवहारनिर्युक्तौ ॥ ४९ ॥

ननु इत्थं तावत्सर्वत्र भव्यस्यैव सम्यक्त्वलाभ उक्तः, अभव्यस्य तु का वार्त्तेत्याह-तित्थकराइयपूअं, दट्ठुणण्णेण वावि कज्जेण । सुअसामाइयलंभो, होइ अभव्वस्स गंठिमि ॥ " इति विशेषावश्यके ॥ ५० ॥

अभिप्रायस्तूभयत्रापि सुगम एव । अथ केचित्साध्वीनां पृथग्विहारमुचितं मन्यन्ते, अपरे तु गृहस्थैः सह साध्वीनां विहारमुचितं मन्यन्ते ते उभयेऽपि सिद्धान्तबाह्या ज्ञेयाः । यथा-

जत्थ य गोअम ! साहू, अज्जाहिं समं पहंमि अट्ठणा । अववाएणवि गच्छेज्जा, तत्थ गच्छंमि का मेरा ॥ १ ॥ इत्यत्र यद्यष्टौनैः साधुभिरपि सह साध्वीनां गमनं नानुज्ञातं तर्हि कथं गृहस्थैः सह एकाकिनीनां वा विहर्त्तुं कल्पते ? इति बोध्यम् । इति श्रीमहानिशीथपञ्चमाध्ययने ॥ ५१ ॥

अथायं लोकः कीदृशाकारः ? कथं च व्यवस्थित इति विचारो लिख्यते-

वेत्रासनसमोऽधस्तान्मध्यतो झल्लरीनिभः । अग्रे मुरजसङ्काशो, लोकः स्यादेवमाकृतिः ॥ १०५ ॥ वृत्तिर्यथा-अधस्तादधोभागे वेत्रासनमधस्ताद्विस्तीर्णमुपर्युपरि सङ्कोचवत्तत्समस्तदाकारः । मध्यतो-मध्ये झल्लरीवाद्यविशेषस्तत्सदृशः । अग्रे मध्यलोकादुपरि मुरज ऊर्ध्वमधश्च सङ्कुचितो मध्यभागे विस्तृतो वाद्यविशेषस्तत्सदृशः । एवमधोमध्योर्ध्वेषु आकारत्रययोगी लोकः । यदाहुः-तत्राधोमुखमल्लकसंस्थानं वर्णयन्त्यधोलोकम्, स्थालमिव तिर्यग्लोकम्, ऊर्ध्वमथमल्लकसमुद्गम्, । इह चाधस्तिर्यगूर्ध्वलोका रुचकापेक्षया । रुचकश्च मेरुमध्ये गोस्तनाकारचतुराकाशप्रदेशप्रमाणोऽधः, तादृश एवोर्द्धं, एवमष्टप्रदेशः । यदाहुः-" अट्ठ पएसो रुअगो, तिरियलोगस्स मज्झयारंमि । एस पहवो दिसाणं, एसेव भवे अणुदिसाणं ॥ १ ॥ " तत्र रूचकादध उपरि च नवयोजनशतानि तिर्यग्लोक इत्युत्सेधेऽष्टादशयोजनशतप्रमाणः तिर्यग्लोकादधो नवयोजनशतोनसप्तरज्जुप्रमाणोऽधोलोकः । तत्र सप्तपृथिव्य उक्तरूपाः ॥ ४ ॥ इति योगशास्त्रचतुर्थप्रकाशे १०५ श्लोकवृत्तौ १८१ पत्रे ॥

अथ का भूमिः ? कियदधः सचित्ता ? इति विचारो लिख्यते-

कठिना पृथ्वी शीतातपादिशस्त्रयोगे उपर्यङ्गुलमेकं प्रासुका, अल्पकठिना त्वङ्गुलचतुष्कं प्रासुका, अकठिनाऽङ्गुलाष्टकम्, वासोर्वी चाऽधिकाऽपि प्रासुका, चतुष्पदादिस्थाने क्षात्रस्थाने च मुंडहस्तं प्रासुका, मलमूत्रातपोष्णांश्वादिना च यावती भाविता वह्निस्थाने च वह्निना यावती भाविता सा प्रासुका, महानगरस्थाने च हस्तमेकं प्रासुका, महानगरादिस्थानेऽपि द्वादशवर्षशून्ये मलाद्यभावात्सर्वा सचित्ता क्षीरवृक्षाधश्च यत्र जन्तूनामसञ्चारः सदा छाया तत्र मिश्रा, क्षीरवृक्षाणां मधुरत्वेनाप्यायकत्वात्, क्षीरवृष्टिवातशीतादिभिः शस्त्रत्वाच्च । अन्यत्र तु जनासञ्चारे छायाबहुले स्निग्धसजले उपरितनं रूक्षं रजो मुक्त्वा सर्वा सचित्ता, क्वापि क्वापि मिश्राऽपि, क्वापि रजोऽपि सचित्तम्, यद्यतयश्चैत्ये शालायां (च) प्रवेशे पादौ रजोहरणेन प्रमार्जयन्ति तत्क्वापि प्रदेशे सचित्तं मिश्रं वा रजो भविष्यतीति हेतोः । तथा सचित्ता वा भूमिः सचित्तांबुयोगे जाते कियत्कालं मिश्रा स्यात्ततो या सचित्ता सा सचित्ता, या चाचित्ता साऽचित्तैवेति । इषत्स्वप्येवं यथार्हं वाच्यम् । इति श्रीमेरुतुङ्गसूरिकृतपिंडविशुद्धिवृत्तौ ।

तथा, जस्स सचित्तरुक्खस्स हत्थिपयपमाणो पिहुलो खंधो तस्स सव्वओ जाव रयणिप्पमाणा ताव सचित्ता भूमी एयं आणासिद्धं ॥ इति श्रीनिशीथचूर्णौ ॥ ५२ ॥

अथ षष्टारकादौ विषाग्निमेघैर्निर्बीजायां पृथिव्यां कृतायां पुनरप्याम्रादीनां यथोत्पत्तिर्भवति तथा लिख्यते-

खारम्माई पुक्खलसंवट्टंता, जहा बहू मेहा । इय धम्मबीयहरणा, करणा य गूरूणमुवएसा ॥ १ ॥ व्याख्या-यथा क्षाराम्लादयः पुष्करसंवर्त्तादयश्च मेघा बीजहरणा बीजकरणाश्च स्युः । तत्र क्षारमेघाम्लमेघाग्निमेघविषमेघाशनिमेघा युगान्तसमयप्रवर्षिणो यथोत्तरं सकलबीजप्लोषाय प्रवर्त्तन्ते । पुष्करावर्त्तमेघक्षीरमेघघृतमेघामृतमेघरसमेघाः पुनः कल्पस्यादौ सकलबीजाद्युत्पत्तये यथोत्तरं सम्भवन्ति । तदुक्तम्-" तदा च विरसा मेघाः, क्षारमेघाम्लमेघकाः । विषाग्न्यशनिमेघाश्च, वर्षिष्यन्त्यात्मसन्निभम् ॥ १ ॥ येन भावी कासः श्वासः, शूलं कुष्टं जलोदरम् । ज्वरः शिरोऽर्त्तिरन्येऽपि, मनुष्याणां महामयाः ॥ २ ॥ दुःखं स्थास्यन्ति तिर्यञ्चो, जलस्थलखचारिणः । भावी क्षेत्रवनारामलतातरुतृणक्षयः ॥ ३ ॥ " अयि च-" तत्राद्यः पुष्करो मेघो, महीं निर्वापयिष्यति । द्वितीयः क्षीरमेघाख्यो, धान्यमुत्पादयिष्यति ॥ ४ ॥ तृतीयो घृतमेघाख्यः, स्नेहं सञ्जनयिष्यति तुर्यस्त्वमृतमेघाख्यः, औषध्यादि करिष्यति ॥ ५ । पृथ्व्यादीनां रसकर्त्ता,

॥२६१॥

रसमेघश्च पञ्चमः । पञ्चत्रिंशद्दिना वृष्टिर्भाविनी सौम्य ! दुर्दिना ॥ ६ ॥ " इत्यादि श्रीउपदेशरत्नाकरे नवमतरङ्गे ॥ ५२ ॥

अथ प्रतिक्रमणे कस्मिन् समये कर्त्तव्ये तल्लिख्यते-

एषां कालस्तूत्सर्गेणैवमुक्तः । अद्धनिबुड्डे सूरे, सुत्तं कड्ढंति गीअत्था । इय वयणपमाणेणं, देवसियावस्सए कालो ॥ १ ॥ रात्रिकस्य चैवम्-आवस्ययस्स समए, निद्दामुद्दं चयंति आयरिया । तह तं कुणंति तह दस, पडिलेहाणंतरं सूरो ॥ १ ॥ अपवादतस्तु दैवसिकं दिवसतृतीयप्रहरादर्द्धरात्रं यावत् । योगशास्त्रवृत्तौ तु मध्याह्नादारभ्यार्द्धरात्रं यावदित्युक्तम् । रात्रिकमर्द्धरात्रादारभ्य मध्याह्नं यावत् । उक्तमपि-" उग्घाडपोरिसिं जा राइयभावस्सयस्स चुन्नीए ववहाराभिप्पाया भणंति पुण जाव पुरिमड्ढं " । इति श्राद्धविधौ द्वितीयप्रकाशे ७६ पत्रे ॥ ५४ ॥

अथ केचित् पाक्षिकोपवासादिकं पूर्णिमायां कुर्वते तच्च सिद्धान्तविरुद्धं यथा-

पाक्षिकचातुर्मासिकसांवत्सरिकाणि पक्षाद्यन्ते च स्युः । आह-पाक्षिकं चतुर्दशयां पञ्चदश्यां वा चतुर्दश्यामिति ब्रूमः । यदि पुनः पञ्चदश्यां स्यात्तदा चतुर्दश्यां पाक्षिके चोपवासस्योक्तत्वात्पाक्षिकमपि षष्टेन स्यात् । तथा च-" अट्ठमछट्ठचउत्थं, संवत्सरचाउमासपक्खेसु । " इत्याद्यागमविरोधः । यत्र चतुर्दशी गृहीता न तत्र पाक्षिकं यत्र पाक्षिकं न तत्र चतुर्दशी । तथा हि-" अट्ठमी चउद्दसीसु उववासकरणं " इति पाक्षिकचूर्णौ । 'सो अ अट्ठमीचउद्दसीसु उववासं करेइ ' इत्यावश्यकचूर्णौ । ' चउत्थछट्ठट्ठमकरणं अट्ठमीपक्खचउमासवरिसे य ' त्ति व्यवहारभाष्यपीठे । अट्ठमी चउद्दसी नाणपंचमी चउमास इत्यादि महानिशीथे । व्यवहारषष्ठोद्देशके च-" पक्खस्स अट्ठमी खलु, मासस्स य पक्खियं मुणेयव्वं, इत्यादि व्याख्यायां वृत्तौ चूर्णौ पाक्षिकशब्देन चतुर्दश्येव व्याख्याता । तदेवं निश्चिनुमः पाक्षिकं चतुर्दश्यामेव । चातुर्मासिकसांवत्सरिके तु पूर्वं पूर्णिमापञ्चम्योः क्रियमाणे अपि श्रीकालिकाचार्याचरणतः चतुर्दशीचतुर्थ्योः क्रियेते । प्रामाणिकं चैतत्, सर्वसम्मतत्वात् । उक्तं च कल्पभाष्यादौ-" असढेण समाइन्नं, जं कत्थइ केणई असावज्जं । न निवारिअमन्नेहिं, बहुमणुमयमेयमायरियं ॥ १ ॥ " तीर्थोद्गारादावपि-" सालाहणेण रन्ना, संघाएसेण कारिओ भयवं ? । पज्जोसवणचउत्थी, चाउम्मासं च चोद्दसिए ॥ १ ॥ चउमासपडिक्कमणं, पक्खिअदिवसंमि चउविहो संघो । नवसयतेणउएहिं, आयरणं तं पमाणंति ॥ २ ॥ " अत्र

चाधिकविशेषार्थिना पूज्यश्रीकुलमण्डनसूरिप्रणीतविचारामृतसङ्ग्रहोऽवगाहनीयः । इति श्राद्धविधौ पर्वकृत्याधिकारे ७६ पत्रे ॥ ५५ ॥

एतेनैव च ये पञ्चम्यां पर्युषणां कुर्वन्ति तेऽपि परास्ता द्रष्टव्याः । " नक्षत्रेषु समग्रेषु, भ्रष्टतेजस्सु भास्वतः । यावदर्द्धोदयस्तावत्, प्रातःसन्ध्या प्रजायते ॥ १ ॥ अर्केऽर्द्धास्तमिते यावन्नक्षत्रामि नभस्तले । द्वित्राणि नैव वीक्षन्ते, तावत्सायं विदुर्बुधाः ॥ २ ॥ " इति श्राद्धविधौ ॥ ५६ ॥

नागवल्लीदलेषु च निरन्तरं जलक्लेदादिना नीलीकुन्थ्वण्डकादिविराधना भूयसी ततस्तानि पापभीरवो रात्रौ न व्यापरयन्ति येऽपि व्यापारयन्ति तेऽपि सम्यग्दिवा संशोध्यैव । ब्रह्मचारिणा तु विशिष्य तानि त्याज्यानि, कामाङ्गत्त्वात्तेषाम् । प्रत्येकसचित्तेऽप्येकस्मिन् फलादावसङ्ख्यजीवविराधनासम्भवः । यदागमः-" जं भणियं पज्जत्तगनिस्साए वक्कमतंऽपज्जत्ता जत्थेगो पज्जत्तो तत्थअसंखा अपज्जत्ता " । बादरैकेन्द्रियेष्वेवमुक्तम् सूक्ष्मे तु यत्रैकोऽपर्याप्तस्तत्र तन्निश्रया नियमादसङ्ख्येयाः पर्याप्ताः स्युरित्याचाराङ्गवृत्त्यादावुक्तम् । इति श्राद्धविधौ ॥ ५७ ॥ अभिप्रायस्तु स्पष्ट एव ।

अधिकोपधिधारी साधुर्न भवतीति ये वदन्ति तदवबोधाय लिख्यते-

तत्र स्थविरकल्पे जघन्यतोऽपि चतुर्दशोपकरणान्येव । उत्कृष्टपदिकोपकरणचिन्तायां तु शीताद्यसहिष्णून् तपस्वी बालग्लानान् प्रतीत्य यावत्संयमहेतुर्द्विगुणोऽप्यधिको वा उपधिरवगन्तव्यः । इति श्री निशीथचूर्णाद्यागमे ॥ ५८ ॥

तथा-"मुल्लजुअं पुण तिविहं, जहन्नयं मज्झिमं च उक्कोसं । जहन्नं अट्ठारसगं, सयसाहस्सं च उक्कोसं ॥ १ ॥ " एतद्गाथोक्तं त्रिविधप्रमाणमपि वस्त्रं साधूनां ग्रहीतुं न कल्पते, किं त्वष्टादशरूपकमानान्यूनमूल्यं कल्पते साधूनाम् । इति स्थानाङ्गवृत्तौ ॥ ५९ ॥

रूपकमानमनेकार्थावचूर्णौ त्वेवमुक्तमस्ति-चतुर्भिर्वराटकैर्गंडकः, तेषां पञ्चविंशत्या पणः, तच्चतुर्थोऽशः काकिणिः, तासामशीत्यारूपकं विंशत्या वराटकैः काकिणिरित्यर्थः । तथा विरलिका नाम द्विसरसूत्रपटी सा साधूनां न कल्पते, दुःप्रेक्ष्यत्वात् । इति कल्पवृत्तौ द्वितीयखंडे १२३ पत्रे ॥ ६० ॥

जो भणइ नत्थि धम्मो, न य सामइयं न चेव व वयाइं । सो समणसंघवज्झो, कायव्वो समणसंघेण ॥ २ ॥ इति

॥२६३॥

श्रीतीर्थोद्गालिकप्रकीर्णके ॥ ६१ ॥ अभिप्रायस्तु स्पष्ट एव ।

छद्मस्थेनापि सह केवली विहरतीत्यक्षराणि लिख्यन्ते-

निट्ठविअअट्ठमयट्ठाणे, सोसियकसाए जिइंदिए । विहरिज्जा तेण सद्धिं तु, छउमत्थेणवि केवली ॥ ४२ ॥ इति गच्छाचारप्रकीर्णके ॥ ६२ ॥

द्वाविंशतेः परीषहाणां मध्ये उष्णाः के ? शीतलाश्च के ? इत्यभिप्रायो लिख्यते-

" इत्थीसक्कारपरीसहा य, दो भावसीयला एए । सेसा वीसं उण्हा, परीसहा होंति नायव्वा ॥ १ ॥ " इत्याचाराङ्गनिर्युक्तौ ॥ ६३ ॥

समन्ताद्विस्तृतपुष्पप्रकरे समवसरणे साधूनां तिष्ठतां कथं न सचित्ते सङ्घट्टदोष इति शङ्कानिरासो लिख्यते-

पुष्पवृष्टिरत्राहुः परे-कथमम्लानपुष्पप्रकरोपरि सर्वथा सच्चित्तसङ्घट्टनादिविरतानां यतीनामवस्थानादि युज्यते । अत्र केचित् प्रेरयन्ति-साध्ववस्थानस्थाने देवा न किरन्तीति । अन्ये त्वाहुः-नैतदेवम्, प्रयोजनेऽन्यत्रापि साधूनां गमनादिरपि सम्भवात् । केवलं विकुर्वितत्वात्तानि सचित्तानि न सम्भवन्ति । अन्ये त्वाहुः-न विकुर्वितान्येव तानि, जलजस्थलजानामपि पुष्पाणां तत्र प्रकीर्णत्वात् । यदागमः-" बिंटट्ठाई सुरहिं, जलथलयं दिव्वकुसुमनीहारी । पयरंति समंतेणं, दसद्धवन्नं कुसुमवासं ॥ " परमत्र बहुश्रुता एवं समादधते-यथा निरुपमाऽचिन्त्यार्हत्प्रभावादेव योजनमात्रे क्षेत्रेऽपरिमितामर्त्यादिसत्त्वसम्भवेऽपि न परस्परमाबाधा काचित् तथा पुष्पाणामपि तेषामुपरि सञ्चरिष्णौ स्थाष्णौ च मुन्यादिलोके । तत्त्वं तु केवलिनो विदन्ति । इति श्रीप्रवचनसारोद्धारैकोनचत्वारिंशद्वारे ॥ ६४ ॥

स्त्रियाः संभोगे चतुर्विधाहारो न भज्यते, बालादीनामोष्ठादिचर्वणे तु भज्यते, द्विविधाहारे तु तदपि कल्पते । प्रत्याख्यानं हि कावलिकाहारविषयमेव, न तु लोमाद्याहारविषयमपि । अन्यथोपवासाचाम्लादेर्वपुरभ्यङ्गगडुकरम्बबन्धनादिनाऽपि भङ्गप्रसङ्गात् । न चैवं व्यवहारो, लोमाहारस्य निरन्तरसम्भवेन प्रत्याख्यानाभावस्यैव प्रसङ्गात् । इति श्राद्धविधौ ॥ ६५ ॥

अशुद्धैः शुद्धैर्वाऽशनपानभेषजादिभिर्ग्लानस्य प्रतिचरणं कर्त्तव्यम् । विशिष्य चाचार्योपाध्यायादीनामित्यभिप्रायो लिख्यते-

सम्प्रति ' गुरुपमुहाणं कीरइ असुद्धसुद्धेहिं जत्तियं कालं ' इति त्रिंशदुत्तरशततमं द्वारमाह-" जावज्जीवं गुरुणो, असुद्धसुद्धेहिं वावि कायव्वं । वसहे बारसवासा, अट्ठारस भिक्खुणो मासा ॥ ६६ ॥" यावज्जीवमाजन्माऽपीत्यर्थः । गुरोराचार्यस्य शुद्धैराधाकर्मादिदोषादूषितैरशुद्धैर्वाऽपि आधाकर्मादिदोषयुक्तैर्वाऽपि अशनपानभेषाजादिभिः कर्त्तव्यं प्रतिजागरणमिति शेषः । अयमर्थःशुद्धैरशुद्धैश्च तैर्यावज्जीवं ते प्रतिजागरणीयाः साधुश्रावकलोकेनेति । सर्वस्यापि गच्छस्य तदधीनत्वाद्यथाशक्ति निरन्तरसूत्रार्थनिर्णयप्रवृतेश्च, तथा वृषभे-उपाध्यायादिके द्वादशवर्षाणि यावत्प्रतिजागरणा शुद्धैरशुद्धैश्च वस्तुभिर्विधेया । ततः परं शक्तौ भक्तविवेकः । एतावता कालेनान्यस्यापि गच्छभारोद्वहनसमर्थस्य वृषभस्योत्थानात् । तथाऽष्टादशमासान् यावत्सामान्यभिक्षोः-सामान्यसाधोः शुद्धैरशुद्धैश्च प्रतिजागरणा विधेया । ततः परमसाध्यतया शक्तौ सत्यां भक्तविवेकस्यैव कर्त्तुमुचितत्वात्, इदं शुद्धाशुद्धादिभिराचार्यादीनां परिपालनं रोगाद्यभिभूतवपुषां क्षेत्रकालादिपरिहाणिवशतो भक्ताद्यलाभवतां च विधेया, न पुनरेवमेव सुस्थावस्थायामिति । व्यवहारभाष्ये तु सर्वसामान्यग्लानप्रतिक्रिया व्यवस्थार्थमियं गाथा लिखिताऽस्ति । यथा-छम्मासे आयरिओ, कुलं च संवत्सराइ तिन्नि भवे । संवत्सरं गणो खलु, जावज्जीवं भवे संघो ॥ १ ॥ अस्या व्याख्या-प्रथमत आचार्यः षण्मासान् यावच्चिकित्सां ग्लानस्य कारयति, तथाऽप्यप्रगुणीभूतं कुलस्य समर्पयति । ततः कुलं त्रीन वत्सरान् यावच्चिकित्सकं भवति, तथाऽप्यप्रगुणीभवने कुलं गणस्य तं समर्पयति यावद्गणः खलु चिकित्सां कारयति, तथाऽप्यनिवर्त्तिते रोगे तं गणः सङ्घस्य समर्पयति । ततः सङ्घो यावज्जीवं प्रासुकप्रत्यवतारेण, तदभावे चाऽप्रासुकेनापि यावज्जीवं चिकित्सको भवति । एतच्चोक्तं भक्तविवेकं कर्त्तुमशक्नुवतः । यः पुनर्भक्तविवेकं कर्त्तुं शक्नोति तेन प्रथमतोऽष्टादशमासान् चिकित्सा कारयितव्या । विरतिसहितस्य पुनः संसारे दुःप्रापत्वात् । तदनन्तरं चेत्प्रगुणीभवति ततः सुन्दरम् । अथ न भवति तर्हि भक्तविवेकः कर्त्तव्यः इति श्रीप्रवचनसारोद्धार ॥ १६६ पत्रे ॥ ६६ ॥

अथ तथाविधगीतार्थानां ग्लानादीनां पुनः पुनर्वस्त्रक्षालनमप्यनुज्ञातमेवेत्यक्षराणि लिख्यन्ते-

आयरियगिलाणाणं, मलिणामलिणा पुणोवि धोविज्जा । मा हु गुरुण अवन्नो, लोगंमि अजीरणं इयरे ॥ ६८ ॥ वृत्तिर्यथा-आह- सर्वेषामपि वस्त्राणि वर्षाकालादर्वागेव प्रक्षाल्यन्ते, किं वाऽस्ति केषाञ्चिद्विशेषः ? अस्तीति ब्रूमः । केषाम् ? इति भेदत आह- आचार्याः-

॥२६५॥

प्रवचनार्थव्याख्याधिकारिणः सद्धर्मदेशनादिगुणग्रामभूरयः सूरयः । आचार्यग्रहणमुपलक्षणं, तेनोपाध्यायादीनां प्रभूणां परिग्रहस्तेषाम् । तथा ग्लानाः-मन्दास्तेषाम् च पुनः पुनर्मलिनानि वस्त्राणि प्रक्षालयेत् । प्राकृतत्वाच्च मलिनानीत्यत्र पुंस्त्वनिर्देशः प्रस्तुतेऽर्थे कारणमाह-' मा हु ' इत्यादि मा भवतु, हु निश्चितम्, गुरूणां मलिनवस्त्रपरिधाने लोकेऽवर्णो-ऽश्लाघा । यथा निराकृतयोऽमी मलदुरभिगन्धोपलिप्तदेहास्ततः किमेतेषामुपकंठगतैरस्माभिरिति, तथा इतरस्मिन् ग्लाने मा भवत्वजीर्णमिति । मलक्लिन्नवस्त्रधारणे हि शीतलमारुतादिसम्पर्कतः शैत्यसम्भवेन भुक्ताऽऽहारस्यापरिणतौ ग्लानस्य विशेषतो मान्द्यमुज्जृम्भते । इति श्रीप्रवचनसारोद्धारे एकत्रिंशदुत्तरशततमद्वारे ॥ ६७ ॥

यः प्रतिदिनं द्व्यासनं करोति तस्य मासेनाष्टाविंशत्युपवासपुण्यं भवति यथा रात्रिचतुर्विधाहारपरिहारस्थानोपवेशनपूर्वकताम्बूलादिव्यापारणमुखशुद्धिकरणादिविधिना ग्रन्थिसहितप्रत्याख्यानपालने एकवारभोजिनः प्रतिमासमेकोनत्रिंशत्, द्विवारभोजिनस्त्वष्टाविंशतिर्निर्जला उपवासाः स्युरिति वृद्धाः । भोजनताम्बूलजलव्यापारणादौ प्रत्यहं घटीद्वयघटीद्वयसम्भवे मासे एकोनत्रिंशत्, घटीचतुष्टयसम्भवे त्वाष्टाविंशतिरुपवासाः । यदुक्तं पद्मचरित्रे:-" भुंजइ अणंतरेणं, दुन्नि य वेला उ जो निओगेणं । सो पावइ उववासा, अट्ठावीसं तु मासेणं ॥ १ ॥ " इति श्राद्धविधौ प्रथमाधिकारे ॥ ६८ ॥

अथ नखरदनीछुरीरक्षणाक्षराणि लिख्यन्ते-

असणाईया चउरो ४, वत्थं ५ पायं ६ च कंबलं ७ चेव । पाउंछणगं ८ च तहा अट्ठविहो रायपिंडो सो ॥ १ ॥ असणाईया चउरो ४, पाउंछण ५ वत्थ ६ पत्त ७ कंबलयं ८ । सूई ९ छूरी १० कन्नसोहणी ११, नहरणिया १२ सागारिपिंडो सो ॥ २ ॥ " इति श्रीबृहत्कल्पभाष्ये ॥ ६९ ॥

इदानीं साधुः स्थंडिलादस्थंडिलं सङ्क्रामन् कस्मिन् काले केन प्रमार्जनं करोतीति लिख्यते-

उडुबद्धे रयहरणं, वासावासासु पायलेहणिआ । वडउंबरे पिलक्खू, तस्स अलंभंमि चिंचिणिया ॥ ६० ॥ ऋतुबद्धे शीतोष्णकाले ' रयहरणं ' ति रजोहरणेन प्रमार्जनं कृत्वा प्रयाति ' वासासु पायलेहणिय ' ति वर्षासु वर्षाकाले वर्षति सति पादलेखनीकया प्रमार्जनं कर्त्तव्यम्, सा च किंमयी भवति ? इत्यत आह-' बडे ' त्ति वटमयी उदुंबरमयी प्लक्षमयी, तस्यालाभे-प्लक्षाप्राप्तौ चिञ्चिणिकामयी-

अम्बिलिकामयीति । सा च कियत्प्रमाणा भवति ? इत्याह-बारसअंगुलदीहा, अंगुलमेगं तु होइ विछिन्ना । घणमसिणणिव्वणाविय, पुरिसे पुरिसे य पत्तेयं ॥ ६१ ॥ द्वादशाङ्गुलानि दीर्घा भवति, येन मध्ये हस्तग्रहे भवति, विस्तारस्त्वेकमङ्गुलं स्यात् । सा च घना-निविडा कार्या, मसृणा निर्व्रणा च निर्ग्रन्थिर्भवति । सा च किमेकैव भवति ? न इत्याह-पुरुषे पुरुषे च प्रत्येकं एकैकस्य पृथगसौ भवति । इति श्रीओघनिर्युक्तिवृत्तौ ३१ पत्रे ॥ ७० ॥

केचिदज्ञानिनो विद्धं मुक्ताफलमचित्तमविद्धं तु सचित्तमिति वदन्ति परं तदनागमिकम्, आगमे हि विशेषानभिधानेन मौक्तिकानामचित्तेषूक्तत्वात् । तथा हि-

से किं तं अचित्ते अचित्ते सुवण्णरययमणिमोत्तिअसंखसिलप्पवालरयणाणं आये सेत्तं अचित्ते " इति श्रीअनुयोगद्वारसूत्रे ५१ पत्रे ॥ ७१ ॥

अथ कश्चित् पंडितमन्यो ब्रूते-यो मांसमश्नाति तस्य सम्यक्त्वं न भवत्येवेति, परं तदसङ्गतमेव प्रतिभासते, यतः केवलसम्यक्त्वधारिणो विरतेरभावात् । वृन्ताकाद्यभक्षमिव पिशितमपि नियमितं नास्ति, यदि नाश्नाति तदा तु भव्यमेव । अथ यदि कर्मगतेर्वैचित्र्येण रसनास्वादरसस्य दुरपोहत्वेन भुङ्क्ते तर्हि श्रद्धानरूपे सम्यक्त्वे का नाम क्षतिः । अथ तादृग् सद्यः संमूर्छिमानन्तजन्तुसन्तानदूषितं तद् ज्ञात्वाऽपि भुञ्जानस्य कथं दयापरिणामः ? तदभावाच्च किं सम्यक्त्वं ? इति चेन्मैवम्, अनन्तजन्तुमयं ज्ञात्वाऽपि मूलकभक्षणं कुर्वतोऽपि सम्य-क्त्वक्षतिप्रसक्तेः, न्यायस्योभयत्रापि तुल्यत्वात् । अथ तल्लोकेऽतिनिन्द्यमिति यदि तत्प्रवृत्तिमत्कुले तस्य निन्द्यत्वाभावात्, मूलकादेरिव । तथैव च ज्ञातायां द्रुपदनृपतिगृहे क्षायिकसम्यक्त्वधारी केशवोऽपि अशनपानखादिमस्वादिमयावत्पिशितमद्यादिभुञ्जानः सुखेन व्यहरदिति श्रूयते । अपरं च यद्यनन्तकायादिमांसादिभक्षणे सम्यक्त्वध्वंस एव दृष्टः स्यात्तर्हि तद्भक्षणस्य प्रायश्चित्तं नोक्तं स्यात् । श्रावक एव प्रायश्चित्ताधिकारी, न तु मिथ्यात्वी । अत्र श्राद्धजीते तु ज्ञात्वाऽपि मांसभक्षणे माध्वीकादिभक्षणे इव प्रायश्चित्तमेवोक्तं, न तु सम्यक्त्वध्वंसोऽश्रावकत्वं वा । सम्यक्त्वाभावे तु प्रायश्चित्तानधिकार एव पुनः सम्यक्त्वोच्चारो वेत्यपि बोध्यम् । तथा पिशितादिविरतिस्तु चारित्रावरणक्षयोपशमोद्भवा । सम्यक्त्वं तु मोहनीयक्षयक्षयोपशमोद्भवमिति, नानयोरपि कश्चित्सहावस्थाननियमोऽस्तीत्याद्यत्र बहु वाच्यं अलं प्रसङ्गेनेति । तत्प्रायश्चित्ताधिकार-

॥२६७॥

स्त्वयम्, अथ भोगोपभोगगुणव्रतेऽभक्षनियमविषयं प्रायश्चित्तमाह-" महुपंचुंबरिफलपुप्फमाइवयभंगि गुरुग अन्नाए । नाए छग्गुरुनिअमे, पिसियासवमक्खणे दसगं ॥ " व्याख्या-मधुप्रतीतं पञ्चोदुंबरी उदुंबर १ वट २ प्लक्ष ३ काकोदुंबरि ४ शाखिनां पिप्पलस्य च नाश्नीयात् फलं कृमिकुलाकुलमित्याद्युक्तरूपं, फलम्-वृन्ताकादि, पूष्पम्-मधूकादि, आदिशब्दात्पर्युषितद्विदलहिमविषादिपरिग्रहः । एतेषां व्रतस्य नियमस्य भङ्गे ' अन्नाए ' त्ति अज्ञातेऽनाभोगत इत्यर्थः अज्ञाते सति ' गुरुग ' गुरुकाः-चतुर्गुरवः प्रायश्चित्तं भवतीति । ' नाए छग्गुरुग ' त्ति ज्ञाते आभोगे सति मधुप्रभृतीनां नियमभङ्गे षट्गुरुप्रायश्चित्तं भवति । अन्ये तु सामान्येन पञ्चोदुम्बरीफलपुष्पादिव्रतभङ्गे लघु नमस्काराष्टशतं त्वेके । अपरे तु नियमं विनाऽपि पञ्चोदुम्बर्यादिषु निषिद्धेषु भक्षितेषु चतुर्गुरु, नियमभङ्गे तु षट्गुरुकमाहुः । अनियमे इत्यादि यस्य ब्राह्मणवणिजादेर्जातिस्वभावादेव पिशितादीनि न भक्ष्यन्ते, तस्य निर्विषयत्वात् । कदाचिदकृतनियमस्यापि पिशितासवम्रक्षणानाम् । तत्र पिशितं-मांसं, आसवो-मद्यं, म्रक्षणं-नवनीतं, एतेषां भक्षणे दशकं क्षपणानामिति गाथार्थः ॥ ८९ ॥ अथ भोगोपभोग-गुणव्रत एवानन्तकायप्रत्येकवनस्पतिनियमविषयं किञ्चिन्मांसासवविषयं विशेषप्रायश्चितं चाह-चउगुरुणंते चउलहु, परित्तभोगे सचित्तवज्जि-स्स । मंसासववयभंगे, छग्गुरु चउगुरु अणाभोगे ॥ व्याख्या-सचित्तवर्जकस्य-श्रावकादेः ' अनंते ' त्ति अनन्तकायानां मूलकाद्रकादीनां भक्षणे चतुर्गुरु प्रायश्चित्तं भवति ॥ यदागमः-" साऊ जिणपडिकुट्ठो, अणंतजीवाणगायनिप्फन्नो । गेही पसंगदोसा, अणंतकाए अओ गुरुगा ॥ १ ॥ " तथा सचित्तवर्जकस्यैव श्राद्धादेः ' परित्त ' प्रत्येकपरिभोगे प्रत्येकाम्रादिपुष्पफलादिभोगे चतुर्लघुप्रायश्चित्तं भवति । तथा मांसासवयोरुपलक्षणत्वान्मधुनवनीतयोश्च ' वयभंगे ' त्ति अनाभोगतः पृथग्वक्ष्यमाणत्वादत्राभोगतो ज्ञेयम्, ततश्चाभोगे सति व्रतस्य नियमस्य भङ्गे षट्गुरु ' चउगुरु ' त्ति अनाभोगे मांसासवमधुनवनीतानां व्रतभङ्गे चतुर्गुरु प्रायश्चित्तं भवतीति गाथाक्षरार्थः ॥ ९० ॥ इति श्रीश्राद्धजीतसूत्रवृत्तौ ३० पत्रे ॥ ७२ ॥

केचिद्रात्रौ अन्धकारयोनिकास्तद्रूपाः सर्वत्र जलादौ जीवा उत्पद्यन्ते दिवा विलीयन्त इत्यादि वदन्ति परं तदनवबोधसूचकम् । एवं सति दीपप्रभास्पर्शे तज्जीवानामिवान्धकारयोनिकजीवविराधनापत्त्या प्रतिक्रमणाद्यभाव एव सम्पनीपद्यते । प्रकाशान्धकारयोरुभयोरपि बाधित-त्वात् । अन्धकारस्य पुद्गलमयत्वं चागमप्रसिद्धमेव-' तहा तज्जोमियाण य ' इत्यत्र तु भ्रान्तिर्न विधेया । तद्योनिकाः-तद्वस्तुयोनिकाः

निगोदोरणिकप्रभृतय इत्यर्थत्वात् । सा गाथा चेयं सार्था-तज्जोणियाण जीवाण तहा संपाइमाण य । निसिभत्ते वहो दिट्ठो, सव्वदंसीहिं सव्वहा ॥ २२७ ॥ तस्मिन्-संसक्तान्नसक्तादौ भक्ते निगोदोरणिकादीनां योनिरुत्पत्तिर्येषां ते तद्योनिकास्तेषाम् । तथा सम्पातिमादीनां-आगन्तुककुन्थुपिपीलिकादीनां, चशब्दादात्मनश्च कीटिकादिभिर्मेधादिघातात्, निशि भक्ते वधो विनाशो दृष्टः सर्वदर्शिभिः सर्वथा । इति श्रीश्रावकदिनकृत्यवृत्तौ २२७ पत्रे ॥ ७३ ॥

अथ पञ्चविधदानस्वरूपं लिख्यते-

अभयं सुपत्तदाणं, अणुकंपा उचिअकित्तिदाणाइं । दुन्निहि मुक्खो भणिओ, तिन्निहि भोगाइअं दिंति ॥ १ ॥ जगति दानं पञ्चविधं प्रसिद्धम्, तत्र प्रथममभयदानं इह लोकेऽभयदानात् श्रेयः, दयालुः, कृपापारावार इत्यादिकीर्त्तिः । परलोके तु राज्यऋद्धिभोगपरिवारादिफलं भवति । सव्वेसिं जीवाणं, अणारियजणेण हम्ममाणाणं । जहसत्तीए वारणमभयं तं बिंति मुणिवसहा ॥ १ ॥ पंचमहव्वयपरिपालयाण पंचसमिई समियाण । सव्वविरइजुत्ताणं, साहूणं दाणमुत्तमयं ॥ २ ॥ मंदाणं टुंटाणं, दीणअणाहाण अंधबधिराणं । अणुकंपादाणं पुण, जिणेहिं न कयावि पडिसिद्धं ॥ ३ ॥ उचियं दाणं एयं, वेलमवेलाइ दारपत्ताणं । तं दाणं दित्तेणं, जिणवयणपभावणा भणिया ॥ ४ ॥ जिणसाहुसाहुणीण य, सुकित्तिपरयाण भट्टबडुयाणं । तं दाणं जं भणियं, सुकित्तिदाणं मुणिवरेण ॥ ५ ॥ अथ चतुर्थं उचितदानं अवसरेषु योग्यमभीष्टप्राधूर्णकदेवगुरुसमागमनप्रासादप्रतिमानिष्पत्तिवर्द्धापनिकादातॄणां काव्यश्लोकसुभाषितविनोदकथादिकथकानां रञ्जितचेतसां यद्दीयते तदुचितदानम्, यथा चक्रवर्त्तिना प्रतिदिनं प्रभातसमये विहरमानतीर्थङ्करस्थितिशुद्धिज्ञापकाय वृत्तिर्दीयते, यथा ' वित्तीओ सुवर्णस्स उ ' इत्यादि । अथ पञ्चमकीर्त्तिदानं कीर्त्त्या-निजकुलरूपवंशविद्यागुणवर्णनरूपया भट्टचारणमल्लगन्धर्वमार्गणादीनां यद्दीयते तत्कीर्त्तिदानम् । यथा सोनाजलहरकूटसागरकडाहिसमुद्रदारिद्र्यमुद्राविहंडणहार इत्यादिविविधगुणवर्णनोत्साहिताः कीर्त्यभिलाषिणो दानव्यसनवासितचेतसः समस्तमपि ददति पुरुषास्तदुपरि विक्रमादित्यकीर्त्तिदानप्रबन्धाः । इति तपागच्छे श्रीसोमसुन्दरसूरिश्रीरत्नशेखरसूरिशिष्यपण्डितनन्दिरत्नगणिशिष्यरत्नमन्दिरगुम्फितायामुपदेशतरङ्गिण्यां धर्मोपदेशतरङ्गे ॥ ७४ ॥

अहो प्रतिमारिपो ? ' वंदणवत्तियाए पूअणवत्तियाए ' इत्याद्यावश्यकसूत्रादौ प्रतिमापूजनाक्षराणि पश्यन्नपि किं मुह्यसे । ननु

‘ वंदणवत्तियाए ’ इत्यादि तु साधुरपि पठति, साधोस्तु द्रव्यार्चनं भवतामप्यनभिमतं ततः कथमयमर्थः समर्थः साधुयितुं भवत्समीहितम् । मैवं क्षीरकंठ ! त्वदुत्पत्तेः पूर्वमेव पूर्वाचार्यैरियं शङ्का समुद्भट्टङ्क्य निराकृताऽस्तीति सकर्णो भूत्वा शृणु तथा ‘ पूअणवत्तियाए ’ त्ति पूजनप्रत्ययं-पूजानिमित्तं पूजनं-गन्धमाल्यादिभिः समभ्यर्चनं, तथा ‘ सक्कारवत्तियाए ’ त्ति सत्कारप्रत्ययं-सत्कारनिमित्तं प्रवरवस्त्रादिभिः समभ्यर्चनं सत्कारः । आह-क एवमाह साधुः श्रावको वा । तत्र साधोस्तावत्पूजनसत्कारावनुचितावेव, द्रव्यस्तवत्वात्, तस्त तत्प्रतिषेधात् ‘ तो कसिणसंजमविऊ पुप्फाईयं न इच्छंति ’ इति वचनात्, श्रावकस्तु सम्पादयत्येवैतौ, यथाविभवं तस्य तत्प्रधानत्वात्, तत्र तत्र दर्शितत्वात्, ‘ जिणपूया विभववुड्ढि ’ त्ति वचनात् । तत्कोऽनयोर्विषयः ? इति । उच्यते-सामान्येन द्वावपि साधुश्रावकौ, साधौः स्वकरणमधिकृत्य द्रव्यस्तवप्रतिषेधः, न पुनः सामान्येन, तदनुमतिभावात् । भवति च भगवतां पूजासत्कारावुपलभ्य साधोः प्रमोदः । साधु-शोभनमिदमेतावज्जन्मफलमविरतानामिति वचनलिङ्गगम्यः । तदनुमतिरियं, उपदेशदानतः, कारणापत्तेश्च, ददाति च भगवतां पूजासत्कारविषयमुपदेशम् कर्त्तव्या जिनपूजा, न खलु वित्तस्यान्यच्छुभतरं स्थानमिति वचनसन्दर्भेण तत्कारणम्, एतदनवद्यं च । तद्दोषान्तरनिवृत्तिद्वारेणायमत्र प्रयोजकोंऽशः । तथा भावतः प्रवृत्तेरुपायान्तराभावात् । नागदत्तसुतगर्त्ताकर्षणज्ञातेन भावनीयमेतत् । तदेवं साधुरित्थमेवैतत्सम्पादनाय कुर्वाणो नाविषयः । वचनप्रामाण्यादित्थमेवेष्टसिद्धिः, अन्यथाऽयोगादिति । श्रावकस्तु सम्पादयन्नप्येतौ भावातिशयादधिकसम्पादनार्थमाह-न तस्यैतयोः सन्तोषः, तद्धर्मस्य तथा स्वभावत्वात्, जिनपूजासत्कारयोः करणलालसः खल्वाद्यो देशविरतिपरिणामः, औचित्यप्रवृतिसारत्वेनोचितारम्भिण एतौ सदारम्भरूपत्वात्, औचित्याज्ञाऽमृतयोगादसदारम्भनिवृत्तेः, अन्यथा तदयोगादतिप्रसङ्गादिति । तथा हि-द्रव्यस्तव एवैतो, स च भावस्तवाङ्गमिष्टः, तदन्यस्याप्रधानत्वात्, तस्याभव्येष्वपि भावात् । अत आज्ञयाऽसदारम्भनिवृत्तिरूप एवायं स्यात् । औचित्यप्रवृत्तिरूपेऽप्यल्पभावत्वात् द्रव्यस्तवः गुणाय चायं, कूपोदाहरणेन । न चैतदप्यनीदृशं इष्टफलसिद्धये । किं तु आज्ञामृतयुक्तमेव । स्थाने विधिप्रवृत्तेरिति सम्यगालोचनीयमेतत् । तदेवमेतयोः साधुश्रावकावेव विषय इत्यलं प्रसङ्गेन । इति श्रीहरिभद्रसूरिकृतायां ललितविस्तरायाम् ॥ ७५ ॥

तथा जिनपूजा यदि मोक्षसाधनं तर्हि साधुभिः कुतो न क्रियत इत्यादि ये प्रलपन्ति तेषामपीदमेव मुखमुद्रणमिति । अथ लोकोत्तरमिथ्यात्वस्वरूपं लिख्यते-

लोकोत्तरदेवगतं-परतीर्थिकसङ्गृहीतजिनबिम्बार्चनादिसप्रत्ययश्रीशान्तिनाथपार्श्वनाथादिप्रतिमाणामिह लोकार्थं यात्रोपचितमाननादि च, लोकोत्तरगुरुगतं च-लोकोत्तरलिङ्गेषु पार्श्वस्थादिषु गुरुत्वबुद्ध्या वन्दनादि । गुरुस्तूपादावैहिकफलार्थं यात्रोपयाचितादि च । ननु यथा वैद्यादयो व्याधिप्रतीकाराद्यर्थं धनभोजनवसनादिना बहु मन्यन्ते तथा सप्रभावयक्षयक्षिण्यादीनाप्यैहलौकिकफलार्थं पूजोपयाचितादौ को दोषः । मिथ्यात्वं हि तदा स्याद्यदि मोक्षप्रदोऽयमिति बुद्ध्याऽऽराध्येत । यदाहुः-" अदेवे देवबुद्धिर्या, गुरुधीरगुरौ च या । अधर्मे धर्मबुद्धिश्च, मिथ्यात्वं तद्विपर्ययात् ॥ १ ॥ " श्रूयते च-विशुद्धदृढसम्यक्त्वा रावणकुष्णश्रेणिकाभयकुमारादयोऽपि शत्रुञ्जयपुत्रप्राप्त्या-
द्यैहिककार्यार्थं विद्यादेवताद्याराधनं कृतवन्त इति । ततश्चेह लोकार्थं यक्षाद्याराधनेऽपि किं नाम मिथ्यात्वम् ? सत्यम् । तत्त्ववृत्त्याऽदेवस्य देवत्वबुद्ध्याऽऽराधनं एव मिथ्यात्वं तथाऽपि यक्षाद्याराधनमिह लोकार्थमपि श्रावकेण वर्जनीयमेव, प्रसङ्गाद्यनेकदोषसम्भवात् । प्रायो हि जीवा मन्दमुग्धवक्रबुद्धयः । सम्प्रति च विशिष्य ते ह्येवं विमृशन्ति । यद्यनेन विशुद्धसम्यक्त्वेन महात्मना यक्षाद्याराधनं विधीयते तदा नूनमयमपि देवो मोक्षप्रदतया सम्यगाराध्य इत्यादिपरम्परया मिथ्यात्ववृद्धिस्थिरीकरणादिप्रसङ्गः । तथा चैहिकफलार्थमपि यक्षाद्याराधकस्यापि प्रेत्य बोधिर्दुःप्रापः स्यात् । उक्तं च-" अन्नेसिं सत्ताणं मिच्छत्तं जो जणेइ मूढप्पा । सो तेण निमित्तेणं, न लहइ बोहिं जिणाभिहियं ॥ रावणकृष्णादिभिश्च तत्समयेऽर्हद्धर्मस्येतरधर्मेभ्योऽतिशायितया सर्वप्रतीतत्वेनापवादपदे यदि विद्याराधनादिकृतं तदाऽपि तदालम्बनग्रहणं नोचितम् । यतः-" जाणिज्ज मिच्छदिट्ठी, जे य परालंबणाइ घिप्पंति । जे य पुण सम्मदिट्ठी, तेसि पुणो चडइ पयडीए ॥ १ ॥ " इति श्रीश्राद्धप्रतिक्रमणसूत्रवृत्तौ ' संकाकंखविगिच्छा ' इति गाथायाम् २३ पत्रे ॥ ७६ ॥

अत्र ये स्तूपं प्रतिसन्दिह्यन्ते तेषामपि लौकिकगुरुमिथ्यात्वाक्षरैर्निरासः स्पष्ट एव-

सुण पंचविहं मिच्छतं थूलभावेणं परमत्थाउ विवज्जासो, सो पुण एवं न मए मम पुव्वपुरिसेहिं वा कारियं जिणाययणं बिंबं वा, कारियं मम पुरिसेहिं वा, ता इत्थ पूयाइयं पवत्तेमि, किं परकीएसु अच्चायरेणं, एवं च न तस्य सव्वण्णुपच्चया पवित्ती, अन्नहा सव्वेसु बिंबेसु अरिहं चेव ववसिज्जा सो अरहा जह परकीओ ता पत्थरलेप्पपित्तलाइयं अप्पणिज्जयं, न पुण पत्थराइसु वंदिज्जमाणेसु कम्मक्खओ किं तु तित्थयरगुणपक्खवाएणं, अण्णहा संकराइबिंबे पहाणाइं सब्भावओ तेसु वंदिज्जमाणेसु कम्मखओ हुज्जा, मच्छरेण

॥२७१॥

वा परिकारियचेइयालए विग्घमायरंतस्स महामिच्छत्तं न तस्स गंठिभेओवि संभाविज्जइ, जे पासत्था जे कुंदसणाए विमोहिया सुविहियाणं बाहाकरा हवंति, जे वा जाइनाइपक्खवाएणं साहूणं दाणाइसु पयट्टंति न गुणचिंताए तेवि तहेव, एयंमि विवज्जासरूवे मिच्छते सह सुबहुपढंतो अन्नाणी चेव, एएसु अ हुंतेसु अइदुक्करावि किरिया न मुक्खसाहगा जम्हा सो अविरओ कहिज्जइ, पंचमगुणट्ठाणे देसविरई छट्ठगुणठाणे सव्वविरइ न पढमगुणट्ठाणे, तस्स य अणंताणुबंधिप्पमुहा सोलसवि कसाया बज्झंति उइज्जंति अ, तन्निमित्ताउ असुहाओ दीहट्ठिइओ तिव्वाणुभागाओ पयडीओ बज्झंति, तासिं च उदएण नरयतिरियकुमाणुसत्तकुदेवत्तरूवो संसारो । इति श्रीउपमितिभवप्रपञ्चग्रन्थे ॥ ७७ ॥

इमानि चाक्षराणि दर्शं दर्शमियं गरीयसी चिन्ताऽस्मच्चित्तमाचामति यत् यः श्रीजिनपूजाप्रतिमाया रजःपर्वराजत्वमुक्तवान्, तस्य का गतिर्भाविनी ? इति । अथवा पर्याप्तं चिन्तयाऽवश्यंभाविनोऽप्रतीकार्यत्वम् । गतिं तु तस्योपमितिभवप्रपञ्चैव उक्तवती । ननु भवद्भिरपि द्रव्यलिङ्गिबोटिककटुकचैत्यानामवन्द्यत्वमङ्गीकृतमेव, ततश्चोभयोः समौ दोषपरिहारौ, मैवं जाल्मत्वं त्यज्यताम् । तेषां हि साध्वादिव्यवहारबाह्यत्वेन सर्वविसंवादित्वेन साधुत्वस्कन्धोत्थापकत्वेन च सङ्घादिव्यवहाररहितत्वं ततस्तत्संबन्धिचैत्यानां प्रणतिनिषेधो न्याय्य एव । यथाऽन्यतीर्थीयपरिगृहीतानां पूर्वोक्तं वचनं च सङ्घादिव्यवहारबाह्यान् विहायान्यत्रैव प्रवर्त्तते । अन्यथाऽन्यतीर्थीयपरिगृहीतार्हच्चैत्यानामपि वन्द्यत्वापत्तेः, तच्चागमविरुद्धम् । न च वाच्यमन्ये यदि साधुव्यवहारयुक्तास्तर्हि ते वन्द्याः सन्तु इति । ते हि व्यवहारतो द्रव्यसाधवोऽपि उत्सूत्रभाषित्वान्नैव वन्द्याः, प्रसङ्गवासनासम्भवाद्यनेकदोषसम्भवात् । प्रतिमा तु नोत्सूत्रभाषिणीति, व्यवहारसाध्वादिप्रतिष्ठितेति च पुरातनैर्महापुरुषैः प्रणतेति च प्रणम्यत एव व्यवहारसाधुत्वं चामीषां भवताऽप्यङ्गीकर्त्तव्यमेव । इतरथा कापालिकाद्यर्थमाधाकर्मीकृतमशनादि भवतां कल्पते । एतदर्थं कृतं च भवतां न कल्पते तत्कथमित्यलं व्यासेन । कदाग्रहत्यागे सर्वं सुस्थमेवेति दिक् ॥

यदि त्रिविधाहार उपवासः प्रत्याख्यातस्तदा परिष्ठापनकं भक्तादि कल्पते । यदि चतुर्विधाहारः प्रत्याख्यातः पानकं च नास्ति ततो न कल्पते । यदि पानीयमप्यधिकं ततो कल्पते । इति श्रीभाष्यावचूर्णौ ॥ ७८ ॥

खरतराः श्रीअभयदेवसूरिरस्मत्पूर्वजः, इति वदन्ति परं तदसत्, श्रीभगवत्यादिवृत्त्यन्ते चन्द्रकुलस्यैवानीतत्वात् । सुविहिता महापुरुषाः

सम्भाव्यन्ते । यदि च खरतरगच्छीया स्युस्तर्हि कल्याणकानि पञ्चेति कथं व्याख्यातवन्त । व्याख्यातानि च तानि तैस्तथा यथा-पंच महाकल्लाणा, सव्वेसिं जिणाण होइ नियमेण । भुवणच्छेरयभूया, कल्लाण फला य जीवाणं ॥ १ ॥ गब्भे २ जम्मे २ य तहा, निक्खमणे ३ चेव णाण ४ निव्वाणे ५ । भुवणगुरूण जिणाणं, कल्लाणा होंति णायव्वा ॥ २ ॥ इति श्रीहरिभद्रसूरिकृतयात्रापञ्चाशके ॥ १० ॥ श्रीअभयदेवसूरिकृता वृत्तिर्यथा-पञ्चैव कल्याणकानि परमश्रेयांसीति ॥ ७९ ॥

अथास्थापिताचार्यपदे भट्टारके परासौ सति यत्कर्त्तव्यं तल्लिख्यते-

आशुकारेण शूलादिनोपरतः कालगतः आशुकारोपरतस्तस्मिन् सत्याचार्येऽस्थापितेऽन्यस्मिन् गणधरे इयं वक्ष्यमाणमर्यादा । तामेवाह-' चिलिमिलिं ' इत्यादि, आशुकारोपरत आचार्यो जवनिकान्तरितः प्रच्छन्नः कार्यः । वक्तव्यं चाचार्याणामतीवाशुभं शरीरं, वाचाऽपि वक्तुं न शक्नुवन्तीति । ततो यो मतिमान् गणधराभिमुखस्तं दर्शयन्ति । गणत्वमेतस्यानुज्ञातं, परं वाचा वक्तुं न शक्नुवन्तीति । एषा हस्तानुज्ञातस्योपरि वासा निक्षिप्यन्ते एष गणधर इति पश्चात्कालगता आचार्या इति प्रकाश्यन्ते । इति श्रीव्यवहारचतुर्थोद्देशके ॥ ८० ॥

अथ मृतयुगलिकशरीराणां का गतिः ? इति शङ्कानिरासो लिख्यते-

अत्र कश्चिदाह-अग्नेरप्रादुर्भूतत्वेन मृतकशरीराणां का गतिः ? उच्यते-भारण्डप्रभृतिपक्षिणस्तानि तथा जगत्स्वाभाव्यान्नीडकाष्ठमिवोत्पाट्य मध्ये समुद्रं क्षिपन्तीति । यदुक्तं श्रीहेमाचार्यकृतऋषभचरित्रे-पुरा हि मृतमिथुनशरीराणि महाखगाः । नीडकाष्ठमिवोत्पाट्य, सद्यश्चिक्षिपुरंबुधौ ॥ १ ॥ किं चात्र श्लोकेंऽबुधावित्युपलक्षणं, तेन यथायोगं गङ्गाप्रभृतिनदीष्वपि ते तानि क्षिपन्ति । इति जंबूद्वीपप्रज्ञप्तीवृत्तौ श्रीशान्तिचन्द्रगणिकृतायाम् ॥ ८१ ॥

भो ! भो ! अपारंपर्यं " पिप्पलिं वा पिप्पलिचुन्नं वा मिरियं वा मिरियचुन्नं वा " इत्यादिनिषेधाक्षरसद्भावेऽपि कथं मरीचिपिष्पल्यादिकं त्वया भुज्यते, भवतामप्येतत्तुल्यमिति चेन्नैवम् । अस्माकं तु अवस्थान्तरसूचकापराक्षरसद्भावात् । तव त्वनन्यगतिकस्यानाचीर्णाचरणमेव शरणम् । अस्मदक्षराणि चेमानि-जलमग्गे सयजोअण, थलमग्गे सट्ठिजोयणा उवरिं । हरडिं पिप्पलि मरियं, समये भणियं अचित्ताणि ॥ १ ॥ तथाऽन्यत्र क्षेत्रे योजनशतात्परतो यदा नीयते तदा सर्वोऽपि पृथिवीकायः सर्वस्मादपि क्षेत्रात् योजनशतादूर्ध्वं भिन्नाहारत्वेन

शीतादिसंपर्कतश्चावश्यमचित्तीभवति । इत्थं च क्षेत्रातिक्रमणेनाचित्तीभवनमप्कायादीनामपि यावद्वनस्पतिकायः । तथा च हरीतक्याद्यपि अचित्तीभूतत्वादौषधाद्यर्थं साधुभिर्गृह्यते । इत्याचाराङ्गप्रथमाध्ययनतृतीयोद्देशके ॥ ८२ ॥

हरियाल मणोसिल पिप्पली अ, खज्जूर मुद्दिया अभया । आइण्णमणाइण्णा, तेवि हु एमेव नायव्वा ॥ १ ॥ हरितालं मनःशिला पिप्पली खर्जूरः, एते प्रतीताः मुद्रिका-द्राक्षा, अभ्या-हरीतकी, एतेऽपि एवमेव लवणवत् । योजनशतागमनादिभिः कारणैरचित्तीभावं भजन्तो ज्ञातव्याः, परमेके आचीर्णा अपरेऽनाचीर्णाः, तत्रापि पिप्पलीहरीतकीप्रभृतय आचीर्णा इति कृत्वा गृह्यन्ते । खर्जूरमुद्रिकादयः पुनरनाचीर्णा इति न गृह्यन्ते । इति श्रीबृहत्कल्पवृत्तौ प्रथमखंडे ॥ ८३ ॥

अथैकेन्द्रियाणामपि कथञ्चिद्भावश्रुतं काश्चित्संज्ञाश्च वर्त्तन्ते, इत्यक्षराणि लिख्यन्ते-

" जह सुहुमं भाविंदिय-नाणं दव्विंदियावरोहेवि । तह दव्वसुयाभावे भावसुअं पत्थिवाईणं ॥ १ ॥ " वृत्तिर्यथा-इह केवलिनो विहाय शेषसंसारिजीवानां सर्वेषामप्यतिस्तोकबहुबहुतरबहुतमादितारतम्यभावेन द्रव्येन्दियेष्वसत्स्वपि लब्धीन्द्रियपञ्चकावरणक्षयोपशमः समस्त्येव, ततश्च यथा पृथिव्यादीनामेकेन्द्रियाणां श्रोत्रचक्षुर्घ्राणरसनस्पर्शनलक्षणानां प्रत्येकं निर्वृत्त्युपकरणरूपाणां द्रव्येन्द्रियाणां तत्प्रतिबन्धककर्मावृतत्वादवरोधेऽप्यभावेऽपि सुक्ष्ममव्यक्तं लब्ध्युपयोगरूपश्रोत्रादिभावेन्द्रियज्ञानं भवति । लब्धीन्द्रियावरणक्षयोपशमोद्भूताणीयसी ज्ञानशक्तिर्भवतीत्यर्थः । तथा तेनैव प्रकारेण द्रव्यश्रुतस्य द्रव्येन्द्रियस्थानीयस्याभावेऽपि भावश्रूतं भावेन्द्रियज्ञानकलं पृथिव्यादीनां भवतीति प्रतिपत्तव्यमेव । इदमुक्तं भवति-एकेन्द्रियाणां तावच्छ्रोत्रादिद्रव्येन्द्रियाभावेऽपि भावेन्द्रियज्ञानं किञ्चिद् दृश्यते एव वनस्पत्यादिषु स्पष्टं तलिङ्गोपलम्भात् । तथा हि-कलकंठोद्गीर्णमधुरपञ्चमोद्गारश्रवणात्सद्यः कुसुमपल्लवादिसम्भवो विरहकवृक्षादिषु श्रवणस्येन्द्रियस्य व्यक्तमेव लिङ्गमवलोक्यते । तिलकादिषु तरुषु पुनः कमनीयकामिनीकमलदलदीर्घशरदिन्दुधवललोचनकटाक्षविक्षेपात्कुसुमाद्याविर्भावश्चक्षुरिन्द्रियज्ञानस्य । चंपकाद्यंघ्रियेषु तु विविधसुगन्धिगन्धवस्तुनिकुरम्बोन्मिश्रविमलशीतलसलिलसेकात्प्रकटनं घ्राणेन्द्रियज्ञानस्य । बकुलादिभूरुहेषु तु रम्भातिशायिस्पर्शप्रवरतररूपवरतरुणभामिनीमुखप्रदत्तस्वच्छसुस्वादुसुरभिवारुणीगंडूषास्वादनात्तदावि:करणं रसनेन्द्रियज्ञानस्य कुरुबकादिविटपिषु अशोकादिद्रुमेषु च घनपीनोन्नतकठिनकुचकुम्भविभ्रमापभ्राजितकुम्भीनकुम्भरणन्मणिवलयक्वणत्कङ्कणाभरणभूषितभव्यभामिनीभूजलताव-

गूहनसुखान्निःपिष्टपद्मरागचूर्णशोणतलपादकमलपार्ष्णिप्रहाराच्च झटिति प्रसूनपल्लावादिप्रभवः स्पर्शनेन्द्रियज्ञानस्य स्पष्टं लिङ्गमभिवीक्ष्यते । ततश्च यथैतेषु द्रव्येन्द्रियासत्त्वेऽपि एतद्भावेन्द्रियज्ञानं सकलजनप्रसिद्धमस्ति तथा द्रव्यश्रुताभावे भावश्रुतमपि भविष्यति । दृश्यते हि जलाद्याहारोपजीवद्वनस्पतीनामाहारसंज्ञा । सङ्कोचवल्ल्यादीनां तु हस्तस्पर्शादिभीत्याऽवयवसङ्कोचनादिभ्यो भयसंज्ञा । विरहकचंपककेसराशोकादीनां तु मैथुनसंज्ञा दर्शितैव । बिल्वपलाशादीनां तु निधानीकृतद्रव्योपरि पादमोचनादिभ्यः परिग्रहसंज्ञा । न चैताः संज्ञा भावश्रुतमन्तरेणोपपद्यन्ते तस्माद्भावेन्द्रियपञ्चकावरणक्षयोपशमाद्भावेन्द्रियपञ्चकज्ञानवद्भावश्रुतावरणक्षयोपशमसद्भावद्द्रव्यश्रुताभावेऽपि यच्च यावच्च भावश्रुतमस्त्येवै- ||२७५|| केन्द्रियाणामित्यलं विस्तरेण । तर्हि जं विन्नाणं सुआणुसारेणेति श्रुतलक्षणं व्यभिचारि प्राप्नोति श्रुतानुसारित्वमन्तरेणाप्येकेन्द्रियाणां भावश्रुताभ्युपगमादिति चेन्नैवमभिप्रायापरिज्ञानात्, शब्दोल्लेखसहितं विशिष्टमेव भावश्रुतमाश्रित्य तल्लक्षणमुक्तम्, यच्चैकेन्द्रियाणामोघिकविशिष्टं भावश्रुतमात्रं तदावरणक्षयोपशमस्वरूपं तत् श्रुतानुसारित्वमन्तरेणापि यदि भवति तथाऽपि न कश्चिद्व्यभिचार इति गाथार्थः ॥ १०२ ॥ इति श्रीविशेषावश्यकनिर्युक्तिवृत्तौ ॥ ८४ ॥

शालि १ व्रीहि २ गोधूम ३ यव ४ यवयवानां ५ त्रीणि वर्षाणि जीवत्वम् । तिलमुद्गादीनां द्विदलानां पञ्चवर्षाणि । अतसी १ कुसुंभ २ कोद्रव ३ कङ्गु ४ बरट ५ रालग ६कोडूसग ७ शण ८ सर्षपमूलबीजादीनां सप्तवर्षाणि । इति श्रीभगवतीषष्ठशतक-सप्तमोद्देशके[1] वृत्तौ ॥ ८५ ॥

अथ साधुभिर्नखा न रक्षणीयाः । ' केसरोमनखसमारया ' इत्याद्यालोचनं तु भूषानिमितं सुन्दरताकरणविषयं बोध्यम् । नखवृद्धौ च दोषा यथा-पादनखा दीर्घाश्चङ्क्रमणे उपलादिषु आस्फिटन्ति भज्यन्ते वा । हस्तनखा दीर्घा भाजने लेपं विनाशयन्ति, देहे वा क्षतं कुर्वन्ति । तथा लोको भणेदेष कामी, कामिनीकृतक्षतत्वादिति । लोकश्च भणति दीर्घनखान्तरे संज्ञास्तिष्ठन्त्यतोऽशुचय एवैते । पादनखेषु च दीर्घे-ष्वन्तरे रेणुस्तिष्ठति यावच्चक्षुरुपहन्यते, एतद्दोषपरिहरणार्थं नखकर्त्तनकुर्वन्नपि शुद्धः स्यात् । इत श्रीयतिजीतवृत्तौ ॥ ८६ ॥

ननु च जानन्नपि केवली यदि जन्तुसङ्घातघातमाचरति तर्हि पापर्द्धिकृत्केवलिनोः कः प्रतिविशेषः ? कथं वा तस्याष्टादशदोषरहितत्वम् ? ||२७५||

---

१ श्री अभयदेवसूरीश्वरकृतवृत्तौ अयं पाठो नास्ति, ततो मूलवृत्तौ भविष्यतीति सम्भाव्यते.

किं वा तस्य केवलित्वमित्येवं वादिनस्तमाशातयन्तीति । हं हो त्रिभुवनादंभस्तंभायितश्रीतपागणघुण ! सम्यग्स्वस्वरूपानुरूपमभिहितवानसि । केवली पापर्द्धिकृता तुल्य इति तु सतां वक्तुमप्यनुचितं, यदि वा सतां वक्तुमनुचितं तर्हि तव किम्, परं वयं त्वेवं ब्रूमः-अवश्यंभावितया यदि केवलिकायाज्जीवविराधना स्यात्तदा निषेधो नास्ति, केवलं केवले समुत्पन्ने ज्ञान एव विशेषो, न तु शरीरे कश्चिद्विशेषो भवति । तथा (नव) वर्षजस्य केवलिनो नूत्नपादोत्पत्तिप्रसक्तेः । किंच यदि कलहकोलाहलं विहाय क्षणं स्वस्थो भवसि तर्हि त्वमेव प्रष्टव्योऽसि देशोनपूर्वकोटिं यावद्विहरमाणः केवली एजनव्यजनकम्पनस्पन्दनादिधर्मोपेतसयोगिजीवपक्षान्तःपाती वा निरेजननिर्व्यजनायोगिजीवपक्षान्तःपाती वा ? अयोगिजीवपक्षान्तःपातीति तु त्वयाऽपि न वाच्यमेव अपसिद्धान्तात्, त्वामपि पंडितं वदन्तो जनाः श्रूयन्ते इति । यदि च सैजनसव्यजनादिधर्मोपेतसयोगिपक्षान्तःपाती स तर्हि तस्य तु आरम्भसारम्भसमारम्भादिकमुक्तमेव स्फुटाक्षरैर्भगवता, मा मा च केवलिन आरम्भकः कृषिवाणिज्यादिकोऽन्यो वेत्यादि वदन् स्वपांडित्यस्वरूपमद्याप्यज्ञातचरं प्रकटीकुर्वीथाः । यदाह-" कोकिलकदम्बकस्थः, कूजति काको न यावदतिकटुकम् । तावन्न हि निर्णेतुं, शक्यो वर्णादिसाधर्म्यात् ॥ १ ॥ " अनन्तरोक्तदूषणं तु तीर्थङ्करगणधरयोर्वाक्ये वक्तुं तवैव धाष्ट्यं नास्माकम्, अदुष्टश्चायमर्थो यथासम्भवं योजनात् । केवलिनो हि अवश्यंभावभाविनी चलशरीरैजनव्यजनजाता सर्वसंवरचारित्राविरोधिनी जीवविराधनैव । आरम्भादिकं जानन्नपि सर्ववित् कथं तान् हिनस्तीत्यादिकं यत्तव ग्राहिल्यं तत्तु अत्रैवाऽऽचाराङ्गभगवतीप्रज्ञापनाविचारतरङ्गेषु सम्यग् निराकृतमेव । तथा च ह्रस्वपञ्चाक्षरोच्चारमात्रकालायां शैलेश्यवस्थायां जन्तुविराधना भवति, देशोनपूर्वकोटिकालायां सयोगितायां तु न भवतीत्यादिका या तव वाग्मिता सा तवैवानुरूपेति त्वय्येव तिष्ठतु, नान्यत्र प्रसरतु । अलं प्रसङ्गेन । यदि धर्मबुद्धिस्तर्हि ' जीवेणं भंते ? सया समियं एयइ ' इत्यादिसूत्रं क्वचिदारामादौ गत्वा चिरमालोचनीयं यथा कदाचित्कर्मलाघवाद्भवत्यपि सुमतिः । सूत्रं च तदिदमुपकाराय लिख्यते-

" जीवेणं भंते ! सया समियं एयति वेयति चलति फंदति घट्टति खुब्भइ उदीरइ तं तं भावं परिणमइ ? हंता मंडियपुत्ता ! जीवेणं सया समियं एयइ जाव तं तं भावं परिणमइ । जावं च णं से जीवे सया समियं जाव परिणमइ तावं च णं तस्स जीवस्स अंते अंतकिरिया भवइ ? नो तिणट्ठे समट्ठे, से केणट्ठेणं भंते ! एवं वुच्चइ जावं च णं से जीवे सया समितं जाव अंते अंतरकिरिया न भवति ? मंडियपुत्ता !

जावं च णं से जीवे सया समियं जाव परिणमति तावं च णं से जीवे सया आरंभइ सारंभइ समारंभइ आरंभे वट्टइ सारंभे वट्टइ समारंभे वट्टइ आरंभमाणे सारंभमाणे समारंभमाणे आरंभे वट्टमाणे सारंभे वट्टमाणे समारंभे वट्टमाणे बहूणं पाणाणं बहूणं भूयाणं बहूणं जीवाणं बहूणं सत्ताणं दुक्खावणयाए सोयावणयाए जूरावणयाए तिप्पावणयाए पिट्टावणयाए परियावणयाए वट्टइ, से तेणट्ठेणं मंडियपुत्ता ! एवं वुच्चइ जावं च णं से जीवे सया समियं एयति जाव परिणमति तावं च णं तस्स जीवस्स अंते अंतकिरिया न भवति । जीवेणं भंते ! सया समियं णो एयइ जाव नो तं तं भावं परिणमइ ? हंता मंडियपुत्ता ! जीवेणं सया समियं जाव नो परिणमति । जावं च णं भंते ! से जीवे नो एयति जाव नो तं तं भावं परिणमेति तावं च णं तस्स जीवस्स अंते अंतकिरिया भवति ? हंता जाव भवति, से केणट्ठेणं भंते ! जाव भवति ? मंडियपुत्ता ! जावं च णं से जीवे सया समियं णो एयइ जाव णो परिणमति तावं च णं से जीवे नो आरंभइ नो सारंभइ नो समारंभइ नो आरंभे वट्टइ नो सारंभे वट्टइ नो समारंभे वट्टइ अणारंभमाणे असारंभमाणे असमारंभमाणे आरंभे अवट्टमाणे सारंभे अवट्टमाणे समारंभे अवट्टमाणे बहूणं पाणाणं बहूणं भूयाणं बहूणं जीवाणं बहूणं सत्ताणं अदुक्खावणयाए जाव अपरियावणाए वट्टइ । इति । वृत्तिर्यथा- ' जीवेणं ' इत्यादि इह जीवग्रहणेऽपि सयोग एवासौ ग्राह्यः, अयोगस्यैजनादेरसम्भवात् । ' सदा ' नित्यं ' समियं ' ति सप्रमाणं ' एयइ ' त्ति एजते-कम्पते ' एजृ कम्पने ' इति वचनात् ' वेयइ ' त्ति व्येजते-विविधं कम्पते ' चलइ ' त्ति स्थानान्तरं गच्छति ' फंदइ ' त्ति स्पन्दते-किञ्चिच्चलति ' स्पन्दि किञ्चिच्चलने ' इति वचनात् । अन्यमवकाशं गत्वा पुनस्तत्रैवागच्छतीत्यन्यो ' घट्टइ ' त्ति सर्वदिक्षु चलति पदार्थान्तरं वा स्पृशति ' खुब्भइ ' त्ति क्षुभ्यति पृथिवीं प्रविशति क्षोभयति वा पृथिवीं बिभेति वा ' उदीरइ ' त्ति प्राबल्येन प्रेरयति पदार्थान्तरं प्रतिपादयति वा । शेषक्रियाभेदसङ्ग्रहार्थमाह-' तं तं भावं परिणमइ ' त्ति उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनादिकपरिणामं यातीत्यर्थः । एषां चैजनादिभावानां क्रमभावित्वेन सामान्यतः सदेति मन्तव्यं न तु प्रत्येकापेक्षया, क्रमभाविनां युगपदभावादिति । ' तस्य जीवस्स अंते ' त्ति मरणान्ते ' अंतकिरिय ' त्ति सकलकर्मक्षयरूपा ' आरंभइ ' त्ति आरभते पृथिव्यादीनुपद्रवयति । ' सारंभइ ' त्ति संरभते तेषु विनाशसङ्कल्पं करोति । ' समारभइ ' त्ति समारभते तानेव परितापयति । आह च-" संकप्पो संरंभो, परितापकरो भवे समारंभो । आरंभो उद्दवओ, सव्वनयाणं विसुद्धाणं ॥ " इदं च क्रियाक्रियावतोः कथञ्चिदभेद इत्यभिधानाय तयोः समानाधिकरणतः

॥२७७॥

सूत्रमुक्तम् । अथ तयोः कथञ्चिद्भेदोऽप्यस्तीति दर्शयितुं पूर्वोक्तमेवार्थं व्यधिकरणत आह-' आरंभे ' इत्यादि, आरम्भे अधिकरणभूते वर्त्तते जीवः, एवं संरम्भे समारम्भे च । अनन्तरोक्तवाक्यार्थद्वयानुवादेन प्रकृतयोजनामाह-आरम्भमाणः संरम्भमाणः समारम्भमाणो जीवः, इत्यनेन प्रथमो वाक्यार्थोऽनूदितः । आरम्भे वर्त्तमाने, इत्यादिना तु द्वितीयः, ' दुक्खावणताए ' इत्यादौ ताशब्दस्य प्राकृतप्रभवत्वात् दुःखापनायां-मरणलक्षणदुःखप्रापणायाम्, अथवा इष्टवियोगादिदुःखहेतुप्रापणायां वर्त्तते, इति योगः । तथा शोकापनायां-दैन्यप्रापणायां ' जूरावणताए ' त्ति शोकातिरेकाच्छरीरजीर्णताप्रापंणायां ' तिप्पावणताए ' त्ति तेपापनायां ' तेपृष्ठेपृक्षरणार्थे ' इति वचनात्, शोकातिरेकादेवाश्रुलालादिक्षरणप्रापणायां, ' पिट्टावणयाए ' त्ति पिट्टनप्रापणायां ततश्च परितापनायां शरीरसन्तापे वर्त्तते, क्वचित्पठ्यते ' दुक्खावणयाए ' इत्यादि तच्च व्यक्तमेव, यच्च तत्र ' किलामणयाए उद्दावणयाए ' । इत्यधिकमभिधीयते । तत्र ' किलामणयाए ' ति ग्लानिनयने, ' उद्दावणयाए ' त्ति उत्त्रासने, उत्कार्थविपर्ययमाह-' जीवेणं ' इत्यादि, ' णो एयइ ' त्ति शैलेशीकरणे योगनिरोधान्नो एजते, इति । एजनादिरहितस्तु नारम्भादिषु वर्तते । तथा च न प्राणादीनां दुःखापनोदिषु तथा च योगनिरोधाभिधानशुक्लध्यानेन सकलकर्मध्वंसरूपाऽन्तक्रिया भवति । इति श्रीभगवतीसूत्रवृत्तौ तृतीयशतके तृतीयचमराख्योद्देशके ४८७ प्रतौ १०२ । १०३ पत्रे ॥ ८७ ॥

इत्थं च केवलिशरीराज्जीवविराधनाऽङ्गीकारे कथं तस्याष्टादशदोषरहितत्वमित्यादिका या तवोक्तिः सा तु अत्यन्तमसमीचीना । एवं चोभयमतसम्मते सुसाधुशरीराज्जीवविराधनास्वीकारे तस्य साधोश्चतुर्महाव्रतित्वं वदतोऽपि ते मुखरस्य किमयुक्तं स्यात्, इति त्यज्यतामयं कठिनो हठः, इति ।

ननु प्रकरणाद्युक्तत्वात् योगोद्वहनं नास्माकमनुमतम् । यदि क्वाऽप्याचाराङ्गादौ श्रुते स्पष्टाक्षरैर्योगोद्वहनं स्यात्तर्हि मन्यत एव । एवं वयस्य ! अतिचमत्कृता स्मः, तव मुखादप्येतादृशाक्षरोद्गमैर्विषकुण्डादिव पीयूषबुद्बुदैः शृणु तावत्सकर्णो भूत्वा साक्षात्सिद्धान्ताक्षराणि योगोद्वहनविषयाणि-तीहिं ठाणेहिं संपन्नेहिं अणगारे अणादीयं अणवदग्गं दीहमद्धं चाउरंतसंसारकंतारं वितीवएज्जा तंजहाअणिदाणताए दिट्ठिसंपन्नयाए जोगं वाहिताए ॥ वृत्तिर्यथा-' तिहिं ' इत्यादि, कंठ्यम् । नवरं-अनादिकं आदिरहितं, अनवदग्रं-अनन्तं, । दीर्घाध्वं-दीर्घमार्गं, चत्वारोऽन्ताविभागा नरकगत्यादयो यस्य तच्चतुरन्तदीर्घत्वं प्राकृतत्वात्, संसारं एव कान्तारं तद्व्यतिव्रजेत्-व्यतिक्रामेदिति,

अनादिकत्वादीनि विशेषणानि कान्तारपक्षेऽपि विवक्षया योजनीयानि, तथा ह्यनन्तमरण्यमतिमहत्वात्, तच्चतुरन्तं दिग्भेदादिति निदानं भोगर्द्धिप्रार्थनास्वभावमार्त्तध्यानं तद्वर्जितता अनिदानता तया दृष्टिसम्पन्नता सम्यग्दृष्टिता तया, योगवाहिता श्रुतोपधानकारित्वं समाधिस्थायिता वा तया । इति श्रीस्थानाङ्गतृतीयस्थानकप्रथमोद्देशके ३१० प्रतौ ७४ पत्रे ॥ ८८ ॥

न च वाच्यमत्र योगस्य समाधिस्थायितेत्यर्थष्टीकायां व्याख्यात एव, सत्यं भवतष्टीका यदि प्रमाणं तर्हि श्रुतोपधानकारित्वमित्यनेनार्थेन किमपराद्धम् ? न च श्रुतान्तरासङ्गतोऽयमर्थ इति ब्रुवीथाः, ' जोगवं उवहाणवं ' इत्याद्युत्तराध्ययनोक्तानामन्येषामपि शास्त्राक्षराणां प्राग्दर्शितत्वादिति ।

अथ केचिच्छ्रमणोपासकाः साधर्मिकवात्सल्यादावार्द्रशाकादिसंस्कृतौ पापं शङ्कन्ते परं तदयुक्तम्, सदारम्भे पुण्यभूयस्त्वात्, पापस्याल्पत्वात् । इत्थमेव च तहारूवं समणं वा माहणं वा अफासुएणं अणेसणिज्जेणं असणं पाणं खाइमं साइमं जाव पडिलाभेमाणस्स किं कज्जति ? गोयमा ! बहुयरा से निज्जरा कज्जइ" । इत्यादि भगवतीसूत्रं सङ्गच्छते । अस्यां च शङ्कायां विचार्यमाणायां विशेष(जिन)प्रासादाद्यपि अकर्त्तव्यमापद्येत । अलं वा युक्तिविस्तरेण । उक्तमपि पूर्वसूरिभिः फलपुष्पपत्रादिविशिष्टसामग्र्या साधर्मिकवात्सल्यम् । यथा-" तं अत्थं तं च सामत्थं, तं विन्नाणं सुउत्तमं । साहम्मियाण कज्जंमि, जं वच्चंति सुसावया ॥ १ ॥ अन्नन्नदेसाउ समागयाणं, अन्नन्नजाईउ समुब्भवाणं । साहम्मियाणं गुणसुट्ठियाणं, तित्थंकराणं वयणे ठियाणं ॥ २ ॥ वत्थन्नपाणासणखाइमेहिं, पुप्फेहिं पत्तेहिं य सप्फलेहिं । सुसावयाणं करणिज्जमेयं, कयं तु जम्हा भरहाहिवेणं ॥ ३ ॥ वज्जाउहस्स रामेण, जहा वच्छल्लयं कयं । ससत्तिअणुरूवं तु, तहा वच्छल्लयं करे ॥ ४ ॥ साहम्मियाण वच्छल्लं, एयं अन्नं वियाहियं । धम्मट्ठाणेसु सीयंतं, सव्वभावेण चोयए ॥ २०६ ॥ इति श्रीश्रावकदिनकृत्ये ॥ ८९ ॥

॥ इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरिशिष्योपाध्याय-श्रीकीर्त्तिविजयगणिसमुच्चिते श्रीविचाररत्नाकरे सङ्कीर्णविचारसमुच्चयनाम्नी वेला समाप्ता ॥

अनेकसिद्धान्तविचाररत्न-रम्ये गुरुपासनमार्गलभ्ये । विचाररत्नाकरनामशास्त्रे, प्राप्ता समाप्तिं रसरम्यवेला ॥ १ ॥

अथ प्रशस्तिः-

यस्योदग्रसमग्रसम्पदुदधेरैरूप्यरत्नोद्भवाः, प्राकाराः कपिशीर्षमण्डलमिषादङ्गीकृतोद्ग्राविकाः ।
निर्यद्दीधितिदीपिकाभिरभितः पश्यन्ति मोहाद्यरीन्, गर्जन्तः सुरदुन्दुभिध्वनिमिषाच्चञ्चत्पताकाकराः ॥ १ ॥
उद्यत्कोकनदच्छदाकृतिपदाङ्गुष्ठे यदालिङ्गितो, मेरुः कुञ्जरकर्णपर्णचपलो येनार्भकत्वे कृतः ।
सोढं तेन च पामरामृतकृतं कष्टं यदेतद्भूयं, स्मारं स्मारमपारमुदद्द्युरमणो, नाद्यापि किं मोदते ॥ २ ॥
सार्वः पूर्वमपूर्वपूर्वरचनाबीजं तु पर्वावली, मौलिखञ्चितरत्नकान्तिलहरीनिर्यत्तरम्यक्रमः ।
कल्याणाङ्कुरकन्दलोऽमलमनःसङ्कल्पकल्पद्रुमः, सः श्रीवीरजिनेश्वरः समभवद्भद्रद्रुमांभोधरः ॥ ३ ॥ त्रिभिर्विशेषकम्-
तत्पदप्रभुरभूदथ जेता, श्रीसुधर्मजिनशासननेता । आयुगान्तमपि सन्ततिशाखा, भाविनी भगवती भुवि यस्य ॥ ४ ॥
तस्य पट्टसरणाः चरणाभ्याः, सूरयः समभवन् बहवोऽपि । येषु वाच्यमपि वर्षसहस्रै-र्नैव सच्चरितमन्यतमस्य ॥ ५ ॥
श्रीमदानन्दविमलाभिधः समभवद्भुवनभानुस्ततोऽनुक्रमान्मुनिपतिः ।
येन शैथिल्यनिर्मूलनान्निर्ममे, निर्ममेशेन जिनशासनस्योन्नतिः ॥ ६ ॥
तस्य संविग्नचूडामणेर्गुणगणान्, गणयितुं कः क्षमः श्रमणधरणीपतेः ।
यद्विहारेण सद्वासना जज्ञिरे, भुवि जना मलयपवनेन फलदा इव ॥ ७ ॥
तदनु विजयदानः सूरिरासीदसीमोज्ज्वलमहिमनिधानं सर्वसाधुप्रधानम् ।
त्रिदश इह यदंघ्रिद्वन्द्वभक्तां पयोधे-र्वहनविलयमग्नां श्राविकामुद्दधार ॥ ८ ॥
अपरमपि कियतं वर्णयामस्तदीयं, निरुपममहिमानं भासमानं युगेऽस्मिन् ।
अधिरजनिनिकायो हिंसकव्यन्तरो यो, निजविशदचरित्रैः श्रावकं तं चकार ॥ ९ ॥
तत्पट्टक्षितिपालभालतिलकश्चन्द्रान्वयालङ्कृति-र्विद्वन्मंडनहारहीरविजयः सूरीश्वरः सोऽभवत् ।

सद्वैराग्यविवेकिता विनयिता सौभाग्यभाग्यादिजं, जाग्रद्यस्य यशो दिशो धवलयन्नाद्यापि किं माद्यति ॥ १० ॥
हेमाचार्यमवार्यवर्ययशसं सम्यग्विचार्याऽपि नो, काचिच्चित्तचमत्कृतिः स हि गुरुर्देवीगणोपासितः ।
चित्रं किं त्विदमद्य तेन गुरुणा काले कलौ जाग्रति, म्लेच्छः स्वच्छमतिः कृतः कृतधिया भूमीश्वरोऽकब्बरः ॥ ११ ॥
यं विश्वैकगुरुं ननाम सुमतिर्लुङ्कापतिर्मेघजी-संज्ञो विज्ञजनैः समं समयवित्त्यक्त्वाऽधिपत्यं महत् ।
हंसः केनचिदंहसा निपतितश्चेत्पल्वले पङ्किले, स्वच्छः किं तत एति नातिरयतः सन्मानसो मान्सम् ॥ १२ ॥
यस्योद्गायति डब्बराभिधसरो नित्यं निजाङ्केशय-प्राणित्राणभवं यशो नवमिव व्यालोलवीचिस्वनैः ।
क्रोडक्रीडदनेकविष्किरगरुत्पातारवोन्मर्दलं, झिल्लीझङ्कृतितालमन्तिकगतैः पारापतैर्हुङ्कृतम् ॥ १३ ॥
यौ शत्रुञ्जयरैवताचलगिरी सङ्कोचमाप्तौ पुरा, म्लेछोत्सर्पितचंडदंडभयतः शीर्षस्थदेवालयौ ।
येनैतावभयावुभौ तु विहितौ दीप्तौषधीदीपिकौ, रात्रावप्युरुलोकचक्रकलितौ नित्योत्सवौ तिष्ठतः ॥ १४ ॥
विद्वल्लोचनसोमसोमविजयो यस्यान्तिषत्कुञ्जरो, मन्त्री सौकृतकृत्यमन्त्रविषये मित्रं मनःप्रीणने ।
मञ्जुषा समयार्थसार्थनिकरे भूषा स्वकीयान्वये, मान्यो मानविमानिमानवनुतः श्रीवाचकः सोऽभवत् ॥ १५ ॥
यच्चारित्रमखिन्नकिन्नरगणादाकर्ण्य कर्णामृतं, सभ्यानीक्षितुमक्षमः समभवल्लज्जाविनम्राननः ।
सर्वत्रोद्गतनेत्रपत्रपटलस्तत्रापि लज्जाकुलः, स्वं धर्त्तुं न शशाक पाकमथनो ध्यायन्नहिल्याननम् ॥ १६ ॥
श्रीमद्वीरपरंपरासुलतां सन्तापितां सागरैः क्षारोर्मिप्रकरानुकारिवचनैर्व्यालोक्य येनामुना ।
कृत्वा वैजयपक्षमंडपमिमां तत्राधिरोप्यादरात्, प्रौढाकारि तथा यथा जगदिमां तुष्टं फलैः सेवते ॥ १७ ॥

अष्टभिरर्थतः कुलकम्-

तदनुमनुजमान्योऽनन्यसामान्यभाग्यस्त्रिभुवनगुरुपट्टे सूरिशक्रो बभूव ।
विजयिविजयसेनः फेनपिंडावदातः, प्रसृमरवकीर्त्तिर्मूर्त्तिमान् पुण्यराशिः ॥ १८ ॥

येनात्युन्मदवादिवृन्दहृदयक्ष्मापीठजन्मा महान्, गर्वक्षोणिरुहः क्षणादपि तथा निर्मूलमुन्मूलितः ।
भूपाकब्बरसंसदि स्ववचनैर्युक्तिप्रथापेशलै-र्माद्यद्बन्धुरसिन्धुरोध्धुरकरैरम्भोजमाला यथा ॥ १९ ॥
तत्पट्टाभ्रमुकान्तसुन्दरशिरःशृङ्गारवास्तोष्पतिः, षट्तर्कोदधिमन्दरः स्मरजयी चारित्रिचूडामणिः ।
चञ्चच्चन्द्रकुलाब्धिचन्द्रसदृशश्चन्द्रोज्ज्वलश्रीयशा-, स श्रीमान् विजयप्रयुक्ततिलकः सूरीश्वरः सोऽभवत् ॥ २० ॥
यः श्रीसूरिवरः समत्वमदधद्भ्राजिष्णुना जिष्णुना, लक्ष्मीदक्षकटाक्षपात्रमतनुप्रद्युम्नसम्पादकः ।
दध्रे येन जिनाधिराजवचनश्रेणीधरित्री ध्रुवम्, दर्पान्धोरगघोरसागरजलैराप्लाव्यमाना बलात् ॥ २१ ॥
तत्पट्टाधिपतिः क्षितीशततिभिः स्तुत्यक्रमाम्भोरुहः, सूरिश्रेणिशिरोमणिः स विजयानन्दः क्षमाभृद्भिभुः ।
स्वच्छश्रीस्तपगच्छराज्यमखिलं शास्ति प्रशस्ताभिध-स्तीर्थाधीशपदारविन्दविलसद्भक्तिर्विमुक्तिप्रियः ॥ २२ ॥
आजन्माऽपि रजःप्रसङ्गरहिते रत्नप्रदीपोज्ज्वले, विश्रामोदिसुवासने श्रुतधने चातुर्यचन्द्रोदये ।
यच्चेतःसदने निरस्तमदने स्वाध्यायदौवारिके, श्रीधर्मः क्षितिपः क्षमादिगृहिणीवर्गैः सह क्रीडति ॥ २३ ।
यत्कीर्त्याद्भुतमेतदद्य विहितं शुभ्रं सृजन्त्या जगत्, कृष्णश्चेतरुचिः श्रितः श्रियमियं प्रोवाच शङ्काकुला ।
कस्त्वं त्वद्दयितो न सोऽसिततनुर्नूनं स एव प्रिये, दम्पत्योरितरेतरं सशपथं क्लृप्तः कलिर्नैकशः ॥ २४ ॥
कंठे सारसरस्वती हृदि कृपानीतिक्षमाशुद्धयो, वक्त्राब्जे मुखवस्त्रिका सुभगता काये करे पुस्तिका ।
भूपालप्रणतिः पदे दिशि दिशि श्लाघाऽभितः सम्पदः, इत्थं भूरिवधूवृतोऽपि विदितो यो ब्रह्मचारीश्वरः ॥ २५ ॥
लक्ष्मीमीश्वरतां च यः परिचितामुत्सृज्य बाल्यादपि, श्रामण्यं श्रितवानगण्यगुणभृत्पुण्यप्रवीणाशयः ।
तत्रौज्झन्नपरान्तिकं तदितरा त्वक्ष्णाऽपि नाङ्गीकृता-ऽप्येतत्पादपवित्रगेहिसदने तिष्ठत्यहो रागिता ॥ २६ ॥
शीलं यस्य परे स्तुवन्ति मतिनोऽप्यन्तर्मनोऽभीष्टदः, कालेऽस्मिन्नपि जाग्रदुग्रमहिमा यद्गोत्रमन्त्रोद्भुतः ।
निःशेषागमवारिधेरपि सुखं दत्तावकाशे हृदि, स्थातुं न प्रभुरङ्गजश्चिरभिदं यस्य त्रयं चित्रकृत् ॥ २७ ॥

॥२८२॥

एतेषामादेशात्समुच्चितः प्रवचनादयं ग्रन्थः । श्रीहीरविजयगणपतिशिशुपाठककीर्त्तिविजयेन ।। २८ ।।
संशोधितश्च सुविहितचूडामणिरामविजयबुधशिष्यैः । श्रीदेवविजयवाचकवृषभैः कोविदकुलोत्तंसैः ।। २९ ।।
किं चात्र लेखनशोधनविषये यत्नं चकार मच्छिष्यः । विनयविजयाभिधानः, प्रथमादर्शं च स लिलेख ।। ३० ।।
यद्यपि मया तु किञ्चिन्न लिखितमत्रास्ति नूतनं तदपि । कृतिभिः शोध्यं धर्मप्रणयादविचारितं यदिह ।। ३१ ।।
इयदागमोक्तयुक्तिप्रचयाद्युदुपार्जितं मया सुकृतम् । तेन ममास्तु विशिष्टा, निरन्तरं बोधिबीजाप्तिः ।। ३२ ।।
अस्मिल्लक्षविपक्षपक्षतिमिकग्रासाग्रहप्रस्फुरत्-सत्पक्षौघतिमिङ्गले कलजयश्रीमन्दिरे सुन्दरे ।
उद्यद्भूरिविचारचारुलहरीप्रव्यक्तयुक्त्यावली-मुक्ताः स्वच्छजले चिरं मणिगणैः क्रीडन्तु ते धीवराः ।। ३३ ।।
यावद्दिव्यवधूविलासरसिकः स्वर्भोगभङ्गीसुखं, जंभारातिरसौ भुनक्ति भगवानुद्भूतभाग्याद्भुतः
तावत्सर्गनिरर्गलान्तरतमःस्तोमप्रणाशक्षमं, शस्तं शास्त्रमिदं निरस्तदुरितं पृथ्वीतले नन्दतात् ।। ३४ ।।
यावद्व्योमतरङ्गिणीजलमिलत्कल्लोलमालालस-द्दिग्दन्ताबलकीर्णवर्ण्यसलिला सेकप्रणष्टश्रमम् ।
ज्योतिश्चक्रमनुक्रमेण नभसि भ्रामत्यजस्रं क्षितौ, तावन्नन्दतु शास्त्रमेतदनघं विद्वज्जनानन्दनम् ।। ३५ ।।
दर्शनहिमकरगगनग्रैवेयकसङ्ख्यवत्सरे[१६९०] जातः आश्विनसिति तुर्यायां, यत्नः सफलो गुरुमहिम्ना ।। ३६ ।।

।। इति श्रीमदकब्बरभूपालविशालचित्तालवालविवर्द्धितवृषरसालसालातिशालिशीलजगद्गुरुभट्टारकश्रीहीरविजयसूरीशिष्योपाध्याय-श्रीश्रीकीर्त्तिविजयगणिसमु च्चिते श्रीविचाररत्नाकरे संङ्कीर्णविचारसमुच्चयनाम्नीवेला समाप्ता ।।

।। इति श्रीविचाररत्नाकरः समाप्तः ।।

।।२८३।।

